प्रकाशक : मानदमन्त्री

चन्दुलाल जमनादास शाह
संचालक, श्रीलब्धिसूरीश्वर जैन ग्रन्थमाला
छाणी (वी बरोडा)

मुद्रक :
लक्ष्मीबाई नारायण चौधरी
निर्णयसागर प्रेस
२६-२८ कोलभाट स्ट्रीट,
मुंबई नं. २

*Shri Labdhisurishwar Jain Granthamala No 35*

# THE DVADASHARANAYACHAKRAM

OF

## SRI MALLAVADI KSHAMASRAMANA

WITH

## THE NYAYAGAMANUSARINI COMMENTARY

BY

SRI SIMHASURAGANI VADI KSHAMASRAMANA

## PART III

Edited with

Critical Introduction, Index & Vishamapadavivechana

BY

ACHARYA VIJAYA LABDHI SURI

PUBLISHED BY

CHANDULAL JAMNADAS SHAH

SECRETARY SHRI LABDHI SURISWAR JAIN GRANTHAMALA

CHHANI ( BARODA DIST. )

*FIRST EDITION 500 COPIES*

*A D 1957* ] PRICE 6 RUPEES [ *V S 2013*

# धन्यवाद अने आभार

●

जैनतर्कशास्त्रना अतिमहत्त्वना आ ग्रन्थरत्न श्री द्वादशारनयचक्रना प्रथम अने द्वितीय भागने वाचकोना करकमलमां सादर कर्या पछी, आजे आ तृतीय विभाग समर्पित करतां अत्यन्त आनन्द थाय छे. प्रथमना भागोनी जेम आ तृतीय भागने पण उंचा लेजर पेपरमां सुन्दर स्वच्छ अने शुद्ध मुद्रणपूर्वक तैयार करवामां आव्यो छे ग्रन्थमुद्रणमां वपराती कागळो विगेरे साधनोनी मूल्यवृद्धि, कल्पनामां पण न आवे तेवी उंची सपाटीए रोज-ब-रोज वधती जाय छे प्रथमना भागो करतां पण आ भागना मुद्रणमां आ कारणे घणो व्यय करवो पड्यो छे. आ भागना मुद्रणकार्य माटे जे उदारचित्त श्रुतभक्त सज्जनोए, श्रुतभक्तिना अमर आ महान अने पुनीत कार्यमां साहाय्य करी छे, तेमनां शुभनामो आ नीचे आपीने अमे तेमने आभारपूर्वक धन्यवाद आपीए छीए. साहाय्य आपवा माटे प्रेरणा आपनार पू. गुरुभक्त गुरुप्रेमी उपाध्यायजी श्रीमद् वसंतविजयजी गणिवरनो पण, अमे अनेकशः उपकार मानीए छीए.

## साहाय्यक सज्जनोनां शुभनामो आ प्रमाणे छे

१००१ श्री जैनश्वेताम्बर संघ

(ज्ञानद्रव्यनी उपजमांथी)

हा. शेठ आणंदजी मंगळजीनी जैन पेढी — इडर

१०१ इडरना श्राविकाओना उपाश्रयनी उपजमांथी

हा. शेठ आणंदजी मंगळजीनी जैन पेढी — इडर

२०० श्रीयुत् सोमचंदभाई पानाचंद — खंभात

[illegible] यथायोग्य श्रम कई सौनो परिश्रम सफल करे.

—प्रकाशक.

# प्राक्कथनम्

अयि नैकविद्याविशेषविनान्तरात्मा वाग्नैपुण्यावधीरितत्रिदशाचार्याः साधुमधुरगिरोऽवधारय धीधना सूरयः !

भवतां पुरतः सुनिर्मलमेधासम्पत्तिपरिजृम्भमाणमनीषिमनश्चमत्कारचातुरीसमेधितरूपकर्कशतर्कावग्रहकृताऽऽचार्य-श्रीमन्मल्लवादिक्षमाश्रमणपूज्यपादप्रतिमप्रतिभाप्रसूतद्वादशारविभवविप्यादिमहत्त्वकनयचक्रशास्त्रस्य श्रीसिंहसूरगणिविरचि-तव्याख्यापरिभूषितस्य पर्यायार्थिकनयप्रभेदान्तर्गतविधिनियमोभयारोभयनियमारात्मकः तृतीयो भागः समुपस्थाप्यते।

अस्मत्गुरुवरणसदर्शनपयोराशिसमुन्मथनसमद्भिलषितपीयूषरसास्वादपुरस्सरतदीयपरम्पराक्षमीकरणकारण जैनेन्द्रशासनमेरुमानस्तम्भमोपदेष्टाचार्यवर्योपपादितसाधनबाधकप्रमाणप्रचुरसमुल्लसितशास्त्र नयचक्रशास्त्रस्य विधिनियमोभयमये उभयनियमनये च वैशेषिकसौगतमतशिक्षणात्मके तत्तत्पूर्वपक्षसमुपपादनाय कटन्दीग्रन्थ प्रमाणसमुच्चयश्च प्राधान्यतया परिगृहीतौ, तत्र कटन्दीग्रन्थः प्रायेण प्रशस्तमतिनापि विस्मृतोऽधुना वैशेषिकदर्शन-वेदितृणामविदिताभिधानो दरीदृश्यते, न खलूदयनाचार्यादिवैशेषिकदर्शनप्रमाणकैरपि क्वचिदपि तद् ग्रन्थनाम निर्दिष्टम्, केवलमनर्घराघवनाटक एव तन्नाम रावणकर्तृकतया कविना रूपकीकृतमत्र एवास्माकं परिशोधनकर्मणि तन्मात्रप्युच्छोऽनौचिती सम्भाव्येत, प्रमाणसमुच्चयो नाम दिङ्नागीयः प्रबन्धोऽपि मुद्रितप्रत्यक्षमात्रपरिच्छेद पाठीमात्रयामेव सम्पूर्णो लिखित आस्त इति श्रूयते, ततः कारिकाणामुद्धरणप्रयासो मया मातानः, न हि ततोऽपि यावत्प्र्येन समुद्धृता भवन्ति कारिका इति प्रमाणीकर्तुं पार्यते, एकस्य पाठीपदस्य छायारूपेणानेकसंस्कृतपदस-म्भवात्, तत्रापि तर्क एवाग्रणीयः स्यात्, अतो वय केवलं टीकाप्रस्तावानुरोधेनैव यावच्छक्यं तावत् प्रतर्क्य निष्कासिताः कारिकात्रयः, तत्र मदीयपरिशोधमानुसारेण पर्यायार्थिकनयप्रभेदसमाप्यमाणयोर्मूलभूता परिगृही-तानि परवचनानि आगमानि चेत्थम्—

अनुमितमूले उपन्यस्तपरवचनान्यागमानि च यथा—

अगणिच्छ्रसिता अगणिसेविय अगणिपरिणामिता अगणिजीवसरीरेति वत्तव्वं सिया ति भ० श० ५ उ० २ सू० १५

अह्नायस्तात् सम्मतसि त्वयाऽभिधास्यसे कौ० उ० २ ११

नैरपेक्ष्ये कार्यद्रव्ये नियमत एव गुणान्तरमारभन्ते (                    )

वर्तमानसामीप्ये वर्तमानवद्वा ( पा० अ ३ पा० ३ सू० १३१ )

शब्दान्तरार्पणेऽपि हि स्वार्थे कुर्वती वृत्तिरभिधत्ते (                    )

आता भंते ! परमाणुपोग्गले णो आता, गोयमा ! सिया आता परमाणुपोग्गले, सिया णो आता, से केणट्ठेणं भंते ! एवं वुच्चइ सिया आता, सिया णो आता, गोयमा ! अप्पणो आदिट्ठे आता, परस्स आदिट्ठे णो आता ( भ श १२ उ० १० सू० १९–२४ )

भेदानां मध्यमायाश्च परस्पराश्रितत्वतुरम् ( वाक्य का० १ श्लो १४२ )

सव्वजीवाणंपि य णं अक्खरस्स अणंतभागो निच्चुग्घाडिओ ( नं० सू० ५१ )

अनेकार्था धातवः (                    )

आगमतो जाणए अणुवउत्ते दव्वसुतं ( अनु १२ सू  )

यदि मूर्तममूर्तस्य नामूर्तं याति मूर्तताम् । द्रव्य त्रिष्वपि कालेषु नात्मभावं जहाति हि ॥ (

द्व्येकयोर्द्विवचनैकवचने, बहुषु बहुवचनम्  ( पा  १–४–२१–२२ )

प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूतः तयो प्रत्ययार्थः प्रधानम्  ( महाभा  १–१–६७ )

प्रकृतिपर एव प्रत्यय प्रयोक्तव्य, प्रत्ययपरैव प्रकृतिः ( महाभा  १–१–२ )

आधारोऽधिकरणम् ( पा  १–४–४५ )

यस्तु प्रयुङ्क्ते कुशलो विशेषे शब्दान् यथावद्व्यवहारकाले ।

सोऽनन्तमाप्नोति जयं परत्र वाग्योगविद्दुष्यति चापशब्दैः ॥ ( महाभा  १–१ पस्पशा )

भिन्नाधारकभेदेन                    (                    )

वाग्विग्मूरस्मि                    (                    )

अर्थप्रवृत्तितत्त्वानां शब्दा एव निबन्धनम् । तत्त्वावबोधः शब्दानां नास्ति व्याकरणादृते ॥ ( वाक्य० का  १ श्लो  ११ )

सोऽयमित्यभिसम्बन्धाद्रूपमेकीकृतं यदा । शब्दस्यार्थेन तं शब्दमभिजल्पं प्रचक्षते ॥ ( वाक्य कां  श्लो  ११ )

तयोरपृथगात्मत्वे रूढेरव्यभिचारिणि । किंचिदेव क्वचिद्रूपं प्राधान्येनावतिष्ठते ॥

लोकेऽर्थरूपतां शब्दः प्रतिपन्नः प्रवर्तते । शास्त्रे तूभयरूपत्वं प्रविभक्तं विवक्षया ॥ ( वाक्य  कां श्लो  १११–११२ )

अशक्तेः  सर्वशक्तेर्वा शब्दैरेव  प्रकल्पिता  ।  एकस्यार्थस्य नियता क्रियादिपरिकल्पना ॥ ( वाक्य कां  २ श्लो  १११ )

वृद्धिरादैच् ( पा० १–१–१ )

यथार्थाभिधानश्च शब्दः ( तत्त्वा  भा  प्र  १ सू० १५ )

यत्र अर्थो वाचं व्यभिचरति नाभिधानं तत् ( तत्त्वार्थभाष्यटी० )

नामं ठवणा दविए त्ति एस दव्वट्ठियस्स निक्खेवो । भावो उ  पज्जवट्ठियस्स  परूवणा  एस परमत्थो ( सन्म  का० १–६ )

असत्योपाधि यत्सत्यं तद्वा शब्दनिबन्धनम् ( वाक्य० कां २ श्लो० १२९ )

न जातिशब्दो भेदानामानन्त्याद्व्यभिचारतः । वाचको नियमार्थोक्तेर्जातिमद्वदपोहवान् (प्रमा० स० )

स्वसम्बन्धमनिर्देश्यं ( प्रमा० स० श्लो० ५ )

भेदो भेदान्तरार्थं तु विरोधित्वादपोहते ( प्रमा० स० )

नार्थशब्दविशेषस्य वाच्यवाचकतेष्यते । तस्य पूर्वमदृष्टत्वात् सामान्यमुपदेक्ष्यते ( प्रमा० स )

अर्थशब्दविशेषस्य वाच्यवाचकतेष्यते । तस्य पूर्वमदृष्टत्वात्, सामान्यात्तूपसर्जनात् ( न्यायचक्र )

विभज्यमाना प्रधानेषु न सर्वे भेदहेतवः । विशेषशब्दैरुच्यन्ते व्यावृत्तार्थाभिधायिनः ॥ ( वाक्य कां० ३ श्लो० )

सहत्वे नास्यतन्त्रत्वाद्भेदाद्व्यावृत्तेरबाधिन । ( प्रमा० स० )

मेघशब्दो यथाऽऽधेयं मत्वैवैव व्यवस्थितः । तत्वेनाह तथापोहशब्दो द्रव्येषु वर्तते ॥ ( भर्तृहरिकारिकापरिवर्तनम् )

नापोहशब्दो भेदानामानन्त्याद्व्यभिचारतः । वाचको नियमार्थोक्तेर्जातिमद्वदपोहवान् ॥ ( प्रमा० स० )

न जातिशब्दो भेदानामानन्त्याद्व्यभिचारतः । वाचको नियमार्थोक्तेः सत्तावर्थोऽप्यतो न सः ( परिशुद्ध पाठः ) अथवा ( )

तन्मात्राकाङ्क्षणाद्भेदः स्वसामान्येन नोज्झितः । नोपात्तः संशयोत्पत्तेः साम्ये चैकार्थता तयोः (प्रमा०स )

भेदो भेदान्तरार्थं तु विरोधित्वादपोहते । सामान्यान्तरभेदार्थाः स्वसामान्यविरोधिनः ( प्रमा० स० )

स्वार्थाभिधानशक्तिश्च भेदो भेदमपोहते । सामान्यार्थविशेषार्थविधिमभिमतं श्रुते ॥ ( न्यायचक्र )

अदृष्टेरन्यशब्दार्थे स्वार्थस्यांशेऽपि दर्शनात् । श्रुते सम्बन्धसौकर्यं न चास्ति व्यभिचारिता ॥ (प्रमा० स०)

बहुत्वेऽप्यभिधेयस्य न शब्दात् सर्वथा गतिः । स्वसम्बन्धानुरूप्येण व्यवच्छेदार्थकार्यसौ ॥

अनेकधर्मा शब्दोऽपि ( प्रमा० स० )

अन्यापोहार्थनैर्मल्यात्स्वार्थस्यांशेऽप्यदर्शनात् । श्रुतेः सम्बन्धसौकर्यात्तथापि व्यभिचारिता ॥ (न्यायचक्र)

लिङ्गानुरूपिणः स्वार्था ( न्यायचक्र )

नाप्रमाणान्तरं शाब्दमनुमानात्तथाहि तत् । कृतकत्वादिवत् स्वार्थमन्यापोहेन भाषयेत् ( न्यायचक्र )

विमर्श ( )

सम्बन्धो यद्यपि द्विष्ठः सहभाव्यङ्गलिङ्गिनोः । आधाराधेयवद्वृत्तिः तस्य संयोगिवन्न तु ॥ ( प्रमा० स० )

लिङ्गे लिङ्गी भवत्येव लिङ्गिन्येवेतरत्पुनः । नियमस्य विपर्यासेऽसम्बन्धो लिङ्गलिङ्गिनोः ॥ ( प्रमा स० )

यत्र लिङ्गमपि व्यापि लिङ्गिन्यपि न तत्तथा । व्याप्तित्वात्तु तयस्य गमकं गोविषाणवत् ॥ (प्रमा० स०)

प्रतिबन्धप्रचारेण यस्माद्व्याप्तिरपेक्ष्यते । लिङ्गे लिङ्गिनि च व्याप्तिस्तस्मात् सम्यक्कारणम् ॥ (प्रमा० स०)

नास्तित्व कृतकत्वेन (प्रमा० स० )

विषाणित्वेन गोव्याप्तिः (प्रमा० स० )

तत्तत्सम्बन्धनादेव साध्यसाधनधर्मयोः । मिथः संयोगिवद्वृत्तिर्नाधाराधेययोरिव ॥ (प्रमाकर्तृ)

एकस्मात् प्रयत्नात् ( )

कश्चिदन्यो वस्तुविशिष्टस्य प्रयत्न .. अभिधिग्रस्साभेदस्तित्वं प्रतिपद्यते । ( )

न धर्मो धर्मिणा साध्य सिद्धत्वात्तेन धर्म्यपि । धर्मेण धर्म साध्य स्यात् साध्यत्वात्तद्धर्मिणस्तथा ॥ ( )

साध्यतापेक्षया चात्र धर्मधर्मित्वता न गुणगुणित्वेनेत्यवोच ( )

तत्तत्सम्बन्धानुबन्धेन हि कृत्युत्पत्तिरुद्भवनम् ( )

यत्र लिङ्गमपि व्यापि लिङ्गिन्यपि तथा । व्यापित्वादुभयोर्लिङ्गलिङ्गिता गोविषाणवत् ॥ (प्रमाहृत)

विधेयार्थप्रचारेण यस्माद्व्याप्तिरपेक्ष्यते । लिङ्गे लिङ्गिनि च व्याप्तिः तस्मात् सम्यक् कारणम् ॥ (प्रमाहृत)

साध्ये नानुगमो हेतोः साध्याभावे च नास्तिता । (प्रमा० स० )

मूलग्रन्थसमुद्धरणकरणपरमोपयिकसर्वार्मीकृतनयचक्रादिसिद्धतयश्चोदाहरिनिदिशकविधानुरूपादसिद्धसूत्र-निराकृतिमात्रमनस्तन्त्र्यन्यायागमानुसारिणीभ्यास्मयोर्सद्भूतप्रमाणवचनानि यथावसरं समुद्धरिष्यामः समुद्धरण कर्मण्यस्मिन्नपि निर्दिष्टप्रतिस्थितिरेकेण बहव प्रत्योऽपिअनवीतस्ता अपि सर्वासु साक्षाद्धृदिगमेतया प्रतिविशेषा-वस्मानमत नाद्धतम्,

परिश्रमबाहुल्यसम्पादनीयेऽस्मिन् सम्यक्परिनिष्ठितमतीनामपि पाषाणत्वेन मनोविषयं कर्तुमशक्यत्वात्स संशो-धनादिविधेये तत्त्वतोऽधनाद् प्रमादादिजन्यदोषावश्यकत्वादपि स्वल्पं मनोऽनुगुणैकगुणगणिन उदाराशया विद्वद्वरेण्याः प्रधानतात्पर्येण विभाव्य स्वीकृत्य च विचारयन्त्विति समाशास्महे

विजयलब्धिसूरिणा

न्यायागमानुसारिणीसमलङ्कृतस्य

## द्वादशारनयचक्रस्य विस्तरतो विषयक्रमः

## [ तृतीयो विभागः ]

–अथोभयनियमाः–

इति तृतीयभागस्यानुक्रमणिका समाप्ता

# श्रीलब्धिसूरीश्वरजैन ग्रन्थमाला

## प्रकाशित–ग्रन्थ–सूची

| | |
|---|---|
| १ जैनमतविधिसङ्ग्रह | ०–८–० |
| २ हीरप्रश्नोत्तराणि | ० १२ ० |
| श्रीपालचरित्रम् | भेट |
| ४ तत्त्वन्यायविभाकरः ( मूल ) | –८–० |
| ५ पञ्चसूत्रम् | भेट |
| ६ हरिभद्रकथानकम् | भेट |
| ७ वैराग्यरसमञ्जरी | भेट |
| ८ चैत्यवन्दनचतुर्विंशतिः | –२–० |
| ९ कविकुलकिरीट ( १ भाग ) | –८–० |
| १० मूर्तिमंडन ( गुजराती ) | ०–४–० |
| ११ मूर्तिमंडन ( हिन्दी ) | भेट |
| १२ आरम्भसिद्धिः ( सटीका ) | २–८–० |
| १३ तत्त्वन्यायविभाकरः ( सटीकः ) | ५– – |
| १४ दीपालिकाकल्पः ( विनयचन्द्रसूरि ) | भेट |
| १५ सम्यक्त्वसोपानम् | ५–०–० |
| १६ सूत्रार्थमुक्तावली | ५–०–० |
| १७ सकलार्हत्स्तोत्रम् ( सटीकम् ) | भेट |
| १८ आत्मानन्दवचनावली | ०–४–० |
| १९ चम्पनारी | भेट |
| २० द्वादशारनयचक्रम् ( १ भाग ) | १–०–० |
| २१ भगिनी शिक्षा | २–०–० |
| २२ सूक्तवचनावली | ४–०–० |
| २३ श्राद्धविधिप्रकरण ( गुजराती ) | ५–०–० |
| २४ श्रेयांसनाथचरित्रम् | भेट |
| २५ जैनमतका स्वरूप | भेट |
| २६ द्वादशारनयचक्रम् ( २ भाग ) | १–०–० |
| २७ आवश्यकमुक्तावली | भेट |
| २८ भगवतीजी सूत्रनां व्याख्यानो ( १ भाग) | ३–०–० |
| २९ कविकुलकिरीट ( २ भाग ) | २–०–० |
| ३० दीपालीका कल्पः ( जिनसुंदरसूरि ) | भेट |
| ३१ मलयसुंदरीचरित्रम् | भेट |
| ३२ जम्बूस्वामीनां आलापको | भेट |
| ३३ सिद्धहेम–मध्यमवृत्तिः ( १ भाग) | ६–०–० |
| ३४ शान्तिश्लोकः ( सटीक ) | भेट |
| ३५ भगवतीजी सूत्रनां व्याख्यानो ( २ भाग ) | ३–०–० |
| ३६ सूक्तितरंगिणी ( १ भाग) | ४–०–० |
| ३७ द्वादशारनयचक्रम् ( ३ भाग ) | ६–०–० |
| ३८ मुनिसुव्रतस्वामीचरित्रम् | ५–०–० |

मुद्र्यमाण–ग्रन्थाः ।

ललितविस्तरा ( गुजराती अनुवाद )

# सप्तमो विधिनियमोभयम्

अथ विधिनियमविधिनियमनयः

इदानीं पर्यायनयप्रथमभेदविवक्षयिषयाऽनन्तरनिर्दिष्टवैशेषिकोभयविधिनिराचिकीर्षया चोत्तरः, समनन्तरानुलोमत्वात् पूर्वविरुद्ध[त्व]प्रसिद्धनिरदुष्टत्वाच्च नयानामसत्कार्यवादमेव रूपयितुमाह—

यद्यसत् कार्यं तर्हि न तदुत्पद्येत, असन्निहितभवितृकत्वात् खपुष्पवत्, खपुष्पमपि 5
चोत्पद्येत, असन्निहितभवितृकत्वात् कार्यवत्।

यद्यसदित्यादि, आस्तां तावदस्मन्मत पूर्वनयमतेनैव त्वद्दर्शनमनुपपन्नमिति ब्रूमः, द्रव्यार्थिकनयानां सन्निहितभवितृकमवनाभ्युपगमात्, नासत्कार्यमुत्पत्तुमर्हति, असन्निहितभवितृकत्वात् खपुष्पवत्, खपुष्पमपि चोत्पद्येत, असन्निहितभवितृकत्वात् कार्यवत्, षट्पदार्थसंसर्गवादस्य सत्तासमवायत्वेन प्रवृत्तत्वात् सत्तासमवायोन्मूलनात् तस्यैवोन्मूलनमित्यभिप्रायेणायं सत्तासमवायविचारप्रस्ताव इति। 10

खपुष्पं सत्तस्याश्रयो नास्तीति चेत्, इतरत्रापि तुल्यत्वात् कार्यस्य मृदोऽसत्त्वात् त्वन्मते पिण्डादेः कार्यसमत्वात्, असतः सत्तासमवायित्वात्।

---

एवं द्रव्यास्तिकनयाविरुद्धत्वात् पर्यायास्तिकनयाविरुद्धमपि प्रतिपादयन्नीदे—इदानीमिति द्रव्यार्थिकनयनिरूपणोत्तरकालमित्यर्थः 'भावी तु वमनि विरा' इति चेच पर्यायनयेषु विरतपेषु प्रथमविराधः अर्थनयमविशेष नयो निरूप्यते इति द्रव्यार्थिकनयनिरूपणेन सहास्यानन्तरत्वमपि प्रदर्शितं तच्च द्रव्यार्थिकान्तिमभेदेन पर्यायार्थिकप्रथमारम्भ इत्यादि सूच्यते—अनन्तरेति नय 15
आरम्भत इति शेषः उत्तरमिति वा पाठः नयमिति शेषः तत्राऽऽद्येऽनन्तरसम्बन्धः पूर्वोपवर्णितो नयो वैशेषिकस्य सोऽपि षट्पदार्थसंसर्गवादी सत्तासम्बन्धात् द्रव्यादि सद्भवति परत सत्ता तु स्वत एव सती एवमसदपि पश्चात् सद्भवतीति वैशेषिकमतमित्यभिमतं पूर्वं विचारत उपादितं तद्धुना निराक्रियते असदुत्पत्तं सत् पश्चात् सत्तासम्बन्धात् सद्भवतीत्यभ्युपगमो न युक्तोऽसन्निहितभवितृकत्वात् खपुष्पादिवत् सतोऽसत सदसतो वा पश्चात्तानी वा सताऽसता सदसता वा सम्बन्धासम्भवात् सत्तादीना सदसत्त्वाभावाच्चोत्पत्तिर्वासम्भवात्पुष्पे यथातिरूपमितरेतराभावलक्षणं यस्मिन्नपि विधिनियमविधिनियमनयस्य मतमत एतस्य पूर्वेण 20
विरोधीति भाव । नयाना स्वरूपं दर्शयति—समनन्तरेति द्वादशानां नयाना क्रमेरिताना पूर्वपूर्वनयापेक्षयोत्तरोत्तरस्य सूक्ष्मविषयत्वात् समनन्तरानुलोमत्वम्, पूर्वपूर्वविरोधत्वात् पूर्वविरुद्धत्वं तत्राप्यनेकान्तवादस्यैव निरवद्येन सर्वथा निरवद्यत्वप्रमाणाभावात् निवृत्तिनिरदुष्टत्वमिति भाव । द्रव्यार्थिकनयेषु कार्यकारणयोरनन्यत्वात् यदपि कार्यं कारणे द्रव्ये सदा द्रव्यात्मना सन्निहितमेव वैशेषिकस्तु कार्यकारणयोरन्यत्वं नेच्छति अत एव कारणे कार्यमसदेव तेनापि इच्छतीति यदपि न सन्निहितमतो नोत्पद्येतेत्याशयेनाह—यद्यसदिति । तत्—कार्यं तदेव साध्यधर्मि । सामान्यत पर्यायार्थिकनयेष्वसत्कार्यवादस्यैवेष्टत्वादाह— 25
आस्तां तावदिति । स्वयुक्ततो हेतुमाह—द्रव्यार्थिकेति यदि द्रव्ये कार्यमपि यदपि सन्निहितं तदैव तस्य भवनं व्यभिचारिकमतो युज्यत इति वैशेषिकप्रतिरिक्तद्रव्यार्थिकनयवादमनुसृत्य इति भाव । विपक्षेऽनिष्टप्रसञ्जनमाह—खपुष्पमपि चेति । असत्कार्यवादस्यैवासौ निराकरणे बीजमाह—षट्पदार्थेति द्रव्यगुणकर्मसामान्यविशेषसमवायपदार्थेषु येषा द्रव्यगुणकर्मणां साधर्म्यवैधर्म्यसमन्वय तत्त्वज्ञाने वाद षट्पदार्थसंसर्गवाद तस्य साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानादि निःश्रेयसाभ्युपगमात् तत्र साधर्म्यं सत्तादि, तस्यासमर्थोन्मूलने तदुन्मूलनं भवेदतीति सत्तासम्बन्धोन्मूलनमेवासौ विवेचयितुमित्याह । विपक्षेऽनिष्टप्रसङ्गं 30
विचारयितुं पक्षव—खपुष्पमिति सत्तासमवायात् सतासम्बन्धाच्च कार्यं सद्भवति खपुष्पस्य नास्त्याश्रय उद्भूतः कश्चित्

---

१ सि °मन्नात्। २ सि. क. 'वाक्यभेदो'।

(खपुष्पमिति) खपुष्पं सत्त्वस्याश्रयो नास्तीति चेत्–स्वात्मवत् कारणद्रव्येष्वाश्रयभूतेषु सत्स्वेव सत्तासमवायात् कार्यं प्रागसत् पश्चादुत्पद्यते, खपुष्पं तु निराश्रयत्वान्नोत्पद्यते इत्यर्थवैधर्म्याद्विशेषश्च न, इतरत्रापि तुल्यत्वात्–कार्यमपि हि निराश्रयमसत्त्वादेव, खपुष्पवत्, अतो न कश्चित् कार्यखपुष्पयोर्विशेषः किं कारणम्? यस्मात् कार्यस्य भूतोऽसत्त्वात्–प्रागभावस्य निष्पत्तेरस्यैवैविषयो न सत्त्वम्, तन्मते निष्पत्तेः
5 कार्यसमत्वात् तस्मादृतादि सत्त्वस्याश्रयो नास्त्येव खपुष्पादिरिवेत्यस्यैव स्वात्मवदेवोत्पत्स्यमानस्य निष्प-
त्तेः कार्यस्य निःसत्तासमवायस्यासतः सत्तासमवायित्वात्–सत्तासमवायित्वाभ्युपगमात् 'कारण
भावाभावमात्रात्मनिष्पत्तिः सत्ता च' इति सिद्धान्तात्, तस्यां प्रागवस्थायां स्वरूपसतः कार्यस्याश्रयत्वाभावात्
खपुष्प[तुल्यत्व]म् स्वरूपमात्रप्रध्वंसाभावमपि इत्यतो! परमतभिक्षुरत्वं भवतामिति सत्तायाः समवायाभावे
न कुतः कार्योत्पत्तिरिति ।

10 अथाश्रयिसमवायात्तेऽपि सत् कार्यं स्वेनैवास्तित्वेनाश्रयो भवति, एवं तर्हि किं तद्-
तिरिक्तसत्तासम्बन्धकल्पनया? तदनभ्युपगमे कार्यखपुष्पयोराश्रयकृतविशेषाभावो वा ।

अथाश्रयीत्यादि अथैव तस्मात् खपुष्पतुल्यत्वापत्तिदोषभयात् सत्ताया आश्रयिण्या[ः] समवा-
यात्तेऽपि सत्कार्यं तदाश्रयभूतं स्वेनैवास्तित्वेन–स्वभावसत्तयैवोत्पद्यमानाश्रयो भवति, कदाचिदप्यनुत्पत्स्य-
मानस्य खपुष्पस्य वैधर्म्येणेतीष्यते ततः एवं तर्हीत्यादि, इत्यत एवैतद्वैसामिः स्वेनैव महिम्ना तत् सदिति
15 ने तु तथा तया वैधर्म्यसामिरिष्यमाणे कारणिषाणाद्यसद्विलक्षणस्य तस्य कार्यस्य सत एव सतः किं
तदतिरिक्तसत्तासम्बन्धकल्पनया प्रयोजनम्? न किञ्चित्तेन कल्पितेनार्थः सत्तासम्बन्धानर्थक्यमतः
सर्वद्रव्यगुणकर्मादिकारणसमवायिकार्यसंसर्गवादो निवर्तते तस्मादेव तदनिष्टानभ्युपगमे यो मया प्रागुक्त

---

तस्मात् खपुष्पवत् कार्यस्य तु स्वाश्रयाभावो परिस्थानादि स्वरूपेणासतीति खपुष्पवत् इति भाव । तमेवाभिप्रायं वर्णयति-
स्वात्मवदिति । खपुष्पं सत्त्वस्याश्रयो न भवति स्वात्मवत्स्वाभावाभिकत्वात् स्वात्मवत्स्वासत्त्वं हेतुं स्फुटयति–कारणेति ।
20 स्वात्मवत्स्वाभावात् कार्येऽपि निराश्रयस्य परिस्थानेऽपि कार्यस्यैव स्वरूपाभिधानात् सत्ताया आश्रयो न स्वाभिधानत्वेनाद्
यद्यस्येति । निष्पत्तेः कार्यसमत्वात्–कार्यसमत्वात्, तदेव व्यनक्ति–स्वात्मवदेवेति स्वतः सत्तासमवायित्वे तस्यैव कार्यं
स्यादनक्ति–उत्पद्यमिति । तथाच्यत्वात् पूर्वमाश्रयत्वेनाभिमतस्य कार्यस्वरूपस्य स्वात्मवत् सत्ताया स्वरूपेणाद्–
तस्यां इति प्रागवस्थायां खपुष्पवत्स्वाभ्यं साधिति खपुष्पतुल्यत्वापत्तिरेव इति भाव । एव सर्वमप्यसत खपुष्पतुल्य-
त्वेऽसत्या स्वत्वमनुपमे एतावताऽपि स्वपरिमाणमित्यत्र वैशेषिकानुसरणेन तस्य स्वमिति ते परमतभिक्षुरत्वमेवेति परिवदति-
25 भवतो इति । यदि तु कार्यं सत्तासम्बन्धार्हमपि स्वतन्त्र सदिष्यते तत सत्तासम्बन्धाभ्युपगमो व्यर्थं स्यादनेनाद्–अथाश्र
यीति । खपुष्पं तु न कदाचिदप्युत्पत्स्यते इति तत्र तदभावात् कार्यखपुष्पयोर्वैधर्म्यमित्याशयेनाह–कदाचिदपीति । कार्यस्य
स्वरूपेण सत्त्वाभ्युपगमे सत्तासम्बन्धवैयर्थ्यात् षट्पदार्थव्यवस्थाया असम्भवात्त्वा तस्यानेनाऽऽश्रयाश्रयिभावव्यवस्था निवर्तेत स्व-
रूपेण प्रमाणतो स्वत्वेति । सत्तासम्बन्धाभ्युपगमे च प्रागुक्तः कार्यखपुष्पयोरविशेष इति दर्शयति–तदनिष्टानभ्युपगम इति ।

---

१ सि० क० °निष्पत्ते° । २ क० सि० ख० °निष्पत्तेरेव स्वात्म । ३ निष्पत्तेः । ३ सि० न तु तथा वैध० ।
ख० क० × × ।

कार्यखपुष्पयोरुभयकृतविशेषाभावो वा तत्र तुल्ये तयोरसत्त्वे कार्यमेवोत्पद्यते खपुष्पमेव नोत्पद्यत इति को विशेषहेतुः ? ।

तदुपपत्तिः –

यद्यसत् कस्मात् खपुष्पमेव नोत्पद्यते घटादि कस्मादुत्पद्यत इति । अथोच्येत कारणवदकारणविशेषादिति, यद्यकारणं नोत्पद्यते तत्पुरुषे वाच्ये, अथ बहुव्रीहि 5 समाश्रयेण तन्नोत्पद्यते तस्याविद्यमानकारणत्वात् खपुष्पवद्घटवद्वा ।

यद्यसदित्यादि गतार्थं यावद्घटादि कस्मादुत्पद्यत इति, इत्यतः कार्यखपुष्पयोरविशेषदोषोपलब्धवान् । अथान्यथैतद्दोषपरिहारार्थमुच्येत–कारणवदकारणविशेषात्–यथा सत्त्व सकारणं घटादि खपुष्पमकारणमित्यस्ति विशेषः, कारणैः समवाय्यसमवायिभिर्घटादि सम्बध्यते, न तु खपुष्पादीति, स एव स्वाभिप्राय विवृणोति–यद्यकारणं नोत्पद्यते तत्पुरुषे[1] वाच्य इति–न भवति कारणमित्यकारणमिति 10 तत्पुरुषसमासग्रहेविग्रहः ततः कार्यं नोत्पद्यत एव कारणमेवोत्पद्यते तस्यैव विधिविध्यादिमात्म्यनयदर्शनात् कार्यत्वोत्पादात् स एव कारणवादः परिगृहीतः स्यात्, स च मया नेष्टः, तस्मात्तत्पुरुषे[ण]ैव विचारः कार्यः, अथ यस्य न कारणं तदकारणमिति बहुव्रीहिसमाश्रयेण तन्नोत्पद्यते कार्यम् तस्य बहुव्रीहिवक्तव्यन- [ा]यमविद्यमानकारणत्वात् खपुष्पवत् घटवदिति वैधर्म्यं यथा घट उत्पद्यते न तथेति ततः किं ? ततोऽ- नुत्पन्नत्वात् तदनाश्रयः सत्तायाः सत्तानाश्रयत्वात् सम्बन्धाभावाच्च न तत् कार्यमिति । 15

अत्रोच्यते –

एवं तर्हि सर्वासत्त्वप्रसङ्गः परमाण्वादयोऽकारणत्वान्नोत्पद्यन्ते, अनुत्पन्नत्वादनाश्रयाः

अविशेषमेव व्याचष्टे यद्यसदिति । अन्यदपि विशेषः कार्यखपुष्पयोरसत्त्वतुल्यत्वेऽपि कारणवत् कार्यं खपुष्पमकारणमितीति शङ्कते–अथोच्येतेति । व्याचष्टे–यदीति । अन्यथा–अन्येन प्रकारेणोच्यत इति भाव यस्य कारणं विद्यते घटादेस्तस्मात् तत्कार्यं घटादि कारणवत् तदेवोत्पद्यते यत्तु कारणयुक्ततामतिक्रान्तं खपुष्पादि तन्नोत्पद्यत इत्यस्याभिप्रायः–यथा सत्त्व 20 मिति । अकारणं तन्नोत्पद्यत इति वाक्यं स्वाभिप्रायप्रकाशनाय समासविभागेन व्याचष्टे–यद्यकारणमिति न कारणमकारणम् 'नञ्' (पा २-२-६) इति सूत्रेण तत्पुरुषसमास पर्युदासार्थक न तु प्रसज्यप्रतिषेधार्थक तदर्थोऽन्यपदार्थमात्रमपादयति एतदर्थ- प्रत्ययनेन न भवति कारणमिति भवतिरध्याहृतव्यस्तमुच्यम्, कारणमित्यभिमतं तथा च यत् कारणात्मक तन्नोत्पद्यत इति वाक्यार्थः कार्यं तु उत्पद्यत इति भावार्थः स्यात् तथा च विधिविध्यादुक्त कारणवाद एवास्माकमनभिमतः प्रसज्येत इति न तत्पुरुषसमास समाश्रयणीय इति भाव यथा नेष्ट इति मूले च न वर्तमाने 'लक्ष्य च वर्तमाने' (पा १-३-६७) इति षष्ठीप्रयोगात् न विद्यते कारणं 25 यस्य तदकारणं खपुष्पादि नोत्पद्यते घटादिकार्यं तु नाकारणमपि तु कारणवत्, खपुष्पवत् एवेति कार्यखपुष्पयोर्विशेष सम्भवती- त्याशयेनाह–अथ यस्येति । तन्नोत्पद्यत कार्यमिति अकारणं नोत्पद्यते–न उत्पत्त्यर्हम्–न कार्यमिति भाव अकारणं न कार्यम् अविद्यमानकारणत्वात् यदविद्यमानकारणं तन्नोत्पद्यते न कार्यम्, यथा खपुष्पम्, नोत्पद्यते तद्विद्यमानकारणं कारणवत्, अत एव तयोरविशेष इति भावार्थ ततश्च किं इत्याशङ्कयाह–ततोऽनुत्पन्नत्वादिति एवमकारणस्यानुत्पन्नत्वात् तत् सत्ताया भाव उत्पन्नस्यैव सत्तासम्बन्धात् ततश्च सत्तासम्बन्धो नास्ति सत्तायोगस्यैव सत्तासम्बन्धात्, अतो न तत् कार्यमिति 30 भाव । यदेवं बहुव्रीहिसमाश्रयणेन कार्यखपुष्पयोर्विशेष उच्यते सोऽपि न सम्भवतीत्याशयेन समाधत्ते एवं तर्हीति, एवं वस्तु–अस्तु प्रसज्येत, सर्वस्तुप्रसक्ततापत्तिरिति भाव । तत्स्पष्टयन्नाह–परमाण्वादय इति । अविद्यमानकारणं

1 सि. वाच्यमेव । 2 सि क. सर्वासिभि । 3 सि क तत् पुरुषो । 4 सि. भावत् ।

सत्तायाः, ततश्च समवायाभावात् खपुष्पवत् कारणानामभावात् कार्यं क्व समवैतु? तस्मात् कार्यसमवायिनां खपुष्पाच्च कश्चिद्विशेष इति सर्वशून्यतेति सर्वविरोधाः ।

एवं तर्हि सर्वासत्त्वप्रसङ्ग इत्यादि यावत् सर्वशून्यतेति सर्वविरोधा इति—परमाणवोऽप्य एकत्वाद्विषाणादीनि च मोक्षपक्षे अनुत्पन्नत्वाभावः सत्तायाः, तदनाभावत्[त्]सत्तासमवायाभावः शेषो द्रव्यत्वे सत्त्वसमवाय इह इति वक्ष्यमाणं दर्शयति—ततश्च समवायाभावात् खपुष्पवत् कारणानां—परमाण्वादीनामभावः, तदभावात् कार्यमकारणत्वात् अनाधारं क्व समवैतु? तस्मात् कार्यासमवायित्वात् खपुष्पाच्चास्य न कश्चिद्विशेषः, अतः मातुलाविशेषदोषप्रसङ्गः कार्यसमवायिभिः परमाणुभिः सहितस्य कार्यस्येदानीं प्रापितत्वमेव, कार्यं समवैतामां रूपादिघटादिद्रव्यादीनाम् कार्यं समवायिन्यप्रवेशि विभक्तात्वयात्, ततः किमिति चेत् उच्यते इति सर्वशून्यतेति—सर्वभावा न सन्तीति तुल्यः परमशून्यता-विता भवता प्रतिज्ञातस्य विनाभनादर्शनात् इति सर्वविरोधाः—इत्थं स्ववचनाभ्युपगमप्रत्यक्षानुमानस्वरि विरोधाः सर्वासत्त्ववादिनः, प्रमाणाभावात् कारणाकारणकार्याकार्यविरोधाविरोधसमवायभेदसूत्रार्थं सत्ताविशेषसूत्रस्य च सत्तासमवायप्रामाण्याभावात् किमवशिष्टं स्यात्कारणस्य तत्त्वानाञ्च प्रयोजनस्य वैशेषिकादेयस्य, कार्यकारणयोश्च खपुष्पाविशेषादिति ।

---

ततोऽन्यत्र इति उभयसमवायसमवायाभावि इति च भवताऽभ्युपगतम्, तथा च तन्मतेन [illegible] परमाणूनां [illegible] सत्ताभावः [illegible] खपुष्पवत् [illegible] न समवायेन समवैतात्? तस्य सर्वसत्त्वभाव एवेति [illegible]—परमाणवोऽकारणत्वादिति । [illegible] सत्ताभाव इति [illegible]—तथा इति । [illegible] कार्यं [illegible] खपुष्पाविशेषात् तस्मादिति । परमाणुभिः [illegible] कार्यसमवायिभिरिति । ननु [illegible] समवायिनः [illegible] अभ्युपेत्य [illegible], न [illegible]—कार्यं समवैतामामिति कार्यं [illegible] समवायसम्बन्धेन [illegible] कार्यसमवायिन इति [illegible] प्रापित एवेति भावः । सर्वासत्त्वप्रसङ्ग इति [illegible] पुनरपि [illegible]—इतिदा इत्येतेति [illegible] । [illegible] न तथाऽभ्युपगन्तुं [illegible]—इत्यमिति । कारणाकारणेति 'द्रव्यगुणकर्मणां द्रव्यं कारणं सामान्यम्' (वै. अ. १ आ. १ सू. १) 'संयोगविभागानां कर्माणि' (वै. अ. १ आ. १ सू. १) 'द्रव्याणि द्रव्यं कर्म सामान्यम्' (वै. अ. १ आ. १ सू. ११) 'गुणवैधर्म्यान्न कर्मणां कर्म' (वै. अ. १ आ. १ सू. १४) 'न द्रव्यं कार्यं कारणञ्च बधति' उभयथा गुणः 'कार्यविरोधि कर्म' [illegible] 'द्रव्याभ्युपगमात् संयोगविभागेष्वनपेक्षकारणम्' इति गुणलक्षणम् 'एकद्रव्यमगुणं संयोगविभागेष्वनपेक्षकारणमिति कर्मलक्षणम्' (वै. अ. १ आ. १ सू. ११–१७) 'समवायि द्रव्यवत् कार्यं कारणं सामान्यविशेषवदिति द्रव्यगुणकर्मणामविशेषः' (वै. अ. १ आ. १ सू. ) इत्यादिसूत्रार्थ [illegible] उपलक्षणसूत्रेण [illegible] [illegible] सामान्य [illegible] तत्त्वादेः [illegible] विशेषलक्षणस्य वा प्रयोजनस्य वैशेषिकस्य कार्यकारणयोश्च खपुष्पवदविशेषादिति भावः ।

---

१ सि क. कारणत्व ए । २ क. खपुष्पवत् । ३ सि ए क. ड तस्मात्तु । ४ सि क. कार्यं । ५ सि क. ततामांव । ६ सि क मातुलाविशु ।

इत्थं प्रागसतः सकारणस्य कार्यस्य खपुष्पाविशेषो मा भूदिति–

अथोच्येत नित्योत्पन्नत्वात् कार्यद्रव्यगुणकर्मणामेव सत्तासमवायात्मत्वमिति, एवं तर्हि कार्यद्रव्यगुणकर्माण्यपि सत्तास्वरूपत्वादनुपनिपातिस्वरूपस्यात्मलाभाभावात् केनचित्सम्बन्धेऽसति स्वात्मस्वरूपं स्वात्मन्यवधति, तत्पदार्थत्ववदिति हेतुफलसंबन्धित्वाभावः स्यादिति सत्तादिसम्बन्धात् सन्ति द्रव्यादीनीत्ययुक्तम् ।

अथोच्येत नित्योत्पन्नत्वादित्यादि, स्वसद्भावेनैव सन्ति पृथिव्यादिचतुर्विधपरमाण्वाकाशकालदिगात्ममनांसि द्रव्याणि सत्तासमवायी गुणश्च विभुपरिमण्डलादयः, किन्तु कार्यद्रव्यगुणकर्मणामेव सत्तासमवायात्मत्वमिति, अत्रोच्यते–एवं तर्हीमान्यपि यावत् तत्पदार्थत्ववदिति, यथाऽऽकाशपरमाण्वादिषु नोपनिपतितुं शीलमस्याः सत्तायास्तथा कार्यद्रव्यगुणकर्मस्वपि सत्तास्वरूपत्वादनुपनिपातिस्वरूपत्वादात्मभेव तस्याः सर्वपरमेण्वाकाशादिपदार्थेषु आत्मभे[दा]च न केनचित्सम्बन्धोऽस्याः स्यात्, असति च सम्बन्धे यथा सत्ता सत्ताद्रव्यत्वगुणत्वादिसम्बन्धाभावे सत्येव पदार्थस्य [त]त्स्वरूपसद्भावात् सा स्वस्वरूपं स्वात्म न्यात्मभातीत्येवंस्वरूपा तथा सत्तादिसमवायमन्तरेण तान्यपि कार्यद्रव्यगुणकर्माणि भवन्तु आकाशपरमाण्वादिवत् सत्तावन्ति किं तद्व्यतिरिक्तसत्ताद्रव्यत्वादिसमवायकल्पनया ? तस्माद्धेतुफलसम्बन्धित्वाभावः स्यात् सत्तासमवाययोः खपुष्पवदिति, इति सत्ता[दि]सम्बन्धात्सन्ति द्रव्यादीनीत्ययुक्तम्–तस्मात् सत्तासम्बन्धाद्द्रव्यं सत्, गुणः सन्, कर्म सदित्ययुक्तम् आदिग्रहणात्–द्रव्यत्वादिसम्बन्धाद्द्रव्याणि पृथिव्यादीनि गुणत्वादिसम्बन्धाद्गुण[ा] रूपादयः, कर्मत्वादिसम्बन्धात् कर्माणि गमनादीनीत्ययुक्तम्, इत्यस्यस्य निगमनार्थत्वात् एवं तावत् सत् प्र[सन्नि]मास्थि[त]सभिहितमविरुद्धत्वात् खपुष्पवत् कार्यमसदिति पूर्वनकर्षणेनैव वसुपापीपदाम ।

तदेवं कार्यकारणयोः परमाण्वादिकारणभावो खपुष्पेणाविशेषो प्रसक्तिदेऽपि यदि वादी नित्यद्रव्यादीनि स्वरूपसन्ति न तु सत्तासम्बन्धात् कार्यद्रव्यादीनि च सत्तायोगात् सन्ति न तु स्वरूपसन्ति खपुष्पवत् तु न स्वरूपसत् नापि सत्तासम्बन्धात् सत्, नित्यत्वमेवैषां विशेष सामर्थि सदेव तामपि प्रतिविधातुं पूर्वपक्षयति–अथोच्येतेति नित्योत्पन्नत्वात् –सततोत्पतिमत्त्वात् स्वरूपत्वात्सत्यभावो भावभाति–स्वसद्भावेनैव सन्ति सद्रूपेणैव न सत्तासमवायेनेत्यर्थः । पदार्थेषु अविशेषत्वमभ्यावर्त्य द्रव्यं प्रथयति–पृथिव्यादीनीति पृथिव्यादीनां चतुर्विधानां परमाणव आकाशादिपञ्चकं च नित्यद्रव्याणि सत्तासमवायी–स्वसामान्यसमवायी द्रव्यपदेनोपलक्षितास्तेन अविभित्वात् द्रव्यस्य अविभुत्वमभ्यावर्त्यैव गुणाः–विभुत्वं परममहत्परिमाणं पारिमाण्डल्यमणुपरिमाणमये विशेषायेति । कार्यद्रव्येति कार्यपदं द्रव्यगुणयोरेव सम्बध्यते अकार्यकर्मानभ्युपगमात् । यथ यथा सत्ताया नित्यद्रव्यादिसम्बन्धित्वमभावेऽप्युपे तथा कार्यद्रव्यादिसम्बन्धित्वमभावेऽप्युपमपि स्यात्, यथावा परमाण्वादेः स्वरूपसद्रूपतामुपगम्यात् सत्तासमवायेन कश्चिदर्थ न वा केनचित् सम्बन्धोऽपेक्षते सत्तया स्वसद्भावे पदार्थत्वात्, स्वरूपसत्त्वात् तथैव कार्यद्रव्याण्यपि सत्तास्वरूपाणि भवन्तु नापेक्षन्तां केनचिदपि सम्बन्धमिति द्रव्यादिभ्योऽतिरिक्तसामान्यस्य समवायस्य निरासेन समाधत्ते–एवंतेति । सत्तास्वरूपत्वात् स्वरूपसद्रूपत्वात्, अनुपनिपातिस्वरूपत्वे हेतुः अनभिसम्बध्यमानस्वरूपत्वादिति तदर्थः तस्याश्चात्मामेदः तस्याश्च स्वात्मस्वरूपं स्वात्मन्यवधतीति यान्तत्र तत्पदार्थत्ववदिति आकाशपरमाण्वादिवत् सत्तावत्त्वेति तदर्थः स्पष्टमन्यत् । इत्यस्यस्य निगमनमेवोपसंहारेण न सत्तादिसमवायात् सन्ति द्रव्यादीनीति एतदेव–इत्येतावदस्येति । एवं तावदिति

1 मि. क. व्यावर्तयद् यदा । 2 सि. ख. क. परमाण्वादिष्वाकाशादि वे परमाण्वाकाशादिष्वागममनादि ।
3 मि. क. व. सम्बन्धाभावात् । 4 सत्तादिसम्बन्धि सर्वासु प्रतिषु ।

इत उत्तरमस्मादेव न्यायात् कर्तव्यां टीकायाम् यैः पूर्वपक्षस्तं तैरेव समर्थयितुमाह—

ततोऽनुपपन्नविकल्पत्वात् सत्तासमवायात् सत्, द्रव्यत्वसमवायाद् द्रव्याणि, गुणत्वसमवायाद् गुणाः कर्मत्वसमवायात् कर्माणि रूपत्वाद्रूपमित्यादिना द्रव्यादीनां लक्षणविरोधाविरोधाऽऽरम्भानारम्भकार्यकारणादिभिन्न सत्तादिभ्यश्च पदविशेषमुखेन विशेषाभिधानं सर्वमयुक्तं
5 कर्तुम् सर्ववाक्यानृतत्ववत् ।

ततोऽनुपपन्न[विकल्प]त्वादित्यादि, उद्देशवाक्य—सत्तासम्बन्धात् सन्ति द्रव्यत्वाद्द्रव्याणि गुणत्वाद्गुणाः कर्मत्वात् कर्माणि रूपत्वाद्रूपम् आदिमहण्यात् पृथिवीत्वादिभ्यः पृथिव्यादयः, रसत्वादिभ्यो रसादयो गमनत्वादिभ्यो गमनादय इत्यादि, 'क्रियावद्गुणवत्समवायिकारणं द्रव्यलक्षणम्' (वै० सू० अ० १ आ० १ सू० १५) 'द्रव्याश्रय्यगुणवान् संयोगविभागेष्वकारणमनपेक्ष इति
10 गुणलक्षणम्' (वै० अ० १ आ० १ सू० १६) 'एकद्रव्यमगुणं संयोगविभागेष्वनपेक्षकारणमिति कर्मलक्षणम्' (वै० अ० १ आ० १ सू० १७) इत्यादिना द्रव्यादीनां नानात्वं विरोधाविरोधारम्भानारम्भकार्यकारणादिभिन्न सत्तादिभ्यश्च 'सदनित्यं द्रव्यवत् कार्यं कारणं सामान्यविशेषवदिति द्रव्यगुणकर्मणामविशेषः' (वै० अ० १ आ० १ सू० ८) इति पदविशेषमुखेन विशेषाभिधानं सत्तासमवायनीत्या सर्वत्र तत्सर्वमयुक्तं कर्तुम्, कस्मात्? अनुपपन्नविकल्पत्वात्, सर्ववाक्यानृतत्ववत्, यथा सर्वं
15 मदीयं त्वदीयमन्यदीयं वा वाक्यमनृतमिति ब्रुवाणस्य तस्य वाक्यं सत्यमनृतं सत्यानृतं वा स्यात् सर्वथा नोपपद्यते यदि तद्वाक्यमप्यनृतं सत्यानृतं वा ततः सर्ववाक्यानृतत्वप्रतिपादनासमर्थम्, अयमप्रमाणत्वात्,

वाक्यं नामान्यमसतं सर्वमसत्यमेवैतत् त्वदुक्तमनुपपन्नविकल्पत्वेन सत् प्रतिज्ञातं तदेभिर्हेतुभिरुपपादितमिति भावः । अथ सत्त्वमिति ध्यातव्या रामानुजाय्या वैशेषिकसत्त्वप्रक्रियायाः तस्यैतस्याभावेन न्यायमुपलक्षणमेव योऽन्यो वैशेषिकसिद्धान्तोपरि पूर्वपक्षः प्रकाशितः तेनैव तदेतद्विचारयन्नद्युत्तरैर्गिरा समर्थयं विवादं प्रतिज्ञायते—तत इति, सत्तासमवायेनकुर्वनाद्
20 सदभिहितमभिन्नत्वेन गुणत्वासमवायादिकं यस्य परस्परं कर्मविभागेनाभिसम्बन्धं तद् सत्तासमवायादिसमवायेन न्यायादि युक्तम्, अनुपपन्नविकल्पत्वादिति तु तस्य पूर्वपक्षिणो हेतुः । उपदेशे प्रतिज्ञायोजनं वाक्यमात्रमर्थमाह—उद्देशवाक्यमिति । आदिमहणादिति रूपत्वाद्रूपमित्यादिनानादिमहणादिकं एतेन द्रव्यत्वकर्मनामान्तरत्वकर्मविशेषमभिधानान्तरत्वनामप्रयोजनमनन्यतात्वद्य निरस्तं । इत्यादिनेति आदिना विरोधाविरोधारम्भानारम्भकार्यकारणभेदप्रदर्शनं प्रवृत्तानि तानि नानानि एभिर्द्रव्यादीनां नानात्वमुक्तं सत्तादिभ्यश्च पदान्तरविशेषमुक्तम् इति सत्तादिपदमेवं नावर्तं
25 सूत्रं दर्शयति—सत्तादिभ्यश्चेति । सर्वेषां सत्तासमवायात् सद्रूपत्वसामान्येन विशेषाभिधानसम्भवादाह—सत्तासमवायनीत्येति । अनुपपन्नविकल्पत्वादिति विविधा कल्पा विकल्पा अनुपपन्ना विकल्पा यस्य तदनुपपन्नविकल्पं तद्भावस्तस्मात्, इत्यादिप्रतिपादनविषयसम्भवविकल्पसमर्थनाभावप्रतिपत्तिरिति भावः । दृष्टान्तं स्पष्टयति—यथा सर्वमिति दृष्टान्ते विकल्पा निर्दिष्टा वाक्यं सत्यं वा? अनृतं वा? सत्यानृतं वा स्यादिति । तत्र विकल्पानुपपत्तिं दर्शयति—यदीति ।

१ सन्तोऽवगम्यन्ते न कापि तद्गुणसन्दर्भे यतोऽत्र यथा यथाकथंचित् पाठः संशोधितः न्यायागमस्य मुरारिकविविरचिते अनर्घराघवनाटके पञ्चमेऽङ्के 'भो भो वयस्य वैशेषिकसत्त्वपरिचितो कणादशिष्यमाचः पर्यटामि काकी रामः तेन सह विवदिष्ये' इति यत्पद्ये रामवचनमिदम् तेन कणादीनां राक्षसानां कश्चित् कोऽपि इत्यनुमीयते । २ सर्वत्र वं इति पत्वते । ३ यदेव इति सर्वत्र ।

अप्रमाणस्यमनन्यत्वात्, अ[थ] सत्यं न तर्हि सर्वमनृतम्, तस्य सर्वान्तःपातित्वात्, तत्सत्यत्वस्यैवेपस्यापि सत्यत्वात् सर्वथानुपपन्नं वाक्यम्, एवं सत्तासमवायात् सविद्यादिसर्वद्रव्यविशेषणप्रमाणविरोधारम्भादि विशेषधर्मोपादानवाक्यानि नोपपन्नानि, सर्वपदार्थानां वैशेषिकीमाणां सत्तासमवायमूलविशेषासत्कत्वात् द्रव्यादिद्रव्योत्पत्तिविचारप्रक्रियेयं तत्रैव विचार्यते, तत्प्राणत्वात् वैशेषिकमेतस्येति ।

स्यान्मतं कथं पुनरनुपपन्नविकल्पत्वं सत्तासमवायस्येत्यत्रोच्यते – 5

इह प्राक् सत्तासम्बन्धात् सतां वा सत्तासम्बन्धः, असतां वा, सदसतां वा ? न तावत् सताम्, खपुष्पाविशेषप्रसङ्गात्, नापि सतां भूतत्वात्, सत्तावत्, प्रकाशितप्रकाशनवैयर्थ्यवत्, सतां च पुनः सत्तासम्बन्धात् सत्त्वादनवस्थाप्रसङ्गात्, प्राक् सत्तासम्बन्धात् तत्र किमारम्भकमिति स्वरूपावधारणं कार्यम्, अन्यथाऽसत्त्वात्, नापि सदसताम्, एकस्यानुपपत्तेः भवसतो वैधर्म्यात् घटखपुष्पवत्, उभयदोषप्रसङ्गाच्च–पदसत्त्वत् खरविषाणाविशिष्टम्, सत्त्वप्रसङ्गति 10 तत्र सत्तासम्बन्धवैयर्थ्यम्, सदसतोर्वैधर्म्यात् कार्ये सदसत्ता नेति च स्वमतसिद्धान्तानुपपत्ति रेवाय विकल्प इति ।

इह प्राक् सत्तासम्बन्धात् सतां वेत्यादि विकल्पत्रयोपन्यासो गतार्थः, एवं मतम्मत स्यात्, तद्गुणर्थ–न तावत् [स]तामित्यादि, खपुष्पादुरक्रमेणासतां सत्तासम्बन्धात्सदभिधानप्रत्ययप्रतिषेधः प्रागिति, नापि सतामिति वैयर्थ्योपादनं भूतत्वात् सत्तावदिति गतार्थम्, प्रकाशितप्रकाशनवैयर्थ्यवदिति 15 द्वितीयमुदाहरणं लोकसिद्धं शास्त्रसिद्धात् सत्तोदाहरणाद्वैनोपन्यस्तमिति विशेषः, न वैयर्थ्यदोष एवास्मिन् विकल्पे, किं तर्हि ? सतां च पुनः सत्तासम्बन्धात् सत्त्वादनवस्थाप्रसङ्गादिति–विद्यमानानामेव पुनरपि सत्तासम्बन्धात् सत्त्वेऽपि सत्ताया अपि तत्सत्त्वाभिधानप्रत्यय[ाः]र्थाः सत्तान्तरसम्बन्धात् तस्या अपि तथेत्यनवस्था स्यात्, किञ्चान्यत्–प्राक् सत्तासम्बन्धादित्यादि यावदन्यथाऽसत्त्वादिति–तत्र द्रव्यादि पूर्वं

पर्यायेणैर्व समीक्ष्येति–एवमिति । के तेऽत्र विकल्पा वैरूप्यपक्षा इत्याह–इह प्रागिति यदा धर्मद्रव्यादे सत्ता सम्बन्धोऽ- 20 भिमतः तत्र पूर्वं तत् धर्मद्रव्यादि किं सत् ? किमसत् ? किं सदसत् ? यत् पश्चात् सत्ता सम्बध्यत इति भावः । सत्तासम्बन्धा- दिष्य पक्षान्वयमायातेऽयमस्य एव विकल्पे मत स्यादित्याह–एवमिति । खपुष्पावत्सदसदात्मकत्वप्रतिषेधे बीजमाह–खपु ष्पादिरिति व्योमारविन्दसमस्ता सत्तासम्बन्धस्य येनापत्तौ इत्यतोऽसतामावात्तुल्यादिति भावः । सत्ता सत्तासमवायविकल्पं एव- कौ–नापीति सत्तासम्बन्धात् पूर्वमपि वस्तु यदि सदिति शब्दतेऽभिधीयते वा तर्हि सत्तासमवायस्य प्रागेव भूतत्वात्, सत्तावत् पुनः सत्तासम्बन्धप्रकाशनमिति भावः । सत्तासम्बन्धात् प्राक् वस्तु किं सत् सत् ? सत्तासम्बन्धाद्वा ? तत्राद्ये यथा सतः सत्ता 25 सत्ताया सत्तासम्बन्धो व्यर्थः तथा सत सतो वस्तुनोऽपीति सत्तोदाहरणम्, यदि तदा सत्तासम्बन्धात् सत्, तर्हि यथा प्रकाशन प्रका- शितस्य वस्तुनः पुनः प्रकाशेन प्रकाशनमनर्थकं तथा पुनः सत्तासम्बन्धो व्यर्थ इति द्वितीयोदाहरणम्, प्रकारान्तरेण तदुदाहरणप्रदर्श- नमिदमस्यार्थस्येति–प्रकाशितेति । सत्तामपि सत्तासम्बन्धे दोषान्तरमपि अप्रमाणित्वात्सत्तासमवायस्याऽभिधानस्य अनवस्थापत्तिरित्याह–न वैयर्थ्यदोष एवेति । सत्तासम्बन्धात् प्राग् वस्तु न सत् नाप्यसत् सत्तासम्बन्धात् सदिति खपुष्पा- दिवत्–प्राक् सत्तासम्बन्धादिति यदि तदानीं न सत् नाप्यसत् तर्हि निरात्मकं तदित्यनर्थकम् । अनवस्थाद्यै चाप्यत्र 30

१ क. सर्वद्रव्यविशेष । २ सि क. ॰सर्व च तत्र । ३ सि क. स्यात् सर्वं तथा ।

सत्तासम्बन्धात् क्रियात्मकमिति सद्रूपानपायात् कार्यम्, तस्मात् तस्यां सत्तासम्बन्धयुक्तत्वमसत्त्वान्नास्ति तत् अनवधृतात्मकत्वात् खपुष्पवत्, अन्यथाऽसत्त्वात्—अनवधृतात्मकत्वे सत्तासम्बन्धादिति, नापि सदसत्ता मिति तृतीयविकल्पस्योक्त—ऐकात्म्यानुपपत्तेरिति—अनभ्युपगमस्य पूर्वाभ्युपगमेन विरोधात्, अथवैकात्म्यानुपपत्तेरित्यनार्हन्तमतेन प्रकाशतमसोरिवात्यन्तवैधर्म्यात्—सत् सोपाख्यमसदनुपाख्यम्, तयोः 5 सदसतोर्वैधर्म्यादेकत्वं न युज्यते सदसत्त्वं यदसत्पुष्पवदिति—यतः सोपाख्यः सत्त्वात्, असत्त्वात् खपुष्पं निरुपाख्यमिति वैधर्म्यादेकत्वाभावस्तयोरतः सदसदात्मकं कार्यमित्ययुक्तम्, किञ्चान्यत् उभयदोषप्रसङ्गाच्च, तद्व्याचष्टे—यदसत्त्वम् तदविनाभेत्यादि यावत् सत्त्वपक्षसिद्ध्यनुपपत्तिरेवात्र विकल्प इति असत्पक्षे खपुष्पा विशेषः सत्पक्षे सत्तासम्बन्धवैयर्थ्यम् सदसतोर्वैधर्म्यात् कार्ये सदसत्ता नास्ति च सत्त्वपक्षविरुद्धमेवानु पपन्नत्वं तस्मादेकत्वस्यानुपपत्तेर्न सत्तासम्बन्धोऽभिधानप्रत्ययहेतुरिति निगमन[मा]ह ।

10 आह –

नन्वगुणगुणवत् स्वभावसद्भावेन सन्नेव भावोऽसन्नित्युच्यतेऽतो नैवासतां सत्करी सत्ता, स्यादेव तर्हि ह्येवमेव ब्रुवता एतदसदनुष्ठेयम् अत्र वयं निश्चिन्ताः संवृत्ताः वयमपि नैवैतत् किन्त्वसतामेव सत्तासम्बन्धः स्यान्न वेति विचार्यम् ।

नन्वगुण[गुणव]दित्यादि यावन्नैवासतां सत्करीति, अस्तु तावत् सतामेव सत्करी सत्ता 15 नासताम्, यथा यथा ह्यगुणो द्रव्यात्मा स्वभावसद्भावप्रतिपादनार्थं नास्य यथा नास्य गुणोऽस्तीत्यगुणो गुण एव सन्नगुण इत्युच्यते तथा स्वभावसद्भावमेव भावो नास्त्यस्य सन्नित्यसदुच्यते न तु सर्वमसदिति तथा द्रव्यादयोऽपि सन्तः तेषामेव सत्तया सह सम्बन्धः प्रतिपद्यते न तु स्वरूपसद्भाव इत्यतो नैवासतां

---

स्वरूपेणास्ति वस्तुमात्रत्वेन भवतीति भाव । यदि तत्र सदसदात्मकमनुपपन्नमेव तदाह—नापीति । सदसदात्मकत्वं नैव कार्यस्य भवति न सम्भवति तत्कथम् यदि तथा नोमितं तर्हि अनेकान्तवादाभ्युपगमः प्रसक्तः स च स्वोपगतिप्रतिज्ञाविरोधी- 20 त्वादेवाह अथवेत्यादिना । [illegible] मत्वा तन्मतेनैव हेतुं व्याचष्टे—अथवेति एका- त्मता च एकात्म्यं तस्य भाव ऐकात्म्यं तस्मात् [illegible] एव [illegible] । [illegible] प्रसक्ताह—प्रकाशेति । [illegible]—सत् सोपाख्यमिति [illegible]—अभिधानं [illegible] सोपाख्यम्, [illegible] निरुपाख्यम् [illegible] वैधर्म्यमसत्ता [illegible] भाव । ननु सत्त्वात् सोपाख्यत्वात् निरुपाख्यमित्युक्त्वा [illegible] वैधर्म्यं [illegible] 25 हेत्वन्तरम्, तथा च सत् कार्ये [illegible]—उभयदोषेति [illegible] वैधर्म्येऽपि सदसतोरेकत्वासम्भव इति भाव । [illegible] प्रतिज्ञातमेव सत्त्वपक्षसिद्ध्यनुपपत्तिरेवात्र विकल्प इति निगमयन्नाह—तस्मादिति । ननु [illegible] पक्षे सत्ता [illegible] एव [illegible] न विपक्षिता किन्तु [illegible] एव [illegible] तेन [illegible] अगुणसुच्यते यथा [illegible] गुण एव गुणसमवायाभावात्तु अगुण्यत इति पक्षे—नन्वगुणगुणवदिति । तथा 30 [illegible] सत्करी भवति [illegible], [illegible] प्रसङ्गेन [illegible] गुणोऽगुण इति [illegible] एव [illegible] एव द्रव्यादेः [illegible] तथा च [illegible] एव [illegible] न तु [illegible] अस्तु तावदिति । यथा ह्यगुण इति

---

१ क० यथा ।

सत्करी सत्ता, किं तर्हि ? सत्त्वमेव, तस्मादसतां सम्बन्धानभ्युपगमाददोष इत्यत्रोच्यते—एष विकल्पोऽनु-
पपन्न इति, त्वयैव तर्हि कृत्स्नमेव हुपता—त्वयैव तर्हि असतां सत्करी सत्ता न भवतीत्येतदस्मदनुमेयम-
नुज्ञिमतोऽस्य सिद्धत्वादत्र वयं निर्विमर्शाः संवृत्ताः, अपि चैवमपि नैवैतदित्यादि, यद्यपि भवता त्वदनभि-
प्रेतासम्बन्धापनार्थमुक्तमसतां सत्तासम्बन्धो नास्तीति, नैतदप्येवम्, किन्त्वसत्तामेव सत्तासम्बन्धः स्याद्वा
नवेति विचार्यम्, किं कारणमिति चेदुच्यते—स्वाश्रयविपर्यये सत्करत्वमसत्त्वः,—सत्तासम्बन्धात् प्राक्तु 5
विषयो द्रव्यादिकाय तत्त्वमावेनैव किं सत्, उत सत्तासम्बन्धात् सदित्येतस्मिन् सन्देहे समानासत्त्वत्वस
कार्यसामान्यप्रतिपादनद्वारेणायं विचारः प्रस्तुत एवेति क्व प्रस्तुतपरित्यागेन परिहारो युक्तः इत्यभिप्रायः।

अपि च ननु सः प्राग् विषयसद्विकल्पोपपादनायागुणगुणत्वदृष्टान्तो योऽपि चाययथा-
र्थविकल्पेष्वन्त्यो व्युत्पत्तिविकल्प' सुष्ठु व्युत्पाद्य व्यावर्णितः सोऽप्येवमनुपपन्नः ।

अपि च ननु स प्राग्विपर्ययेत्यादि योऽयमस्माभिः प्रागुपवर्णितो यस्मादसतीत्यादिनोपपत्ति- 10
मन्येनागुणगुणस्थानीयसत्ताया यथाभाव इति, यद्यविद्यमानद्रव्यादिविषया सत्ता स्वयमसती सन्तं कुर्यात्
व्यवस्थितविपर्ययणीम् वन्ध्यापुत्रादिः सत्त्व कुर्यादित्येकः प्रसङ्गः आपिपादयिषितत्वपायस्त्वा, यतदनिष्टत्वो
द्रव्यादीनां स्वत एवाभिमते सत्तासम्बन्धो व्यर्थः स्यादित्येव वा दोषः, निर्विषयत्वात् सत्तासम्बन्धस्य,
अनिष्टमेतत् अतोऽसत्सत्करत्वमेव सत्ताया इत्येष एव विकल्पो भवितुमर्हति । तथाप्येवमनुपपन्नमस-
त्सत्करत्व विचारितविधिनेत्युपसंहरति—योऽपि चायमयार्थेत्यादि अनुपपन्नविकल्पत्व[ा]दित्यस्य साधनसा- 15
मर्थ्यार्थः—सत्तामसतां सदसतां वा द्रव्यादीनां सत्करी सत्तेति विकल्पाः, तेषु नासतामित्यस्य विकल्प-

---

न्वयमा पूर्वपक्षतया वैशेषिकमतोपन्यासे वैशेषिक पूर्वोक्तं गुणागुणभावदृष्टान्तं स्मारयतीति मतिः । अन्यथा सत्तायोगात् सत्त्वं सम्भवतीति
अन्यथाऽनुपेतं तत्त्वैवानुदितमिति न किञ्चिदस्माभिः कर्तव्यमस्तीति न पुनरेवं सिद्धं साधयितुं प्रवर्तामहे इत्याशयेन समाधत्ते–
त्वयैव तर्हीति । ननु सत्तासम्बन्धानुपपत्त्या प्रागसत् कार्यमुत्तरक्षणवर्ति सत्त्वया सम्बध्यत इत्याशयेन त्वया यो वाद आरब्धः
सोऽस्मदभिमतसाधकोऽपि त्वदनभिमतत्वापादनार्थं प्रतिभाति इति वस्तुतस्तु सत्तासम्बन्धात् प्राक् सत्त्वासत्त्वविकल्पविषयकाय 20
त्वदभिमतधर्मिस्वरूपविचार एव विकल्प तस्यैव परिहार त्वया कार्ये तदीयपरिहारस्तु नैवास्तीत्याशयेनाह–अपि
चैवमपीति । त्वदनभिमततरि त्वयाऽसत्त्वविकल्पस्य च प्रति एवास्माभिरिष्टम् । पूर्वमसत्त्व पश्चात् सत्तासम्बन्धो
न सम्भवतीत्युक्ते यत्त्वदभिमतविषयको नैवेष इत्याशयेनाह–नैतदप्येवमिति । त्वदीयमतस्य स्वभिमते धर्मिणि सत्तासम्बन्धे-
नैव सत्त्वविषयो विचारोऽस्मदभिमत इत्याशयेनाह–किन्त्वसत्तामेवेति । परिहार इति त्वदभिमतस्य धर्मे सत्ताऽस्तीति
प्रस्तुतं विचारं विहायान्यस्य त्वदनभिमतविषयकपरिहारोऽत्र कथं युक्तः इति भावः । अत्र यस्मादनादेरित्यादिना 25
वैशेषिकेणात्र विषये विकल्पानामसम्बन्धस्य वा सम्यक् पूर्वपक्षं विधाय स प्रतिविहित तत्र सत्तायामसत्त्वे प्रसङ्गेन च सदसद्वि-
कल्पस्यानुपपत्तेः यथोक्तप्रतिपत्तेः पूर्वस्य एवोत्तरपक्षो भवतीति प्रदर्शनायाह–अपि चेति । प्रागुपवर्णित इति यस्मादसती यत्र
सत्ताऽन्यत्वैकार्थ्यमित्येव प्रथा असत् करोतीत्यादिविधिनायमभिप्राय प्रथम पूर्वमुपवर्णित इत्यर्थः तथाप्यपि सत्तासम्बन्धस्य
निर्विषयत्वमतो गुणस्यैव सतोऽनुपपत्त सत्त्वे भावोऽभिप्रायस्य इत्यवगन्तव्यम्, एवं च त्वदीयमतस्य प्रतिविधानमेवत्यनु-
पपत्ते तत्रापि तदनुपपत्तिः पूर्वपक्ष एवास्तां सत्करी सत्तेत्येवंरूप उत्तरपक्षो भवतीति भावः । ननु असतां सत्करी सत्तेति 30
विकल्प तथापि भवितव्यमित्याशङ्कायामाह–तथाप्येवमिति । एवं परम्परयोक्तं प्रतिविधानं विमृश्य पूर्वक्रमेण व्याख्यानम्

---

१ सि क. °स्यानित्यार्थविकल्पो ।

सोपपादनार्थं यानि साधनानि न्युत्पादितानि पूर्वपक्षीकृत्य व्यावर्तितानि च, तेषु योऽन्यो न्युत्पत्तिविकल्पः सुष्ठु न्युत्पाद्य व्यावर्तितः पूर्वपक्ष इत्यभिमतः सोऽप्येवमनुपपन्न इति विचारपर्यन्तत्वात्सोत्तरत्वानुपपत्तौ पुरुषकरणवत् सर्वविचारजेरर्थस्यात् पूर्वपक्ष एवोत्तरपक्षो भवतीत्यभिप्रायः ।

यत्तावदुक्तं नासतां सत्करी सत्ता, शशविषाणादीनां सत्करित्वप्रसङ्गात्, नाशयन्येना-<br>
5 नभिसम्बन्धात् असमाधनत्वम्, प्रतिज्ञाविशेषो वा प्रतिविशिष्टत्वम्, अथ द्रव्यादीनां तदानीमसत्त्वमिति चेत् तेषामसत्त्वमसिद्धं द्रव्याद्यभ्युपगमसत्त्वात्, प्रागुत्पत्ते-रिति चेत् सिद्धसाधनमेतत्, तदा तेषां सत्तासम्बन्धानभ्युपगमात्, नासता सम्बध्यते सत्ता, विशेषणत्वात् दण्डवत्, यथा विशेषणस्य दण्डादेः सता देवदत्तेन एवं सत्ताया अपि, अथ सम्बध्यते शशविषाणादौ सत्तासम्बन्धस्तद्वदस्याः, अथ तव मतमस्त्यपि द्रव्यादि सम्बध्यते<br>
10 सत्ताया एवंस्वरूपत्वात्, तत्प्रतिपाद्यसत्ताया एव हि हेतुभूतायाः सामर्थ्यात् तस्या आधारो भवति द्रव्यादीति तद्वच्छशविषाणादिरपि सत्सामर्थ्यात्तस्या आधारः स्यात्, नैवम् शश-विषाणादिवदत्यन्तनिरात्मकत्वानभ्युपगमात् कार्यद्रव्यगुणकर्मणाम् नन्वसदित्युत्तरपदा-भिधेयनिवारकत्वात् कथमस्य सात्मकत्वम्? न, अनेकान्तात्, नास्य सदित्यसत्, न स्वयमसत् यथाऽपुत्रब्राह्मणवत् नास्य पुत्रोऽस्तीत्यपुत्रो न तु पुत्रो न भवतीति प्रतिपिप्यते,<br>
15 अगुणगुणवद्वा नास्य गुणोऽस्तीति गुण एव सन्नगुण उच्यते तथेहापि, न च तदपि निरात्मकं सत्तासम्बन्धात् वैधर्म्येण शशविषाणवत् त्वन्मते दृष्टान्ताभास इति चेत् सामान्य वद्वा सामान्यवदेव सात्मकं न घटादिवत् सात्मकम्, सामान्यादीनां सात्मकत्वमसिद्ध-मिति चेन्न स्वरूपभिन्नत्वे सत्यभिन्नप्रत्ययबुद्धिव्यवहारविषयत्वात्, विशेषण सामान्य सात्मकं चेति, अभाष्युत्तरे वक्ष्येव सम्प्रधार्यम् ।

20 (यदिति) यत्तावदुक्तम् नासतामित्यादि पूर्वपक्षो यावत् सत्करित्वप्रसङ्गादित्यत्र नानात्वं प्रसङ्गसमर्थिना नाशयन्येनानभिसम्बन्धादित्युक्तं यावदसाधनत्वमित्येवं प्रथमो न्युत्पत्तिविकल्पः प्रतिज्ञाविशेषो वेत्यादि द्वितीयो न्यायार्थः सोत्तरो यावत् प्रतिविशिष्टत्वम् अथ द्रव्यादीनामित्यादिस्तृतीयः सोत्तरो यावत् तेषामसत्त्वम-सिद्ध[म्]द्रव्याद्यभ्युपगमे सत्त्वादि[ति], अत्र चोद्य–प्रागुत्पत्तेरिति चेत्–प्रागुत्पत्तेर्न सन्ति द्रव्यादीनि तस्मादसत्त्वं सिद्धमिति अत्रोत्तरं सिद्धसाधनमेतत् तदा तेषां सत्तासम्बन्धानभ्युपगमादिति, एतत्तु त्रिषु<br>
25 व्याख्याविकल्पेष्वसारत्वुक्ता–नासता सम्बध्यते सत्ता विशेषणत्वात् दण्डवत् यथा विशेषणस्येत्यादि

धीभाव भवत्यभेदेऽप्युक्तसाधनानि निराकरोति–यत्तावदुक्तमिति । नासतां सत्करी सत्ता, शशविषाणादीनामपि सत्करित्व-प्रसङ्गादिति एतद् व्याख्यानुसारेण प्रत्ययसिद्ध–नासतामिति । अथेति सम्बन्धमानस्यासत्त्वादसम्बन्धासिद्धत्वात्, अन्यथा व्याख्यानेन पूर्व भाव । तत्र वादस्थो द्रव्यादि सन्तीत्याशङ्क्य–तेषामसत्त्वमिति द्रव्यादीनामसत्त्वमसिद्धं उत्पत्तिसम्-बन्धे तु द्रव्यादीनामसत्त्वं सिद्धमेवेत्यत्र उपपत्त्यन्तरम् तदानीमनभ्युपगमादिप्रदर्शनासत्त्वमिति तदर्थे–प्रागुत्पत्तेरिति ।<br>
30 अत्र सद्भिन्नत्वं तस्यासतः सम्बध्यमानं दाम्, यथा दण्ड देवदत्तेन सता सताऽपि विशेषणत्वात् सतैव सम्बध्यते नासता अवस्-ताऽपि सम्बन्धेन तथा अपि शशविषाणादिनाऽपि सम्बन्धेन न चैवमिष्टमिति दूषणमाह–नासतेति । ननु तथाऽपि एवमिर्थ

1 सि क. वनाव । 2 सि. क. यादृत्वाम्बन्धा । 3 सि. न्याम्पु ।

साधनव्याख्या यावत् सत्ताया अपीति, अथ सम्बध्यत इत्यादिना यावत् तदपक्ष इति, पूर्वपक्षिक एव परमतमाशङ्क्योत्तरमाह–अथ तव मतमसदपि द्रव्यादि सम्बध्यते, सत्तायाः एवस्वरूपत्वात्, तदभिधा- [द्यति–]सत्ताया एव हि हेतुभूतायाः सामर्थ्यात् तस्या आधारो भवति सद्द्रव्यादीति, एतदपि नोपपद्यते, यस्मात् तद्वच्छशविषाणादेरिति गतार्थम्, एवं व्युत्पाद्य पूर्वपक्ष प्रश्नसमविरोधात्राप्युत्तरं–शशविषाणादि वद्व्यन्तनिरात्मकत्वानभ्युपगमात्, केषां ? कार्यद्रव्यगुणकर्मणाम्, द्विविधो हि भाव उक्तः–सामान्यस- म्बन्धः सम्बन्धसद्भावश्च, इतरेतरासतां सात्मकानामेव सविशेषणासत्त्वात् सोऽभिव्यक्तिस्ति[स]मित्यादिपूर्व शशाच्छशविषाणादीनामेषामत्यन्तासतामसत्त्वम्, न प्राक् पश्चादितरेतरापेक्षतामनात्मकत्वम्, अतो द्रव्यादि सत् तन्तुषु कारणेषु समवेत वस्त्वेव सत्तासम्बन्धरहितमपि सात्मकमेव, न खरविषाणवन्निरात्मकम्, तस्मायुक्तः सत्तासम्बन्धो द्रव्यादीनां न खपुष्पादीनामिति अत्राह–नन्वसदित्यादि यावत् कथमस्य सात्म क[त्व]मिति द्रव्यादेर्निरात्मकत्वापादनार्थो ग्रन्थो गतार्थः, तत्परत्वाभिधेयनिवारकत्वात् सप्रतिपेक्षार्थ स्यादनात्मकमिति, अत्रोत्तरं–नानेकान्तादित्यादि यावत् तथेष्टापि, नास्य सत्त्वमिति लौकिकव्याख्यायाद्य व्याख्यान व्यभिचारप्रदर्शनार्थो बहुव्रीहिसमासप्रयोगेणापुत्रत्वाद्यपवद्गुणगुणवदिति च गतार्थो ग्रन्थः, एवमना त्मकत्वे स्थिते तस्य व्यभिचार उच्यते–न च तदपि निरात्मकमित्यादि, वैधर्म्येण शशविषाणवदिति, सत्ता सम्बन्धरहितत्वान्निरात्मकं खरविषाणवदित्येतत् सांख्यवैशेषिककल्पितप्रधानपुरुषव्यभिचारकत्वपत् स्यात्, अथ वा सत्तासम्बन्धात् सात्मकमित्येवमुच्यमाने च प्रधानादिवत् सत्तासम्बन्धादृतेऽपि सात्मकत्वप्रदर्शनादित्यभ्या- पिता तथेष्टापि स्यादिति, स्वपक्षे दृष्टान्ताभाव इति चेदित्यादि पूर्वपक्षीकृत्य तदुत्तरं सामान्यपदेऽप्यारभ्य

सामर्थ्यमस्ति असदपि द्रव्यादि आधारत्वेनाभ्युपैति नात्र कश्चिद्दोष इत्याशङ्कते–अथ तव मतमिति । असदपि सत्ताश्रय सत्ता शशविषाणादीनप्याश्रयेत अविशेषादिति पूर्वस्मात् प्रश्न–यस्मादिति । शशविषाणादि यथा अत्यन्तनिरात्मकं अत्यन्तासत् तथा द्रव्यादि नात्यन्ता सदिति समाधत्ते–शशविषाणादिवदिति । अत्यन्तनिरात्मकत्वाभावमेव दर्शयति–द्विविध इति । परस्परमिश्रणा सात्मकानामेव वस्तूनां सद्भावात् सम्बन्धसद्भावश्च न त्वत्यन्तासतां शशविषाणादीनाम् तस्य भावस्यैकान्ते- नाभावेन निरात्मकत्वात्, द्रव्यादि वस्तु च प्राक् पश्चादितरेतरकृतवाऽसत् प्राक् तन्तुरूपेणासौ पटरूपेण पश्चात् तन्तुरूपत्वादिरूपेण सात्मकमेव अतस्तत्र सत्तासम्बन्ध स्यात् सद्भावसद्भावरूपमिति भावः । तन्तुषु द्रव्यादिरूपेण सात्मकं पटादि सत्तासम्बन्धा- भावेऽपि सत्तासम्बन्धात् प्राक् सत्तासम्बन्धरहितानामपि सामान्यविशेषसमवायानां सात्मकत्वप्रदर्शनाच्चेत्याह–अतो द्रव्या- दीति द्रव्यादि सत्–द्रव्यादिरूपेण पटादि सात्मकमित्यर्थः ननु पूर्वं द्रव्यादेरसत्त्वे कथमस्य सात्मकत्वम्, न सत् असदिति तस्य तत्परत्वाभिधेयनिवारकत्वात्, सप्रतिपेक्षात् सात्मकत्वानुपपत्तेरिति शङ्कते–नन्वसदिति । नास्य सत् असदिति बहुव्रीह्याश्रयेण समाधत्ते–नानेकान्तादिति तथापि एव द्रव्यादि सत्तासम्बन्धस्य प्रतिषेधः क्रियते तथापि सात्मकं सत्ताप्रकाशित- प्रकाशनीयमेव, अतो नत्वात् तन्निरात्मकमिति नियमोऽनैकान्तिकः अपवादाभ्युपगमादिति कोटिद्वय अनुपपन्नमिति सत्त्वो दृष्टान्त इति । ननु मतार्थेऽपि अवत्त्वनिरात्मक एव भवतु, अतोऽनैकान्तिकत्वं तदवस्थमेवेत्याशङ्क्य–न च तदपीति । सत्तासम्बन्धरहितोऽपि सात्मक इत्यत्र विपरीतदृष्टान्त एवास्ति यः सत्तासम्बन्धरहित स निरात्मकः यथा शशविषाणमिति अपत्य सांख्याभिमतप्रधानपुरुषादौ वैशेषिककल्पितसामान्यादौ निरात्मकत्वाभावात् दृष्टान्ता इति भावः । एवं न वैधर्म्यदृष्टान्तत्वम् किन्तु व्यभिचारनिरूपकत्वमित्याह–अथ वेति । अत्र सत्तासम्बन्धरहितं सत्ता व्यभिचार आदि वैशेषिकस्य दृष्टान्त इत्याश- ङ्क्य–स्वपक्षे इति वैशेषिकस्य प्रश्नः सन्ति सामान्यविशेषादयः सत्तासम्बन्धरहितास्सात्मकत्वे दृष्टान्ता इति प्रतिविधत्ते–

१ सि क. °चाचेदं । २ सि क. तथायुक्ती भ । ३ सि क अवस्य । ४ सि क. °र्निरात्मकत्वादेर्मि । ५ सि क. तथाप्य ।

यावत् सामान्यत्रैव सात्मकं न घटादिवत्सात्मकमिति वाशब्दोऽवधारणार्थः तद्व्याख्यानसहितो ग्रन्थः, वैशेषिकपक्षे सत्तासम्बन्धरहितसात्मकत्वदृष्टान्ताभाव चोदिते सामान्यविशेषसमवायानां सात्मकत्वात् स्यादिति गत्वार्थम्। सामान्यादीनां सात्मकत्वमप्रसिद्धमिति चेदिति दृष्टान्ते साध्यधर्मासिद्धिचोदना तत्परिहारो–न स्वरूपमिभेसादि यावद् विशेष्य तत् सामान्यमिति दृष्टान्तसाधनम्, घटपटादिस्वरूपभावविशेषणे

5 तत्रिष्वविकल्पादिनां सात्मकैः सरूपमत्वचरैर्विशेषणवत् स्वरूपमिभसत्वे सत्वभिमता[गु]णुद्धिन्यवहारधि- षयत्वात् विशेषणं सामान्यं सात्मकत्वेऽस्त्यनुत्तरमेवदिति, अत्राप्युत्तरे चोद्य सम्बधार्यम्–अस्मात् प्रत्येव दप्युत्तरं न निग्रहमेवेत्यभिप्रायः, यथावैकल्प्युत्तरे द्रव्यादीनां सविपाकवत्त्वनिरासकत्वानभ्युपगम- वचनेन सप्रसङ्गमुत्पादितं सविपाकादीनामपि सत्कारत्वप्रसङ्गवचनम् इत्यत प्रभृति समानमवधें च।

अन्यदप्यत्र ब्रूमः अत्यन्तनिरासकत्वानभ्युपगमादिति वचनेन सदसत्त्वयोरपि

10 विकल्पत्वस्य वर्ण्यते किञ्चित्सत् समस्तं सदिति एवमसदपीति सम्पूर्णनिरतिशयस्वात्मन एव तु सत्त्वात् कुतो विकल्पः सत्त्वे? अस्तु वा विकल्पवत् तत्पुनर्निरूप्य त्वया।

(अन्यदपीति) अन्यदप्यत्र ब्रूमः–अत्यन्तनिरासकत्वानभ्युपगमादित्यनेनैव तावद्वचनेन सदसत्त्वयोरपि विकल्पवत्त्वं वर्ण्यते द्विधा सत्–किञ्चित्सत् समस्तं सदिति एवम[स]दपीत्याभ्यां विक- ल्पाभ्याम्, सम्पूर्णनिरतिशयस्वात्मन एव तु सत्त्वात् [illegible] परमतव्यावर्णनार्थः, यदपि मतं परस्य

15 सदसत्त्वयोः विकल्पवत्त्वमस्तु को दोष इति तन्न भवति, सत् सत्त्वं सत्त्वमिति सतोऽतिशयाभावात् कुतो विकल्पः सत्त्वे तस्मात् सम्पूर्णमेव सत्त्वम् एवमसत्त्वमपि ततो नात्मानात्मकं सात्मकत्वेऽस्त्युक्त

सामान्यत्रैवेति सामान्यादयस्त्वेवं [illegible] –सामान्यत्रैवेति। दृष्टान्तं [illegible] –सामान्यादीना- मिति। [illegible] वैशेषिक –मेति [illegible]

20 [illegible]

[illegible] –यथावैकल्प्युत्तरे इति। [illegible] –सविपाकादीनामपीति। [illegible]

25 [illegible] –अन्यदपीति। [illegible] –सम्पूर्णेति [illegible]

30 [illegible] –तत इति। [illegible]

१ [illegible] । २ [illegible] ।

वक्तुमित्यभिप्रायः, अस्तु वा विकल्पवत् सत्त्वमसत्त्वञ्च, तत् पुनर्निरूप्य यथा कथमपि तत् स्वरूपतः, क्व वाऽऽत्मने किञ्चित् सत्त्वमसत्त्वञ्चेति विकल्प्यम् ।

अत्राह —

एतर्हि निरूप्यते एकसत्तासदसदपि, असमर्थगोवत्, एष तर्हि सामान्यसत्तासत्ताऽव्यक्तिः किञ्चित्सती न सम्पूर्णा सती, एकसद्भावत्वात् यदेकया सत्तया सत् तत् सत्तासच्च दृष्टम्, 5 स्वसत्तावत्, स्वभावसद्भावत्वाद्वा, असमवेतसत्ताकानि द्रव्यादीनि यथा स्वभावसद्भावत्वात् सत् सम्बन्धसत्तयाऽसत् तथा सत्तापि स्यात् सा असर्वगता च व्यक्तिरेव वा, एकजातीयाप तत्स्वरूपत्वात् घटवत् वक्ष्यमाणपुनर्निरूपणविकल्पत्वाच्च ।

(एतर्हीति) एतर्हि निरूप्यते, किमत्र निरूप्य ? नन्विदमेव यदेकसत्तासदसदपि—एकया स्वभावसत्तया सत् तदेवासत् सम्बन्धसत्तया, तदवस्थात् किञ्चित् सत् किञ्चिदसत्, किमिव ? असमर्थगोवत्— 10 यथा गोकार्यासमर्थो गौरेव सन् गौरित्युच्यते—असौ गौर्न भवति, तथेदमपि द्रव्यादि सदसदिति, अत्र ब्रूमः—एष तर्हीत्यादि, सामान्याख्यायाः सत्तायाः—सामान्यसत्तायाः सत्ता सा व्यक्तिः—द्रव्यादिव्यक्तिरहिता किञ्चित्सती, न सम्पूर्णा सती—स्वभावसत्तामात्रेण सती सम्बन्धसत्तया न सती—सती चासती च विकल्पवतीत्यर्थः, कस्मात् ? एकसद्भावत्वात्—यदेकसत्तया सत् सत् सत्तासच्च दृष्टम्, तद्यथा स्वसत्तावत्—यथा द्रव्यादि स्वभावसत्तया सत् एकया सम्बन्धसत्तयाऽसत् तथा महासत्तापि स्यादिति, एष एव 15

---

सत्त्वे द्रव्यसामान्यये प्रतियोगिसमानाधिकरणत्वेऽनुमतेऽपि कथम् सत् प्रतियोगिसमानाधिकरणं च वाऽधिकरणं सत्तासत्त्वसामान्ये प्रतियोगिसमानाधिकरणत्वं तत्प्रदर्शनीयं भवतेत्यत्राह—अस्तु वेति । सत्त्वं हि द्विविधं प्रागुपदर्शितं स्वभावसत्त्वं सम्बन्धसत्त्वञ्चेति, तदुभयमिच्छताप्युक्तं तत् सम्पूर्णमिति विवक्षयोच्यते यत्र तु केवलं स्वरूपसत्त्वं तत्र किञ्चित्सत्त्वमसत्त्वमेवेत्यभिप्रायेण प्राह—एतर्हीति । एकसत्तयेति या व्यक्तिरेकया सत्तया युक्ता ऐकसत्ता सती असती चेति भावः स्वभावसत्तु पुरा यथा सत्ता च एकतरा एकसत्तया पुनः सत्, एकयाऽसत्, तदेवासत्, एकसत्तासदसदिति न लौकिकसत्ता भवति बहुव्रीहि 20 'सोऽस्मिन्नेकमर्थमस्य' (पा १-१-४८) इति प्रकृत्यापत्तेः । असमर्थेति सवर्धस्थाऽसमर्थत्वेनोक्तेः । सदसत्त्वयोरव्याप्याक्तिमिति निदर्शनमाह—असमर्थेति । एष तर्हीति सामान्यस्य सत्ताऽपि सत्तासम्बन्धरहिता एकस्वरूपत्वात्सम्पूर्णा सा च स्वरूपसम्पूर्णा सा न परान् सम्पूरयितुं प्रभवति स्वरूपमात्रमात्, स्वरूपसदिति द्रव्यादि एकनियतसत्तया सत्, अत एव सदसच्च दृष्टम्, तथैव महासत्ताऽपि स्वभावसत्तयैवा सतीति सती चासती च स्यात्, न चेयापत्तिः सामान्यादेरव्यवस्थामयेन हि सामान्यादीनाम् स्वरूपमात्रस्वरूपा एवामितत्वादिति वाच्यम्, तथा सति स्वरूपसद्रूपस्य द्रव्यादेरपि न सन्ति व्यवस्था न चाऽप्रतर्कणीयत्वं तथा 25 महासत्ता अपि स्वरूपसद्रूपत्वात् व्यक्तिरहितत्वं स्वाभाव्यापत्तिप्रसङ्गादप्रतर्कणीयत्वं च स्यादिति व्यक्तिरूपैव स्यात् सा न सामान्यमिति निष्कर्षः । सामान्यसत्ताया इति महासत्ताया सत्ता स्वरूपस्य स्वभाव स्वरूपमिति यावत्, सा कीदृशी ? व्यक्ति—व्यक्तिरहिता न तस्याः काऽप्यात्मभूता व्यक्तिरस्ति अत एव किञ्चित् सती न सम्पूर्णा सतीति भावः । तत्र हेतुमाह—एकसद्भावत्वादिति स्वार्थो भावत्व सतो वा भावः सद्भावः सत्त्वेसत्त्वं एकेन सद्भाव एकसद्भावः एकया सत्तया सद्रूपत्वं यथा एकया सत् सत् एकसत्, भावप्रधानो निर्देशः एकसत्त्वम्. तत्र भाव एकसद्भावः तस्य भावस्तत्त्वादिति विग्रह 30 एकत्वसत्ता सम्बन्धिनीति प्रतिज्ञा साध्यमभ्युपेतव्यम्, तस्यैव भावं किञ्चित् सती न सम्पूर्णा सतीति हेतुरेकसद्भावत्वादिति । व्याप्तिं प्रदर्शयति—यदेकसत्तयेति स्वसत्तावत्, स्वरूपात्मवदित्यर्थः । स्वभावसत्तया द्रव्यादिसमानसम्बन्धसत्ताविरहितमिति दृष्टान्तं व्याचष्टे—यथेति । हेत्वन्तरमाह—स्वभावेति । स्वभावस्य सद्भावे भाव तस्य भावस्तस्मात्, असमवेतसत्ताकानीत्यर्थं न

---

१ सर्वासु प्रतिषु एव एव हेत्वर्थोऽन्यथा वा बोध्यते ।

हेत्वर्थोऽन्वय चाभोच्यते—समानसत्ताकत्वाच्च, असमवेतसत्ताकानि द्रव्यादीनि यथेति गतार्थम्, एतदनिष्टापादनम्, सा—सामान्यसत्ता असर्वगता च स्वविषयसर्वगता च न भवतीत्येतदपि दोषापादनम्, न सर्वत्राविषयानुवृत्तिरित्यर्थः व्यतिरेकेण वा—द्रव्यादिभ्यतिरिक्ता न भवतीति वापापादनमभिप्रायान्तरम् उभयत्रैक एव हेतुः—एकजातीयापेक्षस्वरूपत्वादिति, एकप्रकारमेकजातीयम् 'प्रकारवचने जातीयर्' (पा० ५. ३-६९) न तु 'बाह्यन्ताच्छन्दसि' (पा० ५ ४ ९), मा भूदव्यवस्थितसत्ताभिधानैकान्तिकत्वम्, तत एकजातीयापेक्षं—व्यावृत्तं स्वरूपं यस्याः सा एकजातीयापेक्षस्वरूपा, तद्भावादेकजातीयापेक्षस्वरूपत्वात्, घटवत्, सजातीयासजातीयेभ्यो व्यावृत्तस्वरूपत्वादित्यर्थः, यथा घट एकप्रकारेभ्यो व्यावृत्तस्वरूपो वैसदृश्यपर्यायाकारादिभिर्विशिष्टत्वात् पटान्तरस्वविषयव्यापी न भवति व्यतिरेकेण च न भवति तथा सत्तापि स्यादिति तस्मादयुक्तमसमर्थगोचरेऽसत्तासदसत्त्वं द्रव्यादेस्तथा सत्तायाश्चेति । द्रव्यमयुक्त—वक्ष्यमाणस्तुनिरूपकि-
10 स्यत्वात्, खपुष्पवदसत्त्वादिति ।

अनुपपत्तिविकल्पस्यास्य हेतोर्वैतानि व्याख्यानान्तराणि तद्यथा—

उभयासम्पूर्णतायां वा तभिरूप्यमेव किं सदसम्पूर्णता उतासत् आहोस्वित् सदसदिति, तत्र यदि तावत् सत् तस्य न भवति, असत्त्वात् खपुष्पवत्, नासत् सत्त्वाद्घटवत् न सदसत् स्वमतेनैव सदसतोर्वैधर्म्यात् सदसत्ताऽभावाच्च अहं पुनरेवं तर्कयामि सदसद्धर्मनिराकरणा-
15 येव तु माय इव प्रतिपत्तिर्भवत उभयासम्पूर्णतायां तदेव सम्पाद्यमेति साधर्म्यमेव ।

उभयासम्पूर्णतायां चेत्यादि, वस्तुनो द्रव्यादेः सामान्यस्य वा सत्त्वेनासत्त्वेन च भिन्नि स्सम्बन्धात्मसम्पू[र्ण]तायां पुनरपि तभिरूप्यमेव किं सदसम्पूर्णता ? उतासत् ? आहोस्वित् सद

---

हि सामान्यतायां सत्ता समवैतीति भाव । समानसूत्रमेव दर्शयति—असमवेतसत्तेति । असमवेतसत्तानि द्रव्यादीनि यथा खपुष्प तथा महासामान्यापीत्यभिप्रायस्य विशेषः । अथ सामान्यस्य असर्वगतत्वं प्रतिपादयति दर्शयति—सेति । स्वविषयेति तस्मिन्ने
20 सर्वत्र वर्तिनी भवतीत्यर्थः । अन्य प्रतिपादमाह—व्यतिरेकेण चेति । सामान्यसत्ता व्यतिरेकेण भवति, एतस्मात् व्यतिरिक्ता व्यक्तिभ्यो न भवतीत्यर्थः । इदमेव दर्शयति—द्रव्यादीति । सामान्यस्य असर्वगता व्यतिरेके इति प्रतिपादने हेतुमेवाह—एकजातीयेति एकस्मात् प्रकारात् अनेकप्रकारत्वात्, विशेषैरेकोऽनेकप्रकारजातीयार् प्रत्ययः न लोकप्रसिद्धस्वात् सुन्दरं स्यात् यथा जातिप्रत्ययादिति ननु, यदेवमेकं द्रव्यं ननु, एतत्पक्षे एकजातिमपेक्षस्वरूपत्वादिकं स्यात् तत्र तस्य हेतुरनैकान्तिकत्वमस्थितसत्त्वोऽव्यभिचारी भवतीति भाव । व्यभिचारमेव प्रदर्शयति मा भूदिति । निर्विशेषानपेक्षस्वरूपत्वं तस्यां
25 हनि भवता निरूपयितव्यम्—सजातीयेति । दृष्टान्तप्रदर्शनेऽन्वयव्यतिरेकाभ्यां दर्शयति—यथा घट इति । तथैव द्रव्यादेः सामान्यस्य तथात्वं वा व्यतिरेकलक्षणेन समवायलक्षणेन च सम्बन्धेन इति नियमयति—तस्मादिति । दोषान्तरमाह—द्रव्यमिति । सा सदसम्पूर्णता तत्त्वेन वा किं सदसत् उतासत् किं वा सदसत् ? एतदपि विकल्प्य स्वमतेन उभयेति । उभयेति उभयात्मके निरूप्यमाणा चासौ वस्तुनोऽसम्पूर्णतायामित्यर्थः इति पक्षान्तरद्योतनम्, पूर्वं सम्पूर्णत्वविरोधिकत्वादेव एव यत्र नियुक्ता तत्र विकल्पमनुक्रम्य विचारितत्वात् । विकल्पयति विकल्पं दर्शयति—किं सदसम्पूर्णतेति । प्रथमं विकल्पं

---

१ सि क वस्त्वादुक्त । २ सि क °प्रकारेभ्यो । ३ सि क हेतोरेवैतानि व्या ।

सत् ? इति, तत्र यदि तावत् सत् सत्त्वं भवति, कस्मात् ? असत्त्वात्, खपुष्पवत्, उभयासम्पूर्णत्वा-
भ्युपगमाभासिद्धम्, असत्त्वस्यापीष्टत्वात्, नासत्—न च तदसत् भवत्याद्यदृष्टम्, सत्त्वमपि नासिद्धमुभ-
यासम्पूर्णत्वादेरेव, न सदसत्—नापि तत् सदसत्, उभयरूपमित्यर्थः। त्वन्मतेनैव सदसतो वैधर्म्यात् 'कार्ये
सदसत्त्व नेति' वचनात्, किञ्चान्यत् सदसत्ताऽभावात्—यथा सत्तासम्बन्धात् सद्भवति तथा सदसत्ता-
सम्बन्धात् सदसत् स्यात्, असत्तासम्बन्धादसद्वा स्यात् न चैवं भवितुमर्हति, अदृष्टानिष्टत्वात्, तस्मा- 5
दसत्ताभावात् सदसत्ताभावाच्च नासत् सदसदसम्पूर्णमिति, अहं पुनरेव तर्कयामि त्वया नोपलक्षिता
सदसद्वैधर्म्यनिराकरणायैव तु प्राय इयं प्रतिपत्तिर्भवतः किञ्चित् सत् समस्तं सत् किञ्चिदसत् समस्तास-
दिति ब्रुवतः, उभयासम्पूर्णतायां तदेव सत्तासत्त्वेति सदसतोः साधर्म्यमेव न वैधर्म्यमिति प्रतिपन्नत्वादिति।

योऽपि चासच्छब्दस्यागुणगुणवत् नास्य सदित्यसदिति बहुव्रीहिसमाश्रयात् सदर्थवस्तु-
मेवेति विकल्पः, असदिति सत्तासम्बन्धरहितमित्यर्थः, सोऽप्यनुपपन्नः, कृतकृतान्तरूपार्थवि- 10
प्रकृष्टान्तरत्वात् कथं सत्ता सत् स्यात् यदभावाच्चास्य सदित्यर्थं भाव्येत।

योऽपि चासच्छब्दस्येत्यादि भाष्यम् सत्तासम्बन्धरहितमित्यर्थ इति पूर्वपक्षप्रत्युच्चारणम्,
सोऽप्यसौ नास्य सदित्यसत्, अगुणगुणवदिति तस्य बहुव्रीहिसमाश्रयात् सामान्यविशेषसमवाये सदि-
सामान्यसत्तया न सम्बद्धम्, तस्मादसच्छब्दस्य सदर्थवस्त्वमेवेति विकल्प इति ततोऽपरमुच्यते सोऽप्यनु-
पपन्नो विकल्पः कृतकृतान्तरूपार्थविप्रकृष्टान्तरत्वात् भवमस्ति चेति सत् कृदन्तरूपम्, अर्थश्चास्य द्रव्य- 15
भूतः सतो भावः सत्तेति तद्धितान्तरूपम्, अर्थश्चास्य 'यस्य [गुणस्य भावात्] द्रव्ये शब्दनिवेश-
स्तदभिधाने त्वतलौ' (महा० ५-१ ११९) इति सतोऽसाधारणं स्वरूपं सदन्तरस्यापि सामान्यमेवेति

---

एतमपि—तत्र यदीति। हेत्वसिद्धिं निराकरोति—उभयेति। द्वितीयं दूषयति—नासदिति। तृतीयं दूषयति—न सदसदिति।
हेत्वन्तरमाह—वैधर्म्यादिति। तत्रार्थान्तरं कारयितुं तदीयं वचनं प्रमाणयति—कार्येति। अथ सत्तायोगात् सदित्युच्यते तथाऽसत्ता-
योगात् सदसत्तायोगाच्चासत् सदसच्च वाच्यम्, नैतयोर्भवतामिष्टम्—किञ्चान्यदिति। एवञ्चासत् उभयासम्पूर्णं न स्यात् 20
सम्पूर्णमेव साधितमाह—तस्मादिति। किञ्चिन्नसमस्ताभ्यां सदसतोरसम्पूर्णतामनुमन्वानो भवतो वाद सदसतोर्वैधर्म्यनिराक-
रणपर्यवसायत्वं तत्त्वतः प्रायः सदसतोः साधर्म्यमेव इति तदभ्युपगममाह—अहं पुनरिति। कथं वैधर्म्यनिराकरणं भवतीत्यत्राह—उभयेति।
ननु अगुणगुणवदसत्त्वं नास्य सदित्येव मन्यते न बहुव्रीह्यन्तत्वमसति तत्त्वं कथं तत् तत्र भवतीत्यत्र शङ्कयति भावा-
न्तरमिति शङ्कया प्रतिविधानमारभते—योऽपि चेति। व्याख्याने—योऽप्यसाविति। कृदन्ततद्धितान्तयोः शब्दयोरत्यन्तविप्रकृष्ट-
त्वेन सच्छब्दवाच्यस्य सत्तासम्बन्धरहितत्वमिष्टमेव सत्ता न सद्भवितुमर्हति इत्याशयेन समाधत्ते—कृतकृतान्तेति। कृदन्त- 25
तद्धितान्तयोरत्यन्तविप्रकृष्टार्थयोरन्यतरस्याभावेनान्यतरस्याभावोऽसम्भवीति भाव। तदेव स्फुटयति—भवतीति।
तद्धितनिष्पन्नो त्वतलोरर्थमाह—अर्थश्चास्येति। यस्य चेति। यस्य गुणस्य भावात् द्रव्ये शब्दनिवेशस्तदभिधाने त्वतलौ
भवतो भवत इति वैयाकरणानां नियमोऽयम्, तन्मते सत्ताया अपि स गुण इति गुणत्वमतो सत्ताशब्देऽपि गुणत्वेन ग्रहणम्,
एवञ्च प्रकृतिप्रत्ययार्थयोर्भेदः तद्धितान्ते सत्ताभिधाने त्वतलौ भवत इति भावार्थकत्वस्य तथा च कृदन्ततद्धितान्तस्य भेदावगमात्,
तद्धितान्तस्य तदसम्बन्धस्य भेदसम्भवात् सत् सत्तायोरत्यन्तभेदेन सत्ता सदिति वक्तुं न शक्यत इति निगमयति—सतोऽसाधा- 30
रणमिति। तदर्थं सच्छब्दार्थसामान्यं नास्ति सत्ता सदिति विवक्षितं नास्य सत् तस्यासत्त्वमपीति न बहुव्रीहि वक्तुं शक्यत इत्यर्थ—

---

१ सि. क्ष. डे. साधर्म्यमेव च वैधर्म्यमेव च वैधर्म्यमिति। २ सि. क्ष. डे. सुत्ससत्तयेति।

द्रव्यतोऽर्थान्तरमनन्यमेवारम्भयोः कथं सत्ता सत् स्यात्, सद्भावाभावात् सदिवेव–द्रव्यादि भाव्येव, एवं यावत् सद्गुणो नैव सत्तोक्तिः ।

अथ नास्य सदिति सत्तापि स्वभावसत्तया सती सा यस्य नास्ति तदप्यसद्द्रव्यमुच्यते गुणत्वाभावाद् गुणागुणत्ववदिति, एतदेव ननु प्रस्तुतं सदादिपदविशेषाभिधानद्वारेण द्रव्या
5 दीनामेव त्रयाणां विकल्पः परस्परतश्च लक्षणादिना व्यावृत्त्यासितो भवताम्, तत्र सदादिपदविशेषो द्रव्यादीनामेव न सामान्यादीनामित्युक्त्वा सामान्यादीनां सत्त्वमुच्यमानं स्ववचनविरोधाय, सदा मौनव्रतिनः कोऽस्मीति वचनवत् ।

अथ नास्य सदित्यादि, अथ मा भूद्व्याख्यार्थविभक्तप्रसङ्गात् तन्त्वेन तद्विशार्थानभिधानाच्च व्यार्थसंहरणोऽप इति सत्तापि स्वभावसत्तया सती यस्याः सत्त्वात् सा यस्य नास्ति तदप्यसद्द्रव्यमु-
10 च्यते, यथा गुणत्वाभावादगुणत्वम्य गुणः कर्म चोच्यते, गुणत्वाभावात् गुणागुणत्ववत् तथा सद्भाव सत्ताभावात् सत्त्वादसदित्युच्यमानमदोषमित्यत्रोच्यते एतदेव ननु प्रस्तुत–'सदनित्यं द्रव्यवत्कार्यं कारणं सामान्यविशेषवदिति द्रव्यगुणकर्मणामविशेषः (वै अ १ आ १ सू ८) इति सदादयः पदवि-शेषा द्रव्यादीनामेव त्रयाणाम्, न सामान्यविशेषसमवायानामित्यविशेषाभिधानद्वारेण त्रयाणां विकल्पो-मानानां परस्परतश्च लक्षणादिना व्यावृत्त्यासितं भवताम् अस्माभिश्च द्रव्यव्यतिरिक्तगुणाद्यभावात्
15 सामान्याद्यभावाच्च सत्त्वेनाविशेष एव [अ]विशेषेऽस्माद्द्रव्यादित्रयं सामान्यादित्रयं वा खपुष्पतुल्यं स्यादित्यासञ्जितम् प्रोक्तद्वारेण चारम्भवादिनामिति तत्र सदादिपदविशेषो द्रव्यादित्रयविषय एव न सामा-न्यादित्रयविषय इत्युक्त्वा सामान्यादीनां सत्त्वमुच्यमान [न] सदिति सदिति स्ववचनविरोधाय सदा मौन-व्रति[नः] कोऽस्मीति वचनवत् ।

---

सद्भावाभावादिति ... । ननु ... द्रव्यादिषु सत्तापि ... सत्यम्
20 ... यथा गुणाभावात् सर्वं द्रव्यं वा गुणे वा कर्मणि वाऽगुणत्वं ... भवेदिति । ... सत्तात्मेन रूपेण तथा ... द्रव्यविशेष... मा भूत् किन्तु ... तथा ... दोष ... मौन-व्रतादिवत् ... अथ मा भूदिति ... तथा सत्त्वात्–सत्ता ... तथा च ... नास्य सदित्यादि ... द्रव्यादि ... इति भाव । ...
25 यथेति गुणत्वाभावात्–गुणत्वाभाववत् । ... द्रव्याणां ... गुणत्वाभावात् ... द्रव्यादयो ... इति भाव । गुणत्वाभावादिति ... गुणत्वाभावादिति । ... सद्भावेति ... यथा ... द्रव्यादि ... इति भाव । अत्र द्रव्यादिषु ... यत्र द्रव्यादीनां त्रयाणां
30 ... परस्परतश्च ... द्रव्यादीनां ... सामान्यादित्रय ... तत्र ... सामान्यादीनां ... एतदेव ननु प्रस्तुतमिति ... । ... 

१ मि द. ए. ई. ... । २ मि ... विशेषाभिधान ।

यत्तु सत् गुणस्य समवायिकारणं द्रव्यादेः कार्यस्य, तदस्यास्त्येवेति तत्किमिति नास्त्युक्तम्? ननूक्तं सामान्यं समवायि सत् तदस्य नास्ति तदपेक्षयोक्तमसदिति, सद्धि सदेव न भवत्याव-योरपि मतेन, किं तर्हि युक्तं वक्तुम्? नास्यासत् तदिदमनसदिति, न हि खपुष्पं यस्य नास्ति सोऽसन्नित्युच्यते किन्तु खपुष्पमात्रमसदिति प्रतिषेधद्वयार्थत्वात्।

यत्तु सदित्यादि, यत्तु सत्त्वं गुणस्य सत् तत्समवायिकारणं द्रव्यादेः कार्यस्याऽऽश्रय परमाणु- 5
तन्तुकपालादि, घटपटादिपरिणामिकारणं तदस्यास्त्येव बीजभूतं साधयिष्यमाणं, तत्किमिति नास्त्युक्तम्? न स्वर्थसत्त्वादिना—बहुव्रीहिणा नास्य सदस्ति तदिदमसद् द्रव्यादिकार्यमिति तस्य गुणस्य सतोऽस्तित्वात् युक्तं वक्तुम्, न च मम मत[तौ]मसदिति वस्तुरूपेण द्रव्यादिकार्यस्य सत्त्वादिति वा ननूक्तं सामान्य समवायि सत्, तदस्य नास्ति, यत्सम्बन्धाद् द्रव्यादिकार्यं सद्रूपवेशं लभते इति तदपेक्षयोक्तमसदिति, अत्रोच्यते यत्त्वसौ नास्ति समवेतमिति सामान्यं तदपेक्ष्य न युक्तं वक्तुम्—नास्य सदिदमसदिति, यस्मात् 10
तत्सदेव न भवत्यावयोरपि मतेन—स्वमतेन तावत् सदविशेषाभावात् सामान्यादित्रयस्य द्रव्यादेरेव समवायविशेषात् भवन्मतेन द्रव्यादिव्यतिरिक्तसामान्यविशेषसमवायासत्त्वादेव तस्यैव विचारस्य प्रस्तुत-त्वात्, तस्यासत्त्वात् द्रव्यादि कार्यं नास्त्यस्य सत्तदिदमसदिति बहुव्रीहिणा वक्तुं शक्यम्, किं तर्हि युक्तं वक्तुम्? नास्यासत् तदिदमनसदिति तस्यासत्पस्य नास्ति तत्सदेव अनसदित्यर्थः, तन्निदर्शनेन—नहि

---

अत्र मतान्तरेण पूर्वपक्षमाशङ्कते—यत्तु सदिति कार्यं सदा स्वकार्यैकोपादानं अप्युच्यते द्रव्यादि किन्तु समवेतं 15
सामान्यं स्वकार्येकोपादानं तदसदुच्यते सत्तासामान्यसम्बन्धोऽभिव्यक्तत्वात्। उत्पत्तिप्राक्कालमविच्छेदे द्रव्यादावभावादित्यसत्त्वं निरूपयति—यत्तु सत्त्वमिति कार्यरूपत्वाऽनुभूयमानत्वाद् द्रव्यस्य समवायिकारणत्वाऽनुमीयमानस्य नित्यत्वात् एवो-त्पत्तिपक्षरूपत्वा गुणस्य सत्- समवायेनाश्रयस्य सत्त्वात् तदपेक्षया द्रव्यादिकार्यं न सत्तासम्बन्धोऽभावात्मेति वक्तुं शक्यम् तस्य सामान्यत्वात् असमवायाच्चेति भावः। न स्वर्थसत्त्वादिनेति अर्थेन सत्तादिना येति भाव द्रव्यं गुणः कर्म चार्थसंज्ञैरोक्तत्वं तत्र वैशेषिकेण्वया परिभाषितत्वात्, यथा 'अर्थ इति द्रव्यगुणकर्मसु' (वै ८-२-३) तेन तेन निमित्ताऽर्थे- 20
मानत्वात्। सत्त्वेन यदाऽर्थो गम्यते तदा कथमिति बहुव्रीहि भवति सत्त्वसम्बन्धं गम्यते तदा तत्पुरुष स्वार्थसत्त्वेनाद्-बहुव्रीहिरेवेति, सत्त्वार्थसत्त्वादिनेति पाठेऽपि सत्त्वार्थे षष्ठ्याः समानार्थे तदर्थे बहुव्रीहि। 'सत्त्वार्थे च। व बहुव्रीहिरिति वक्तव्यमिति' महाभाष्यात्। कुतोऽयुक्त बहुव्रीहिरित्याह—तस्य गुणस्येति। तद्गुणस्यापेक्ष्याभावात्—न च सतेति। तर्हि कथमसदित्युच्यते—सामान्यमिति अनुक्तार्थं समवायप्रतियोगित्वमनुपादाय नास्य सदिति वक्तुमुक्त इति भाव। समवाय-प्रतियोगित्वमात्रमुपादाय नैवं वक्तुं युक्तमित्याह—अत्रोच्यत इति। उभयमतेन सत्त्वसामान्यस्याऽभिमतं सामान्यं सदेव न 25
भवति तत् कथं तत् असत्त्वं निराकरोति—यस्मादिति। मन्मते सदविशेषेण द्रव्यादित्रयस्याऽभेदः न तु सामान्या-दित्रयस्य, तस्मात् तदसत्, भवन्मते तु सामान्यादीनां द्रव्यादिभिरव्यतिरेकात् भिन्नस्येऽस्वरूपत्वं सामान्यं न सदिति दर्शयति—स्वमतेनेति। एवं सामान्यस्य सत्त्वानुपपत्तेः स्वमतेऽप्यभावं नास्य सत्सम्बन्धात् द्रव्यादीति नोपपन्नमितम्, अपि तु सामान्यसम्बन्धोपादाय [illegible] युक्तं [illegible]—तस्यासत्त्वादिति। सामान्यसम-त्वाभिमतं सदेवासदिति [illegible] सदेव भवतीति भाव। ननु 'न 30
हि खपुष्पं यस्य नास्ति सोऽसन्नित्युच्यते' इति [illegible] 'अभिप्रायेऽर्थे पुनरन्यत्र न नपुंसकलिङ्गं प्रयुज्यते' इति नियमेन नपुंसकलिङ्गे प्राप्ते तत्कथं

---

१ सि. क. तत्किमिति न त्वो। २ सि. क. प. दे. कार्यस्याऽभ्य। ३ सि. के. प. दे. नास्त्यसम।

खपुष्पं यस्य नास्ति सोऽसन्निमित्युच्यत इति सामान्यापेक्षया नपुंसकनिर्देशे प्राप्ते पुल्लिङ्गनिर्देशोऽर्थसामाना
धिकरण्यात्, तदर्थनार्थः संस्तु सोऽन्य निमित्तात् भवति–सदस्मात्यस्तीति सन्निमित्तम् यथा गोरस्यास्तीति गोमान्
बहुव्रीहिः स्वपेक्ष एव खलेनार्थो युज्यते नान्यथेति तथा तत्पुरुषेऽपि योज्यम् एवमेव वैयर्थ्यनिदर्शनम्,
कस्मात् ? प्रतिषेधद्वयार्थत्वात्–यथा प्रतिषेधद्वयसमर्थत्वेन दशमनगुरिति तथा द्विःप्रतिषेधस्य प्रकृत्याप-
5 त्तेर्न्यासमित्युक्ते सन्नेव भवितुमर्हति नासत् सदर्थत्वात् ।

अत्राह–

ननु द्विविधभावत्वात् सत्तासद्वचनेऽपि न दोष इति, ननु तदेवद् भवन् विचार्यते किमेकविधमेव निरतिशयमसम्भवत् ? उत खम्भवत् किञ्चित् सत्, समस्तं सदिति ? तस्य द्वैविध्यस्यासमात् प्रत्ययसिद्धेः, सत्तासम्बन्धरहितत्वमपि सत्तोपपत्तिरहितत्वमेव प्रसक्तम् ।

10 (नन्विति) ननु द्विविधभावत्वात् सत्तासद्वचनेऽपि न दोषः–स्वभावसत् सम्बन्धसदिति च द्विविध सदुक्तम् तस्मात् सत्तायाः सामान्याख्याया अपि स्वभावसत्त्वमस्तीति नास्य सत् तदिदमसदिति वक्तु युक्तम् एवेत्यत्रोच्यते–ननु तदेवेद भवन विचार्यते किमेकविधमेव निरतिशयमसम्भवत् ? उत खम्भवत् किञ्चित् सत् समस्त सदिति ?–स्वभावसत् सम्बन्धसदिति च तस्यैव द्वैविध्यस्यासाम् प्रत्य-सिद्धिः सत्तासम्बन्धरहितत्वमपि सत्तोपपत्तिरहितत्वमेव प्रसक्तम्–यथाऽसम्बन्धमेवोक्तं न किञ्चित् [सत्]
15 सैव सत्–स्वभावसत् सम्बन्धसमासमेति विकल्पद्वयार्थ सतोऽस्तीति, अथवा खपुष्पसम्बन्धनिरहितमविद्य-मानत्वात् अर्थपरत्वेनिरवधीर्य सर्वमेवोक्तम् तत्सम्पूर्णनिरतिशयं सैत्वमसत्त्वमेवैतस्य प्रतिपादनार्थमिति ।

अत्र केनचित् पुष्पत्वेन कस्मात् खपुष्पं वृक्षकेसरमकरन्दादिषु कारणेषु न समवैति ?

---

पुल्लिङ्गेन निर्देशत्वे विना एवमस्मात् कस्यस बहुव्रीहौ लैङ्गिक्यन्निमर्थसमानाधिकरणेन अन्यपदार्थे (पा २.२.२४) इति वक्तोर्गमितिव्येरर्थस्वसमानात् तदिदेयत्वात्तस्ये पुल्लिङ्गतया निर्देश इत एतदुक्तम्–सामान्यापेक्षयेति । कस्तत्र
20 तदित्यस्य भवति तदभिधान–संस्त्विति । तत्र कारणमाह–बहुव्रीहिरिति नास्मात्यस्ति हि बहुव्रीहिनिमित्तानम्, बहुव्रीहिमन्यपदार्थेऽभ्युपगम्यते अन्यार्थेति सम्बन्धोऽन्यपदार्थे समासो भवत्य सम्बन्धपुरुषत्वेन सम्बन्धग्राभोऽन्यपदार्थ तथा धात्वाभिधित सम्बन्धी भवेत् न तस्य प्राक्तेन तस्य सामानाधिकरण्यम्, तस्मात् यस्य स भविष्यत् स समानाधिकरण्यार्थ-मस्येति हृस्वभाव एवान्यपदार्थ इति सनिरुक्तमन्वयस्य एव बहुव्रीहि तस्मात् असदितीति सति एतार्थे युज्यते भवति तत्पुरुषसमासेऽपि च पुंस्त्वात्मैव सत एवासदित्यपीति चैयम् । पुनर्वाद्यर्थ सत्ताया सम्बन्धसत्वेनैव सत्तापेक्षया द्रव्यादे-
25 रसत्त्वं वक्तुं वक्तव्य इत्यपदते–नन्विति । मात्वर्थं भवार्थं व्याचष्टि–स्वभावसदिति । भावस्य द्वैविध्य एव हि विचार्य भवति किं निरतिशयत्वं सत्[1] किं वा निरतिशयमसम्भवात्मना सनिरूपमिति तस्मात्तस्यात् प्रत्यक्षिमुत्पादन वक्तुमुच्यते एत-द्भेदोत्तरवादी–ननु तदेवेति । उभयात्मपि प्रत्युत्पत्तिप्रोपपत्तेरभावस्यतामसम्बन्धरहितत्वेनासत्त्वमेवमपि न सम्बन्धिताद्-सत्तासम्बन्धेति । स्वपतीति प्रेक्षमा एकवादी–यथेति, प्रत्युतैव भवेत् तद्विति मत । अथवा भवैतदसम्बन्धारभ्य वक्तुं सम्पूर्णनिरतिशयमेव एवं भवत्यस्य भवतीकेनाप्यस्यात्मार्थं तस्यैव विशेषमिदमपेक्षात् यथेति । अथ सत्ताप-
30 मस्मात् मात्मपि द्रव्यादे कार्येषु एवं सावयिनु निराश्रितोयोर्थाति भावयितु वक्तुमुच्यते–अत्र केनचिदिति । कार्येषु

---

1 तर्षोतु प्रविशु कस्मात् निषधत्वमपि सत्त्वात्मनीति सत्वात्मत्वा गौरस्यास्तीति । २ सि क. सत्ता । ३ सि क. सम्बन्धमसत्त्वात । ४ सि. क. °सत्तासमिति । ५ सि क. सत्त्वमसदसमेवेति ।

इति, वयमत्रोपपत्तिं ब्रूमः, अद्रव्यत्वात् अमूर्तत्वात् असन्निहितत्वात् वन्ध्यापुत्र इव, पुनः पृच्छेत् कश्चित् कस्माच्चम्पकपुष्पं दण्डादिषु तु समवैति? इति, सद्द्रव्यत्वादेरिति।

(अत्रेति) अत्र कश्चित् पृच्छेदेव कस्मात् खपुष्पं दण्डकेसरमकरन्दादिषु कारणेषु न समवैतीति? वयमत्रोपपत्तिं ब्रूमः, अद्रव्यत्वात्-निर्बीजत्वादित्यर्थः द्रव्यं सामान्यमाश्रय इति पर्यायाः, कस्मा निर्बीजमिति चेत्-[अ]मूर्तत्वात्-अतीतेऽधुनाऽनागते काले न मूर्तं हि तत्, मूर्तद्रव्यस्य त्रिकालव्यापि-त्वात् आकाशमूर्तवत्, अमूर्तत्वादकारणत्वादद्रव्यत्वादित्यर्थः, तत्कुत इति चेत्-असन्निहितत्वात्, यत् सतत भवति तत्सन्निहितम्, सन्निहितमेव हि भवति, असन्निहितं नैव भवति वन्ध्यापुत्र इव-वन्ध्यायां स्त्रीभावानाविर्भावनात्मसन्निहितः [पुत्रः], अथवाऽद्रव्यत्वादसन्निहित नार्भूतत्वादिति पर्यायत्रयमेवेति, पुनः पृच्छेत् कश्चित् कस्माच्चम्पकपुष्पं दण्डादिषु तु समवैतीति-तुशब्दः खपुष्पात् तस्य विशेषं दर्शयति, अत्रोच्यते विशेषः सद्द्रव्यत्वादेरिति स एव हेतवस्तुल्यव्याख्यानाः, एष खचम्पकपुष्पयोर्विशेषोऽ-सत्त्वा[त्]सत्त्वाच्च भवति, इयत्र भावाभावयोः प्रमोपक्रमस्वरूपविशेषव्याख्या।

तथा च द्रव्यादीनि प्राक् सन्ति, तस्यामवस्थायां सत्तयाऽभिसम्बध्यमानत्वात्, यथो-त्पत्त्युत्तरकाले सत्तयाऽभिसम्बध्यमानान्युत्पत्त्यवस्थायां तान्येव, अमूर्तक्रियागुणव्यपदेशानु-त्पत्त्यवस्थमपि कार्यं सतः प्रागपि सत्, सत्तायाः सम्बन्धित्वात् भवनात्, आकाशवत्, इदा-नीमपि वा न सत्तया सम्बध्येत कार्यम्, प्रागसत्त्वात् खपुष्पवत्।

---

खपुष्पस्यासमवायित्वे तत्र हेतुत्रयमित्याह-वयमत्रेति। अद्रव्यत्वादिति नास्ति द्रव्यं यस्य तदद्रव्यम्, तद्भावस्तत्त्वात्। ननु निमन्त्र्य भावाभिप्रायमिदं गुणक्रियाद्रव्यम्? किं वा कारणसमवायिकारणं द्रव्यं यस्य तदद्रव्यम्? अथ वा अन्-यदेव द्रव्यमिति नैकत्वम्? इत्याशङ्क्याह तदर्थमाह-निर्बीजत्वादिति अकारणत्वादित्यर्थः उत्पत्तिमत्तागुणपरिणामकारणं द्रव्यं तदस्य नास्तीति भावः। द्रव्यमिति सामान्यं कारणमित्यर्थः सामान्यं अनियतमसमवायिनिमित्तमित्यर्थः परिणामाय गुणक्रियादीनामाधारभूतं द्रव्यं उत्पत्तिमत्तां परिणामिकारणमन्यदपि आश्रयं द्रव्यमित्यर्थः। खपुष्पस्य निर्बीजत्वमेव कथमित्या-ह-अमूर्तत्वादिति मूर्तता भावसामान्ये भावे च 'नपुंसके भावे क्तः' (पा ३।३।११४) इति सूत्रात्, यस्य कालत्रयेऽपि मूर्तं नास्ति तत् खपुष्पादि अमूर्तमुच्यते यथाऽऽत्मनः क्वापि मूर्तं भवनं नास्ति तथैव भावः। अकारणत्वादिति खपुष्पादेरद्रव्यत्वादकारणत्वममूर्तत्वादमूर्तत्वमिति भावः। अमूर्तत्वमपि खपुष्पादेः कुत इत्याशङ्क्याह-असन्निहितत्वा-दिति कार्ये सन्निहितमेव हि भवति नासन्निहितम्, खपुष्पं तु न क्वापि सन्निहितं तस्मात् अमूर्तममूर्तत्वादद्रव्यम्, अद्रव्यत्वात् दण्डादौ न समवैतीति भावः। अमूर्तत्वादिनामसन्निहितत्वस्य वैधर्म्येण प्रदर्शयति-यत्सततमिति। सततभवनस्य निवर्त्यं उपपत्तिं सूचयति-सन्निहितमेवेति। एतद्व्यतिरेकमाह-असन्निहितमिति। कार्ये यत्र सन्निहितं तदेव भवतीत्यर्थः। दृष्टान्तमाह-वन्ध्यापुत्र इति। ननु असन्निहितत्वमद्रव्यत्वमेव तस्मात् कुतो न समवैतीति चेत् तत्र-स्त्रीत्वेऽपि गर्भनिर्वृत्तिविरहादित्याह-अथवेति। द्रव्यं मूर्तं सन्निहितमिति पर्यायाः, कार्यं हि द्रव्यं मूर्तं सन्निहितं भवति असद-द्रव्यममूर्तमसन्निहितत्वे कार्यासम्भवात् द्रव्यत्वादेव तयोरेतयोरद्रव्यत्वादीनां पर्यायत्वमिति भावः। सद्द्रव्यत्वेन समवेत-त्वमिति समर्थयितुं प्रश्नयति-पुनः पृच्छेदिति। समाधत्ते-सद्द्रव्यत्वादेरिति यत् विद्यमानं द्रव्यं कार्यं यस्य तत् सद्द्रव्यं तद्भावः सद्द्रव्यत्वं आदिना अमूर्तत्वासन्निहितत्वयोर्ग्रहणम्। तथैव खपुष्पचम्पकपुष्पयोः कारणत्वाकारणत्वाभ्यां समवायासमवायि-त्वरूपो विशेष उपपद्यत इत्यादि सत्तासम्बन्धात् प्रागपि सत्त्वमेवेति सूचयति-एष इति। भावाभावयोः खपुष्प-पुष्पयोः सदसत्त्वप्रतिपादनमित्यर्थः। एवं तयोर्विशेषे सिद्धेऽनुमानप्रयोगं दर्शयति-तथा चेति। द्रव्यादीनि प्राक् सन्तीति

---

१ सि॰ व्यादमूर्तमिति।

तथा च द्रव्यादीनि प्राक् सन्तीत्यादि, अत्रानुमानं यत्सामयस्थायामुत्पन्नमात्राणि द्रव्या-
दीनि सन्त्येव सत्तयाऽभिसम्बध्यन्ते इतीष्यते तस्या अवस्थायाः प्रागपि सन्तीति प्रतिज्ञा तत्सामयस्थायां-
मेवसाभिसम्बध्यमानत्वात्, यत्सामयस्थायां सत्तयाऽभिसम्बध्यन्ते तस्या अवस्थायाः प्रागपि सन्त्येव यथाग्नि-
घयोरुत्पत्त्युत्तरकाल मेवसत्ताऽभिसम्बध्यमानमपि उत्पत्त्यवस्थायां तान्येव तयोरुत्पत्त्यवस्थायाः प्रागपि स्तुरिति,
अभूतक्रियागुणव्यपदेश्यमुत्पत्त्यवस्थमपि कार्यं ततः प्रागपि सत् सत्तायाः सम्बन्धित्वात् तत्कालद्रव्या-
दिवत्, किमुक्तं भवति सत्तासम्बन्धित्वादिति ? अत आह—भवनात्—अभूतक्रियागुणव्यपदेशं भवद्भवत्
कार्यं ततः पूर्वमपि वस्तुस्वरूपमेव नाभावः इदानीं मायाकाशवदिति तद्विपर्ययं—इदानीमपि न सत्तया
सम्बध्येत कार्यम् प्रागसत्त्वात् खपुष्पवदिति विपर्ययेणानिष्टापादनसाधनम् भवदेव हि भवति गगन-
वत् नाविद्यमानम् अश्वविषाणवदिति ।

अन्यथाभूतत्वाच्चेति चेन्न, अन्यथाभवनेऽपि तदनन्यथाभवनात् प्रत्यक्षतः, मृत्त-
न्त्वादित्वभावानतिक्रमात् सजातीयासजातीयेतरस्वभावभूतत्वात्, सुचिरादपि तन्तुत्वाच्च
दग्धीभूतपटवत् ।

(अन्यथेति) अन्यथाभूतत्वाच्चेति चेत्—स्यान्मतं प्रत्यक्षेण तन्तुभ्योऽन्यथा पटभवनात्
प्रत्यक्षविरुद्धं प्रागपि सत्कार्यमिति वचनमिति चेत् तन्न प्रत्यक्ष[विरुद्ध]मन्यथा भवनेऽपि तदनन्यथाभवन-
मेव प्रत्यक्षतः किं कारणं ? मृत्तन्त्वादित्वभावानतिक्रमात्—अनतिक्रान्ततद्भावत्वादित्यर्थः दग्धीभूतपटवदिति

प्रतिज्ञाया विवक्षितार्थ—अत्रानुमानमिति द्रव्यादीनामुत्पत्तिप्रथमकालीना एकाऽवस्था, उत्पत्तिकालीना [illegible] अन्या च सत्ता-
सम्बन्धकालावस्था उत्पत्तिकाले द्रव्यादीनि [illegible] उत्पन्नं कार्यं [illegible], तदुत्तरकाले च सम्बध्यन्ते
[illegible] सत्तासम्बन्धात् [illegible] पूर्वमुत्पत्तिकाले द्रव्याणि [illegible]
[illegible] द्रव्यादौ सत्त्वमत्र साध्यते सन्त्येव—[illegible] । साध्यमाह—तस्या अवस्थायामिति सत्ता-
सम्बन्धित्वात् [illegible] । उदाहरणमाह—यथाग्निघटयोरिति । सत्तासम्बन्धात् प्राक्काले द्रव्यादौ सत्त्वे साध्ये
[illegible], यथैव [illegible] तथैव [illegible] नामान्तरमाह—अभूतेति न भूत क्रियागुणयोर्व्य-
पदेश [illegible] कार्यं
[illegible] तत्र गुणक्रिययोरभावात् [illegible] तत् पूर्वमपि सत् भवतीति प्रतिज्ञा हेतु सत्तासम्बन्धित्वात् निदर्शनं
[illegible] । [illegible] हेतुरुपपत्तिरूप [illegible] द्रव्यादौ सत्तासम्बन्धानमु-
[illegible] इति विचार्य किमुक्तं भवतीति । [illegible]—इदानीं मायाविति न इदानीं भाव
च पूर्वमपि भाव एवेति निदर्शनमाह—आकाशवदिति । तद्विपर्ययं—[illegible]
मार्त्यमस्तीति भाव [illegible] । ननु तन्त्वादिकारणे [illegible] कार्यस्य प्रत्यक्षेण [illegible] पूर्वमपि
सत् इतिति [illegible]—अन्यथेति [illegible] । तत्राह—तन्तुभ्य इति [illegible] प्रतिज्ञाया
प्रत्यक्षबाधितत्वमिति भाव । [illegible] प्रत्यक्षविरोध [illegible]
[illegible]—तदेति । अन्यथा भवनेऽपि [illegible] हेतुमाह—मृत्तन्त्वेति—[illegible]
प्रत्यक्षप्रतिषेधक [illegible] हेतु [illegible] प्रत्यक्षप्रतिषेध [illegible]ऽभावः
[illegible] इति भावः—अनतिक्रमेति [illegible] कार्यं दर्शनात्
[illegible] भाव । निदर्शनमाह—दग्धीभूतेति [illegible] । ननु [illegible]

१ सि. क. यथा म × ×, [illegible] । २ सि क. [illegible]-
[illegible] । ३ [illegible] कार्यकारणा [illegible] ।

दृष्टान्तो यस्यते, हेतोरस्य व्याख्या—सजातीयासजातीयेतरस्वभावभूतत्वात्—घटस्य सजातीयानि घटान्तराणि, असजातीयानि पटादीनि, तेभ्य उभयेभ्य इतरोऽन्यो घटः सजातीयासजातीयभिन्नो देशकालाकारप्रमाणस्वादिभेदात्, नन्वेवं सजातीयासजातीयभिन्नत्वे स्वकारणेभ्योऽपि भिन्नत्वात् प्रागसत्त्वमेव प्राप्तमर्थस्यैवमायुक्तम्, स्वभावभूतत्वादिति विशेषणोपादानात्, स्वसमवायिकारणभूतपरमाणुद्व्यणुकादिरूपरसापारमरूपपरिणामस्वभावेनैव भूतत्वादिति तदर्थानतिक्रम एवैष व्याख्यातो भवति, किञ्चान्यत्—सुषिरादपि 5
तत्त्वात्—घटमल्लकाकारादिभेदे सत्यपि मृत्पिण्डावस्थासु मृद्भस्मागतरूपादिस्वरूपानतिवृत्तेः परमाणुरूपादित्वस्य एव घटः तस्मादन्यथा भवनेऽपि तदनन्यथाभवनमेव, किमिव ? द्रवीभूतघटवत् यथा मालव नगरे घटो द्रवीभूतः आर्द्रीविसामिश्रुभ्यस्तपुरमध्यमपुरापायवस्थास्वन्यथा भवनेऽपि घटत्वमनतिक्रमन् सत्सु वर्षशतेषु नीतेष्वपि स एव तथा भवति, एव सदपि कार्यं द्रव्यादीति ।

किञ्चान्यत्— 10

यदपि च दृष्टान्तत्वेनोक्तं नास्य पुत्रोऽस्तीत्यपुत्रो न तु पुत्रो न भवतीति प्रतिपिपादयिषत इति, इदमपि नातिगमितार्थं, यथापि हि पुमान्तरसम्बन्धो न प्रतिपिपादयिषतेऽस्य स्वामिपुत्रादेर्दृष्टत्वात्, नञ् उत्तरपदाभिधेयनिवारणार्थः, तत्पुरुषसमाससम्भवसामर्थ्यात्, बहुव्रीहावपि पुत्रारम्भकत्वमेव प्रतिपिपादयिषते नञा, अतद्रूप्यत्वात्, स्वयं पुत्रीभावपरिणामशून्यत्वात् खपुष्पवत्, यथोक्तं भगणिभूसिता भगणिसेविया भगणिपरिणामिता भगणिजीवसरीरेति वत्तव्वं सिया 15
त्ति' (भ० श० ५ उ २ सू १५) तथाऽन्योऽप्याह 'अङ्गादङ्गात् सम्भवसि हृदयाद्भिजायसे' (कौ० उ० २-११) इति ।

यदपि चेत्यादि पूर्वपक्षमनुवादेन भावत् प्रतिपिपादयिषत इति तदुक्तं—इदमपि नातिगमितार्थं

---

प्रागभावेऽपि कारणभवभावस्याभावनिमित्तत्वमनुभवमेव कथं कारणभेदात्, प्रत्युत सत्त्वसिद्धिरित्याद्याशङ्क्य हेतुं व्याकरोति 10
सजातीयेति सजातीयासजातीयभिन्नत्वे सति स्वभावभूतत्वात्, द्रव्यमेव तेन तेन रूपेण भवतीत्युपपत्तिप्रदर्शनेन घटादिरूपं द्रव्यमेव घटान्तरादिभ्यः पटादिभ्यो भिन्नं सद् स्वाकारापरसारूपपरिणामस्वभावेन तथा तथा भवति भावात्मना तथा च पूर्वं घटादिभ्यावेशभावे तथा न भवेदेवेति भावः । उक्तं व्याचष्टे—घटस्येति घटादिसजातीयेभ्यो घटान्तरेभ्यो देशकालाकारप्रमाणादिभेदाद्व्यतिरिक्तं घटो भिन्नं भवति असजातीयेभ्यः पटादिभ्यो भिन्नमत एवं सजातीयात् विजातीयाच्च भेदेन भेदेऽपि प्राक् सत्त्वमुक्तं तस्मात् प्रागपि सदस्ति भावः । विशेषणपरत्वाशङ्कायाः परिहारमाह—नन्वेवमिति नन्वेवमपि प्रागसत्त्वात् 20
सजातीयात् कारणादपि घटादिकार्यं भिन्नमेव केनचिद्रूपेणेति कथं प्राक् तद् सदिति भावः । कार्यं न तस्माद्भिन्नमित्याशयेन विशेषणार्थमाह—स्वभावभूतत्वादिति । ननु कार्यकारणयोर्देशकालाकारादिभेदो दृश्यत इति कथं स्वभावभूतत्वमत्र हेत्वन्तरमाह—सुषिरादपीति मृत्पिण्डस्वास्वभेदघटाद्यवस्थादिषु देशकालाकारादिभेदो यद्यपि तथापि घटत्वं सर्वानतिवर्तमानो घटस्य एव घटादिरिति भावः । उपसंहरति—तस्मादिति । निदर्शनमाह द्रवीभूतेति अवस्थान्तरप्राप्तो घटस्य सुषिराद् पीतत्वे न सजातीयादिति भावभावान्तरमिश्रस्य दृष्टान्तता बोध्या । ननु 'नञस्तत्पुरुषोत्तरपदाभिधेयनिवारकत्वात् नञसमास 30
सामर्थ्यं' नत्र 'न भवेतावता नास्य सदित्युक्तम् न कस्यचित् यथा नास्य पुत्रोऽस्तीत्यपुत्र न तु पुत्रो न भवतीति प्रतिपिपादयिषते' इति यदुक्तं वादिना तन्निराकरणार्थमाह—यदपि चेति । अनुभयस्मात् बहुव्रीहिर्न तु तत्पुरुष इति पूर्वोक्तं

---

१ सर्वप्रतिषु 'अन्यथाभूतत्वाविति चेत् कार्यत्वाकार्यप्रमाणत्वात् अनुपपत्तिरिति विपर्ययेण्यनिवृत्तपादसद्भावनम् भवदेव हि भवति प्रसक्तं अनुपपत्तोऽन्यथा ।

मित्यादि यावत् सम्भवसामर्थ्यमिति, तद्विभिद्यते यदपि मत यथासम्भवप्रतिपादनार्थं दृष्टान्तत्वेनोक्तं नास्य पुत्रोऽस्तीत्यपुत्री न तु पुत्रो न भवतीति तस्मान्नपुत्रत्वामिति तदपि नास्तिगमितार्थमिति दाक्षिण्यवचनमेतत्, मा निष्ठुरं वाचमिति वचनगमितार्थं ? यस्मादत्रापि पुत्रान्तरसम्बन्धो न प्रतिषिध्यते, येन स्वामिपुत्रादेर्दृष्टत्वात् नास्य पुत्रोऽस्तीति बहुव्रीहिसमासार्थस्य प्रमाणविरुद्धसासम्भवात् किं तर्हि वक्तव्यं ?

5 नञ् उत्तरपदाभिधेयनिवारणार्थः तत्पुरुषसमाससम्भवसामर्थ्यात् यथा मित्रो वेद्मि, वेद्मीति मृदुवक्तृत्व स्ववोर्मायकत्वात्मकयोर्वाच्यादापनसम्भवनवत् यो मित्रो एतावीति प्रमे प्रत्याख्यानगमनसम्भवत् गवादेगाम स्वामित्वनिरपेक्षसम्भवत्वाद् उत्तरपदाभिधेयसम्भवः स्वयमेवासौ पुत्रो न भवतीत्युक्तं भवति तत्र यस्य तस्याभास पुत्रोऽस्तीत्यपुत्र इत्युक्तो दृष्टान्तः, अभ्युपगम्य बहुव्रीहिं—बहुव्रीहावपि पुत्रारम्भकत्वमेव प्रतिषिध्यते तथा, न पुत्रान्तरसम्बन्धः यस्मात् ? अतद्रूपत्वात्—तद्रूप तत्करणं तदीय परिणामस्य तदिदं

10 तद्रूपं न तद्रूपमतद्रूपं तद्भावात् तद्रूपत्वात् स्वयं पुत्रीभावपरिणमनशून्यत्वात्, स्वयं पुत्रत्वेनानुत्पित्सुत्वादित्यर्थः अपुत्र इति गतार्थम्, यथोक्तं "[अ]गमि मुसिता[अगमिसेविता] अगमिपरिणमिता अगमि-[वीय]स्त्रीरेति वक्तव्य सिद्धमिति (अ सू ५ च २ सू. १५) तथोऽन्योऽप्यनाद्—अङ्गादङ्गात् सम्भवसि [बृ उ ६ ४ ९ कौ उ. २ ११] इत्यादि तान्येव पितुः स्वाङ्गभूतानि पुत्रात्मत्वेन परिणमन्ति वीरप वित्वात् इत्यपरमितायास इति मेघाऽपि सैव पुत्रस्य या पितुः, अन्यायमितया मनुष्यादिप्वमायात् ।

15 गुणोऽगुण इति गुणभाव एव प्रतिषिध्यते, न गुणसम्बन्धः, स येषां युगपदयुगपदप्रपि वा भवनलक्षणद्रव्यत्वात् सन्नवधावद्गा तस्माद्बहुव्रीहावपि नासत्, सदेव तस्मात् सम्पूर्णनिरतिशय स्वस्थ ।

---

यत्रोक्त—यदपीति । कृपी न तत्पुरुष इत्यत्र हेतुं पृच्छति—तत्रोति स्वय यत्किञ्चित् पुत्रत्वात् पुत्रो न भवतीति तत्पुरुषो वेद इति भाव । यत्रोक्त निरस्यति—नास्तिगमितार्थमिति तत्पीतमित वचन गतिप्रयोजनार्थं प्रयुक्तमिति । किमर्थं तदपि न समीची-
20 नमित्यपेक्षया गतिस्वमितार्थमित्युक्तमिदम् इत्यत्राह दाक्षिण्येति । अत्रापीति बहुव्रीहावपीत्यर्थः तत्पुरुष इत्यत्रापि पुत्रासम्बन्धमेव तत्र प्रतिपिध्यते न तत्रोन पुत्रेण सम्बन्धस्य सम्बन्धो निषिध्यते "स्वत्वत्वादपुत्रस्य" इत्यत्र स्वामिनः पुत्रेण अभावरूपो विनाशकपुत्रेण सम्बन्धसद्भावात् कर्म प्रमाणविरुद्धार्थं बहुव्रीहि योजनेति भाव । तर्हि कर्थं योऽपुत्रत्वमेतोक्त इत्यत आह इति अपुत्र इत्यत्र नञ् उत्तरपदार्थं पुत्रमेव प्रतिषेधति तत्पुरुषसमासार्थस्यात्र सम्भवादिति भाव । यदि बहु सम्भवेऽपि तत्पुरुषसमासः परिकल्प गुण प्रमाणविरुद्धार्थो बहुव्रीहिस्तु कर्तृमितार्थमनेनाह—तत्पुरुषेति । सम्भवत्तत्सामर्थ्य-
25 रूपेणाभ्यात्—यथेति । अतद्रूपत्वमित्यत्र—स्वयमपीति स्वयं पुत्रत्वेन न परिणमतीत्यर्थं । अतद्रूपत्वात् तद्भावादित्यनेन तत्पुरुषेण यत्र प्रमाद—तथेति । तुल्यं पुत्रेण इति स्वामित्व—बहुव्रीहावपीति । पुत्रपरिणामस्यार्थं न द्रव्यं कार्यं वीर्यं वा यतोऽन्यो भावं पुत्रस्य न पुत्र पुत्रत्वपरिणमोऽभावो अपुत्र परिणमपरिणामित्वेनैतत्समर्थ यथेति पुत्रत्वपरिणाम एतावदपि मतिरेवं तत्र क्रियते न पुत्रान्तरसम्बन्धोऽपीति यावदिति—अतद्रूपत्वादिति तत्र तद् द्रव्यं तद्रूपमिति यत्समय च परिणमस्य द्रव्यमितरं तस्य वा परिणामस्य द्रव्यं तद्रूपमिति वा न तु तद् द्रव्यस्य तत् तद्रूपमिति बहुव्रीहि तथा
30 तमि अतद्रूपत्वमिति व्यभिचार सार्थेति भाव्यम् । अत्रार्थे आगमं प्रमाणयति 'अगमि' इति । इत्यत्र सम्भवविदा पक्षकर्तृत्वे यदेता यत् हेतोस्तदुदाहरणे भावार्थं प्रदर्शितं तदपि न दृष्टान्तमिति दर्शयितुमाह—गुणोऽगुण इतीति । तस्या-

---

१ मि. वै अग्यर्थ । २ सि क. तथ । ३ मि क. योषात्तत्पद । ४ क. व्याप्त । ५ सि. व अर्थं सर्वं । ६ मि. क. तदव्यवाच्येवाह । मि. इत्यपेक्षेव ।

(गुण इति) यदप्युक्तं द्वितीयमुदाहरणं तत्रैव गुणोऽगुण इति शाब्दीयं तदपि गुणभूतोऽप्रधानो द्रव्याणामुपसर्जनं इतीष्टोऽयमर्थो [गुणशब्दस्य] न भवति, किं तर्हि? स्वतन्त्र[ः] प्रधानं द्रव्यमेवेति, उत्तरपदाभिधेयनिवारणार्थं नाञ्समासः, न तु नास्य गुणोऽस्तीत्यगुणो गुणः, तस्य हि रूपादेः परस्परतोऽन्यरसादिगुणकस्य गुणभावापात् सत्त्वादेर्वा गुणसद्भावभावे गुणवत्त्वात्, गुणभावो—गुणस्य गुणत्वमेव प्रतिपिद्यते न गुणसम्बन्धः स चेष्टो—गुणसम्बन्धः, युगपद्भाविता रूपरसगन्धस्पर्शसंख्यादीनां गुणानां 5 सम्बन्धः अयुगपद्भाविमृत्पिण्डशिवकस्थासकादीनामयुगपद्भाविता, कृष्णनीलपीतरक्तादिवर्णविशेषाणामयुगपद्भाविता विशेषगुणानामिति, तथा सत्त्वादीनामङ्गाङ्गिभावेन युगपद्भाविता महदहङ्कारतन्मात्रादीनामयुगपद्भाविता चेति कस्मात्? भवनलक्षणद्रव्यपरत्वात्—द्रव्यं च भव्ये (पा ५ ३ १०४) भवतीति [भव्यं] द्रव्यं भवनसम्बन्धयोग्यं गुणाः सम्भूयैव तिष्ठन्ति भवन्ति द्रवन्ति इति, गुणयन्ति गुण्यन्ते सूयन्ते ज्ञायन्ते चैकैक पदार्थ इति, सद्भूतवादवद्वा—यथा वा सद्भूतवादे सर्वस्य सर्वात्मकत्वात् त एव रूपप- 10

---

यादे—यदप्युक्तमिति । अगोरेवमूलो गुणशब्दो यस्यार्थो भवति प्रधानो द्रव्याणामित्यादिरूप्यते न तदर्थं किन्तु स स्वतंत्रं प्रधानं द्रव्यमाह अगुण इत्यत्रोत्तरगुणपदाभिधेयार्थनिरसनपरत्वात्तत्र इत्याह—गुणभूत इति गुणभूत यदि प्राधान्येनोच्यते तार्थ्यं न तस्य प्रत्यर्थाप्रत्यर्थौ वा किन्त्वभिधेयैरेवोक्तमिति परतंत्रे स्वार्थेऽपि प्रयुज्यते तत्र पद इत्यत्रोऽयं गुणभूत अप्रधान—अन्यत्वेनैकस्येव प्रतीयमान द्रव्याणामी—याधारेणाभिव्युत्पत्तिरेकत्वप्रधानेन सम्बन्धी उपसर्जनं विशेषणं तस्येव परस्पर अविशेषणमुच्यते एवंविधो गुणपदार्थो भवतामिष्टः सोऽत्र न सम्भवतीत्यर्थः । अगुण गुण इत्यत्र हि नञोऽयमूलो गुणशब्दार्थो 15 गुणभूततया नाप्येकैकस्याऽऽश्रयितयोपसर्जनतया वा प्रतीयते किन्तु तत्तद्धर्मैरन्यैरप्रत्यक्षेन विशेष्यत्वेनानन्यत्वेन च प्रतीयतेऽतोऽसौ स्वतंत्रं प्रधानं द्रव्यमेवेत्याह—स्वतंत्र इति । यदि रूपादिगुणत्वेन प्रधानोऽगुण स्वतंत्र च बहुव्रीहिराश्रीयते तदा परिहारो यथान्त स्यात् द्रव्यं हि यथाहि रूपरसगन्धस्पर्शवत्, तथा च रसादि कथाचिदेव रूपेणापि सम्बन्धस्य सद्भावात् अर्थ गुणसम्बन्धप्रतिषेधे गुणे गुणेऽयोगात्सेनाह—तस्य हीति यस्य गुणस्य भावस्तस्मिन्नुपचरिते तत्समभिधाने त्वतलाविति तत्वप्रत्ययात्मभावे गुणस्पर्शवत्परस्परान्ता गुणान्तरोऽन्यस्याभिसम्बन्धाय यथाय … अपि निर्वर्ण्य गुणसम्बन्धो द्रव्यमिति द्रव्यलक्ष- 20 णमुच्यते, गुणा सम्भूयन्ते मिथोमिलन्ति इति गुणसन्द्राव 'समितुलुग' (पा १ १ २१) इति कन् गुणसङ्ग इति फलितोऽर्थं अत्र गुणपदं अनुपालयतीति बोध्यम् । अत्र तु सत्त्वरजस्तमसां गुणसमुदायस्याभिप्रायेणाह सत्त्वादेर्वा गुणसद्भावभावात् इति सत्त्वरजस्तमसां सद्भावो द्रव्यमिति मतेऽपि सत्त्वादयोऽपि गुणत्वाद्गुणा एव … गुणान्तरसम्बन्धसत्त्वात् गुणे गुणसम्बन्धप्रतिषेधो न युक्त इति भाव । … द्रव्यार्थेनामुत्वा प्रतिषेध्यमाह—गुणभाव इति । गुणानां रूपरसादिसामान्यगुणानां सहभाविनीव परस्पर सम्बन्ध विशेषगुणानां कृष्णनीलादीनां तथा मृत्पिण्डशिवकादीनां विशे- 25 षाणामयुगपद्भाविस्वसतीति न गुणसम्बन्ध प्रतिषेध्य इत्याह—स गुणसम्बन्ध इति । गुणसन्द्रावपक्षे गुणानां सम्बन्धं दर्शयति—तथेति । गुणाङ्गाङ्गिभावेन युगपद्युगपद्भाविस्वरूपेण भवनलक्षणद्रव्यस्य न गुणसम्बन्धः परिहार्य इत्याशयेन हेतुमाह भवनलक्षणेति भवनेन हि द्रव्यं लक्ष्यते इति भाव । एतमेव व्यक्तं द्रव्यशब्दव्युत्पत्त्याऽभिधित्सति—द्रव्यञ्चेति भव्येऽर्थे द्रव्यशब्द कार्ये प्रतिकृतिरूपे स्त्यायमाना निपात्यते इति द्रव्यं भव्यमित्यर्थं भव्यमिति च 'भव्यगेयप्रवचनीयोपस्थानीयजन्याप्लाव्यापात्या वा' (पा ३-४ ६८) इत्यनेन कर्तरि वा निपात्यते भवतीति भव्यं द्रव्यं तदर्थम् भवनसम्बन्धयोग्यमिति भाव । गुणसन्द्रावे 30 द्रव्यमिति अस्यार्थाभिप्रायेणाह—गुणा इति तिष्ठन्तीति पतितैस्तिष्ठन्ति स्थितिमात्रं न … अपि तु भवन्ति—उत्पद्यन्ते द्रवन्ति—गच्छन्ति—भिन्दन्ति यदि …, अनेनापि भवनलक्षणद्रव्यत्वं फलितम्, गुणयन्त्यादिमाह—गुणयन्तीति । सद्भूतवादापेक्षया द्रव्यमेव युगपद्युगपद्भाविता परिणमतीत्याह—सद्भूतवादवदेति रूपमेव तथा तथा भवति

---

१ सि. क्ष. °यादिरि° ।

रमाण्वादिद्रव्यविशेषाः स्वात्मपरित्यागेन युगपदयुगपच्च भवन्ति द्रवन्ति, द्रूयन्ते भूयन्ते चैवेत्युक्तम् तस्मादणुभ्योऽन्यानपि नास्ति सदेवेति प्रस्तुतोपनयः, यथोक्तं 'भवितं भविते परिणमति' इति 'भवितं भविते परिणमति' (भ० सू० २) इति तस्मात् सम्पूर्णमिदमिदम् सत्सदेवेति तस्मादसत्कार्यं न सत्तया सम्बध्यते सत्त्वाभावात्, असम्पूर्णसत्त्वसत्त्वाभावादित्युक्तम्।

5 यथा–

स्ववचनविरोधादेः सदप्यसत्, सत्तासम्बन्धरहितत्वात्, सत्तासम्बन्धश्च सदिति लिङ्गात् सदभिधानप्रत्ययदर्शनादनुमीयते, अतः सत्तासम्बन्धात् सद्भवतीत्युक्तं भवति सत्तासम्बन्धेन च भाव्यमानं सद्भवतीति ततो यच्च भाव्यमानं सद्भवति तदारम्भकेभ्यो भवति, द्रव्याद्यारब्धद्रव्यान्तरवत्, भाव्यमानभवितृत्वात्, तस्मात्तस्यामवस्थायामसत् तत् सदिति च ब्रुवतः 10 स्ववचनविरोधोऽनुमानविरोधश्च।

स्ववचनविरोधादेः सदप्यसदिति यदपि सदिति द्रव्यादिकार्यमिष्टं तदपि स्ववचनविरोधादेर्दोषादसदेव जायत इति पक्षः, स्ववचनादिविरोधावनुमानविरोधप्रकारेणैवोपपादयिष्यन्ते, सत्ताऽभावात् तस्यामसत्त्वे हेतुः–सत्तासम्बन्धरहितत्वात् सत्तायाः सम्बन्धमननुभूय सदित्यभिधानप्रत्ययौ न लभते कार्यम्, विज्ञापकस्वरूपाभिधानप्रत्ययमात्रत्वादित्यस्य दण्डनिमित्तदण्ड्यभिधानप्रत्ययमात्रवद्वत् सत्तास- 15 म्बन्धश्च सदिति लिङ्गात् सदभिधानप्रत्ययदर्शनादनुमीयते अतः सत्तासम्बन्धात् सद्भवतीत्युक्तं भवतीति परमतसमर्थनमेव पारवश्यात्, पश्चात् सत्तासम्बन्धेन भाव्यमानं सद्भवति–परतः आत्मलाभं लभते न

---

परमाण्वेव तथा तथा भवतीति द्रव्याणुभ्यो सत्ता प्रतिषिद्धा। तत्र कार्यस्य द्रव्यादेरणुभ्योऽभिन्नत्वात् न [illegible] तस्मादिति। [illegible] कार्यं प्राक् कारणात्, यथाह सत्तासम्बन्धात् सद्भवतीत्युक्तमित्याद– तस्मात् सम्पूर्णेति। एवं सत्तासत्त्वयोः सम्पूर्णनिरोधनासम्भवे [illegible] तयोर्विरोधे स्ववचनविरोधश्च भवतीति 20 [illegible]–स्ववचनेति [illegible] स्ववचनविरोधादिदोषात्, [illegible] स्ववचनविरोधादिदोषेण [illegible]–स्ववचनादीति। [illegible] हेत्वाद–सत्ताऽभावादिति। [illegible] सत्तायाः इति ननु द्रव्यमपि [illegible] निमित्ते [illegible] इति [illegible] [illegible] सत्तासम्बन्धमनुभूय [illegible] 25 [illegible] इति भावः। सत्तासम्बन्धात् [illegible] सत्तासम्बन्धेनेति [illegible] (वै० अ० १ आ० १ सू० ७) '[illegible]' (वै० अ० ७ आ० १ सू० ११) इति सूत्राभ्यां द्रव्यादिषु त्रिषु [illegible] सत्ता [illegible] सत्तासम्बन्ध [illegible] इति भावः। [illegible] इति [illegible] 30 [illegible] इति भावः। [illegible]–तस्मात् सत्तासम्बन्धेनेति। [illegible]–परत इति [illegible]

1 सर्वत्र 'तत्र भावात्। 2 सर्वत्र 'भावितत्वमित्यात्।

स्व इत्यर्थः, ततः किं ? तत इदं भवति यच्च भाव्यमान मद्भवति तदारम्भकेभ्यो भवति–कारणद्रव्या दिभ्य इत्यर्थः, भाव्यानुगतसाधनवचनात् साधर्म्यदृष्टान्त एषः, तन्निदर्शनं हेतुनाऽन्वयमिव प्रतिपत्तिलाघवाय द्रव्याद्यारम्भद्रव्यान्तरादिवदिति–यथा द्रव्यगुणकर्मभिर्द्रव्यगुणान्तराण्यारभ्यन्ते कर्म च गुणैः संयोगविभागप्रयत्नगुरुत्वसंस्काराख्यैः, तथा सत्तयाऽऽरभ्यते सत्प्रत्ययम्, हेतुरत्र–भाव्यमानभवितृत्वादिति व्याख्यावार्थः तस्मात्तस्यामवस्थायामसत्त्वद्रव्यादिकार्य, अभूत्सदिति च ब्रुवतः स्ववचनविरोधोऽनुमान- 5
विरोधश्च प्रत्यक्षाभ्युपगमलोकविरोधा अपि योज्यास्तथैव, एवं तावत् द्रव्यादिकार्यमुत्पत्तेरवस्थायां सत एवासीदितीष्टमपि सत्तासम्बन्धाद्भवितृत्वादसदेवेत्युक्तम् ।

न केवलं द्रव्यमेवासत्तया, किं तर्हि ? सत्तापि च नासीत्यापादयिष्यते हेतुसद्भावेन कारणता दिभ्यः, कारणस्य तावत्–

सत्तापि च कारणं भावकत्वात् आरम्भकवत्, सति सत्तान्तराधानमिति चेन्न, तुल्य 10
त्वात्, एवमपि कारणमेव ते सत्ता, सति सत्तान्तराधायित्वात्, पटसत्ताधायितन्तुसंयोगवत् ।

(सत्तापि चेति) कार्यस्य तावत्–सत्तापि यदि द्रव्यादेः कार्यस्य भवतो भाविका तत उक्तविधिना कारणं भावकत्वात्–भावयितृत्वादित्यर्थः 'तसिलादिष्वाकृत्वसुचः' (पा० ६ ३ ३५) इति पुंवद्भावात्, आरम्भकवदिति, पटस्य तन्त्वादिवदिति वक्ष्यते, इह तु सामान्येन, यथा आरम्भकाः परमाणवः तत्समवायिनः संयोगविभागाः अदृष्टादिगुणाश्च सापेक्षनिरपेक्षाः क्रियाश्च 15
दृष्टादिहेतुकाः कारणानि भावकानि यथासम्भवं द्व्यणुकादिकार्यद्रव्याणां गुणानां कर्मणाञ्च तथा सत्तापि कारणमिति, सति सत्तान्तराधानमिति चेत् स्यान्मतं स्वयमुत्पन्ने समवाय्यसमवायिकारणारब्धे

---

प्रतिमे' यन्न विशेषणेऽपास्यम इति भाव । स्ववचने को बोध इत्यत्रानुमानविरोधमुद्भावयति सदवारब्धमाह–यथेति भाव्य-
मानभवनं हेतुः आरम्भकेभ्यो भवनं साध्यम्, एवं साधर्म्येणानुगतस्य हेतोर्गोचरप्रवचनमिदं साधर्म्यदृष्टान्तपरमिति भाव ।
हेतुपूर्वं निदर्शनं प्रदर्शनीयं प्रतिज्ञाहेत्वादरणादिक्रमः क्रमवद्भावात्, तत्र क्रममुल्लङ्घ्यानभिधाय हेतुं निदर्शनमुक्तं तस्य 20
प्रकाश–तन्निदर्शनमिति । यथेति–एकस्मिन्नेव द्रव्ये समवायिकारणे द्रव्यगुणकर्माणि आरभन्ते गुणाश्च द्रव्यगुणकर्माणि
भवन्ति [illegible] कर्मैव इति दृष्टान्तार्थः ।
एवं दार्ष्टान्तमपि सत्तयाऽऽरभ्येतत्याह–तथेति । हेतुं दर्शयति–भाव्यमानेति भाव्यमानत्व तत् भवितृ च–भाव्यमानभवितृ
तस्य भावस्तस्मादिति विग्रह सत्तया भाव्यमानत्वे सति भवितृत्वादित्यर्थः । एवञ्च सत्तासम्बन्धात्प्राक् सत्त्वनियमे सत्तासम्बन्धात्
प्राक् कार्यस्यासत्त्व स्ववचनेनानुमानविरोधित्वात् अवचनमिति सूचयितुमाह तस्मात्तस्यामिति । एवं पर्यवसितार्थमाह–एवं 25
तावदिति । सत एवासीदिति–सत्त्वमिति यथा द्रव्यस्य सत्तासम्बन्धाद्भवितृत्वात् असत्त्वमुक्तं तथा सत्तापि कारणत्वादित्येतदनु-
क्तमेवास्तीत्यत्र निरूपयिष्यन् कारणत्वादिहेतुं तत्र प्रदर्शयति–सत्तापि चेति । भवतो द्रव्यादेः सत्ताया भावकत्वे सद्भावकं तत्
कारणमित्यविनाभावात् सत्ता कारणम्, आरम्भकाणि परमाण्वादीनि यथा द्रव्यगुणकर्मणामारम्भकत्वात् कारणानि भवन्ति तथैवाह सत्तापि
भवतीति । के आरम्भका इत्यत्राह–आरम्भका इति । तत्कार्याण्याह–यथासम्भवमिति । ननु कथमेवम्, समुत्पन्ने
सत्पदार्थे कार्ये सत्ता सत्त्वमुत्पादयति न तु सद्रूपं कार्यमुत्पादयतीति न कारणं सत्तेति शङ्कते–सतीति । तन्निराचष्टे–स्यान्म- 30
तमिति यथा परमाणवः आरम्भकत्वात् कारणानि भवन्ति न तथा सत्ता कारणमनारम्भकत्वात् तदनारम्भकत्वाद्धि विलक्ष-

---

१ सि. क. कारणत्वादद्रव्य । २ सि. क. के चार्थे चेति ।

द्रव्यादौ कार्ये समावयः सत्वेन सत्तान्तरसम्बन्धे सत्व[। स]माधीयते तस्मात्सत्ता नारम्भिका अस्या अनारम्भकत्वे न कारणमण्वादिवत्, अतो वैषम्य दृष्टान्तदार्ष्टान्तिकयोः मावकत्वं वा तस्या नास्तीत्येतच्च न तुल्यत्वात्—अनन्तरोक्तं व्याख्यातविशेषणसमपसङ्‌गिधानमत्समानुमितसत्तासम्बन्धमिष्टे। अभ्युपेत्याप्यमयपक्षन सति सत्तान्तराभावेऽनेन सत्ताया एवमपि कारणमेव ते सत्ता सति सत्तान्त-
5 राऽऽधायित्वात् पटसत्ताऽऽधायितन्तुसंयोगवत्, यथा तन्तुभिः परस्परसंयोगापेक्षैरारब्धे पटे सति तत्संयोगः सत्तासमवायेन सम्बन्धसत्त्वमादधानः कारणं दृष्टः तथा सत्तापि स्यादिति ।

साम्प्रतमारम्भका परमाणवो न संयोगा, तस्माद्वैधर्म्यमित्येतदाशुच्यम्—

संयोगस्याप्यारम्भकत्वेष्टेः कारणत्वमात्रसाधनाद्वा न दोषः, अथ वा वृत्तसत्त्वातिरिक्तस्वकरत्वात् कारणमेव, तन्त्वादिवत् तथा च द्रव्याद्यन्यतमदेव तत्सामान्यम्, तस्मात्
10 सदनित्यं द्रव्यवत् कार्यं कारणं सामान्यविशेषवच्च, द्रव्यादिवत् ।

( संयोगस्येति ) संयोगस्याप्यारम्भकत्वेष्टेः कारणत्वमात्रसाधनाद्वा न दोष इति अथ वा वृत्तसत्त्वातिरिक्तसत्त्वकरत्वात् कारणमेव सत्तेति वर्तते यस्माद्वृत्तस्य—निष्पन्नस्य कारणान्तरैः समावयतः ततोऽतिरिक्तं सम्बन्धसत्त्वं करोति सत्ता तस्मात् कारणमेव, को दृष्टान्तः ? तन्त्वादिवत्, यथा वृत्तसत्त्वं तन्तुत्वं तदतिरिक्तपटसत्त्वकरं कारणञ्च तथा सत्तेति अथ वा यथा वृत्तस्य तन्तुभिरारब्धस्य पटस्य
15 सम्योगरक्षणमपि सत्त्वं कुर्वन्तस्तन्तव एव संयोगापेक्षाः कारणं पटस्येष्यन्ते तथा सत्तापि वृत्तसत्त्वातिरि

---

एवेत्यारम्भकत्वं [illegible] तत्र नास्तीति भावः । यथा सत्ता सतो नारम्भिका तथा तत्र सत्तान्तराभावेऽपि न स्यात् तुल्यत्वात् —[illegible] तथा तन्तुभिः [illegible] सत्ता न [illegible] तुल्यत्वादिति । [illegible] यदि सत्तान्तराभावमभ्युपेत्यापि कारणत्वमाह—एवमपीति यथा तन्तुसंयोग कार्ये [illegible] पटे सत्तासमवायकृतं सत्त्वं [illegible] कारणं भवति तथा सत्ताऽपि सत्त्वं स्यादिति भावः । अथ संयोगस्य [illegible] आरम्भकत्वे नोपादान [illegible] किन्तु परमाण्वादिरेवेत्य-
20 [illegible] आरम्भकत्वादिति तन्तुसंयोगस्यापि [illegible] समाधानमाह—संयोगस्यापीति संयोगस्याप्यारम्भकस्यापि [illegible] द्रव्यगुणयोः [illegible] आरम्भकत्वं साधर्म्यं तस्य [illegible] भावः । अथ वा [illegible] कारणत्व [illegible] न वैधर्म्यमित्याह—कारणत्वेति । हेतुरपि आरम्भकत्वं [illegible] साध्येऽस्ये-
[illegible] हेत्वन्तरं दर्शयति—अथ वेति सत्ता कारणम्, वृत्तसत्त्वातिरिक्तसत्त्वकरत्वात् तन्त्वादिवत् इत्यनुमानम् ।
हेत्वर्थमाह यस्मादिति [illegible] सत्ता [illegible] सत्त्वं करोतीति भावः । दृष्टान्तं [illegible]—
25 यथेति [illegible] तन्तुपटादिषु [illegible] यथा ये [illegible] सत्ताऽऽसत्त्वं [illegible] तथा तन्तुना [illegible], [illegible], तस्मात् [illegible] कारणानां [illegible] [illegible] [illegible] कारणतया [illegible] कारणतया [illegible] [illegible] तस्मात् [illegible] तन्तुत्वं पटसत्त्व—[illegible] करोति एवं च तन्तुभिः सत्तापि [illegible] भावः । [illegible] कारणैर्निष्प-
न्नस्य [illegible] सत्त्वं [illegible] सत्तापीत्याह—अथ वेति । [illegible] कार-
30 णे सिद्धे [illegible], यथा परमाणु [illegible] इत्याह [illegible] ‘सदनित्यं द्रव्यवत् कार्यं कारणं सामान्यविशेषवदिति’ द्रव्यगुणकर्मणामविशेष [illegible] कारणत्वात् सत्तापि कारणत्वात् द्रव्यं गुण

---

१ सि क. तथा [illegible] । २ सि क. [illegible] । ३ सि क. द्रव्यादिव । ४ सि क [illegible] ।

कत्वस्वरूपत्वात् कारणमेव स्यात्, आदिमत्त्वात् कपालक्षीरादिवद् द्रव्याण्युदाहर्तव्यानीति, तथा च द्रव्यो-पान्त्य[तम]दिव तस्मात् सामान्य—सत्तात्म द्रव्यं गुणः कर्म वा ततोऽन्य[तमत्] स्यात्, यदि कारणं तद्द्रव्यं गुणः कर्म वा ततोऽन्य[तम]द् दृष्टं, यथा तन्तवस्तत्संयोगाश्च तत्क्रियाश्च तथा सामान्यं सत्ताख्यम्, तस्मात् सामान्यं सदनित्यं द्रव्यवत् कार्यं कारणं सामान्यविशेषवच्च द्रव्यादिवत् अतो द्रव्यादीनामेव सत्तादिपदविशेषा इति व्याख्या व्यर्था । 5

अत एव च नास्य सत्त्वादिदमसदिति स्वान्वयवृत्तिसत्त्वाद्व्यतिरेकवृत्तिनिष्कलसतोऽव-धारितसत्त्वं द्रव्यादि व्याख्यातम्, तस्मात्तदर्थमभिधानप्रत्ययहेतुनाऽन्येन नार्थः, स्वत एव सिद्धप्रयोजनत्वात्, तत्रान्यस्य सदभिधानप्रत्ययहेतोर्द्रव्यादावनवकाशः स्वत एव सिद्ध-प्रयोजनत्वात्, सत्तासामान्यादिवत्, आकाशादिवद्वा यथा वा पुत्र एवापुत्र उच्यते स्वगत-पुत्रत्वसंसिद्धान्वयव्यतिरेकाभिधानप्रत्ययदेवदत्तः पुत्र एव सन्ननपेक्षपुत्रत्वः, अत्र स्वभावसि- 10 द्धेरेव द्रव्यादित्वं नेतरसत्त्वादिति सत्ताया निराकरणं कृतम्, द्रव्यत्वाद्यप्येवमेव निराकार्यम् ।

अत एव चेत्यादि, एतस्मादेव द्रव्यार्थान्यत्वमसत्स्वरूपत्वात् सत्तायाः सामान्याख्यायाः, नास्य सत्त्वादिदमसदिति विगृह्य असदेतदन्यथाभेदि च व्यतिरेकात् द्रव्यगुणकर्माण्यस्य प्रभवस्य सतोऽवधारणार्थं प्रतिषेधवाचिना नञा व्यपदेश्यां सत्तामभ्युपगम्य स्वान्वयवृत्ति सत्त्वाद्व्यतिरेकवृत्ति च निरूपिते-ऽन्वयव्यतिरेकाभ्यां निःकारकाभ्यां निष्कलं परिपूर्णं स्वरूपतोऽवधारितं च सत्त्वं यस्य तद्द्रव्यादि द्रव्यान्त- 15 रादि सद्व्यतिरेकेण स्वान्वयेन च यथा व्याख्यातं सिद्ध्यति च, तस्मात्तदर्थं—द्रव्याद्यवधारणार्थं अभिधान-प्रत्ययहेतुनाऽन्येन सत्तादिना नार्थः [न] प्रयोजनम्, स्वत एव सिद्धप्रयोजनत्वादित्युक्तोपसंहारः, अत्र पृथक् साधन—तत्रेत्यादि द्रव्यादिव्यतिरिक्तस्य सदभिधानप्रत्ययहेतोर्द्रव्यादावनवकाशः स्वत एव सिद्धा-भिधानप्रत्ययत्वात्, यत्र स्वत एव सिद्धाभिधानप्रत्ययत्वं तत्रान्यस्य सदभिधानप्रत्ययहेतोर्नावकाशोऽस्ति,

कर्म वा व्यतिरेकात्—तथा चेति । एवं सामान्यस्यापि सत्तादिपदविशेषत्वात् प्रमाणमेव तदुक्तिरुपेत्याह—तस्मादिति । 20 एवं सत्ताया द्रव्यगुणकर्मान्यत्वमस्वरूपत्वे सिद्धे द्रव्यादे स्वत एव सामान्यविशेषरूपता न व्यतिरिक्तं कुतः सामान्यमन्यत्र सद्भा-वमपि न वा वस्तुत्वं वक्ष्ये अमत इति व्यतिरिक्तं सान्वयवृत्ति सामान्यवृत्तिरेव अत एव तत् सम्पूर्णनिरूपितम्, तस्मात् द्रव्यादेः स्वत एव सत्स्वरूपात् नास्य व्यतिरिक्ता सत्ता यदा तदा सत्त्ववती क्रियते सदभिधानप्रत्ययौ स्वत एव सिद्धत्वादित्या-शयेनाह अत एव चेति । व्याख्याने—एतस्मादेवेति सत्तासामान्यस्य द्रव्यगुणकर्मान्यत्वमसत्स्वरूपत्वादेवेत्यर्थः । नास्य सत्त्वादिदमसदिति विगृह्यासदन्यत् सतो द्रव्यादेरसदिति व्यतिरिक्तमसामर्थ्येन वर्तते तद्गुणमेवेत्याशयेनाह—नास्येति असदिति 25 पदेन व्यपदेश्यामपि सत्तामभ्युपगम्य नञा प्रतिषेधवाचिना व्यतिरिक्तसत्ताया व्यपदेशेनाऽभ्युपगमाभिप्रायमभिप्राय इति भाति । सत्त्वं तदन्वयि व्यतिरेकेणभिन्नं व्याप्य वर्तते नान्यत्र च वर्तत इत्याशयेनाह—स्वान्वयेति सजातीयासजातीयेतरत्वाभावमुक्तमिति भाव । अत एवोक्तम् सम्पूर्णमिति निरूपितमित्याह—अन्वयेति । भवतु सत्त्वं तथाऽपि, तत् किमित्यत आह—तस्मात्तदर्थमिति द्रव्यं गुणः कर्म च सत्त्वेनावधारणार्थमित्यर्थः । अत एव चेत्यादिना सिद्धमेव तस्मात्तदर्थमित्यादिनोपात्तत्वात् पौनरुक्त्यमित्यत आह—इत्युक्तोपसंहार इति । प्रत्ययप्रयोजनरूपेण तमेवार्थं साधयति—अत्रेति व्यपदेशारम्भणया अनाश्रुमानप्रदर्शनपरत्वं 30

१ सि. द्रव्यान्तरादि २ द्रव्याद्यन्यत्वात् ३ सि. क. वायोरन्यत्वात् । ४ क. तत्सामान्यं सत्तात्वं द्रव्यम् । ५ सि. क. द्रव्यगुणम् । ६ क. सिद्धमिति मिथ्याध्याहृतं तत्त्वान्वयव्यतिरेकवृत्तिच मिथ्यैतदधिकं पाठे दृश्यते ।

यथा सत्तासमवायविशेषेष्विति अत्र चाऽऽश्रयाश्रयिणोः पारतन्त्र्यस्वातन्त्र्यमाश्रित्याशङ्कितप्रसङ्गत्वान्मा कार्षीद्विपक्ष इति निराशङ्क्याकाशादिवदिति दृष्टान्तः यथा निष्क्रियत्वादाकाशद्रव्याणि निष्क्रियाणि गुणसामान्यशून्यानीति, अत्र वा प्रस्तुतोदाहरणमेव दृष्टान्तः स्वगतेत्यादि अन्वयव्यतिरेकानुकाराभिधान-प्रत्ययावन्वयवदन्वयव्यतिरेकाभिधानप्रत्ययौ तौ स्वगतेन पुत्रत्वेन संसिद्धौ यस्मिन् सोऽयं स्वगतपुत्रत्व

5 संसिद्धान्वयव्यतिरेकाभिधानप्रत्ययो देवदत्तः पुत्र एव सेमनपेक्षपुत्रत्वः–स्वपुत्रमनपेक्ष्य न्यायस्याविधिना पुत्रपान्तरस्य पितुः पुत्र एव स्वपुत्रः नैसर्गिकत्वाभावादिति यथा पुत्र एव पुत्र तथैव [illegible] दृष्टान्तार्थं भावयित्वा दार्ष्टान्तिकमुपनयति अत्र स्वभावसिद्धेरित्यादि,–स्वभावसद्भावसिद्धेरेव द्रव्यादित्व मेवास्य स्वात्–न सम्बन्धिसत्त्वादिति विचारफलं निगम्यते–एवं हि विपक्षविचारद्वारेण सत्ताया निराकरणं कृतम् द्रव्यत्वाद्यन्वयमेव निराकरणम् द्रव्यत्वगुणत्वकर्मत्वसामान्यविशेषनिरपेक्षावभिधानप्रत्ययौ स्वत

10 एव द्रव्यादीनां मुख्यौ न्यायागतवदिति तत्रापि तुल्यप्रवर्त्तत्वात्।

एतेन सत्सत्करत्वपक्षेऽपि साक्षात्कृतमेव वैधर्म्यम्, स्वत एव सिद्धत्वात्।

( एतेनेति ) एतेन सत्सत्करत्वपक्षेऽपि साक्षात्कृतमेव वैधर्म्यम्–नास्य सन्निहितसत्त्वपक्षे यथाऽभि-हितं विचारावसाने नासतः सत्करी सत्ता सा द्रव्यादिव्यतिरिक्तस्य सत्ताद्रव्यत्वादेः तस्यैवाभिधानप्रत्ययहेतो-रनवकाशः स्वत एव सिद्धाभिधानप्रत्ययत्वात् घटादिवदिति, तथा तथैव सतां द्रव्यादीनां सत्करी सत्तेत्य-

15 स्यापीति प्रसक्तौ [illegible] तथैव वैधर्म्यं सत्तासम्बन्धस्य, स्वत एव सिद्धत्वादिति।

---

तस्येति मत्वाऽनुमन्यत इति भाव प्रयोगार्थं स्फुट एव। ननु द्रव्यादिरारम्भ परेण सद्द्रव्यादिमत्वति आश्रयि च सत्ता-द्रव्यादि स्वत एवेति वैशेषिको यदि ब्रूयात् तर्हि तत्तोयार्थमाश्रयमुद्दं स्वत एवाभिधानप्रत्ययनिमित्तं दृष्टान्तमुपन्यस्यति–आकाशादिवदिति [illegible] प्रत्यवस्थान स्वत एव [illegible] परेण [illegible] सामान्याननुगमादिति भाव। तत्रापि यथाऽऽकाशादिना [illegible] तर्हि स्वपुत्रे

20 प्रस्तुतमनुगमयन् [illegible] अथ वेति। अनेन पुत्रो दृष्टोऽन्यत्र [illegible] अन्वयव्यतिरेकानुगतौ अभिधानप्रत्ययाविति सम्यगनुगम्यतेऽपि [illegible] अभिधानप्रत्ययौ सामान्यविशेषा [illegible] मान्या। तौ च स्वाश्रयं स्वत [illegible] तथा च स्वपितृ-पुत्रत्वेन देवदत्त पुत्राभिधानप्रत्ययविषय यद्यपि पुत्रस्य पितृवशेषं तथापि पुत्राभिधानप्रत्ययौ [illegible] [illegible]–तौ स्वगतत्वेनेति अन्वयव्यतिरेकाभिधानप्रत्ययौ [illegible] पुत्रत्वेनैव [illegible] पुत्रत्वादिति भाव।

25 अनपेक्षपुत्रत्व इति [illegible] पुत्रस्य [illegible] पुत्रत्वेन स्वपुत्र एवेति भाव। न्यायस्याविधिनेति [illegible] पुत्रीयत्वस्याविधिनेत्यर्थ। [illegible] विचारणी–एवं रीति। [illegible] द्रव्यस्याविति। एतस्मादेव द्रव्याद [illegible] सत्तासम्बन्ध इति [illegible] सत्तासम्बन्ध इति पदं निराकरणमाह–एतेनेति [illegible] स्वत एव सिद्धाभिधानप्रत्ययत्वात् सत्तादिवदनुमानेनेदम्। एतेन न्यायेन

30 नाम्यतीति [illegible] सत्ता सत्करी न मन्तव्येति विचारस्य प्रान्तभागे [illegible] [illegible] स्वत एव सिद्धत्वादिति तदर्थम्। ननु द्रव्यादित्वं यदि न स्वत [illegible] किन्तु [illegible] तर्हि [illegible] स्यात्, [illegible] तत्र तदपि सामान्यसम्ब-

1 सि. यस्मीरे दरव। 2 सि क. पुत्रत्वेन । 3 सि. क ग क. [illegible] ।

किञ्चान्यत्—

यस्त्वनवस्था न दृष्टान्तात् बाह्यप्रकाशितघटाद्यर्थक्रियार्थप्रदीपप्रकाशोपादानस्यार्थस्यप्रकाशनार्थस्यासत्, इहापि द्रव्यादिकार्येण वस्तूद्भूतिप्रकाशमात्रेण द्रव्यादेरुपयोगक्रिया नास्तीत्यशक्यसदसत्त्वात् विचित्रोपभोगसिद्ध्यर्थं सत्तासम्बन्धोऽर्थवानेवेति ।

यस्त्वनवस्था नेत्यादि, यावदर्थवत्प्रकाशनवत्स्यादिति पूर्वपक्षप्रत्युच्चारणम्, अनवस्थादोष 5
परिहारार्थः प्रतिसमाधानविकल्पो नैष दोषः दृष्टान्तादित्यादि, दृष्टान्तस्तावत्—बाह्या गमिते प्रकाशिते
घट इति ज्ञानमात्राधान कृते तावता तदाद्याहरणादिक्रियाविनियोगार्थो न कृत इति तस्य घटग्रहणाद्यर्थ
प्रयोजनार्थं प्रदीपप्रकाश उपादीयते तस्य बाह्यप्रकाशनान्यप्रकारस्य प्रदीपप्रकाशस्योपादानं न व्यर्थम्,
न च पुनस्तस्यान्यः प्रदीपोऽन्यो वा प्रकाशः प्रकाशनार्थमुपादीयते, तस्मात्तत्रैव व्यवस्थितत्वादनवस्था
दोषोऽस्तीत्येष दृष्टान्तः उपनयः—यथेहापि द्रव्यादिकार्येण वस्तूद्भूतिप्रकाशमात्रेण स्वकारणोत्पादितमा- 10
त्रेण बाह्यप्रकाशितघटस्थानीयेन द्रव्यादेः कार्यस्योपयोगक्रिया नास्ति, पुरुषोपभोगार्थाश्च सर्वाः क्रियाः न्वि
भवः कारणात् असत् अशक्यसदसत्त्वात्—अशक्यस्य स्वकार्यकरणे मत एवासत्त्वात् अङ्कुरावस्थायामिव
व्रीहेः, अकठिनावस्थायामिव वा मृत्पिण्डादिकार्यसदृशीत्यत्—विचित्रोपभोगसिद्ध्यर्थ—घटपटकटादिभिः
परस्परव्यतिरिक्तैर्जलधारणप्रावरणप्रच्छादनाद्युपभोगसिद्ध्यर्थं विचित्रेषु घटादिषु पटादिषु देशकालाकारा-
दिभिः समानजातीयेष्वभिधानाभिधानप्रत्ययव्यवहारसिद्धार्थ स्वसामान्यान्वितेषु सत्त्वविशेषणेन प्रकाशान्त- 15
रेण सम्बन्धोऽर्थवानेव बाह्यप्रकाशितस्य पुनः प्रकाशनं प्रदीपप्रकाशस्येव ।

---

सामान्यमपरमपि विशेषवदवस्था यदि च सत्ता व्यक्त्यैव सती नापरमपेक्षतेऽतीति नानवस्थेत्युक्ते तर्हि द्रव्यादिकार्यस्यापि
व्यक्त्यैव सत् स्यात् किं सत्तासम्बन्धेन वैशेषिकस्य समाधिं दृष्टान्ते—यस्त्वनवस्था नेति । नास्त्यनवस्थादोष
यस्मान्नदृष्टान्तादिति बाह्यप्रकाशितप्रदीपप्रकाशोपादानस्य दृष्टान्त—अनवस्थादोषेति । दृष्टान्तं तात्पर्यतः—बाह्येति
दृष्टान्तो यदि कश्चित् घटप्रदीपः बाह्यो दीपत इति अनवस्थादोषभयेन प्रति दीपान्तरमपि न उपादाने किन्तु 20
प्रदीपप्रकाशेन चक्षुरादिना घट विज्ञात इत्येव परिगृहीत तदर्थं निवृत्तीति सामान्यस्योपयोगस्य विषयत परिज्ञानार्थं प्रदीपादि
प्रकाशस्यापेक्षाऽस्ति न तत्र प्रदीपादिप्रकाशस्य प्रकाशनार्थमपरप्रदीपापेक्षा ततोऽपेक्षाभावादनवस्थाभाव एव व्यवस्थित बाह्या
स्पष्टयन्नेव दृष्टान्तार्थं । तदर्थं—आहरणादिक्रियासु व्यापारविनियोगार्थम् । सामान्येन प्रकाशितस्यापि पुनर्विशेषेण प्रकाशनं न
विफलमित्याह—तस्येति । अनवस्थाऽभावं वक्ति—न च पुनरिति । दार्ष्टान्तिकं दर्शयन्नाह इहापीति कारणसमवायेन
द्रव्यादिकार्ये सामान्यतः वस्तूद्भूतिमात्रेण प्रकाशितेऽपि तावता पुरुषप्रयोजननिर्वृत्त्यनुपयोगमेव तदसदिति भाव । तत्र हेतु- 25
माह—अशक्येति द्रव्यादिक्रियासु असमर्थत्वेन असत्यमेवेति भाव । तत्रैवाशक्यत्वस्य दृष्टान्तमाह अङ्कुरेति ।
सत्तासम्बन्धात् सत्त्वोपयोगित्वस्य दृष्टान्तमाह—अकठिनेति । सत्तासम्बन्धप्रयोजनं दर्शयति—विचित्रेति घटपटकटादीना
मात्मत्वपरिमाणा विचित्रा उपभोगा न सन्तीति समानधर्मा अपि विशेषधर्मो भिन्नतया स्वरूपमिति
सत्त्वमपि सत्तासम्बन्धोऽपेक्षित एव न वा सत्तया सम्पूर्णमङ्गलाया प्रदीपप्रकाशस्थानीयया सत्तान्तरापेक्षाऽस्तीति
नानवस्थेति भाव । विचित्रपदादुपभोगस्य सर्वथा व्यावर्तनं प्रयोजनम्—घटपटेति । विचित्रेषु देशकालाऽऽकारादिभि घटादिषु 30
तस्यैव अभिधानाभिधानप्रत्ययव्यवहारसिद्ध्यर्थमिति सामान्यविशेषाभ्यां विचित्रत्वमिति सत्तासम्बन्धस्य-

---

१ सि. क. °वैकल्प्य । २ सि. क. प्रकाशनम् ।

वाक्प्रकाशितपदविषयस्यावबोधपरनरस्यारोपाभावात् योऽत्र प्रतिसमाधानविकल्पः—

सोऽप्यनुपपन्नः, अवस्थावद्दृष्टान्तासत्त्वात्, अनेकान्तत्वात्, एकान्तरूपो हि निश्चितोऽर्थो दृष्टान्तः स्यात्, त्वदुक्ताभिहितार्थस्य तु न हि स्वार्थस्यैकान्तानुगतं प्रकाशनम्, इन्द्रियेणानुपलभ्यस्य विविधोपभोगप्रसिद्धेः तस्यापि चक्षुरमेयोपकरणप्रकाश्यत्वात्, तान्य-
5 प्यात्मलब्धिप्रकाश्यानि, साप्युपयोगप्रकाश्या, तस्यापि बाह्योपयोग्यद्रव्योपयोगप्रकाश्यत्वादनवस्था, अतः परं पुनरुक्तं भवति, तस्मात् प्रकाश्यः प्रदीपप्रकाशोऽपि, अतद्रूपभावाधिगम्यत्वात्, प्रस्तुता तथापि च आश्रयस्यातद्रूपस्य प्रत्ययेनात्मानं लभते न सत एव, वाक्प्रकाशावगमितार्थस्य प्रदीपादिप्रकाशनवदिति ।

सोऽप्यनुपपन्न इत्यादि यावत् प्रदीपादिप्रकाशनवदिति कस्मादनुपपन्न इति चेदुच्यते—
न्यासमतेति वर्तमति—जैनेन्द्रत्वमेवेति । मा भूदिति [illegible] [illegible] मूढिति [illegible] [illegible] । [illegible] [illegible] [illegible] नाहं [illegible], [illegible] [illegible] अत्राहेति । [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] भाव । [illegible] [illegible] वर्तमति—[illegible] [illegible] [illegible] [illegible] भाव । [illegible] [illegible] [illegible] [illegible] भाव । [illegible] [illegible] [illegible]—यथासंख्यमिति । [illegible] [illegible]—यथासम्भवमिति । [illegible]

---

१ सि क. °[illegible] । २ सि क. [illegible] । ३ सि. क °[illegible] । ४ सि. क [illegible] । ५ सि. क. °मेव । ६ सि क. अ. [illegible] ।

यद्वा तु क्रियेत्यादि, उभयैकान्ते दोषदर्शनादिति, सदेवाऽसदेव चेत्येकान्ते, सदेवासदेव चेति वा युक्त पक्षान्तः सदसदात्मकत्वात् कार्यस्य सत्त्वमाश्रित्योपादाननियमो युक्तः, असत्त्वमाश्रित्य क्रिया युक्तेति।

यदेतत्सैद्धान्तिकं मतं—

तन्न विकल्पानुपपत्तेः, सदेवासत् सदसत्　　　　　　　　स्वेनैवात्मना

सद्व असद्वान्येनात्मना प्रागुत्पत्तेः घटो मृदात्मना सत् घटात्मना चासत्, न तावत् ..　　　5

असत्त्वप्रतिपक्षञ्च सत्त्वम्, सत् सोपाख्यमसन्निरुपाख्यम्,

सदसत्त्व न भवतीत्यर्थः।

तन्न, विकल्पानुपपत्तेरित्यादि, सदेवासत् सदसदित्यादि प्रत्युच्चारणं संक्षेपेण विकल्पद्वयेन सोपपत्तिक स्वेनैवात्मना सद्व, असद्वान्यमात्मनेत्यादि यावत् घटात्मना चासदिति, न तावदित्यादि, प्रथमं तावद्विकल्पं व्यवस्थाप्य सूत्रेण दूषणमाह सम्पाख्यानं सो[प]वर्णनं यावदसत्त्वप्रतिपक्षञ्च सत्त्व　10
मिति गतार्थम्, सतोऽसता विरोधः प्रातिपक्ष्यं वैधर्म्यमेव हेतुः, मा मंस्थाः सोऽसिद्ध इति अतस्त व्यवस्थापनार्थमाह सत् सोपाख्यमित्यादि वैधर्म्यस्फुटीकरणं यावत् सदसत्त्वं न भवतीत्यर्थ इति मुख्याख्यानम्।

अत्राऽऽचार्यं वचनमाह—

अत्र तूपादानसतोऽसत्प्रतिपक्षत्वमसिद्धम्, तदङ्गत्वात् सदात्मकत्वात्, तत्प्रवृत्तित्वाच्च, घटोर्ध्वग्रीवादित्ववत्, तदङ्गत्वस्य मृत्सत् भवतीति, भवनधर्माभावानुविद्धम्।　　　15

(अत्रेति) अत्र तूपादानसतोऽसत्प्रतिपक्षत्वं विरोधो वैधर्म्यमसिद्धम्, कुतः? तदङ्गत्वा[त्] अंगमवयवः, तदेकदेशः, यद्यस्याङ्गं स तस्य प्रतिपक्षो न भवति, यथा घटस्योर्ध्वग्रीवादित्वमिति, इतश्च

---

यस्योभयैकान्तदोषदर्शनादित्यनेन व्याख्यो—सदेवेति। तत्प्रतिपक्षमभिप्रायोऽपि—सदेवासदेव चेतीति तस्य पक्षे: सदुभयैकान्तो युक्त इति भाव। एवं वैशेषिकं सदसत्त्वमुपन्यस्तं तत्र विकल्पानुपपत्तेर्निराक्रियते—तन्नेति अत्र विकल्पनिर्णयस्य पदार्थीकरणात् प्रत्यक्षानुपपत्ता का इति चिन्त्यम्, अत्र वैशेषिकेन सदसतो नैकत्र सम्भव सत्त्वासत्त्वयोः प्रातिपक्ष्यादिति वक्तुं तदभावमपि—सतोऽसतेति विरोध अत्यन्ताभावविरूपत्वम्, प्रातिपक्ष्यं वैधर्म्यं तत्प्रतियोगित्वमभावत्वम्, तथा चासत्त्वं सत्त्वात्यन्ताभावविरूपत्वम् तदभावरूपत्वात्, ययो प्रतियोगिता न तयो सामानाधिकरण्यं यथा घटत्वाभावयोः प्रतियोगित्वे च सदसत्त्वे, तस्मात्सामानाधिकरण्ये इति भाव। ननु सत्त्वासत्त्वयो. प्रातिपक्ष्यमसिद्धमित्याशङ्क्य समाधत्ते—मा मंस्था इति तत्—सामीप्येन सामीप्यात्सिद्धिमात्रादिरोपमिति युक्ता मत्वा—अभिधाय तत्सिद्धं वस्तु सोपाख्यमुच्यते यत्किन्तु निरुपाख्यं वस्त्वुच्यते न सत्त्वमप्येऽभावोऽभावसिद्धिमात्रादिपरिहारेण यथाख्यानेन निर्दिष्टं तत्र इति निरुपा-　25
ख्यम्, तत्र सोपाख्यत्वेन स्थितादिरूपत्वेनैति, अत एव माह धर्मं यदि यथाख्यमनुमितिमर्हति, यद्यसत् न तदनुमितिमर्हति, तदत्र नैवं सदसदिति भावः। अत्र सतोऽसत्प्रतिपक्षत्वमसिद्धम्, अभावस्य भावाश्रयत्वात् भावात्मकत्वात् भावप्रवृत्तित्वाच्चेति समाधत्ते—अत्र त्विति। सत् पक्षः असत्प्रतिपक्षत्वं साध्यम्, तदङ्गत्वादि हेतव तत्र सर्वेति यद्यपीति एवं हेत्वन्तरेऽपि। घटत्वादिरूपोपादानभूते भाव एव घटत्वाभावस्य प्रतियोगितया भवति तदभावाश्रयत्वमसिद्धत्वं तत इत्याशयेनाह—अत्र तूपादानसत इति। वस्तुतः तदङ्गत्वात् सत्त्वे परस्परमङ्गाङ्गिभावः, यथा घटस्योर्ध्वग्रीवादित्वम्। अतोऽसौ तस्माद्　30
परस्परप्रतिपक्षत्वमसिद्धम्—तदङ्गत्वादिति भावात्मत्वादिरूपम्। तत्प्रवृत्तित्वादस्य भावाश्रयत्वाच्च इति, अस्माऽऽ-

---

१ मि. क °त्यसदिति। २ मि. क. स्वभावाय।

प्रतिपक्षो न भवति तदात्मकत्वात्—स आत्माऽस्य भावस्य, भावाभाव आत्मा, तद्भावात् तदात्मकत्वात् घटोऽघटीभावित्ववदेव तत्प्रवृत्तित्वात्—स एव भावो यस्य ततः प्रवृत्तिः, तेनाभावरूपेण भावः प्रवर्तत इत्यर्थः, एक एव भावाभावरूपेणार्थो घटवस्तुस्थिरशिवकादिरूपादि[युगपद्]युगपद्भाविपर्यं भावाभावप्रवृत्तिरिति अथवा भावात्मा, भावश्च प्रवृत्तिरित्येकार्थमितीति व्याख्यानं तदर्थत्वस्य भवत्
5 सद्भवतीति, सत्त्व नाम भवत एव, नाभवतः, नैनमस्य भीरर्थं ? भावाभावप्रवृत्तिमिति ।

तदर्थमेव—

प्रत्येकवस्तुस्वरूपप्रतिपत्त्यर्थसदसद्व्यवृत्तिव्यावृत्तिसदसदात्मकः स्वतोऽस्त्यन्वाविभक्त-वृत्तिपर्यनुभवनात्मकत्वादमूर्तत्पुष्पविलक्षणः मर्यान्तरमूर्तक्षणभङ्गविलक्षणश्च अतीतानागत-वर्तमानभिन्नभवनसदसदेकक्रियः, तस्मादभावो भावाज्ञ भावात्मा भावप्रवृत्तिरेव, भावश्च
10 वदितोऽपीतोऽपीति ।

प्रत्येकवस्त्वित्यादि यावत्तो भवत्सदसदात्मकः, एकमेक प्रति प्रत्येकं वस्तुनः स्वरूपं प्रतिपत्तुं प्रत्येकवस्तुस्वरूपप्रतिपत्त्यर्थं व्यावृत्तं घटार्थं शिवकादिभ्यावृत्तं पटादिभ्यावृत्तञ्च तस्मात्तदेव घटार्थं घटात्मना प्रवृत्तं भवति पटशिवकाद्यात्मना व्यावृत्तञ्च भवति, अतः सदसदात्मकः, तस्मादभावो भावाज्ञ भावात्मा भावप्रवृत्तिरेव, एवं तावद्युगपद्भाविरूपादिभ्यपेक्षयापि भवन् स घटो भावाभावेन
15 व्यावृत्तात्मप्रवृत्तिरूपेण भिन्न भवतीत्युक्तं द्रव्यक्षेत्रापेक्षम् कालभावापेक्षमप्युच्यते स एव च अभिता

भवत्यपेक्षमेव इति भेदाभेदैकम्, अभेदाभेदात्—सदात्मकत्वादिति भवत सदात्मकत्वादिति । [illegible] सर्वो भावो भावस्वभावो भवत्येव न [illegible] परस्परस्वात्मानुवृत्त [illegible] मात्मना [illegible]—तत्प्रवृत्तित्वादिति । एक एव स्थितिक्रमभावोऽर्थ [illegible] युगपद्युगपद्भाविपर्यं उक्तं प्रवर्तते यथा स्थितिस्तस्य घट [illegible]
20 [illegible] एवम् [illegible] उक्तं प्रवर्तत [illegible]—एक एवेति । [illegible] स्वभावस्वरूपात्, भावस्य च प्रवृत्ति [illegible] तेषां [illegible] चेति । [illegible] भाव एव च वस्तु [illegible]—तद्भूतमिति । [illegible] नैव [illegible] । भावस्य भावात्मा [illegible] प्रत्येकेति । [illegible] द्रव्यक्षेत्रापेक्षया [illegible]—
25 [illegible] प्रतीति [illegible] स्वरूपेण [illegible] सदात्मकं [illegible] मित्रम्, [illegible] वस्तु [illegible] न भवेत्, [illegible] प्रतीयते इति [illegible] तथैव [illegible] इति भाव । एवमयुगपद्भाविभावेन [illegible]
30 युगपद्भाविभावेनापि [illegible]—एवं तावदिति । [illegible] तस्य न [illegible] [illegible] एव च भवितेति । [illegible]

१ सि. क. [illegible] । २ सि. क. [illegible] । ३ सि. क. च ।

घटः सतोऽत्यन्ताविभक्तवृत्तिपर्यनुभवः—यामात्मनो वृत्तिं प्राक् पश्चाच्च परितोऽनुभवति तस्मात्तु तदात्मकत्वा
दमूलपुष्पविलक्षणः—केनचिद्रूपेण खपुष्पस्याभवनात् घटस्य च पूर्वोत्तररूपैर्भवनात्, अर्वाक्परभूतक्षण-
भवनविलक्षणश्च प्राक् पश्चादिदानीं च भवनात्, भवनस्य भवद्धर्मस्य द्रव्यार्थतोऽत्यन्तमभिन्नत्वात्, क्षण-
भङ्गवादेऽन्यस्य क्षणे क्षणेऽन्यस्याभ्युपगमात्तद्विलक्षणं एव भवतीति मन्येव द्रव्यार्थभवनस्याभेदादभवन
मित्यन्यदभेदेनेत्यत्र न भवतीत्यत आह—अतीतानागतवर्तमानभिन्नभवनसत्त्वसदेकक्रियः—यान्यतीतानि भव- 5
नान्यनागतानि च यानि वर्तमानभवनाद्भिन्नानि देशकालाकारनिमित्तादिभेदात्, तेभ्यश्च वर्तमान-
भवनम्, परस्परविलक्षणत्वाच्च परस्पररूपेण न सन्ति, अथ च भवनक्रियैकैव सर्वाणि तान्युच्यन्ते, कथम्?
आकाशवत्—यथा तथाप्याकाशं शब्दादिसमवायिनां घटादिसंयोगिनां चाधारभूतमेकमविच्छिन्नभवनमपि
तेषु घटपटशब्दादिभवनाधारतया भिद्यमानत्वात्तदात्मभेदाभ्यां यथाभवनेनेषणीयम्, अन्यथा तेषां घट[पट]-
शब्दादीनां सङ्करप्रसङ्गात्, तथाऽऽत्मगतेनाप्यवगाहसामान्यात्तदवयवाङ्गुलिपटाद्यवगाहभेदादसत्त्व, तथो- 10
भयात्मनो योगो द्रव्यादिकार्यत्वेति, यथाकाशं तथामूर्तत्वात् तन्तुपटादयोऽपि क्रमभावि सत्त्वसत्, यथा वा तत्तन्तु
प्यादिक्रमभावि सत्त्वसत् तथा युगपद्भावि तमपि सत्त्वक्रियाभिन्नोऽतीतोऽपीति तथाऽऽत्मकत्वप्रदर्शनं इति।

**इतरथा च नैव भवेद्वस्तु, अपूर्वत्वात्, खपुष्पवत्, वैधर्म्येण चम्पकपुष्पवत्, सत्ता-**

---

पर्यनुभावात्यन्तविलक्षणमपि तु भवात्म्याप्यनुवर्तनात् [illegible]—अर्वाक्परेति पूर्वापरपर्यन्तभूत —क्षण-
भङ्गविधौ यो क्षणः तद्विलक्षण इत्यर्थः । ननु द्रव्यार्थेन पूर्वोत्तरभावयोरभेदे द्रव्यार्थस्य सर्वैकरूपतया व्यभिचारित्वेनाभवनं 15
निरवकाशं भवैकरूपत्वात्, अन्यथा भवैकरूपता न स्यादित्याशङ्क्य समाधत्ते—नन्वेवमिति । यद्यपि वस्तु सत्तयैकरूपमनतीतं
त च परिणामा द्रव्यादेरन्यकारनिमित्तादयो एव एतत्र विशिष्टस्य देशस्य कालस्याकारस्य निमित्तस्य सम्बन्धात् विशिष्टाः
परिणामाः पृथक् पृथक् प्रतिभवा नान्योऽन्यरूपेण सन्तीत्यभ्युपगच्छतापि भवनक्रियाव्यवस्थया अविशिष्टा अपि; तस्मात् वर्तमान-
भवनमतीतानागतभवनभ्यामभवनमपि भवनरूपत्वात् भवनात्मकमित्यभिप्रायेणाह—अतीतानागतेति । परस्पर भेदमाश्रित्ये-
त्याहेति । अन्योऽन्यापेक्षामभवनमाह—परस्परेति । भवनैकरूपतामाह—अथ चेति । दृष्टान्तमुपवर्णयति—यथाकाशमित्ति यत्र 20
येषां शब्दानां समवाय परिसमाप्तो भवति यत्र च घटपटादिसंयोगाः परिसमाप्तास्ते प्रदेशा आकाशस्य भवनान्येव, शब्दसंयोगादे
सर्वेषां भवनवृत्तित्वात् तद्भेदेनाकाशस्य भेदात् [illegible]
भेदाभेदरूपमाकाशं घटपटादिसंयोगिनां घटपटादिसंयोगैरसत्त्वाधारत्वेन च सत्त्वात् सदसदात्मकमिति तथान्येष्वपी-
त्यपीति भाव । समवायस्य व्याप्यवृत्तित्वेऽपि शब्दादि [illegible] तस्यापि [illegible] पृथगाश्रय शब्दस्य
वादिनामिति [illegible] [illegible] परिमितदेशवृत्तित्वादिति [illegible] एव [illegible] सर्वेषामविकारत्वेऽपि भवनमात्रम् 25
[illegible] तेषामाधारभूतानि [illegible] भेदाभेदसमन्वया-
त्मत एव नानात्वानि परस्पररूपेण न सन्ति आधारभवनापेक्षया च तानि सर्वाणीति सदसद्रूपमाकाशमिति समुदाय-
योजना । अन्यथेति घटपटाद्याधारभेदेनाधारभूताकाशस्य भेदाभावे आधारभेदाभावे आधेयभेदाभावात् घटपटादिभावसङ्करेण
घटोऽपि पटः स्यात्, पटोऽपि घटः स्यादित्येवं सङ्करः स्यादिति भाव । आत्मगतेनाप्याकाशस्य सदसत्त्वं वर्णयति—आत्मगतेनापीति,
निर्विभागसर्वगामकमाकाशमात्मरूपम्, आकाशमपि व्यापित्वेन व्यापकत्वेन मूर्तास्तु भावा परस्परप्रतिबन्धकाः [illegible] 30
न वा व्यापिकरणा न हि निर्विकल्पपरिमाणं वस्तु व्यापिकरणं [illegible] [illegible]
परस्परमसतोऽप्यसन्नपीति भाव । दार्ष्टान्तिकं निगमयति—तथोभयात्मन इति [illegible] भावितो घटोऽपि भेदा-
भेदात्मा तदात्मक इति भाव । युगपदयुगपद्भाविभवनक्रमानुक्रमयो सदसत्त्वे भिन्नाभिन्नत्वे च परस्परव्याप्त्यनुगतत्वमाह
तमप्याह—यथाऽऽकाशमिति । वस्तुन सदसत्त्वमभ्युपगमे वस्त्वेव न भवेदिति विपक्षे दोषमाविष्करोति—इतरथा चेति

---

१ सि० क० कन्नति । २ सि० क० [illegible] । ३ भि० क० [illegible]कार्यत्वेति । × × सि०

वर्तमानमेव न स्यात्तच्च नैव स्यात्, वान्ध्येयवत् क्षणिकवादवत्, तस्मात् सदसतोः प्रतिपक्षत्वम्, इतश्च नानैकात्म्यम् विधिप्रतिषेधैकविषयत्वात्, भावितैकात्म्यचेतनाचेतनत्ववत् ।

इतरथा चेत्यादि, एवं सदसदात्मकत्वमनिच्छतो वस्त्वेव—नैव भवेदसत्, अपूर्वत्वात् निर्बीजत्वात् नास्य पूर्वमिति बहुव्रीहिसमासवचेन, न पूर्वमपूर्वं प्रागसत्त्वादिति तत्पुरुषसमासेन वा शशपुष्पवत् वैधर्म्येण चम्पकपुष्पवत् मूलाङ्कुरनिमित्तनेन पूर्वमेव सत एव चम्पकस्य पुष्पीभवनात्, तच सदसदात्मकं चम्पककुसुममिति, एवमपरत्वादनुत्पत्त्वादभेवत्वादिति योज्यम्, तस्माद्वर्तमानमेव न स्यात् तदभावाद्वर्तमानत्वादपि नैव स्यात् वान्ध्येयवत्, क्षणिकवादवदिति च तत्पुष्पवदसदात्मकत्वप्रसङ्गात् स्यादवस्थानमेतत् तन्निगमयति—तस्माच्च सदसतोः प्रतिपक्षत्वमिति इतश्च नानैकात्म्यम्—सदसतोरैकात्म्यमेव द्विःप्रतिपक्षस्य प्रसङ्गापत्तेः, कुतः ? विधिप्रतिषेधैकविषयत्वात्—विधिरन्वयः प्रतिषेधो व्यतिरेकः, तावुभावेकविषयाविस्येतत् प्रत्येकवस्तुस्वरूपप्रतिपत्त्यर्थमन्वयव्यतिरेकवृत्तिसदसदात्मकं इत्यविभक्तस्वरूपपर्यनुभवातीतानागतवर्तमानमभिन्नमचमसदसदेकत्रिव इत्यादिवचनात् सिद्धम्, तस्मात् सदसदैकात्म्यमेव भावितैरात्म्यचेतनाचेतनत्ववत्—यथा च चेतनाचेतनयोर्विधिप्रतिषेधैकविषयत्वेन भाविता चेतनमेवनोऽचेतन[म]प्युक्तं तथेहापि द्रव्यादिसदसदेकात्म्याभावित सदसतोः प्रतिपक्षतेति ।

यदपि च वैधर्म्यमुच्यते सत्सोपाख्यमसदनिरुपाख्यमिति तदपि नोपपद्यते सतोऽप्यनुपाख्यत्वात्, को हि प्रतिवस्तुविलक्षणसत्त्वेन सद्वस्तु प्रतिक्षणमुपाख्यातुं शक्नोति, असाधारणत्वात् स्वसुखादिपर्यनुभववत्, अथ च निरुपाख्यतायामपि नैव तदसत्, सामान्यसोपाख्यत्वात् यदप्यसाधारणं सुखादिपर्यनुभवादि तदपि सामान्येनोपाख्यायते किमपि सुखं दुःखमित्यादि अपि च त्वयापि द्रव्यादिकार्येण वस्तुभूतिप्रकाशमात्रेण द्रव्यादेरुपयोगक्रिया नास्तीत्यशक्यसदसत्त्वादिति विधिप्रोपयोगक्रियाप्रसिद्ध्यर्थं सत्ताद्रव्यत्वादिविशेषणसम्बन्धः कस्य इति वदता अथ च प्रागसत् सत् सम्बन्धसत्त्वात् तस्यामवस्थायाम्, सोपाख्यात्र तदुत्तरकाल सत्तासम्बन्धोपाख्यत्वादिति व्यभिचार उक्तः ।

यदपि चेत्यादि, सदसतोः प्रतिपक्षत्वभावनार्थं वैधर्म्यमुच्यते त्वया सत् सोपाख्यमनभिलप्यमिति तदपि नोपपद्यते, सतोऽप्यनुपाख्यत्वात् को हीत्यादि, वस्तुनि वस्तुनि रूपरसादौ यथोर

व्यर्थत्वादिति सौत्रान्तिकमतेन एवं नवम तीव्रमितद्रष्टिनिति बहुव्रीहिसमासान्न निर्बीजत्वादिति न भवति पूर्वमसदिति तत्पुरुषसमासात् प्रागसत्त्वादिति वाक्यं भवतीत्यत्र निर्बीजत्वादिति । वैधर्म्यदृष्टान्तं दर्शयति मूलेति पूर्वमेव कारणत्वेन सत एव मूलाङ्कुरादिक्रमेण भाव एव एवंवि समासद्वयापेक्षया व्याख्या । एवमन्येऽपि तदुत्पत्तिता अवस्थात्वादयोऽभ्यूहनीया इत्यादएवमिति । अत एवमन्न उदितानभिव्यक्तत्वं चम्पकपुष्पम् सर्वैरनभिमतम् तत् तथात्वत्वादिति तदात्मैव भवेदित्याभैतद्-तस्मादिति । तदुपलम्भप्रसङ्गमाह क्षणिकवादवदितीति । तदवेदान्ते निगमयति तस्मादिति । सप्तमीविषयस्य नियमेन तत्स्वं प्रसङ्गमेवाह—तदुभावितिति । दृष्टान्तमाह भावितेति । दृष्टान्तं व्याचष्टे—यथा चेति । एवं सदसदैकात्म्यं व्यवस्थाप्य सोपाख्येतरवैधर्म्यं निराकर्तुमाह—यदपि चेति । अन्यत्र निरुपाख्यमिति विकल्पो नास्ति तत्रोऽपि निरुपाख्य तादिवात्मना निरुपाख्यो—तदपीति । सतोऽपि निरुपाख्यत्वं समर्थयति—को हीत्यादि प्रतिवस्तु प्रतिक्षणं

१ सि इतरथा चैत्यादि । २ सि क. न तुषेत । ३ सि क. °वं तदैव ? । ४ सि क. °क्षमिति ।

साधारण आत्मा, पूर्वक्षणे उत्तरे च क्षणे विलक्ष[ण]त्वस्य भावः सत्त्वं तेन सत्त्वेन प्रतिपर्यंतुप्रतिक्षणविल-
क्षणसत्त्वेन च सद्वस्तु तदुपाख्यातुं केनचिदशक्यमसाधारणत्वात्, यदसाधारणं न तदुपाख्यातुं शक्यते,
सुखादिपर्यनुभववत्, तस्मान्नायमेकान्तः सत् सोपाख्यमेवेति, स्यान्मतं [न]ब्रूमः सत् सोपाख्यमेवेति
यतोऽयं व्यभिचार उच्यते, किं तर्हि? सत् सोपाख्यं निरुपाख्यं वा स्यात्, निरुपाख्यमसदेव
तस्मात् साधर्म्यं न भवत इत्येतदपि नोपपद्यते व्यभिचारादित्यत आह—अथ च निरुपाख्यतायामपि नैव 5
तदसत्, सामान्यसोपाख्य[त्वा]त्, उपसामीप्येनाख्या उपाख्या सचेतनार्थः, सहोपाख्यया सोपाख्या, यदप्य-
साधारणं सुखादि पर्यनुभवादि तदपि सामान्येनोपाख्यायते किमपि सुखं दुःखमित्यादि तस्मान्निरुपाख्य-
स्यापि सत्त्वस्यैकेनाप्युक्तमुक्तमसन्निरुपाख्यं सत्सोपाख्यमिति, तस्मात् केनचिदात्मना सदेवासत् सोपाख्य-
मेवेति नास्ति सदसतोर्वैधर्म्यम्, अथ वा सामान्यसोपाख्यत्वात्—यथा सामान्ये स्वेनात्मना सोपाख्यं सत्त-
था, न विशेषणात्मना सामान्यान्तरेण न तु द्रव्यादिवस्तुवदिति सत् सोपाख्यं निरुपाख्यमसदेवेति एत- 10
स्याप्यैकैकस्य सदसतोः, नास्ति विपक्षता किञ्चान्यत् अपि च त्वयापीत्यादि त्वत्कल्पनयैव सदसदिति
यत् प्रदर्शयितुमिदमुच्यते आरभ्यास्माभिर्यदेव प्रश्नो यावद्विशेषणसम्बन्धः कल्प्य इति, इह तु प्राग्वि-
शेषणसम्बन्धात् विद्यमानमेव निरुपाख्यमितीह त्वया इत्येतस्यार्थस्य प्रदर्शनार्थमुपन्यस्तः, अत आह
अथ च भवमसन्निरुपाख्यत्वादिति निरुपाख्यत्वस्य सति दृष्टत्वाद्व्यभिचार उक्तः, असत्त्व तत्र सम्बन्ध
सत्त्वात्, तस्मादसत्त्वार्थं सोपाख्यमत्र तदुत्तरकाल सत्तासम्बन्धोपाख्यत्वात् । 15

---

परिणमति न हि परिणामव्यतिरेकेण क्षणमात्रमपि वस्तु भवितुमर्हति इत्याद्यभिप्रायस्य तदर्थममाभावस्तुत्पद्यते ते चानुक्र-
मामिपरिणामा सजातीयविजातीयव्यावृत्तत्वेन न साधारणा न केनचिदप्यन्येन निर्देष्टुं शक्यन्त इति प्रतिपर्यन्तुप्रतिक्षणमसत्त्वेन
अन्योऽपि निरुपाख्या इति भावः । सजातीयविजातीयव्यावृत्तत्वमेवाह—असाधारणत्वादिति समानधर्मेण विरुद्धधर्मेण
चान्यैरसमानत्वादित्यर्थः पीतत्वरक्तत्वोपादानत्वं हि वाक्यकुण्डलादि प्रतिक्षणं भिन्नभिन्नपरिणामेन परिणामा भवन्ति अन्यथा
पीतस्य तावतस्मात्पुरातनस्य एव भवेत् न च ते परिणामाः सदेकत्वव्यवहारकाल्याप्यकत्वमात्रेण केनचिदप्युपाख्यातुं शक्यन्त 20
इति भावः । व्याप्तिं दर्शयति—यदिति । ननु सत् सोपाख्यमित्युक्त्वा सोपाख्यत्वव्याप्यत्वं सत्त्वस्य नाभीप्सितम्, यतोऽयमन-
परिणामेषु व्यभिचार आपद्येत किन्तु निरुपाख्यत्वाव्याप्यत्वमसत्त्व तस्मादसत् न सता साधर्म्यं भजत इत्याशयेनाह—स्यान्मत
मिति सत् सोपाख्यमेवेत्यनेन यत् सत् तत् सोपाख्यमेव न निरुपाख्यमिति न नियमः सत् सोपाख्यं स्यात् निरुपाख्यमपि
स्यादित्यर्थं यत्तु निरुपाख्यं तदसदेवेति ब्रूम इति नियमोपाख्यम् । अत्रापि व्यभिचारमाविर्भावयति—एतदपि नोपपद्यत
इति नियमोऽयमपि न युक्तो व्यभिचारादिति भावः । अनुक्रमपरिणामस्य केनचिदुपाख्यातुमशक्यत्वेऽपि नाशासदप्युपाख्यातुमर्हति 25
विशेषरूपेण असौ निरुपाख्यः न तु सामान्यरूपेण तेन तु सोपाख्यमपीत्याशयेनाह—अथ चेति असाधारणस्यापि अभिधेय-
त्वेऽपि नानुक्रमपरिणामोऽसत् सामान्यरूपत्वादित्यर्थः । हेत्वर्थमाह—उपेति सामीप्येन अभिधानं तदुपाख्यादिशब्दाः सत्,
सत् अर्थं एतावभिधानानि केवलान्वयित्वात् धीप्रयोजकविषयत्वात् अन्यतमोपगामीति भावः । हेतुं दृष्टान्ते साधयति—यद
पीति । निगमयति सदसतोर्वैधर्म्याभिधानं—तस्मादिति तत एवासत्त्वात् सोपाख्यत्वात् न सदसतो प्रतिपन्नतेति भावः ।
स्वरूपेण सोपाख्यत्वनिरुपाख्यत्वे दर्शयितुमन्यथा व्याचष्टे—अथ वेति यथा हि द्रव्यादिवस्तु स्वात्मनाऽपि सोपाख्यमन्येन 30
द्रव्यत्वादिनाप्युपाख्यं भवति न तथा सामान्यं सत्, किन्तु स्वरूपेणैव सोपाख्यं नान्येन विशेषणेन तेन तु निरुपाख्यमेव तस्मात्
सामान्यरूपं सत् सोपाख्यं निरुपाख्यमपि असदपि चेति विरुद्धत्वात् सदसतोरैकात्म्यमेवेति भावः । स्वाभिप्रायेणाह न सदसतो
प्रतिपक्षता सत्तासम्बन्धभावात्मके वा स्वपक्षत एतावत्त्वादिति पूर्वोक्तिसम्बन्धेनोपन्यस्यति—अपि चेति । सोपाख्यनिरुपाख्यत्वाभि-
धानेऽभिधानाभावमाह—इह त्विति । व्याख्यानमाह—अथ च भवमिति अनेन प्रयोगान्तरमत्रात्मनिरुपाख्यत्वमुक्तम् ।

---

१ सि. क. ड. डे प्रतिपर्यन्तुप्रतिक्षण । २ सि. क. ड. डे तदुपाख्यातुं ।

एवं सोपाख्य[त्वनिरुपाख्य]त्वाविरोधमापाद्य प्रस्तुतधर्मस[म]त्वाविरोधे साधनमाहऽऽचार्यः—

सदसदेव तु सोपाख्यनिरुपाख्यत्वात्, सामान्यवत्, अथ वा सोपाख्यं निरुपाख्यञ्च, सदसत्त्वात् सामान्यवत्, सामान्यं स्वसत्, न सामान्यसत्, वस्तुवदिति सदेवासत् सामान्यम्, तदेव च सोपाख्यम्, स्वपरप्रत्ययाभिधानाधानात्तदेव निरुपाख्यञ्च, वस्तुवत्

5 सामान्याद्यन्तराभावादिति सोपाख्यमेव निरुपाख्यम् वस्तुनि विपर्यय इति व्यवस्थापिते दृष्टान्ते साध्यां धर्माभ्यामेव प्रतिपद्यतां भवान् सोपाख्यनिरुपाख्यत्वात् सामान्यादिद्रव्यादिवत् सदसत्त्वमिति ।

( सदसदेव स्थिति ) सदसदेव तु सोपाख्यनिरुपाख्यत्वात् सामान्यवदिति अथ वा सोपाख्यं निरुपाख्यञ्च सदसत्त्वात् सामान्यवदिति सदसदैकात्म्ये साध्ये सोपाख्यनिरुपाख्यत्वं हेतुः सोपाख्य-

10 निरुपाख्यत्वे च सदसत्त्वं भोक्तृभावेन त्वयैवाभ्युपगतत्वात् सामान्यदृष्टान्तस्य सदसत्सोपाख्यनिरुपाख्यत्वैकात्म्यैकात्म्यं दर्शयति—सामान्य स्वसत्—स्वसत्तया सत्, न सामान्यसत् वस्तुवत्, सम्बन्धसत्त्वे सर्वः यथा स्वसत्तेनैव सामान्येन सम्बन्धाद्द्रव्यगुणकर्मादिर्वस्तु सम्बन्धसदिष्यते न तथा सामान्यम् सामान्यस्य सामान्यान्तरसम्बन्धाभावादिति सदेवासत् सामान्यम् इत्यभिप्रायस्य हेतुत्वार्थत्वात्, एवं सामान्यस्य सदसत्त्वैकात्म्यम् तदेव च सोपाख्यम् स्वपरप्रत्ययाभिधानाधानात्—आत्मनि सम्बन्धिनि च

15 प्रत्ययमभिधानञ्चाधत्ते सती सत्ता सन्ति द्रव्यगुणकर्माणीति च, सामान्य तदेव निरुपाख्यञ्च—नास्योपाख्याऽस्ति वस्तुवत्—वस्तुन इव सम्बन्धिसामान्याद्युपाख्या नास्ति सामान्यादेः सामान्याद्यन्तराभावादिति सोपाख्यमेव निरुपाख्यम् द्रव्यगुणभावेन सोपाख्यनिरुपाख्यत्वयोर्वैधर्म्याभावः वस्तु[नि] विपर्यय इति—द्रव्यादिविषये वस्तुनि स्वतो निरुपाख्यता सामान्येन सोपाख्यता स्वतः[अ]सत्त्वं सम्बन्धकृतसत्त्वञ्च

सत्तासम्बन्धकृतसत्त्वमिति व्यवस्थापिते दृष्टान्तमभिधाय साधर्म्यवैधर्म्ये इति भाव । एवं सोपाख्यनिरुपाख्यत्वयोः परस्परं विरोधं

20 निराकृत्य सोपाख्यनिरुपाख्यत्वयोः सदसत्त्वाभ्यां परस्परव्याप्तत्वमनुमाय सोपाख्यनिरुपाख्यत्वाभ्यां सदसत्त्वे सदसत्त्वाभ्यां वा सोपाख्यनिरुपाख्यत्वे साधयन्नुपन्यस्यति—सदसदेव स्थिति । अत्र च स्वपरोक्तस्य प्रथमेन सदसत्त्वे सोपाख्यनिरुपाख्यत्वयोः स्वाभ्युपगतत्वात् धर्मद्वये हेतोर्धर्मिविशेषणत्वेन—सदसदैकात्म्य इति । दृष्टान्ते साध्यहेत्वोः सद्भावं विवृणोति—सामान्यमिति स्वसत्तया सत् सामान्येन सम्बन्धसत्तयाऽसदित्यर्थः । सम्बन्धसत्तयाऽसत्त्वे वैधर्म्यदृष्टान्तमाह—वस्तुवदिति यथा—द्रव्यगुणकर्मादिवस्तु । तानि हि स्वसत्तया सन्ति सामान्यन्तु न सम्बन्धसत्तया सत्, तत्र सामा-

25 न्यस्य सम्बन्धाभावादिति दर्शयति—यथेति । एवं प्रथमप्रयोगानुसारेण साध्यं द्वितीयप्रयोगानुसारेण हेतुं सदसत्त्वं प्रदर्श्य तत्रैव सामान्ये सोपाख्यनिरुपाख्यत्वं दर्शयति—तदेव चेति सामान्यमेव च सोपाख्यम्, कस्मिन् सामान्ये परस्मिन् द्रव्यगुणकर्मात्मके अर्थे सन्तीति प्रत्ययमभिधानञ्च जनयतीति भाव । सामान्ये निरुपाख्यत्वं दर्शयति—तदेव निरुपाख्यञ्चेति सामान्यमेव हि सोपाख्यं तत्र द्रव्यादौ तस्य सोपाख्यत्वात् यदि स्वप्रत्ययाभिधानाधानात् तदेव सोपाख्यं नैतावता सोपाख्यं सामान्ये वर्तते स्वत एव स्वात्, द्रव्यादि च सामान्यप्रत्ययविशेषाख्या सोपाख्यमेव न निरुपाख्यमिति भाव । द्रव्यादौ सामान्यादे-

30 र्वैधर्म्यं सोपाख्यनिरुपाख्यत्वयोर्दर्शयति—वस्तुनीति द्रव्यादेः च स्वतः सोपाख्यता स्वपरप्रत्ययाभिधानाधानाभावात् स्वतो निरुपाख्यता सामान्येन च सोपाख्यतेति सामान्याद्विपरीतम्, तथा द्रव्यादेः स्वतोऽसत्त्वं सम्बन्धकृतसत्त्वम् सामान्यतो वैधर्म्यमिति भाव । तदेवं सामान्ये दृष्टान्ते एकस्मिन्नपि सोपाख्यनिरुपाख्यत्वयोः सदसदैकात्म्यसाध्यतया सा-

1 सि क. ख दे. °व्यास° ।

सद्भावो विपरीतम् अतो व्यवस्थापितं इत्यादि, व्याख्यातदृष्टान्ते सोपाख्यनिरुपाख्यत्वैकग्राहीकृतहेतु धर्मयोः सदसत्त्वैकग्राहीभूतसाध्यधर्माविनाभाव उपसंह्रियते, तस्मात्ताभ्यां धर्माभ्यां भिन्नौ विरुद्धौ चेत्त-भिमताभ्यामेव प्रतिपद्यतां भवान् सोपाख्यनिरुपाख्यत्वात्, सामान्यादिद्रव्यादिवत्—सामान्यविशेषसम-वायाः सामान्यादयः, द्रव्यगुणकर्माणि द्रव्यादीनि, सामान्यादयश्च द्रव्यादीनि च यथा सन्त्यसन्ति च सोपाख्यनिरुपाख्यानि चेति सोपाख्यनिरुपाख्यत्वं सदसदैकात्म्ये हेतुः सदसत्त्वमपि सोपाख्यनिरुपाख्य-त्वैकात्म्ये तथैव हेतुस्त्वन्मतेनैव, उपनये तु द्रव्यादीनां दृष्टान्तत्वेनोपादान स्वयंवेद्यत्वात्, अत्रापि सद सत्त्वैकात्म्ये सोपाख्यनिरुपाख्यत्वैकात्म्ये च निःसंशयमविपक्षत्वेति ।

इदानीं स्याद्वादे परोक्तम् दोषान् परिहर्तुकाम आह—

यत्तूक्तं स्याद्वादिनं प्रति पूर्वदोषपापीयस्त्वाच्च सदसत् कार्यम्, तत्र हि सदसत्कार्ये पक्षयोः सति क्रियाया अभावः, असति चोपादाननियमाभावः, विरोधादिति द्वयदोषो जैन स्यापि हेतूपादानक्रियानियमाभाव इति द्विदोषता पापीयसीति, तन्न, परिहृतपूर्वदोषत्वात् ।

यत्तूक्तमित्यादि, टीकायां प्रस्तुमतो स्याद्वादिनं प्रति पूर्वदोषपापीयस्त्वाभेऽसुक्तौ दोषौ, तत्र सदसत्कार्यपक्षयोः सांख्यवैशेषिकोक्तयोर्यथासंख्य क्रियाऽनुपपत्त्युपादाननियमाभावदोषौ यथोक्त उपादान-नियमाभावसति[सति]च क्रियाया अभावमनतिक्रान्त सदसत्कार्यमिति दोषद्वयं प्रसज्यते जैनस्य पूर्वदोषपापीयस्त्वं विशेषेणानुभूयते तद्यथा—तत्र हीत्यादि यथासंख्यं प्रत्येकदोषप्रदर्शनमग्रतो गतार्थो यावद्धेतूपादानक्रियानिय-माभाव इति—हेतवो दण्डादयो घटस्य मृदुपादान क्रिया कुलालव्यापार इति, अस्मिन् पुनः सदसत्कार्यपक्षे द्विदोषता पापीयसी सदसत्पक्षाभ्यामेकैकदोषाभ्यां, सत्त्वात् कार्यस्य घटादेर्यायाः क्रियाया अभावः असत्त्वादुपादान[ा]भाव इत्येवं द्विदोषत्वात् पापीयानेष पक्ष इति, अत्राचार्य आह—तन्न परिहृतपूर्वदोष-त्वात्—परिहृतावस्मिन् सदसदैकात्म्यकार्यपक्षे पूर्वोक्तौ क्रियाभावोपादाननियमाभावदोषाविति ।

---

सत्त्वधर्माभ्यामविनाभावो व्यवस्थापित इत्यस्यैवाह—व्याख्यातेति । अविनाभाव सामान्यविशेषसमवायेषु तद्धर्मत्वेन द्रव्यगुणकर्मसु तयोः तत निमित्तमाह—ताभ्यां धर्माभ्यामिति । सामान्यादिद्रव्यादिवदित्यत्र द्रव्यादिदृष्टान्तीरणाभिप्रायमाविष्कर्ति—उपनये त्विति । प्रकृतमाविष्कर्तुं स्याद्वादं दोषानुद्धर्तुमाह—यत्तूक्तमिति । तदुक्तिमेव प्रकाशयति—पूर्वदोषेति । कार्यस्य सदसदेकात्मकत्वेऽपि पूर्वदोषाभ्यां पापीयानेव यौ पूर्वदोषावभिमतावाह—तत्रेति कार्यस्य सत्त्व-पक्षे सांख्याभिमते असत्त्वपक्षे वैशेषिकाभिमते क्रमेण क्रियाऽनुपपत्तिरुपादाननियमाभावश्च दोषाविति भावः । तमेव दोषानुप दर्शयति यथोक्तमिति । स्याद्वादिनैव सत्त्वेऽसत्त्वे चोक्तावेतौ दोषावुभयात्मकत्वेऽपि दुष्परिहरावेवेत्याह—दोषद्वयमिति । दोषद्वयमाह—सत्त्वादिति कारणकाले कार्यस्य घटादेः सत्त्वे कारकव्यापारवैफल्यमपि च तत्प्रयत्ने तत्साध्यानुप-रमप्रसङ्ग इति भाव । असत्त्वादिति कारणे कार्यस्यासत्त्वे सर्वस्यसर्वस्मिन् भावमात्रस्यासत्त्वमपि कथं भवेत्, असत्त्वे च नियतोपादानत्वं न स्यादिति, असत्त्वविशेषात्सर्वेषामुपादानताऽनुपादानता वा स्यात् अन्यदि च दण्डादिव्यापारो नियामको न प्रवर्तेतेति भाव । प्रयुक्तो कारणकार्ये द्रव्यात्मना सद् पर्यायात्मना चासदिति स्याद्वादिनिर्विशेषितत्वात् तत्सत्त्वेन प्रागुक्तोभय-दोषप्रसक्ति स्याद्वाद इत्यत्र समाधत्ते—परिहृतेति पर्यायात्मनाऽसत्त्वात् द्रव्यात्मना सत्त्वेऽपि न क्रियानुपपत्ति पर्यायात्मना-

---

१ सि. क. °विशेषा । २ सि. क. स्वात्म्य । ३ सि. क. एवं । ४ सि. क. पापीयसी । ५ सि. क. तत्त्व ।

ततरेणैवासौ बाधयति प्रश्नपूर्वकम्—

तत्र हि सत्कार्यपक्षे क्रिया किं विरुध्यते ? यदसावेकान्तेन सन्नेव घटः इत्याह ततस्तस्य क्रियाकरणं न युज्यते, कर्तव्यस्याभावात् कृतघटवदित्येव तस्य क्रियाऽभावदोषो भवति, न पुनराकांक्षितकर्तव्यपर्यायद्रव्यवादिनः स्याद्वादिनः, यदि त्वसौ स्याद्वादिना कर्तव्यत्वमपि 5 विदर्शितं च एनमेवं ब्रूयात् 'क्रियाभावदोषस्ते प्राप्तः, कर्तव्यस्याभावात्, कृतघटवदिति'।

(तत्र हीति) तत्र हि सत्कार्यपक्षे क्रिया किं विरुध्यते ?—केन हेतुना सांख्ये यदसावेकान्तेनैवापि ब्रवीति कारणवदिति द्रव्यार्थतो हि मृत्पिण्डे घटोऽस्ति, न पर्यायतः सांख्यस्तु सन्नेव घटः कार्यत्वपर्याय- निरपेक्ष इत्याह ततस्तस्य क्रियाकरणं निष्पन्नस्य सर्वथा विद्यमानस्य न युज्यते कर्तव्यस्याभावात् कृतघटवत्- निष्पन्नघटवदित्येव तस्य सत्कार्यवादिनः क्रियाभावदोषो भवति न पुनराकांक्षितकर्तव्य[त्व]पर्यायद्रव्यार्थ- 10 वादिनः स्याद्वादिनः स्यात्—सन्नेव मृत्पिण्डे घटः केनचिद्धर्मेणासन्नपीति यतः परिहृतपूर्वोक्तसत्कार्यैकान्त- वाददोषत्वात्, यदि त्वसौ सांख्योऽपि स्याद्वादिना कर्तव्यत्वमपि विदर्शित—स्याद्वादिवत् कथञ्चित् कृतमि- त्यादिनाऽनेकान्तवादिना विशेषणेन विशेष्य सदेव कार्यमिति, ततः च एनमेवं ब्रूयात्—यो वादी सुसमीक्षितवाक्यगुणदोषोऽपि क्रियाभावदोषस्ते प्राप्तः कर्तव्यस्याभावात् कृतघटवदिति च ब्रूयात् परिहृत- पूर्वदोषं वादिनं सांख्यमस्य वाऽभ्युपेतानेक[ान्त]वादमिति ।

15 असत्कार्यपक्षेऽप्युपादाननियमः किं विरुध्यते ? यदसावेकान्तेन क्रियागुणव्यपदेशा- भावादसत्कार्यमिति इत्युप एवमिहितस्याभ्युपगतस्यार्थस्य पर्यवसानं यदा ब्रूयात् तस्य घटार्थितायां तन्त्वाद्युपादाननियमो न युज्यते तत्रासत्त्वात् तृणादिवदित्यसत्कार्यैकान्तवादेऽप्युपादाननियमा- भावदोषः, सोऽनेकान्तवादे स्यादादिविशिष्टे नास्ति यथा यदि वैशेषिकोऽपि विशेषं ब्रूयात् च एनं किञ्चिदपि ब्रूयात्, तस्मात् ततः स्याद्वादिनः पूर्वदोषो कुतः पापीयस्त्वम् ? ।

---

*0 [illegible] इति भाव । [illegible] तत्र हीति [illegible] । [illegible]—द्रव्यार्थतो हीति [illegible] इति भाव । [illegible] 5 [illegible] न पुनरिति । [illegible]—यदि त्वसाविति । [illegible] पापीयस्त्वम् [illegible] । [illegible]

---

१ सि० क० त्वसौ । २ सि. क. सत्येवासौ ।

असत्कार्यपक्षेऽपीत्यादि, वैशेषिक प्रत्यसत्कार्यवादिन्नुपादाननियमाभावदोष उक्तो योऽयं स किं विरुध्यते ? इति पूर्ववत् प्रश्नोपक्रमं भावयति—यद्यसावेकान्तेनेत्यादि, यद्यसौ वैशेषिकः पर्यायार्थाश्रयेण क्रियागुणव्यपदेशाभावादसत् कार्यमिति द्रव्यार्थतो हेतुषु तुर्यादिपूपादानेषु च तन्तुषु सन्निहितस्याप्यसत्त्वस्य क्रियान्तरेण क्रियाऽभिव्यङ्ग्यपटाख्यस्यार्थस्य पर्यवसाया—अनपेक्ष्य तु ब्रूयात्, तस्य पटार्थितायां तत्त-दुपादाननियमो न युज्यते, तथासत्त्वाविशेषादिति—यथा तृणाद्युपादाने पटार्थितायां न युक्तः तत्र तस्या 5 सत्त्वात्, एवं तन्तूपादानमपीति—इत्यमसत्कार्यैकान्तवादेऽप्युपादाननियमाभावदोष, सोऽनेकान्तवादे स्याद्वादविशिष्टे नास्ति, स्यादसत्कार्यमिति वचनत्वावधारणमपि यदेवथा यदि वैशेषिकोऽपि विशेषं ब्रूयात् न पुनः किञ्चिदपि ब्रूयात्, न तथा तस्य वादिनो विशेषिता न्यायव्यतिरेकधर्मधर्मिव्यवस्थस्य विज्ञानुपपत्त-भागमात्रमपि वाच्यमस्तीति, उक्तञ्च 'इट्ठुविसयोवणीअ वइ वयणिज्ज परो नियत्तेइ । जति तं तहा पुरिल्लो दाइंतो केण जिव्वंतो ॥' ( संम० का० ३ श्लो० ५८ ) तस्मान्न तत्र स्याद्वादिनः पूर्वदोषो, कुत पापीयस्त्वम् ? । 10

ताभ्यां वा श्रेयस्त्वमेवेत्यत आह—

एवमस्मिन् पूर्वश्रेयस्त्वार्थं मापुन्नाहे दर्शित एव स स्वपक्षरागादसत्प्रक्षेपाद्वा नाथ युक्तस्त्वया ।

(एवमिति) एवमथ पूर्वश्रेयस्त्वार्थः—पूर्वाभ्यां वादाभ्यां श्रेयसो भावस्य भावः पूर्वश्रेयस्त्व, तदेवार्थः स्याद्वादस्येति, सोऽयमापुन्नाहः पूर्वश्रेयस्त्वार्थः परिहृतदोषवचनावकाशः, तस्मिन्नापुन्नाहे प्रति- 15 ज्ञानिर्देशदर्शित एव मया—स्यात्सत् कार्यं स्यादसत् कार्यमिति स पुनस्त्वया स्वपक्षरागादसत्प्रक्षेपाद्वा नावयुक्तः ।

यत्पुनरिह सद्भागस्योपादाननियमः, असद्भागस्य क्रिया च युज्यतेऽतः सदसद्वादयोर

युक्तमसमसितनाम केवल क्रियागुणव्यपदेशाभावात् प्राक् पटाभावधियि ब्रूते तदिदमभिधानं पर्यायैकैकत्वसमैनाह यद्यसा-विति । द्रव्यार्थतस्तन्तुपूपादानभूतेषु तुर्यादिषु हेतुषु न सन्तं कारणक्रिया निमाऽभ्यक्त क्रिया च प्रकाशं परमुपेक्ष्यमाण 20 इयासो तथा वर्णितस्य—द्रव्यार्थत इति । एवमसत्त्वाविशेषात् तन्तुवत् सर्वेषामुपादानतया प्रवृत्तं प्रसज्यत इति तत्तत एवो-पादानं न तु तृणादस्य प्रत्युपादाननियमाभाव प्रसज्यत इति दर्शयति—तस्य पटार्थितायामिति । यदि वैशेषिकोऽपि द्रव्यार्थतः पर्योऽपि पर्यायार्थतया नास्तीत्यत्र [illegible] न एवमुपादाननियमाभावदोषं ब्रूयादित्याह—यदि वैशेषिकोऽपीति कार्यं यदि स्यादसत् कार्यमिति द्रव्यार्थत कार्यरूपतया [illegible] पर्यायार्थतो विशेष ब्रूयादित्यर्थः । न तथेति सामान्यवि-शेषात्मकवस्तुप्रतिपादकेन न तस्याणुमात्रमपि निविशेषवार्तं वक्तव्यमस्तीति भाव । तदर्थे सैद्धान्ती सम्मतिगाथामाह—उक्त- 25 ञ्चेति यदि हि द्रव्यार्थत सत् पर्यायार्थतोऽसदिति परस्परापेक्षया सदसत्त्वे स्यात्सत्त्वे कार्ये धर्मिणि व्यवस्थिते एवमेव तत्ते-रपक्रमात् इत्या व्यवस्थापयितुमिच्छता यो वादी एकान्तं सद्रूपमसद्रूपं वा वदेत् स परेण निवर्तनीयो भवेत् यदि स एव वादी द्वितीयपर्यायमेवं स्याद्वादप्रयोगेण वदतस्तिष्ठेत न केनापि बाधकत्वं प्रतिपद्यते भाव । उपसंहरति—तस्माच्चेति । न पूर्वदोषपापी-यस्त्वं स्याद्वादस्य किन्तु पूर्वाभ्यां वादाभ्यां श्रेयस्त्वमेव दर्शयति एवमयमिति । व्याचष्टे—पूर्वाभ्यामिति श्रेयसो भाव श्रेयस्त्वं पूर्वाभ्यां श्रेयस्त्वं पूर्वश्रेयस्त्वं तदेवार्थोऽस्यासौ पूर्वश्रेयस्त्वार्थ —पूर्वावादयोर्विरोधाभावोऽभ्यस्त प्रकार्यं कस्मात् ? परिहृतपूर्वदोषाव- 30 काशत्वात् कथं ? कार्यस्य स्यात्सत्त्वमसिद्धेन सदाऽसत्त्वं वा निरस्यतीति भाव । एवं मया प्रदर्शितोऽपि त्वया नाभ्युपगत इत्याह—तस्मिन्निति अभ्युपगमे हेतुत्व स्वपक्षराग परपक्षप्रद्वेषो वा रागापेक्षया प्रद्वेषस्य प्रवर्तकत्वेऽन्यायकत्वात् तमेव प्राधा-न्येनोपादाय वाक्येनोपदर्शितम् । प्रकारान्तरेण वादिनोर्व्यं पूर्वदोषपापीयस्त्वं निराकर्तुमनुवदति—यत्पुनरिति । पूर्वदोषपापीयस्त्वे

न्यतराश्रयेण सार्वंशो वस्तुनि स एवेति चेन्न विपर्ययप्रसङ्गात्, एकस्योभयात्मकैकवस्तुत्वे कुत एतत् सद्भागमाश्रित्यैवोपादाननियमो न त्वसद्भागमाश्रित्य असद्भागमाश्रित्यैव च क्रिया, न सद्भागमाश्रित्येति विशेषहेत्वभावादिति पूर्वदोषपापीयस्त्वमेव' इति ।

यत्पुनरिदमित्यादि, पूर्वपक्षः परस्य भावत् पूर्वदोषपापीयस्त्वमेवेति, जैनेनायं परिहारः पूर्व-
5 दोषपापीयस्त्वेऽभिहितः—सदसत्कार्यवादिना सद्भागस्योपादाननियमः—मृदि सत्त्वाद्घटस्य मृदुपादान-नियमः, तथा वा असद्भागस्य क्रिया च घटस्य युज्यते, सदसदंशयोरन्यतराश्रयेण सार्वंशो वस्तुनि स एवेति चेदित्याशङ्काम् एतस्यान्यस्य इत्यर्थान्तरीयं परिहारमाशङ्क्योत्तरमाह—एतच्च न, विपर्ययप्रसङ्गात् विपर्ययः सद्भागमाश्रित्य क्रियाप्रसङ्गोऽसद्भागमाश्रित्योपादाननियमप्रसङ्गः, अनिष्टो च ते जैनस्य, एकस्यो-भयात्मकैकवस्तुत्वे विशेषहेत्वभावात्—यस्मिन् सत्युभयात्मके कुत एतदित्यादि गतार्थं विपर्ययप्रसङ्गापादनं
10 विशेषहेत्वभावात्—हेतुहेतुनियमाभावात् ।

अत्राचार्य आह—

एतदपि न किञ्चित्, कार्यत्वादेव, क्रियत इति हि कार्यम्, तस्मिन्नुपादानक्रिययोः स्वविषयनियतौ, एकस्योभयात्मकत्वात्, एकपुरुषनियतपितृपुत्रत्ववत्, न ह्येकस्य पुरुषस्य पितृपुत्रत्वात्मकत्वेऽपि ते अनियतविषये दृष्टे किन्तु नियतविषये एव, न तु नियमाभावः,
15 एवं वस्तुन उभयात्मकैकत्वेऽप्युपादानक्रिययोः स्वस्वविषयनियतत्वान्न विपर्ययप्रसङ्गः ।

(एतदपीति) एतदपि न किञ्चित् नोत्तरस्य गन्धोऽप्यस्तीत्यर्थः, कस्मात्? कार्यत्वादेव, क्रियत इति हि कार्यम् तस्मिन् कार्ये उपादानक्रिययोः स्वविषयनियतौ[ भावा ]भावावेव न[ ियम ]ा[भावः] तयो विषयः स्वविषयः उपादानस्य भवेन नियमः तस्य तत्र नियतत्वात् भावो विषयः क्रियायाः पुनर

---

परेणोद्भावित जैनस्य मत्प्रतिविधानमभिहितं तदर्थं दर्शयति-जैनेनायमिति सदात्मना भवस्य सत्त्वादुपादाननियमो असदात्मना
20 चासत्त्वात् क्रियया करणमिति च परिहार परस्यैकात्म्ये जैनेनोक्त इति भाव । सोऽयं परिहारो न युज्यते विपर्ययप्रसङ्गादि त्यत एतच्च नेति । भावाभावविभागे नियामकाभावात् क्रियायोऽपेक्षं तत्स्मुपादानापेक्षमसत्त्वमपि स्यादिति दर्शयति-विप र्यय इति । नियामकाभावमाह एकस्येति । सद्भाग एवोपादानापेक्षित्वात् तु असद्भाग एवोपादानापेक्षित्वादेव असद्भाग एव क्रियापेक्षत्वादेव सद्भागस्तु तदपेक्षित्वादेव इत्येव नियामकाभावादित्याशयेन व्याचष्टे-हेतुहेत्वेति । एकस्योभ- यात्मकत्वेऽपि तयो [illegible] नियामकाभावेऽपि ... एतदपीति । [illegible]
25 [illegible]
[illegible] इति ... [illegible] भाव एव [illegible]
[illegible] उपादान[illegible] ... कार्यत्वादेवेति [illegible] ।
अस्मिन् कार्ये इति व्याख्या [illegible] भावाभावात्मके [illegible] । [illegible]
30 विषय इति । तस्य तत्रेति [illegible]

सत्त्वेन नियतत्वादभावो विषयः, उच्यते, ते चोपादानक्रिये स्वस्वविषये नियते इति कथं ज्ञायते ? एकस्योभयात्मकत्वात्–सदसदात्मक एकं कार्यं यथाऽभ्युपगतं त्वया च दोषाभिधित्सया, तस्मादेकस्यो-भयात्मकत्वात्, यथा तूभयात्मकस्यैकस्य तस्य तस्य स्वविषयनियतता दृष्टा, एकपुरुषनिमित्तपितृपुत्रत्ववत्, न ह्येकस्येत्यादिदृष्टान्तव्याख्यानं यावत् न तु नियमाभाव इति, एवमित्यादिदार्ष्टान्तिकव्याख्यानमिति, नियमा-भावसाधर्म्यप्रदर्शनेन दोषाभावप्रदर्शनम्, उभयैकत्वमेव च विशेषहेतुः, तस्य विषयनियतत्वान्नास्ति विप- 5 र्ययप्रसङ्गः, तस्मात् पूर्वाभ्यां श्रेयस्त्वमेव ।

अभ्युपेत्यापि विपर्ययप्रसङ्गमपि—

विपर्ययप्रसङ्गापत्तावप्येवंविधार्थतैव, सदसदात्मनो वस्तुनोऽसङ्गागमाभिन्नोपादाननियमाभाव एव, अनुपादानसत्तादिभावसामान्यलभ्यस्वरूपत्वात्, अस्य नोपादाननियमोऽस्ति, असङ्गागमाभिन्न क्रियाया अभाव एव, तस्य वादिनः सर्वस्य तथात्वादसमानं किञ्चिन्नास्ति । 10

(विपर्ययेति) विपर्ययप्रसङ्गापत्तावप्येवंविधार्थतैव–अनेकान्तसिद्धेर्न बाधकम् यद्यपि सदसदात्मनो वस्तुनो योऽसौ पर्यायार्थोऽसङ्गागो भुवि घटाभावः तदभिन्नोपादाननियमाभाव एव कस्मात् ? अनुपादानसत्तादिभावसामान्यलभ्यस्वरूपत्वात्–प्रागभावे प्रागुत्पत्तेः कार्यमसदेव समवाय्यसमवायि-कारणसान्निध्ये जायते, न तस्योपादानेनार्थः कश्चित्, उत्पन्नं सत् सत्तयाऽभिसम्बध्यते द्रव्यगुणकर्मसु द्रव्यत्वेन द्रव्यं गुणत्वेन गुणः कर्मत्वेन कर्मेत्येवमिमर्थाः सामान्यास्यैर्लभ्यस्वरूपत्वादेति नैव कार्यस्योपादान- 15

---

[illegible] प्रत्येन [illegible] । उपादानक्रिये स्वस्वविषयतयां [illegible]–ते चेति एकस्योभयात्मक-त्वात्–[illegible] सदसदात्मकमिति यथा [illegible] त्वया [illegible] भाव । एकपुरुष-एकपुरुषेति [illegible] एव पुत्रत्वयोर्न [illegible] प्रति पुत्र [illegible] प्रति पिता भवति तत्र पुत्रापेक्षया [illegible] पितृत्व पुत्रत्वापेक्षमेव नियतम् न पितृत्वापेक्षम्, पुत्रत्वं च पितृत्वापेक्षमेव न पुत्रत्वापेक्षम्, तथा [illegible] भावः । न तु नियमाभाव इति न विपर्ययप्रसङ्ग इति च प्रदर्शनं यथा न [illegible] विपर्ययप्रसङ्गोऽपि नेति साम्यप्रदर्शनं [illegible]– 20 नियमाभावेति । नास्ति विपर्ययप्रसङ्ग उभयैकत्वात् नियमाभावाभावप्रतिपत्ति [illegible]–उभयैकत्वमेव चेति [illegible] तत्र [illegible] तत्र विपर्ययप्रसङ्गोऽस्ति यथा पितृपुत्रात्मकत्वेऽपि पुरुषस्य पितृपुत्रत्वयो [illegible] तत्र [illegible] भाव । [illegible] विशेषहेत्वभावाद्विपर्ययप्रसङ्गो यो [illegible] तथापि–विपर्ययेति । [illegible] च क्रिया-[illegible] नैकान्तता किन्तु [illegible]–अनेकान्तसिद्धेरिति । [illegible] 25 [illegible] कार्यं जायते [illegible] उपादानाभिव्यक्त्येन न किञ्चित् प्रयोजनमस्तीति कार्यमुपादाना-पेक्षमेव [illegible] जायते [illegible] [illegible] समाभिन्न [illegible] सामान्य [illegible] निमित्तं [illegible] उपादानानपेक्ष [illegible] [illegible] नैवास्युपादाननियम [illegible]–अनुपादानेति । [illegible] एतेन [illegible] नैरिति । न तस्येति कार्यस्योपादानेन न किञ्चित् प्रयोजनम् [illegible] । उत्पन्नमिति उत्पन्नं कार्यं [illegible] 30 [illegible] निमित्तं न [illegible] द्रव्यत्वेन न गुण [illegible] द्रव्यत्वादि [illegible]-

---

१ सि क ख वे [illegible] । २ सि क ख वे [illegible] ।

नियमोऽस्तीत्यनेनाम्नाः सिद्धस्तीति, सद्भागमाभिन्न च क्रियाया अभाव एव—यो घटस्य कार्यस्य सत्त्वमेव द्रव्यार्थतो वाञ्छति तस्य क्रियाया नास्त्येव प्रयोजनम्, नैव क्रियाऽस्तीत्यनियमः, किं कारणं ? तस्य वादिनः सर्वस्य सर्वात्मकत्वात् मृत्पिण्डो हि युगपदयुगपद्भाविसर्वधर्मात्मकः, तेन प्रकारेण तथा, द्रव्यार्थवादप्रकारेण तथा भावस्वभावत्वं सर्वसर्वात्मकत्वं तस्माच्चयारात्सद्भाव क्रियामाक्षि अतोऽसं-
5 तमसतोऽभावात् प्रत्येकमयविवक्षायामन्यतराभाव इतरस्याभावात्र अत्र विशेषहेतुनार्थ एव ।

यत्तूच्यते सदसतोर्धर्म्योरेकस्मिन्नेव कार्ये प्रागुत्पत्तेः सदसच्छब्दार्थयोरेकाधिकरण-भावेन प्रयोगो नास्ति—सदेवासदित्यनुसन्धान नास्त्येकाधिकरणभावेनेति प्रयोगानुपपत्तिः, यथोऽर्थो दर्शितः कार्ये सदसत्ता नेति समम्यभिधाने नेति, एतदपि न किञ्चित्, इतरेतरभूता-भूतत्वस्य जगत्, न केवलं कार्यमेव सदसत्, द्रव्यार्थपर्यायार्थेनाविभक्तद्रव्यार्थभावनायां
10 निखिलं जगत् सदेवासत् किमुभयपर्यायप्रत्ययापेक्षया भावयितव्ये निःसन्दिग्धमेव वस्तुनः स्वात्मनि तथा चेतरेतराभावरूपेण स्वेन च भावरूपेण सदेवासत् सर्वमिति न सदसतोर्धर्म्यम्।

यत्तूच्यत इत्यादि, यावत् संप्रम्यभिधानेन दर्शयति सूत्रार्थः उच्यमानत्वात् सदसतोर्धर्म्यो-रिति, किमुक्तं भवति परस्परविरोधात् समानाधिकरणभावेनैकस्मिन् प्रागुत्पत्तेः सदासच्च तदेवेति [सद]-सच्छब्दार्थयोर्विरोधादेकस्मिन्नेव कार्ये कुतः सत्त्वं प्रागुत्पत्तेः ? किन्तर्हि ? असत्त्वमेवेति सदसच्छब्दार्थ-
15 योरेकाधिकरणभावेन प्रयोगो नास्तीति, तस्मात्—सदेवासदित्यनुसन्धानं नास्त्येकाधिकरणभावेनेति युक्ता निर्धारणं नास्ति तदभावात् प्रयोगानुपपत्तिः, यथोऽर्थ एकस्मिन्नेव कार्ये सदसत्ता नेति समम्यभिधानेन

---

[illegible] । सद्भागमाभिन्न क्रियाया नियमोऽपि नैव—सद्भागमाभिन्नस्येति । [illegible] वस्तुनि सोऽयं सद्भावे द्रव्यार्थत-याभिप्रेतं प्रत्यस्ते हि [illegible] सर्वथा द्रव्यात्मना [illegible] विधिनियमोभये [illegible] क्रिया [illegible] प्रयोगीति क्रियाया अभाव एवैति नास्ति क्रियाया नियम इत्याह—यो घटस्येति । हेतुमाह—तस्य वादिन इति द्रव्यार्थ-
20 [illegible] परिणामित्वं [illegible] तथा [illegible] [illegible] एवं सर्वात्मकमिति [illegible] सर्वसर्वात्मकत्वात्सद्भाव [illegible] क्रियानियमो भवतीति भाव । सर्वसर्वात्मकत्वे निदर्शनमाह—मृत्पिण्डो हीति । [illegible] विशेषहेतुपेक्षेण नास्ति [illegible] कार्यस्य [illegible] [illegible] प्रत्येकनयविवक्षायामिति । सदसतोर्धर्म्योरिति [illegible] पूर्वपक्षमाह—सूत्रार्थ इति । तात्पर्य-
25 माह—किमुक्तमिति, [illegible] इतरेतराभावरूपत्वात् परस्परं विरुद्धत्वं [illegible] तयोर्न समानाधिकरण्यमिति [illegible] न सदेवासदिति प्रागुत्पत्तेः कार्यस्य [illegible] [illegible] भाव । [illegible] सामानाधिकरण्य [illegible] तत्र न सदसच्छब्दौ [illegible] [illegible] [illegible] न [illegible] —सदेवासदिति [illegible] [illegible] कार्यस्य [illegible] कार्यस्य कारणपर्यायैः [illegible] तस्य सत्तापि कारणात्मनैव
30 [illegible] [illegible] न [illegible] कार्यमुत्पन्नमेव प्रत्यक्षमुपैमात् [illegible] [illegible] [illegible] कार्यस्य [illegible] [illegible] कार्यमसदेवेति निर्धार्यते । [illegible] [illegible]—यथोऽर्थ इति [illegible] सदसत्त्वयोरेकाधिकरणवृत्तित्वं प्रतिषिद्धं भवति अन्यथा कार्ये सद-

---

१ सि. क. प्रभृति । २ सि क. [illegible] ।

दर्शितः, अन्यथा काय सदसत्त्वमिति स्वमतार्थं ब्रूयात्, एतदपि न किञ्चिदित्याद्युत्तरं यावत् स्वात्मनि, एकस्मिन् घटपटाद्यात्मके स्वात्मनि, इतरेतरभूताभूतत्वस्य जगत्—घटात्मना घटोऽस्ति, पटात्मना नास्ति, तथेति, स्वेनात्म[ना] भूतत्वमभूतत्वञ्चेतरात्मना, तस्माद्भूताभूतत्वं जगदिति व्यापितां दर्शयति—न केवल कार्यमेव सदसदिति, तथा वृत्तावृत्ताभ्यां पिण्डशिवकपर्यायाभ्यां क्रमभा[विभ्याम]विभक्तो द्रव्यार्थ एकस्तस्य भावना—मृत्पिण्ड एव शिवकीभवति, शिवक एव स्थासकीभवतीत्यादि यावद्धटो यावच्च पांसुर्या- 5
वच्च परमाणुरित्यवस्थासु सन् पिण्डात्मना भवति शिवकाद्यात्मना न भवतीति पिण्डो भावाभावात्मकः, तथा शिवकोऽपि शिवकात्मना भवति न पिण्डात्मना तथोत्तरावस्थास्वितरेतराभावस्वरूपेण स्वेन च भावरूपेण सदसच्च, 'सदसत्' (वै० अ० ९ आ० १ सू० ४) इति वचनात्, एवं सकलं जगत् वृत्तावृत्तपर्यायार्थेनाविभक्तद्रव्यार्थभावनायां सदेवासत्, किन्तूभयेत्यादि, किं पुनर्युगपद्भाविनामयुगपद्भा- विनाञ्च पर्यायाणां रूपरसादीनां शिवकादीनाञ्च प्रत्यक्षया भावयितव्यो यस्य वस्तुनः स्वात्मा तस्मिन् 10
भावयितव्ये, निःसन्दिग्धमेव तथाऽसत्त्वमपीत्यर्थः, तदुपसंहरति तथा चेति गतार्थम् ।

यदप्युक्तमापेक्षिकं सदसत्त्वं स्याद्वादी किलेत्थं समर्थयति—मृदात्मना घटस्य प्रागुत्पत्तेः सत्त्वम्, घटात्मना चासत्त्वमिति, न, असत्कार्यत्वसिद्धेः—एष तर्हि मृदात्मनः कर्तव्यत्वा भावात्, क्रियते इति हि कार्यम्, न च मृत् क्रियते घटो हि क्रियते स त्वसन्, तस्माच्च प्रागुत्पत्तेः सदसत्कार्यमिति, अत्र न पूर्वपक्षो नोत्तरपक्षश्च सत्यः । 15

एवेति समानविभक्तिकनिर्देश एव स्यात्, कुर्यादिति भावः । अत्र सदसत्त्वैकधर्म्यनिराकरणाय निर्दिष्टं वचनम्, स्वपररूपेण सदसत् भूताभूतमिति सदसत्त्वयोरविशिष्टत्वमात्रेणैव निर्धारयन्नस्यासत्त्वमितरेतरमाह—एतदपि नेति । सर्वेषां [illegible] सर्वथा भावरूपत्वे सर्वसर्वात्मकत्वप्रसङ्गात् प्रतिनियतप्रवृत्तिनिवृत्त्याद्यसम्भवो न स्यात् सर्वथाऽभावरूपत्वे वा सर्वथाप्रमेयत्वात् [illegible]- निरुपाख्यभावात् [illegible] तस्यैव वस्तुनः सत्त्वं पररूपेण चासत्त्वमभ्युपगन्तव्यमिति दर्शयति— इतरेतरेति । भूतो वा [illegible] भूतत्वं न [illegible] सर्वात्मना तस्य द्रव्यार्थेनैव [illegible] तथा [illegible] 20
सत्त्वं [illegible] इति सर्वं वस्तु द्रव्यात्मना भूतं—नित्यं पर्यायात्मना चाभूतमनित्यम्, भूतस्यैव [illegible], [illegible] भूताभूतत्वं सर्ववस्तुनां [illegible] इतरेतरभूताभूतत्वमिति सर्ववस्तुव्यापित्वमस्य [illegible] दर्शयति—तस्मादिति । क्रमभाविपर्यायैरपि न सदसत्त्वमित्येतत् [illegible] प्रथमं क्रमभाविपर्यायैः सदसत्त्वं दर्शयति— वृत्तावृत्ताभ्यामिति, वर्तमानावर्तमानपर्यायाभ्यामित्यर्थः । पिण्ड एव शिवको भवति शिवक एव स्थासकः स एव कोशः स एव कुशूलः स एव घटः स एव कपालः स एव कपालिका सैव शर्करा सैव पांसुः स एव रजस्तदेव त्रुटिः सैव 25
परमाणुरित्येवं [illegible] वस्तुनः परिणामात् तस्य वस्तु वर्तमानपर्यायेण सत् अवर्तमानपर्यायेण चासदिति सदसद्रूपमिति भावः । परिणामपरम्परां दर्शयति—मृत्पिण्ड एवेति । एवं सदसद्रूपत्वमाह—अवस्थास्विति । तत्र वैशेषिकं वचनमपि दर्शयति— सच्चासदिति । क्रमभाविपर्यायैः सदसत्त्वं प्रदर्श्य सहभाविपर्यायैरपि सदसत्त्वं दर्शयति किन्तूभयेति वस्तुनः [illegible] [illegible] सहभाविभावेन सदसत्त्वं निःसन्दिग्धमेवेति भावः । ननु पूर्वोक्तात्मा स्याद्वादिनोऽभिमतमिति यदुपवर्णितं तथा तदपि [illegible] [illegible] पूर्वपक्षोत्तरपक्षौ [illegible] [illegible] दर्शयितुमाह—यदप्युक्तमिति । 30

१ सि. क. ख. डे. वृत्तिविच्छ कभिन्न् । २ सि. क. ख. डे. भावित्वञ्जेति घटपटाद्यात्मके स्वात्मनि । ३ सि. क. सती ।

यदप्युक्तमापेक्षिकमित्यादि, स्याद्वादी विशेषं सदसत्त्वं समर्थयतीति पूर्वपक्षः, मृदात्मना घटस्य प्रागुत्पत्तेः सत्त्वम्, निष्पन्नस्योत्तरकालमपि सत्त्वदर्शनात् तदात्मकत्वान्मृदुपादानोपपत्तिः, घटात्मना चासत्त्वाद्घटाद्यर्थक्रियोपपत्तिरिति, अत्र सिद्धोत्तरं कटन्दीकार आह न, असत्कार्यत्वसिद्धेः, एतदपि व्याख्या—मृदात्मनः कर्तव्यत्वाभावात् क्रियत इति हि कार्यम् न च मृत् क्रियते, घटो हि क्रियते स
5 त्वसदिति तदुपनयति तस्मान्न प्रागुत्पत्तेः सत्कार्यमिति अत्र न पूर्वपक्ष इत्याचार्यो मन्ये अत्रैव पूर्वोत्तरपक्षयोर्न किञ्चित् सत्यम्—मागधीयेषु पूर्वपक्षोऽपि कश्चित् सत्यः स्यात् विवक्षावशार्पणात्, यथा सद्भागमाश्रित्योपादानमसद्भागमाश्रित्य क्रियाभाव इत्यादि, इह तु न पूर्वपक्षो नोत्तरपक्षः सत्यः ।

पूर्वपक्षस्वरूपं तावत्—

को हि नाम सोऽनेकान्तवादी ब्रूयात्—प्राक् मृदात्मना सत्, घटात्मना चासत् कार्य-
10 मिति, यदि ब्रूयादनेकान्तवादत्याग एकान्तवादाभ्युपगमश्च, एवं हि मृदोऽकार्यत्वेऽसत्कार्य-वाद एवावस्थापितः स्यात्, तत्रैव ब्रुवाणेषु को भेदः, अभूत्वोत्पत्तिवाचकप्राक्शब्दोच्चा-रणादेव चासत्त्वैकान्तः साक्षादभ्युपगतः, तदा किमर्थं विवदेत, अत्यन्तासमीक्षितभाषिणै-कान्तवादिनापि न तुल्यतामेत्यसौ ।

को हि नाम सोऽनेकान्तवादीत्यादि, एवं असत्कार्यवाद एवावस्थापितः सदसत्कार्यमत
15 स्यान्न कोऽप्यनेकान्तवादी एवं ब्रूयादित्यादि, प्रागित्यादि तदेव प्रत्युच्चारण घटत्वात्मना चासदिति न ब्रूयादेवेत्यभिप्रायः यदि ब्रूयादनेकान्तवादत्याग एकान्तवादाभ्युपगमश्च, कुत इति ? तद्दर्शयति—एवं हि मृदोऽकार्यत्व इत्यादि गतार्थो यावत् को भेद इति स यदैव वैशेषिको बौद्धो वा स्याद्वाद्यपीति, किञ्चान्यत् अभूत्वोत्पत्तीत्यादि यावदभ्युपगतेः प्राक्शब्दो ह्यभूति[प्र]सङ्गवाची, घटावस्थातः पूर्वोक्ता

---

तथैव पूर्वपक्षमुपन्यस्य—मृदात्मनेति सत्त्वम् । अत्र स्याद्वादिमतप्रतिक्षेपार्थमस्य पूर्वपक्षस्योत्तरं कटन्दीकारोक्तं दर्शयति-
20 अत्र सिद्धोत्तरमिति । कथं मृदात्मना सत् घटात्मना चासदित्यभ्युपगमे कार्यत्वमुक्तम् मृदात्मना सत्त्वं प्रागुत्पत्तेः घटात्मना चासत्त्वस्य प्राक् सत् [illegible] कार्यं [illegible]—मृदात्मन इति । घटात्मनो [illegible] घटात्मना कार्यो हि यदेव सा न क्रियते न तु [illegible]—क्रियत इतीति । [illegible] [illegible] दर्शयति—घटो हीति । [illegible] [illegible]—प्रागेवमिति घटात्मना [illegible] ।
25 [illegible] [illegible], [illegible] [illegible] [illegible] [illegible]—मागधीयेष्विति । तदाह पूर्वपक्षस्वरूपं दर्शयति—को हि नामेति । प्रागुत्पत्तेर्मृदात्मना सत् घटात्मना चासदित्युच्यमानत्वात् एव [illegible] स्यात् [illegible] [illegible]—एवं हीति । एवं [illegible] [illegible] [illegible] स्यात् नास्ति [illegible]
30 [illegible]—एवं हि मृद इति । घटात्मना च. प्राक् [illegible]—अभूत्वोत्पत्तीति अत्र प्राक्शब्दोऽभूत्वोत्पत्तिद्योतक । [illegible]—घटावस्थात इति प्रकृत कथं भवति, [illegible]

1 सि क. इत इति । 2 सि. क. °गमः । 3 सि. क. °पूर्वोत्तरं ।

वाच्यत्वात्, स चामूर्त्तोत्पत्त्यर्थः प्राक् शब्दोच्चारणादेव साक्षादभ्युपगतः तेन स्यात्, ततः किमर्थं विब देत, अभ्युपगम्यासत्त्वैकान्तं मृदात्मना सत् घटात्मना चासत्कार्यमिति, तथापि भ्रान्तिमपि न ब्रूते, किञ्चान्यत्—असम्यगसमीक्षितमापिण्डिकान्तवादिनापि न शक्यतामेत्यसौ—घटादन्यथा मृद् आत्मा तेना त्यन्तमन्यो घटो भवति तेन च घटात्मना न भवतीत्येवं ब्रुवन् प्रत्यक्षादिविरुद्धमपोह्यमयथाभिधत् स्यात् सोऽपि चैकान्तवादी प्रत्यक्षादिविरुद्धं किञ्चित् परिहरतीति । 5

किञ्चान्यत्—

देशकालभेदलक्षणोभयपर्यायमात्रस्वाभाव्यमयमसद्भाव एव स्यात्, इत्थं पुनः कोऽनेकान्तवादी मृदाद्रूपं रसात्मना नास्ति रसोऽपि रूपात्मना कृष्णाद्यपि शुक्लात्मनेत्यादि, भूतिसन्न-हृदयपिण्ड्यूहावकाशदानात्मकपृथिव्याद्यात्मकत्वान्मृदादेर्घटादेश्च कथं मृदमेकामपेक्ष्य मृदात्मनैवासीत्यापेक्षिकमसत्त्वमसद्भावितवत्, आपेक्षिकमृदात्मसद्विशेषणात्त्वसदभिधानमेवेद मृदा 10 त्मना सत् घटात्मना चासदिति वचनम्, अभिधेयस्वतत्त्वनिरसननियतत्वात्, यद्वाक्यमभिधेयस्वतत्त्वनिरसननियतं तदसदभिधानं दृष्टम्, यथाऽनुष्णोऽग्निरित्युक्तिरिति, अभ्युपगमे तु घटात्मनापि सत्त्वेव, तद्भावत्वात्, तथा च सत्कार्यस्योक्तिरेव कृता त्वया वदता ।

देशकालेत्यादि, देशतो भेदो रूपरसादीनाम्, कालतो भेदः पिण्डशिवकादीनाम्, स भेदो ययोर्यं सदासदात्मतायिनामुभययोः पर्यायाणां ते देशकालभेदलक्षणोभयपर्यायाः तत्परिमाण देशकाल[भेद]- 15 लक्षणोभयपर्यायमात्र तद्भावात्—तन्मात्रत्वात्, एव—अनेन प्रकारेणायमसद्भाव एव स्यात्—रूपं रसादन्यत् तदपि विभज्यमानं कृष्णं पुनरप्येकगुणकृष्णमित्यादि यावत् परमाणुशो विभागादसदेव रूपम्, एवं रसा-

---

प्रागुत्पत्तेः [illegible] प्रागसत्त्वमभ्युपगतम् तथा च प्रागसत् पश्चाद्भवति च अमूर्त्तोत्पत्तिमान् च इति भावः, एवम् पूर्वोक्त[illegible] ततः प्रागसत्त्वेन [illegible] इति तत्र न्यायागम एव स्यादिति भावः । मृदात्मना सत् घटात्मना चासत् [illegible] 20 [illegible] परस्परं [illegible] यदि तु सोऽभ्युपगमो भ्रान्तिरूप इति स [illegible] ब्रूयात्, [illegible] तमपि स न ब्रूत इत्याह—अभ्युपगम्येति । [illegible] असम्यगिति, [illegible] प्रमाणावधारणं [illegible] मान्यान्योऽप्यनेकान्तवादी प्रत्यक्षादिविरुद्धं कदाचित् कथितं परिहरति [illegible] मृद् [illegible] मिथ्या [illegible] प्राक् घटात्मना भवति घटात्मना च न भवतीति प्रत्यक्षादिविरुद्धमापादितम्, न हि किञ्चित् सामान्यविशेषात्मना भवति [illegible] च न भवतीति तस्मात् स नैकान्तवादिनापि साम्यतां यातीति भावः । [illegible] 25 [illegible] इति [illegible]—देशकालेति । [illegible] इति दर्शयति—देशतो भेद इति [illegible] परस्परेण परस्परं एव [illegible] भेदस्वरूपम्, [illegible] परस्परेण परस्परं एव [illegible] भेदस्वरूपम्, [illegible] मृदात्मना सत् [illegible] 30 भावः । तेन किमित्याह—अनेन प्रकारेणेति । [illegible] दर्शयति—रूपमिति । [illegible] भवति एवं रसादयोऽपि विभज्य परमाणु यावत् भवति तथा परस्परतोऽन्यान्यत्वात् [illegible] एवमेव दर्शयति—तदपि विभज्यमानमिति ।

---

१ सि. [illegible]भेदसद्भावत्वा । २ सि. क. कृ° ।

दयः, यथा पिण्डादयोऽतीतसद्भावाः, इत्थं पुनः कोऽनेकान्तवादी ब्रूयात् यथाऽसावसद्वादी ब्रूते रूपं रसात्मना नास्ति, रसोऽपि रूपात्मना कृष्णमपि शुक्लात्मनेत्यादि, न ब्रूयादेवेत्यर्थः, किं कारणम् ? मृत्ति-सद्रूपपरिच्छिन्नरूपादिसंस्थानात्मकपृथिव्याद्यात्मकत्वात्पूर्वापरपर्यायैः घटादेश्च कथं मृदमेकामपेक्ष्य घटात्मनैवासतो-ऽपेक्षिक[1] सत्त्वम् ? असद्वादिवत्, कः कुम्भो मृदादिति सम्बध्यते अत्र प्रयोगः—आपेक्षिकमृदात्म-

5 सन्निक्षेपणात्तु असदभिधानमेवेद घटात्मना सत् पटात्मना चासदिति वचनम्, कुतः ? अभिधेयस्य तत्त्वनिरसननिवर्तकत्वात्—अभिधेयस्य मृत्पिण्डस्य स तत्त्वं देशभिन्नरूपरससंस्थानादि कालभिन्नरूपरसादिव कादि पांस्वादि वृक्षादिसकलभिन्नपृथिव्यादि च, मृदात्मनैवास्ति घटो न रूपादिशिविकादयादिसत्त्वैरिति तैस्तु तत्त्वानि सन्त्येव निरस्तानि स्युः, तन्निरसने निवर्तकत्वात् वाक्यस्य पाश्चात्त्यमभिधेयतत्त्वनिर सननिवर्तकत्वमभिधानं दृष्टम्, यथाऽनुष्णोऽग्निरित्युक्तिः अभिधेयतत्त्वनिरसन[निवर्तक]मसिद्ध

10 मिति मा मंस्थाः सिद्धमेवैतदायात्मनानुपसन्नात् स्वात्मैव नाभावार्थं घटात्मनैव सत्, नान्येनेति ब्रूमः [×]किं तर्हि ? घटात्मना भवन् सन् पटो यदि रूपादिपिण्डशिविकाद्यर्थाद्यात्मभिरपि भवितुमर्हतु नाम तदात्मा को दोषः ? इति अत्र ब्रूमः, अभ्युपाये तु पटात्मनापि सत्त्वेव तद्भावत्वात्, ते भावा रूपादिशिविकार्यादि प्रीत्यादयो घटादयश्चात्मा घटः, तद्भाव[स्य] भावतद्भावत्वं तस्याभावाद्भावत्वात्, यथो मृदात्मना भाव

---

तथा चैतदसत्त्वं कुम्भस्य कुम्भस्थानादिसर्वात्मनाऽसत्त्वेनान्यथैव भूतं न तु साक्षादित्यपरेणाह—इत्थं पुनरिति। घटादीनां मृदादीनां

15 च साक्षादिकत्वात् तेनैव घटात्मनैवास्तीति साक्षात् कर्म भूतमिति हेतुमाह—मृत्तीति पर्यायैरन्यैः वर्तते वा पृथ्वीत्वम् समानां मृदाद्यन्तरावान्तर पृथिवी उपलब्धेति सद्रूपो ज्ञातव्यम् तथा सद्रूपेण निर्वर्तकेन तथा चोपलब्धेति यदि पानं तेषां वर्ग तेन आहारपाकेनोपलब्धेति यत्तु स्थूलवर्णा सर्वप्रकारेणा मृदुत्वेनाभिरक्तेन आपाकभावत्वतया सर्वेषाम-पाकप्रत्ययेनोपलब्धेः इति स्वात्मत्वात्पृथिव्यादात्मत्वे यथा घटादि न तथाः, तर्हि तथा इतो घटस्येव घटात्मनैवास्तीत्युक्ते एतदन्यथा एकत्वं स्यात्, न तथा सुवर्णादिसत्यस्यानुपलब्धेः स्याद्वादोऽपि निरपेक्षं सत्त्वमसत्त्वं वा वस्तुस्वरूपं इति भावः।

20 अनुमेयार्थे प्रयोगस्य प्रदर्शयति—अत्र प्रयोग इति सत्ये हि निर्देशं प्रदर्शितं घटात्मनेति तेन घटात्मनैव सत्त्वं कथ्यते न तु पटादिरूपस्य तत्प्रभूते देशकालादिभिरपि कालभेदाद्भिन्नाभिरप्यादिभिः सद्रूपत्वाद्घटस्य सत्त्वमिति घटात्मना सदित्यादिकमसदभिधानमेव पृथगभिधेयानां सततात्मना रूपादिशिविकादिप्रकारादीनां निरसने निवर्तकत्वात्, यथा अग्निस्वं तस्य तन्निरसने निवर्तकत्वादनुष्णोऽग्निरिति वचनमसदभिधानमेव तद्वदिति भावः। यद्यपि घटात्मना घटस्य पृथगभिधेये घटार्थत्वात् पटादिति नाभिधेयनिरसननिवर्तकत्वं हेतुः तथापि घटात्मनैवास्य परिपूर्णपर्यायापेक्षैवायं एतदित्यर्थं

25 अन्यत्र घटात्मना न सदिति वाक्यम् अन्यथा घटस्यापि पृथगभिधेयत्वात् तद्रूपेणापि सत्त्वात्, तथाऽसिद्धो हेतुरित्याशङ्क्य- नाह—अभिधेयस्य मृत्पिण्डस्येति। व्याचष्टे—पाश्चात्त्यमिति। हेत्वसिद्धिं निराचष्टे—अभिधेयेति। ननु एवं वाक्यं तथाभावमिति न्यायमनुसृत्य घटात्मनैवास्ति घटात्मनेति न ब्रूमो येनाभिधेयतत्त्वनिरसननिवर्तकं वाक्यं स्यात्, किन्तु तन्निरसनमनुसृत्यैव तथा च पृथगभिधेयेष्वभिधेयत्वात्मना घट सन् स्यात् को दोष इत्याशङ्कते—स्वात्मवदिति। तथा यदि घटात्मनापि पटस्वरूपत्वे घटात्मना न सदिति वचनं निरर्थकं स्यादित्याशङ्क्योत्तरयति—अभ्युपाये त्विति अभिधेय-

30 तत्त्वनिरसनप्रतीकारे दिशति हेतुमाह—तद्भावत्वादिति। ते भावा घटादयः तद्भाव तस्य भावत्वं तस्यापि भिन्न इति मत्वाऽन्येषामपि विवरणमाह—ते भावा इति। के भावाः ? तेन दर्शयति सर्वेऽत्र दृष्टान्तमाह—यथेति। व्याचष्टे—

---

1 सि० क० °कम । 2 सि० क० °घटादि । 3 सि० क० °त्मक । 4 सि० क० °भावता । 5 क × × । 6 सि० क० घटात्मा । 7 सि० क० घटत । 8 सि० क० °घटादि । 9 सि० क० घटात्मना ।

कार्यमुत्पत्तेः सत्, तथा घटात्मत्वात्, अपिशब्दात् सर्वात्मकत्वात् शिवकादिपर्यायात्मनापि सत्, तथा चासत्कार्यस्यानुक्तिः सत्कार्यत्वोक्तिरेव कृता तथा वदतेति, तस्मान्न स्याद्वादिन एष मोहः एकान्तवादिन इवानपेक्ष्य पूर्वापरम् ।

कथं तदुक्तिरिति चेदत आह—

सदसदात्मकैकं वस्तुतत्त्वं द्रव्यार्थपर्यायार्थोभयलक्षणं जैना उपवर्णयन्ति खपुष्पव-न्ध्यापुत्राऽसम्भवात्, द्रव्यशब्दमपि मृदादिरूपाद्यतीतानागतवर्तमानभेदाभेदार्थं पर्यायशब्दं सर्वमेव भेदार्थं तेष्वेव, तस्मादुभयोरुभयार्थत्वम् । 5

सदसदात्मकैकेत्यादि, एकात्मकं वस्तुतत्त्वमित्येतस्यार्थस्य प्रतिपत्तीकरणार्थं जैना—स्याद्वादिन एकमेवात्मानं परमार्थं द्रव्यार्थतः सत्त्वात् पर्यायार्थतोऽसत्त्वाच्चोभयलक्षणमुपवर्णयन्ति, [illegible] प्रतिपादितत्वात्, खपुष्पवन्ध्याऽसम्भवात्–उभयरूपैकात्म्याभावादेकरूपस्य द्रव्यार्थात्मनः पर्यायार्था- 10 त्मनो वा निर्भेदत्वान्निर्बीजत्वाच्च खपुष्पवदतिप्रसङ्गात् सदसद्रूप एवात्मा वस्तुन इति, द्रव्यशब्दस्याप्यस्मा-द्रव्यशब्दस्य मृदादिरूपाद्यतीतानागतवर्तमान[भिन्ना]भेदार्थं वर्णयन्तीति वर्तते–यथा पिण्डशिवकादयः क्रमभुवः, सहभुवः रूपरसादयश्च भिन्नाः त्रिषु कालेषु मृदादयो वर्तमानाश्च रूपादयो [illegible] ते च भिन्ना अप्यभिन्नाः सर्वा मूर्तिमनतिवर्तमानत्वादिति भेदाभेदार्थमेव द्रव्यशब्दं वर्णयन्ति, पर्याय-शब्दं सर्वमेव भेदार्थं तेष्वेव–त्रिष्वेव त्रिकालवर्तमानकालवर्तिषु [illegible] भिन्नत्वं वर्णयन्ति, तस्मादुभयो- 15 रुभयार्थ[त्व]म् ।

---

तथेति । [illegible] सर्वात्मकप्रतीतेः [illegible] ... अपिशब्दादिति । पूर्वापरमिति [illegible] इति [illegible] । [illegible]–सदसदिति । [illegible]–एकात्मकमिति [illegible] 20 [illegible] । [illegible]–एकमेवात्मानमिति । [illegible] –उभयरूपेति, यदि केवलं द्रव्यार्थात्मकं वस्तु तर्हि [illegible] न सु- [illegible] पर्यायात्मकं तथापि [illegible] [illegible] [illegible] 25 [illegible] [illegible] [illegible] । [illegible] –द्रव्यशब्दमपीति [illegible] [illegible] 30 [illegible] द्रव्यम् । [illegible] [illegible] । त्रिष्वेवेति [illegible]

---

१ सि क. [illegible] । २ सि क. [illegible] । ३ सि. क. [illegible] । ४ सि क. [illegible] । ५ डे [illegible] ।

न केवलं द्रव्यार्थकथनमात्रार्थैवोभयार्थता, किं तर्हि? वस्तुस्वरूपमपि विधत्ते यथा—

प्रेतस्तद्दूषणम् इत्यर्थः । समाधत्ते–देवदत्तेति । अभ्युपगमेनोपसंहरति–तदपि नेति । व्याचष्टे–समवायीति । दोषान्तरं समुच्चिनोति–स्ववचनेति । समवायिकारणत्वविरोधं स्फुटयति–क्रियागुणेति द्रव्यमेव गुणकर्मणोः द्रव्यमारम्भकं मत- 25 मिति तस्य समवायिकारणत्वमुक्तमित्यर्थः । अत्र दोषमाह–यदि पुनरिति । अनारम्भकाण्यकारणानि चेति अन्यत्र वस्तु- भावं गतस्यैव तन्त्वादिकार्यं समवायाभ्युपगमात्सम्बद्धस्य कथं कारणत्वमभिप्रायाणीति भावः । वचनाभ्युपगमविरोधौ दर्शयति ततश्चेति । स्ववचनाभ्युपगमान्तरविरोधौ दर्शयति–एतावपीति निष्पन्नवस्तुभावस्यैव तन्त्वादिना सम्बन्धे पृथक् पृथक् सिद्धयोः सम्बन्धात् स सम्बन्धो युतसिद्ध एव स्यात् नायुतसिद्धः, तन्तुभिः पटस्य परिनिष्ठितत्वाभावात्, अत एव तन्तुसम्बन्धव्यतिरेकेण परिनिष्ठितत्वमिति भावः । एतावेव समवायिकारणत्वनिवृत्तिमाशङ्क्य प्रसक्तमपि परस्माद्दोषं तद्रूपयितुमाह–यत्तूच्यत इति । 30

१ सि. क. डे. दे विचारमुक्तम । २ सि क. समवायिनां कार्याणां । × × क. ध । ३ सि क. अत्यन्त- विरोध ।

द्वितः—समवायिनिराकरणनिवृत्तिरिति चेदित्याशङ्क्य न अन्यत्रासमवायादिति व्याख्यानम्—यदि तस्येत्यादि सुनिश्चितत्वान्न विक्रियते सोऽप्यपरिहारः, इच्छामात्रत्वात् कार्यस्य निश्चितस्य कारणैः सम्बन्धोऽन्यत्र समवायाव्यभिचारिणी नान्यत्रासमवायादित्युक्तवाक्यं निरस्यति, तदन्तरविरोधि, तर्हि कपालयोर्निरस्यार्थत्वात् इच्छामात्रं ते वचो न परिहार इत्यत आह—सोऽप्युपपत्तिविरुद्धार्थत्वात्, विरुद्धार्थ[त्व]मसम्बद्धत्वात् कारणैः 5 कार्यस्य तदसम्बद्धत्वमन्यत्र परिनिष्ठितत्वात्, किमिव ? तन्तुष्विव पटस्य—यथा तन्तुषु पटस्यानिष्ठितत्वात् न्यत्र कपालेषु निष्ठितत्वात्तन्तुभिरसम्बद्धत्वमेव, द्रव्यादिकार्यस्य तदसिद्धमिति चेन्न, तत्रावृत्तत्वात् तन्तुष्विव पटस्येति वर्तते तत्रावृत्तत्वमन्येन प्रवृत्तत्वात् तत्रानारम्भात् तत्रानारम्भत्वञ्च तदसम्बद्धोत्पत्तित्वात्—तैः कारणैरसम्बद्धस्य कपालयोर्निष्पन्नत्वात् तत्रैवारम्भप्रवृत्तिनिष्ठा तन्तुषु पटस्य न सन्ति पटेऽस्या अत एव खपुष्पस्येव वा सामान्येनैक एव हेतुरसम्बद्धोत्पत्तित्वादिति, अनिष्ठापादनमत्र कार्यस्य चेत्यादि 10 खपुष्पमुत्पद्यताम् कारणैरसम्बद्धत्वात्, खपुष्पमिव कार्यवत् ।

---

अन्यत्रासमवायादिति तन्तुषु यथा न समवायः पटस्य तथान्यत्रापि समवायाभावात् कारणैरन्योऽन्यत्र परिनिष्ठितत्वात् सम्बन्धविरहसिद्धिरिति भावः । अन्यत्र समवायं मत्वैव निराकरोति—सोऽप्यपरिहार इति अन्यत्रासमवायादिति परिहारः शब्दमात्रमनेनेच्छामात्रवचोभिर्न परिहार इति भावः । निश्चितस्य कारणैः सम्बन्धमन्यत्र निश्चितत्वात् तदन्यत्र तदसम्भवात्, तथाविधिकस्य सम्बन्धविशेषमात्रमिच्छितं प्रतिपद्यते, यदि च तदन्यत्र न समवायस्तर्हि कार्यस्य 15 समवायो परिनिष्ठितः स्यादित्यन्यत्रासमवाये निष्ठितं विरुद्धमित्यन्यत्रासमवायादिति वचनमिच्छामात्रवचनमेव न परिहारमात्रमिति निरस्यति—कार्यस्येति । इच्छामात्रत्वे हेतुमाह—सोऽपीति येन येन सोपपत्ति—परिनिष्ठितमात्रस्य कार्यस्य कारणैः तन्तुभिः समवायस्योपपत्तिं तथा विरुद्धोऽर्थोऽस्य—अन्यत्रासमवायविरुद्धस्य वचनस्य तदुपपत्तिरिति । कुतोऽस्यार्थो विरुद्ध इत्यत आह असम्बद्धत्वादिति अनयोरेव कारणैः कार्यस्यासम्बद्धत्वमनुपपद्यते एवमन्यत्र परिनिष्ठितं तस्य निष्ठितं यथा तन्तुषु पटस्य कपालेष्वन्यत्र कपालेषु परिनिष्ठितं स्थितिः समवायो वा तस्यैव यदि तु तदन्यत्र परिनिष्ठितं तर्हि यथा तन्तुषु पटस्य न कदापि 20 समवायस्तथा घटस्यापि तन्तुभिरसम्बद्धत्वमेव स्यादिति भावः । द्रव्यादिकार्यस्यान्यत्र परिनिष्ठितत्वमसिद्धम्, गुणादौ द्रव्यादेः परिनिष्ठितत्वासम्भवादित्याशङ्कते—द्रव्यादीति । तत्राप्रवृत्तत्वादिति द्रव्यादौ गुणत्वसामान्यविरहः न हि द्रव्यादौ तस्य परिनिष्ठितत्वं प्रतिपद्यते इति भावः । यथा तन्तुषु पटस्य प्रवृत्तिर्नास्ति तत्रान्यत्र परिनिष्ठितमित्थं तावन्मात्रं तन्तुष्विवेति । कुतो न तत्र प्रवृत्तिरिति चेदत्रान्यत्रारम्भो नास्तीति दर्शयति—तत्राप्रवृत्तत्वमिति । अनारम्भोऽपि तत्र कुत इति चेदाह—तत्रेति कारणैरसम्बद्धस्यैव कार्यस्योत्पादात्, परिनिष्ठितानन्तरं हि कारणैः सह तस्य कार्यस्य सम्बन्धोऽभ्युपगम्यते तस्मादसम्बद्धस्योत्पत्तिरिति 25 भावः । एवञ्च तत्रैवारम्भकत्वेन प्रवृत्तिः तत्रैव च परिनिष्ठितं युक्तम्, तन्तुषु च न पटस्यारम्भ इति न तत्र प्रवृत्तिः परिनिष्ठता च न हि असमवायस्य खपुष्पस्य वा तन्तुष्वारम्भप्रवृत्तिनिष्ठा भवन्ति तदसम्बद्धोत्पत्तित्वादर्थं पटस्यापीत्यभिप्रेत्याह—तत्रैवेति । पटस्य तन्तुसम्बद्धोत्पत्तिकत्वेऽपि यदि तन्तुष्वारम्भप्रवृत्तिनिष्ठा अभ्युपगम्यन्ते तर्हि खपुष्पमप्युत्पद्यताम्, कारणैरसम्बद्धत्वात् घटादिवदिति विपक्षेऽनिष्टमापादयति—कार्यस्य चेति । यदि कारणैरसम्बद्धस्योत्पत्तिस्तर्हि खपुष्पमप्युत्पद्यतां कार्यत्वेनानिष्टापादनं च

---

१ मि. क. च. ज्योऽप्रुप । २ सि. क. रे. °मन्येन प्र । ३ सि. क. रे. तद्रूपमारम्भात् । ४ सि. क. रे. °रसम्बद्धस्य । ५ मि. क. रे. कारणैरसम्बद्धस्य ।

अकारणत्वादिति चेत्, पटाद्यपि कार्यं मोत्पादि, अकारणत्वात्, खपुष्पवत्, तद्वोत्पद्यताम्, अकारणत्वात्, कार्यस्योत्पत्तिवत्, यथा तन्त्वादीनि कार्येणासम्बन्धादसतः सतोऽप्यकारणानीति सर्वत्र कारणमकारणञ्च यथायोगं तस्यैव कार्यस्य नासतो नान्यकार्यस्य वा, असम्बन्धात्, कार्यकारणभावश्च सम्बद्धत्वे सति भवति, तस्मात् सम्बन्धः प्रागपि कार्योत्पत्तेः।

(अकारणत्वादिति) अकारणत्वादिति चेत्—निष्कारणञ्च खपुष्पं पटादि सकारणम्, तस्माद् दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यादयुक्तमिदमनिष्टापादनमिति चेदुच्यते—पटाद्यपीत्यादि, पटाद्यपि कार्यं मोत्पादि, अकारणत्वात् खपुष्पवत्, अकारणत्वञ्चास्य कारणासम्बद्धत्वात्, आकाशवत्, तद्वोत्पद्यतामिति, कारणासम्बद्धस्य कार्यस्योत्पत्तिवत्, खपुष्पस्याप्युपपद्यमानकारणत्वमित्युक्तमेव, यथा तन्त्वादीनीति, तन्त्वादीनां कारणानां कार्येण सम्बन्धो यतो नास्ति तस्मात्तेऽप्यसतः सतोऽप्यकारणानि कार्यस्यात्यन्तासतः खपुष्पस्येव पटस्येव वा कारणान्तरसाम्यमेवेत्युक्तमुपनयति—सर्वत्र कारणमित्यादि, करोतीति कारणं करणसाधनम्, खपुष्पादि पटादि वा तन्तुभिर्न क्रियते ततस्तान्यकारणानि पटस्तु क्रियते तस्मात्तस्य कारणानि, यो[यो] योऽत्र यथायोगं तस्यैव कार्यस्य—तन्तवः पटस्य कपालादीनि घटस्य, नासतो नान्यकार्यस्य वा, कस्मात्? असम्बन्धात्, कार्यकारणभावश्च सम्बद्धत्वे सति भवति तस्मात् सम्बन्धः प्रागपि कार्योत्पत्तेः—तत्कारणैः सम्बन्धोऽस्ति, कथं तत्कार्यं विशिष्यति कारणैरसम्बद्धम्? तस्मात् कार्यमठ[illegible]सद्भवति, सम्बद्धञ्च सदा सत्कारणैरित्यनुमीयते।

सम्बन्धसमवायाभ्यामर्थाप्येवमेव घटेते नान्यथात्वतः—

योऽयमेकीभावेन बन्धः स सम्बन्धः, अनेकत्वैकात्मकत्वात्, एकीभावेनापगमनेन गतिः, द्रव्यपर्यायाभ्यां तत्तुल्यापरित्यागेन पटत्वपरिणामः समवायः कारणस्य कार्यैकत्वलक्षणः, सदापत्तिक्रमात्मयात्स्वयेवमभावमपदनमस्थाने क्रियते यदिदमस्यापदेशाधारकार्यसम्बन्धकल्पनम्, कार्यस्यासत्त्वात्।

उच्यते, खपुष्पवत् कारणैरसम्बद्धत्वे—अकारणत्वादिति चेदिति। न्यायेन—निष्कारणमिति। नास्ति दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यमकारणत्वस्योभयत्र समानत्वादित्याह—पटाद्यपीति। तन्त्वादिभिः कारणैरसम्बद्धत्वात् कार्यस्य [illegible] अकारणत्वञ्चेति। यथा खपुष्पस्यानुत्पत्तौ खपुष्पस्याकारणत्वमपि कारणानुपपत्तौ [illegible]—तद्वेति खपुष्पवत्। किमत्र कारणमित्याह—खपुष्पस्येति पूर्वोक्तमेवोक्तमेव। [illegible] कार्यकारणभावस्याभावे समवायस्याभाव इति दर्शयति—यथेति। तन्त्वादीनामपि कार्येण सम्बन्धाभावादत्यन्तासतः खपुष्पस्य [illegible] कारणानि तन्तुभिः पटस्य क्रियमाणत्वात् कारणानि न तस्मात्, [illegible] कारणमपि न तन्त्वादीना खपुष्पस्य [illegible] कर्तृत्वाभावात् [illegible] तेषां तत्सम्बन्धाभावेन कार्यकारणभावाभावात्तेषां तत् सम्बन्धात् [illegible] भावः। कारणकारणत्वे कथमिति—खपुष्पादीति। अकारणत्वे हेतुमाह—असम्बन्धादिति। अत एव कार्यकारणभावो न भवतीत्याह—कार्यकारणभावश्चेति, कस्य पूर्वं कार्यस्यासत्त्वे ततोऽप्यसम्बन्धे कारणस्य व्यापारो न स्यात्, [illegible] कारणस्य व्यापारः स नास्ति कार्योत्पत्तेः प्राक् नास्ति [illegible] सह सम्बन्धो नास्तीति न कारणस्य व्यापार इति तत्कार्यं वा कारणैरसम्बद्धं कथं विशिष्येतेति भावः। तस्मादेव सम्बन्ध इति [illegible]—तस्मादिति। सम्बन्धसमवायाभ्याम[illegible]—योऽयमिति।

१ सि. क. ञ्चोपमान । २ सि. क. कार्यं । ३ सि. क. सम्बन्धाभाव नास्ति । ४ सि. क. ड. डे. सर्वत्र ।

योऽयमित्यादि, आह—सन्निकर्षीभावबाध्यमनुपसर्गः एकीभावेन बन्धः सम्बन्धः, अनेक कार णस्य वस्तु सदेकमेव कार्यांस्यं भवति परस्परेण बध्यते, तमर्थमाह—अनेककर्तृत्वैककारकत्वात्—अनेकक तन्त्वादेः प्रतिस्वमात्मानमपरित्यज्य सर्वैकसंघातमयनेन पटादिकार्यांख्येनैं परिणतेः एकीभावेन गतिः—गमन- परिणतिरेव अथ अपगमनेन—प्राच्यसंस्थानादिधर्माणां त्यागेन द्रव्यपर्यायाख्यां तन्तुत्वापरित्यागेनैव पटत्व- 5 परिणमः, संबन्धः समवाय इत्यपरार्थानुसारणोक्त्या वस्तुनि स्फुटीकर्तुमाह—कारणसत्कार्यैक वस्तुरूप—कार णेषु विप्रकीर्णेषु सत्कार्यमेकत्वमापन्नेषु कीदृशं कार्यं पार्थिवमेव परमार्थः, तदापत्तिस्वाभिमानि, येन द्रव्यप- र्यायात्मकवस्त्वात्मपरमार्थनाव मा प्रवर्त्स्येऽस्मिन्स्वात्मरूपात् स्वपक्षरागसमुत्थात् परपक्षद्वेषाच्च स्ववर्त्ममार्ग- प्रवर्तनमस्थाने प्रतिपक्षयोर्येनं क्रियते, वैरमवमार्गप्रवर्तनमिति चेदुच्यते—अविरलव्यपदेश्याधारत्वं प्राग्भा- त्यात तत्पुनः किमर्थमारभ्यते ? इहेति यतः कार्यकारणयोः समवाय इति इहप्रत्ययाभिधानाभ्यां कारण- 10 गताभ्यां समवायोऽनुमीयते सोऽपि च न सम्भवति कार्यस्यासत्त्वात्, तस्मादव्यपदेश्याधारकार्यसम्बन्ध- कल्पना क्रियतेऽप्रमुत्स्वगमनतोऽसौ निरर्थकः ।

सोऽपि च मिथ्याभिमान एव मन्यतान्तु तत्रैवास्तीति, परिनिष्ठितत्वात्, विभुपरि मण्डलविषयादिवत् ।

( सोऽपि चेति ) सोऽपि च मिथ्याभिमान एव—अव्यपदेश्याधारं द्रव्यादिकार्यमसमवेतम 15 कारणैः प्रागुत्पत्तेरिति मा मंस्थाः, मन्यतान्तु तत्रैवास्तीति—तथा च मन्यस्व व्यपदेश्याधारं द्रव्यादिकार्यं समवेतञ्च स्वकारणैः प्रागपि निर्वृत्तेः स्वमतेनैव परिनिष्ठितत्वात्—वस्तुभावमापन्नत्वात्, विभुपरिमण्डल- विषयादिवत्—यथा विभुत्वपरिमाणान्याकाशकालदिगात्मद्रव्याणि परिनिष्ठितत्वात् विभुत्वगुणसमवेतानि व्यपदेश्याधाराणि च तथा द्रव्यादिकार्यम् परिमण्डलपरिमाणाः परमाणवः परिमण्डलत्वेन समवेताः

व्यवच्छेदार्थं उपर्युक्तं सन्निकर्षीति अनेकान्तत्व परस्परमेकीभावेन बध्यमाना पटाख्या बध्यन्त इति भाव । एकीभावमाह 20 अनेकेति अनेकेषां तन्त्वादीनां न स्वा सत्ता न वैकैकेन सम्बन्धः न वा कार्यत्व इत्यत्र किन्तु विविक्तस्वरूपापरित्यागेनानेकेषां तन्तूनां संघातरूपतया समवायापरित्यागेन कार्यत्वस्वभावापत्तिरेकत्वपरिणतिः सम्बन्ध इति भाव । उभयांशसमर्थनमाह—एकीभा वेनेति गतं तन्तुत्वरूपमपि अपरित्यागेन आवृतसंस्कारमयेऽर्थ एकीभावेन प्राचनस्वरूपपरित्यागो त्यागेन तन्तुत्वा- दिस्वरूपापरित्यागेन पटादिस्वभावत्वमया पटादिरूपेण परिणतिः समवाय इत्यर्थः । कारणेति पूर्वं विप्रकीर्णेषु तन्त्वादिष्व- र्थेषु अवस्थानेन सत् कार्यं यदि सामग्रीसमासादिते पटादिरूपपरिणामेन तन्त्वादिपरिणामेषु तन्त्वादिषु स्वत भवतीत्यर्थः । 25 एवं सौगते कस्यापक्षस्य अविप्रयोगीति भावेन मतान् वस्तुभूतत्वमेव परपक्षद्वेषात् स्वीकारयेन्मार्गप्रवर्तनमिति वैरस्य परिकल्पित- मनूक्त सौत्रिक इत्याह तदापत्तीति अहङ्कारतोऽवर्त्म कृत नयपरता परपक्षद्वेषव हेतु । वेदयुक्तार्थप्रतिनिविष्टत्वोऽपक्षे यदिदमिति अव्यवस्य व्यवहारनामानार्थमेव तदर्थं सति, तद्विषयाभ्याम् तन्तु पट इति इहप्रत्ययाभिधानाभ्यां तु समवा- येऽनुमीयते न वेतन गतिस्वभावेन भवति कार्यस्यासत्त्वात्, अतः वेदनि स्वस्वाधारात्मेवी भाव । परपक्षेण कार्यमव्यप- देश्याधारं स्वमुखेन व्यपदेश्याधारं सिद्धिं भवति न समवायमिदमपि तु तत्रैवास्तीति मन्यस्वेत्याह—सोऽपि चेति । व्यपदेश्यादि- 30 व्यपदेश्यपतति । तद्विषयत्वे येन देशाद्युक्तत्वं भवति—तथा चेति । विभ्विति कपर्दनिष्ठि भवति व्यवहारत्वात्

1 सि क दे अनेकसमवायेभ्यकत्वात् । ×× क । 2 सि क. पूर । 3 सि क. प्रत्यात्मा । 4 सि. क. अर्थेन । 5 सि क. तत्रैव । ×× सि

व्यपदेश्याधाराश्च अणुत्वादिकार्ये विभुत्वपरिमण्डलत्वगुणयोर्वाऽऽत्मभूतयोर्वाऽऽकाशपरमाण्वोर्वाणुत्वमपि व्यपदेश्याधारत्व समवेतत्वञ्च सिद्धम्, तथा द्रव्यादिकार्यस्येति एव तावत् परिनिष्ठितसम्बन्ध युक्तो द्रव्यस्य समवायिकारणत्वनिवृत्तिप्रसङ्गपरिहारोऽसमर्थः ।

योऽपि च कार्यकारणयुतसिद्धिदोषस्य परिहार—तस्यासंयोगात्—न हि कारणसम्बन्धिभिः कार्यस्य संयोगोऽस्ति, द्वयोरङ्गुल्योराकाशे युज्यमानयोः संयोगस्य सम्बन्धिनोः पृथक् सिद्धयोरिवेति सोऽपि न परिहारः, तत्कथदसंयोगासिद्धत्वात्, यदि तत्रोत्पन्नतायसिद्धिः सम्बन्धासिद्धिश्च स्यात् स्यादसंयोगः ततः परिहारश्च युतसिद्धिदोषस्य स्यादिति । 5

योऽपि चेत्यादि, अस्मदुक्तस्य कार्यकारणयुतसिद्धिदोषस्य परिहारो योऽभिहितः—तस्यासंयोगादिति, व्याचष्टे—न हि कारणसम्बन्धिभिः कार्यस्य संयोगोऽस्ति यथा द्वयोरङ्गुल्योराकाशे युज्यमानयोः संयोगस्य अङ्गुल्याकाशसंयोगकारणस्य सम्बन्धिनोः युतसिद्धयोः संयोगो न तथा कारणसम्बन्धिभिः 10 कार्यस्य द्रव्यादेः कश्चित् संयोगोऽस्ति, यतो युतसिद्धिदोष आपाद्येत पृथक् सिद्धयोरिव, तस्मादसंयोगात् संयोगवैधर्म्यात् पृथक् सिद्धभाव इत्यत्रोच्यते–सोऽपि न परिहारः, तत्कथदसंयोगासिद्धत्वात्, यदि तत्र परिनिष्ठित प्रवृत्तस्यारम्भ कथं तेनासम्बद्धमित्यादिना प्रपञ्चेन सम्बद्धत्वमेवेत्युक्तम् सम्बन्धसमवायत्वप्रत्याख्यानेन च, तस्मात्तत्कथदसंयोगस्यासिद्धत्वादपरिहारः, यदि तत्रोत्पन्नतायसिद्धिः सम्बन्धासिद्धिश्च स्यात् स्यादसंयोगः ततः परिहारश्च युतसिद्धिदोषस्य स्यात् एवं तावद्व्याप्त्यात्मान्तरमप्ययुक्तम् । 15

---

समवेतत्व भवति यथा विभुपरिमण्डलत्वादीनि विभूनि च परिमण्डलानि च विभुपरिमण्डलानि विभुपरिमण्डलानि च तानि [illegible] चेति विग्रहः [illegible] परमाणवश्च गृह्यन्ते तत्र गगनादीनि चत्वारि द्रव्याणि [illegible] [illegible] तेषु च विभुत्वं समवेतमिति विभुत्वगुणसमवेतानि, यथा वा परिमण्डल[illegible] परमाण्वो [illegible] परिनिष्ठिता परिमण्डलत्वेन समवेता [illegible] तथा द्रव्यादिकार्यमपि [illegible] [illegible] समवेतमिति मन्यतेति भावः । एवञ्च परिनिष्ठितस्यैव कार्यस्य कारणे [illegible] सम्बन्धेऽभिमते कार्यस्यात्यन्त परिनिष्ठितत्वा- 20 [illegible] समवायिकारणं न भेत्स्यति [illegible]—एवं तावदिति [illegible] [illegible] सिद्धौ [illegible] परिनिष्ठितस्य कारणेन [illegible] [illegible] परिहारो[illegible] युज्यते सोऽसमर्थ एवेति भावः । अथ परिनिष्ठितस्य कार्यस्य कारणे सम्बन्धे युतसिद्धि दोषं [illegible] परिहर्तुं वैशेषिकोक्त [illegible]—योऽपि चेति । व्याचष्टे—अस्मदुक्तस्येति । कार्यकारणभावाना [illegible] पृथक् पृथक् सिद्धयोर्हि सम्बन्ध संयोग उच्यते यथा [illegible] संयोगकारणयोराकाशे पृथक् पृथक् सिद्धयो परस्परं 25 सम्बन्ध संयोगो भवति न तथा कार्यकारणयोः पृथक् पृथक् सिद्धिरस्ति [illegible] सम्बन्ध संयोग [illegible]—तस्यासंयोगादिति, तस्य कार्यस्य संयोगाभावादित्यर्थः [illegible] न हीति [illegible] [illegible] कारणस्य [illegible] सम्बन्धिनो[illegible] संयोगो यथा भवति तथा कारणीभूता[illegible]सम्बन्धिभिः [illegible] कार्यस्य [illegible] द्रव्यादेः संयोगोऽस्तीति न युतसिद्धौ तन्तुपटौ येन संयोगस्तयो स्यादिति भावः । [illegible]—पृथगिति पृथक् पृथक् सिद्धयोर्[illegible] संयोगो भवति [illegible] । एवञ्च पृथक् सिद्धौ [illegible] तन्तुपटौ तु न पृथक् सिद्धाविति [illegible] 30 युतसिद्धिरिति—तस्मादिति । [illegible] हेतुमभिप्रेत्याह—सोऽपीति । यदि तन्तुषु पटः परिनिष्ठित प्रवृत्त आरम्भक तत तन्तौ न तन्तुषु सम्बध्यते असम्बद्धत्वे तु न तत्र परिनिष्ठित प्रवृत्त आरम्भश्च स्यात्, न वा सम्बन्धः समवायो वा स्यात् कारणेन कार्यस्य, तस्मात् सम्बन्धोऽस्त्येव स च सम्बन्धो युतसिद्धत्वात् संयोग एव न समवाय [illegible]—यदि तत्रेति । आरम्भकाधिष्ठिता यदि तत्र न भवन्ति तदा [illegible]—यदि तत्रेति । [illegible]

१ सि क. [illegible] । २ सि क. सम्बन्धो ।

इदानीं सूत्रकारमत समर्थयन्तो वाक्य—भाष्य—टीकाकाराश्च भवन्ति समाहत्य प्रधानानुगामित्वो-पक्षेपार्थं सूत्रकारमतमेवेत्थं रूपयितुमाह—

तस्यापनिष्पन्नत्वात् सदाद्यभिधानार्थं कारणसमवेतस्य वस्तुन उत्तरकाले सत्तासम्बन्ध इति बहूनां मतम्, वस्तूत्पत्तिकाल एवेति तु वाक्यकाराभिप्रायोऽनुसृतो भाष्यकारैः, सिद्धस्य वस्तुनः स्वकारणैः स्वसत्तया च सम्बन्ध इति मतान्तरमतेरभिप्रायः अस्मदभिप्रायस्तेषां प्रमाणा-मप्यमत्यवति, परस्परविरुद्धार्थत्वात्, कुमारब्रह्मचारिपितृत्ववत्, इदमेवोदाहरणमन्यत्र, एवं-मप्रकृतिय सर्वेषां शास्त्रकारमतानुवर्तित्वात् स एव नाशः स्यात् ।

( तस्येति ) तयोरनिष्पन्नत्वात् सदाद्यभिधानार्थं कारणसमवेतस्य वस्तुन उत्तरकाले सत्तास-म्बन्ध इति बहूनां मतम् वस्तूत्पत्तिकाल एवेति तु वाक्यकाराभिप्रायोऽनुसृतो भाष्यकारैः, सिद्धस्य वस्तुनः स्वकारणैः स्वसत्तया च सम्बन्ध इति मतान्तरमतेरभिप्रायः, अस्मदभिप्रायस्तेषां प्रमाणमप्यस-त्यवति कस्मात् ? परस्परविरुद्धार्थत्वात्—दर्शिता विरुद्धार्थता किमिव ? कुमारब्रह्मचारिपितृत्ववत्—यदि पिता कथं कुमारब्रह्मचारी, ? अथ कुमारब्रह्मचारी कथं पितेति ? इदमेवोदाहरणमन्यत्रेति—न्योक्तेरपरस्य न्युतमविरुद्धार्थत्वादिप्यन्यत्रोदाहरणं वाच्यमिति एवमप्रकृतिरेवेत्यादि सर्वेषां—वाक्यभाष्यटीकाकारशा-स्त्रकारमतानुवर्तित्वात् स एवाभाव असत्यवादी अन्यतरपि स्यादिति लोकानुवृत्त्या सामञ्जस्येनोक्ते मा मूर्खार्थकत्वेरथावहमतिविरमात एवेति निष्ठुरवचनवृत्तिः सह तद्रूलेः कथं इति ।

विधाव्यम्—

सदादिविकल्पानुपपत्तिश्च तदवस्थैव, वस्तुनर्द्रव्यादीनां स्वत एवाभिधानप्रत्ययविषयत्वं मत्स्याद् मत्तादिवत् यथा च सत्तायां स्वत एवाभिधानप्रत्ययौ एवं द्रव्यादेः, न सत्तायोगा-दितुपकल्प्यत परिहारः प्रमाणदर्शनवत्, अतादात्म्याद्दण्डनिमित्ताद्दण्डदण्डिवत्, यथाऽद-ण्डाद्दण्डिना दण्डित्वं दण्डनिमित्तमनं द्रव्यादरमदात्मनः सत्तानिमित्त सदभिधानादीति ।

( सदादीति ) सदादिविकल्पानुपपत्तिश्च तदवस्थैव—स्वाभिधानप्रत्ययोरेकत्वासत्त्वादिति तुष-

[illegible] तस्यापनिष्पन्नत्वादिति [illegible] [illegible] [illegible] कुमारेति [illegible] [illegible] एवं वस्तुरित्येति [illegible] [illegible] स्यादिति [illegible]

१ वि० ब० ब० वे [illegible] । २ वि० ब० ब० [illegible] ।

तापि किं कार्यस्य सत्तया सम्बन्धः सतोऽसतः सदसतो वा ? इत्युपालम्भाय चोदित एवाऽऽत्मा, तद्यथा कार्यस्य किं सत्तया सम्बन्धो निष्क्रियस्यानिष्क्रियस्य निष्क्रियानिष्क्रियस्येति समानप्रश्नत्वात् अन्यत्रात्मा प्रोच्चारणात् दोषपरिहारः, वस्तुनो द्रव्यादीनामित्यादि, द्रव्यादीनां स्वत एवाभिधानप्रत्ययविषयत्वं सत्त्वात्— स्वतःसत्त्वात्, समवायसत्त्वादित्यर्थः, किमिव ? सत्तावदिति व्याख्यानमभिप्रायादनसाधनं वैशेषिक प्रति गतार्थं यावत् सत्तायोगादित्युक्तेः, उच्यते परिहारः किञ्च कथमनैः—नैतत्, अतादात्म्यात्—स आत्मा 5 यस्य तत्तदात्म सत्तादि, तद्भावस्तादात्म्यं तद्धर्म्यादतादात्म्याद् द्रव्यादीनाम् तद्व्याख्या—यावदभिधाना दीति गतार्थम्, दण्डनिमित्तादण्डदण्डिवदिति दृष्टान्तः—यथा दण्डोऽस्यास्तीति दण्डीति दण्डिस्वमदण्डा दण्डिनो दण्डनिमित्तमेवं द्रव्यादेरसदात्मनः सत्तानिमित्त सदभिधानादीति ।

अत्र वयं सम्प्रधारयामस्त्वया सह कथमिदं तादात्म्यं किं सतो भावात् ? उत सत्कर त्वादिति, तद्यदि तावत् सतो भवनं ततः सर्वेणापि सता भूयते, स्वत एव अथ सत्कर 10 त्वात्तादात्म्य सत् प्राक् प्रत्युक्तम्, यथा च सत्तायां स्वत एव सदभिधानप्रत्ययौ तदात्मत्वादेवं द्रव्यादौ द्रव्यत्वादौ नित्यैकसर्वगेषु सामान्यसामान्यविशेषशून्येष्वपि, दण्डेऽपि च तादात्म्यादेव दण्डाभिधानप्रत्ययसिद्धौ स्वत एव दण्डिनि तौ तादात्म्यात्, इतरथा दण्डिकुण्डल्यविशेषः स्यादिति, तथा च दण्डस्वसामान्यविशेषनिरपेक्षः स्वत एव भवति दण्डस्तादात्म्यात् सत्तावदिति सिद्धम् । 15

(अत्र वयमिति) अत्र वयं सम्प्रधारयामस्त्वया सह कथमिदं तादात्म्य ? किं सतो भावात्—य[त्] सद्भवति तत्तस्य सतस्तादात्म्यं—आत्मलाभः स्वरूपानुभवनम्, उत सत्करत्वादिति तद्यदि तावत् सतो भवनं ततः सर्वेणापि सता भूयते—सत्तादिना द्रव्यादिना वा स्वत एवेत्युक्तम्, अथ सत्करत्वा त्तादात्म्यं सद्भवतीति तस्मात् प्रत्युक्तम्—स्वतःसिद्धस्य द्रव्यादेः सत्ता सत्करी न भवति, वैयर्थ्यादसतोऽस

---

त्याभिनिष्पत्तावा एव केवलं शब्दमात्रभेदो न त्वर्थभेद इत्येतदु प्रदर्शितं यथायथ्वस्वसत्ता एकैवास्मैवात्—तद्यथेति । ननु 20 सत्तायां यथा स्वत एव सदभिधानप्रत्ययौ न तु सत्तासमवायादेवं द्रव्यादावपि स्वत एव सदभिधानं प्रत्ययश्च भवेताम्, किं सत्तासम्बन्धेनेति वैशेषिकं प्रत्यभिप्रायमाचार्यः वक्तुमरिरिति । ननु भावरूपेणैव भावतीयेन सदसत्त्वरूपमात्रवस्तुना वा प्रतिनियताद् रूपभेदमन्यथाविरेकेण प्रतिनियतगवादिभावाभिधानप्रत्ययस्योऽप्रसिद्धा न भवेतामिति तत्रापरीतामभिसन्धाय प्रमत्तेवाः धर्मीनच्चे धर्मान्तरं प्रतिनियतत्वसमवायात्प्रत्ययात् स्वत एव न धर्मान्तरसम्बन्धात्, न च भावा एव स्वतो भिन्नाः अनुवृत्ति- प्रत्ययाभिधानप्रत्ययो स्वत एव प्रतिनियतप्रत्ययाभावादिति सत्ताद्रव्यत्वानुवृत्तिप्रत्ययो धर्मो विशेषणत्वेन भावरूपतया भावे- 25 ऽन्याभावत्वा न प्रतियाति प्रसिद्धा तस्मात् सत्ताद्रव्यत्वानुवृत्तिप्रत्ययसिद्धप्रत्ययमानो परस्परं वैधर्म्यादतादात्म्यभूततादात्म्यसामान्या- भिन्नत्वात् द्रव्यादेरन्यसम्बन्धात् पुरुषस्य दण्डाभिधानप्रत्ययवत्तदभिधानप्रत्ययावित्यर्थः स्वत एव द्रव्यादीनां सदभिधानं न सतः सत्तायै वैधर्म्यादेवानुप्रतिपादनेन वैशेषिक आह—अतादात्म्यादिति प्रतिनियतस्वरूपभूततत्त्वादिधर्मैकत्वाभिमतं सामान्या- भावस्वभावादिति यावत्, वस्तु सत्तया सम्बन्धेन सदभिधानप्रत्ययनिमित्ते भवति यथा दण्डसम्बन्धात् पुरुषे दण्डसम्बन्धात्प्रत्ययाभि- धानप्रत्ययनियमो भवति तथान्यत्र धर्मिणः प्रमाणात् पृथगेव भिन्ना स्वत एवाभिधानप्रत्ययविषय इति न द्रव्यस्वात्मन्यं सत्तया 30 इति सत्तानैकत्वात् स्वतः सदभिधानप्रत्ययविषयत्वं द्रव्यादिस्वाभाव्य—दण्डनिमित्तेति । अतादात्म्यादित्यत्र तादात्म्यकल्पनाविचार पूर्वकं मतमिदं निराकरोति—अत्र वयमिति । अतादात्म्यप्रतिषेधेन तादात्म्यमुच्यते तत् किं कन् सद्भवति तस्य सतो भावात् तादा- त्म्यम्, किं वा सत्करत्वात् सतोऽभवत् इति विकल्पयति—कथमिदमिति । प्रथमं दूषयति—यदि तावदिति यथा भावात्म्यात् सत्ता- दिषु सदभिधानादीति न युक्तमिति भाव । द्वितीयं दूषयति—अथेति । अथ प्रत्युक्तं दूषयति—स्वतःसिद्धस्येति सतो न सत्करी

---

१–२ सि. क. डे °भिधानादीति ।

स्यात् खपुष्पवत्, सदसतः सम्भवाभावादित्युक्तम्, यथा च सत्तायामिष्टाभि मावमार्थं द्रव्यादेर्द्रव्यता-देश्च स्वत एवाभिधानप्रत्ययौ, तदात्मत्वात् सत्तावदिति सोऽद्रव्यादेस्तदात्मत्वं–सदात्मत्वं द्रव्यादेरेवं द्रव्यत्व-गुणत्व[कर्मत्व]सामान्यादिनिर्दिष्टसर्वभेदेषु सामान्यसामान्यविशेषद्रव्येष्वपि सदभिधानप्रत्ययौ सर्वत्र च इति सर्वव्यापित्वं न्यायस्यास्य दर्शयति किञ्चान्यत्–दण्डेऽपि चेत्यादि–योऽपि दण्डित्ववदिति दण्डवतः

5 सोऽपि तादात्म्यादेव दण्डस्य भवनात्मत्वादेव दण्डाभिधानप्रत्ययसिद्धौ सत्यां स्वत एव दण्डिनि देवदत्ते दण्डीत्यभिधानं प्रत्ययञ्च करोति तावभिधानप्रत्ययौ तादात्म्यमित्यनेनार्थेन विना न भवतः अतोऽस्याभिप्रायं साधयति इतरथा दण्डिकुण्डल्यविशेषः स्यात् साधनञ्चात्र दण्डोऽपि स्वरूपाभिधानप्रत्ययकारी स्वत एव तादात्म्यात् भवावत्, यथा द्रव्यमपि, स्व एव तद्वत्, दैवा चेत्यादि, एवञ्च सति दण्डत्वसामान्यविशेष-निरपेक्षः स्वत एव भवति दण्डः तादात्म्यात् सत्तावदिति सिद्धम् ।

10 अथोऽप्येवं दण्डोऽपि दण्डत्वाद्दण्डाभिधानप्रत्ययभागिति, अनुदाहरणं तर्हि दण्डी दण्डाद्दण्ड्यभावात्, दण्डस्य स्वतोऽसिद्धत्वात् दण्डत्वोपपादितदण्डाद्दण्डीति चेत्, इतरेत-राश्रयत्वात् दण्डस्वतस्त्वाद्दण्डसिद्धिः दण्डविशेषणसाधितदण्डत्वसिद्धेर्दण्डस्वतस्त्वसिद्धिरिति, दण्डीति च दण्डाद्दण्डी, न तु दण्डत्वात् स्वत एव भवद्दण्डी, आत्मान्तरसंक्रान्तिर्वैषम्, दण्ड स्यात्मान्तरे दण्डः स्वत एवाभवन् दण्डत्वाश्रयन् तदात्मा भवति, एवं दण्ड्यपीति, वयन्तु

15 ब्रूमो यत्तद्दण्डेन भूयते तस्यैव दण्डत्वात् यद्दण्डी दण्डी भवति स देवदत्तो भवत्यासमानं लभते, तदभावेऽसामान्यात्मकत्वमेव सर्वस्य स्यात्, यदि सा स्वत एव न भवति सत्तासामान्यादिव स्याश्रयति नास्त्येव सा खपुष्पवत्, सतश्चासामान्यमेव सत्तादिः स्यात्, स्वत एव भवतः समानस्याभावात्, तस्मात् स्वत एव दण्डो भवति स्वत एव सदभिधानप्रत्ययौ, न सत्तायोगात् एवं दण्ड्यपि ।

20 अथोऽप्येतेत्यादि, वैशेषिको दण्डमपि दण्डत्वाद्दण्डव्यतिरिक्तान्मन्यते दण्डाभिधानप्रत्ययभाजम्,

---

तथा वैधर्म्यात् भावत वस्तुत्वादेः तादात्म्यादेव नापि तत्सत् स्वमते तत्सत्तात्मकस्य वस्तुनोऽसम्भवाद्विशेषं मा भूदभाव इति भाव । एवं भवनात्मकं तादात्म्यं सत्तायामिव द्रव्ये द्रव्यत्वादावपि व्याप्नोत्येवेति इति सर्वत्र स्वत एवाभिधानप्रत्ययौ भवत इत्याह–यथा चेति । दण्डनिमित्तस्वभावत्वादिति यावत् विवक्षति–योऽपि दण्डित्ववदिति दण्डस्य स्वत एव तत्स्वभावात् दण्डाभिधानप्रत्ययावपि स्वत एव न तु दण्डत्वात् एवं दण्डिनोऽपि स्वत एव स्वरूपानुभवनात् स्वत एव दण्ड्यभि-

25 धानप्रत्ययौ भवतो न दण्डनिमित्तात् न हि तादात्म्यमन्तरेण तदभिधानप्रत्ययौ भवत इति भाव । तादात्म्यं विनाप्यन्येन यदि तौ भवेतां तर्हि स एव दण्डी पुरुष स एव कुण्डल्यपि स्यात्, पुरुषाविशेषात्, अनन्यविशेषेण वा दण्डेन कुण्डले अन्यत्वाविशेषात् तस्मात् वा सर्वत्राविशेषात् कुण्डल्यपि दण्डसम्बन्धवत्त्वात् सोऽपि दण्डी स्यादित्यत आह–इतर-थेति । तथा च प्रयोगेण दर्शयति साधनञ्चात्रेति, स्वत एव न दण्डत्वसम्बन्धात्, तत एव–तादात्म्यात् सत्ता–वदि-त्यर्थः । तथ सामान्यविशेषाभिधानप्रत्ययौ भवतः अन्यथा सामान्यविशेषवैधर्म्यात् एवञ्च दण्डो न स्वतः दण्डाभिधानप्रत्यय-

30 भाक् किन्तु व्यपदेशान्तरभेदभिन्नदण्डत्वयोगाद्दण्डत्वमभिधानप्रत्यये अथोऽप्येतेति । यस्य स्वतोऽभिधानप्रत्ययौ स्व-लैनैकस्य तदभिधानप्रत्ययौ सत्तावदिति न नियम अन्यस्य अन्याभिधानप्रत्ययौ तथा तादात्म्यमपि विशेषाभावे तथा इत्यादिदण्डत्वसम्बन्धात् एव इत्यस्य वैशेषिक तादात्म्येऽपि विशिष्टाभिधानप्रत्ययौ ब्रूते वैशेषिक इति विशिष्टप्रत्यये विशे-षणमेव कारणत्वात् अन्यं दण्डेन दण्डे दण्डाभिधानप्रत्ययौ तत्संयोगात् पुरुषे दण्डीतिप्रत्ययाभिधाने भवत इति भाव ।

1 सि. क. डे. स्वत इत्यादि । 2 सि. सर्वत्रगीति, क. डे. सर्वत्र तन्त्रीति । 3 सि. क. दुर्वीति । 4 सि. क. यथा ।

चाचार्यो ब्रवीति अनुग्राहणं तर्हि दण्डी, दण्ड[त]दण्ड्यभावात्, दण्डस्य सतोऽसिद्धत्वात्, दण्डी न सिध्यति, परतः सत्त्वसिद्ध्यर्थमुभयोराश्रियते दण्डी, दण्डासिद्धेः कुतस्त्यसिद्धिरिति, दण्डत्वोपपादितदण्डो दण्डीति चेत्–दण्डत्वसामान्यविशेषाद्दण्डः सिध्यति, दण्डाद्दण्डीति, तत उदाहरणसिद्धिः विशेषणादेव विशेष्यसिद्धेः, एवमप्यन्यस्ये–इदमापतितं दण्डत्ववत्त्वाद्दण्डः सिध्यति, दण्डत्ववत्त्वं पुनर्दण्डविशेषणस्या भिन्नदण्डत्वसिद्धेः सिध्यति तदिदमितरेतराश्रयं प्राप्तं 'इतरेतराश्रयाणि च न प्रकल्पन्ते तद्यथा नौर्नावि 5 बद्धा नेतरत्राणाय' (महाभा० १ अ० १ पा० १ सू०) इति तत्प्रतिपादनार्थो ग्रन्थः–इतरेतरेत्यादिः गतार्थो भावत्वस्यासिद्धिरिति, दण्डीति च देवदत्तः स दण्डाद्दण्डत्वाद्वा कथमिति निर्णये? दण्डोऽस्यास्तीति दण्डी देवदत्तः स यदि दण्डादेव सत्प्रसिद्धात् सिद्ध इत्युच्यते अथ दण्डत्वात् दण्डत्वमस्यास्तीति दण्डत्वीमस्तु मा भूद्दण्डी, पुरुष भावदण्डाद्दण्डी न तु दण्डत्वात् सर्व एव भवेद्दण्डी, किञ्चान्यत्–आत्मान्तरसंक्रान्तिप्रसङ्गश्चैवम्–दण्डत्वादात्मान्तरं दण्डो दण्डी च, दण्डात् दण्डत्वमण्डिनौ, दण्डिनो 10 दण्डसम्बन्धे, दण्डः सत एवात्मकम् दण्डत्वात्मकम् तदात्मा भवति, एव दण्डमपीति, यथा तु भूमो धवलत्वेन भूयते तथैव दण्डत्वात् [illegible] दण्डी भवति स देवदत्तो भवत्यात्मानं लभते भावान्तरविविक्तम् धवलेन भूयते तदेव भवन् दण्डत्वं [illegible] दण्डत्ववत्त्वात्, एवं देवदत्तस्य दण्डिनोऽप्यात्मानुभवन

---

[illegible]–अनुग्राहणमिति, दण्डस्यापि दण्डत्वाभिमानमन्येन परापेक्षत्वात् [illegible] [illegible] परैव प्रसिद्धमिष्टार्थं दण्ड्यनुग्राहणं तर्हि तद् दण्डसिद्धमभावादसिद्धमेवेति भाव । ननु भाष्ट प्रसिद्धदण्डत्वतत्त्वाद्दण्डत 15 पुरुषे दण्डीति प्रत्ययो भवति न तु भावसिद्धदण्डात् [illegible] तदानीं दण्डत्वापेक्षत्वात् दण्ड [illegible] न भवेदिति [illegible] पठते–दण्डत्वोपपादितेति दण्डत्वेन [illegible] भाग् यो दण्ड तस्मादित्यर्थ । ननु विशेषणात् विशेष्यस्य सिद्धावभिमतायां दण्डस्य दण्डत्वात्, दण्डत्वस्य च दण्डात् सिद्धि –दण्डोऽभिमतानुपपन्नमतीह दण्डत्वं सैत्सति तस्मादितरेतराश्रयो दोष स्यात् तेन च न वस्तुनि सिद्धिरित्याशयेन व्याचष्टे–इदमापतितमिति । इतरेतराश्रयस्य सिद्धिप्रतिबन्धकत्वे [illegible]– इतरेतरेति । ननु दण्डीति प्रत्यय किं दण्डसम्बन्धात्, उत दण्डत्वसम्बन्धात् [illegible] निराकरोति–दण्डीति चेति, प्रथमं 20 पक्षं दूषयति–दण्ड इति दण्डसम्बन्धात् मत्वर्थे 'अत इनि ठनौ' इति इनिप्रत्यये दण्डीति भवति तत्सम्बन्धात् दण्डसम्बन्धादेव दण्डी न तु दण्डत्वसम्बन्धादिति अनुभवते तर्हि सर्वेषां वस्तूनां भेदरूपेण भावाभावात्मकत्वात् सत एव सिद्धत्वात् किं दण्डापेक्षया ? न हि वस्तु सत् सत्सम्बन्धात् [illegible] अन्येन वा [illegible] भवतीति भाव । दण्डीति च देवदत्तो यदि दण्डत्वाद् भवति न तर्हि दण्डीति भवेदित्य किन्तु दण्डत्वीति स्यात् दण्डार्थेनैव तस्य सम्बन्धादित्याह–अथेति । यथा तु दण्डादेव दण्डी भवति न दण्डत्वात् सत एव सिद्धो दण्डी नान्येन अन्यथा आत्मान्तरसंक्रान्तिदोषः स्यादित्याह–पुरुष भावदिति । [illegible]–दण्ड 25 त्वादिति दण्डत्वाद्दण्ड आत्मा दण्डो दण्डी च दण्डात् [illegible] आत्मा दण्डत्वं दण्डी च दण्डिनो [illegible] आत्मा दण्डो दण्डत्वस्य [illegible] –दण्ड सतो न भवति दण्डत्वात् भवन् तदात्मा भवति एवं दण्डी सतो न भवति दण्डात् भवन् तदात्मा भवतीति प्रसङ्गत इति भाव । तथा तत्र वस्तुना भवनेन तत्त्वं भाव्य [illegible] तद्भवनं सर्वतामितिप्रमिति तथा– [illegible] स्वरूपमेव हि तद्भवनमिति भवतस्य वस्तुन स्वभावान्तरभेदात् [illegible] आत्मान्तरसंक्रान्तिमेवमितस्फुटमाह– यथा तु भूम इति दण्डस्य स्वरूपानुभवनमेव दण्डत्वम्, दण्डिन पुरुषस्य दण्डित्वस्वरूपानुभवनमेव दण्डित्वम्, न तु दण्डा- 30 दिसम्बन्धमिति न भावान्तरस्य संक्रान्तिरिति भाव । भावमेवं प्रकटयति–धवलेन भूयत इति तदेव स्वरूपानुभवनमात्म

---

१ सि क. दण्डत्वाद्दण्डत्वात् क । २ क भवत एव [illegible]दण्डी । ३ सि क. दण्डो दण्डो । ४ सि धवलेन च, इति नास्ति । ५ सि न तद्व्यतिरिक्तादिति नास्ति ।

तत्त्वं तदभावेऽसामान्यात्मकत्वमेव सर्वस्य स्यात्, यदि सा दण्डवदन्यतोऽभिव्यक्तिः स्वत एव न भवति सत्तासामान्ययोगात् सदभिधानप्रत्ययौ भवतः स्वत एवाभवन्ती नास्त्येव सा अपुष्पवत्, तत्सामान्येन सत्तादिः स्यात् तथानिष्टम् स्वत एव[१]भवतः समानसाभावात् सामान्यमेव सामान्यं न स्यात् तस्मात् स्वत एव दण्डो भवति स्वत एव सदभिधानप्रत्ययौ, न सत्तायोगात् यथा दण्ड एव सत्त्वपिस्तारि

5 पदार्थं साधनम्, एवं तादात्म्यात् सत्तादिषु सदभिधानादिप्रयुक्तम् ।

यदप्युक्तमतदात्मत्वात् द्रव्यादीनां सदभिधानप्रत्ययौ सत्तायोगात् न स्वत इति तदपि न, अतदात्मत्वादित्यादर्शनैकान्तिकत्वात्, द्रव्यत्वादीनामतादात्म्ये स्वतः सदभिधानप्रत्ययौ न सत्तातः, एकैकत्वात्, सात्मवत्, एवं द्रव्यादीनामपि स्वत एव द्रव्यत्वादिवत् ।

यदप्युक्तमतदात्मत्वादित्यादि, असत्तात्मकत्वाद्द्रव्यगुणकर्मणां सदभिधानप्रत्ययौ सत्ताया

10 नात्म स्वत इति तदपि न अतदात्मकत्वादित्यस्यानैकान्तिकत्वात् अनैकान्तिकत्वप्रतिपादनार्थं प्रत्या यमाह द्रव्यत्वादिष्वपीति, तस्य भावना द्रव्यत्वादीनामतादात्म्य–द्रव्यत्वगुणत्वकर्मत्वघटत्वपटत्व त्वादीनां सामान्यविशेषाणामसत्त्वात्मकत्वे स्वतःसदभिधानप्रत्ययौ न सत्तातः कस्मात्[२] एकैकत्वात् एकमेव द्रव्यत्वं सर्वद्रव्येषु द्रव्य[त्वा]ख्यानिष्ठः तत्र सत्तायोगो नेष्यते अनुपपत्त्यसमापात्, तथापि च सदित्यभिधीयते प्रतीयते च एवं गुणत्वादीन्यपि तस्मादेकैकत्वात् स्वतः सत्त्व आत्मवत्–सत्तावदित्यर्थः,

15 स च दृष्टान्तः सत्तो द्रव्यत्वादिमवने तस्य वर्णनात्, द्रव्यत्वादिषु भिन्नेषु स्वतो भवन्त्याः सत्ताया एकस्याः सदभिधानं दृष्टमेव द्रव्यादीनामपि स्वत एवेति साधनतोपपादितोऽर्थः ।

अस्य सामान्यरूपस्य तदभावे तु सर्वं तत्त्वमेवान्तर्भिन्नत्वं साधिति भाव । एतदेव येनयुक्तानयति–यदि सेति यस्मात् स्वतोऽभवन् अन्येनैव भवेत् सति तदभवन् अन्येन भवत्, अपरमपीतरेण इत्यतपि तद्वेव येन यस्मिन्निरसेयमानत्वमा न किंचिदपि सत् भवेत् स्वतोऽसत्त्वादिति भाव । स्वत एव स्वतो सत्तामभावे तत्त्वादिभिरभेदेऽस्ते स्याद्विर्णीत तत्सत्तादवत्तो-

20 समत्वम्, एव तत्त्वादिरपि तस्मात् न स्यात् तस्मापि स्वतो सत्त्वस्वरूपस्य सामान्यस्याभावात् तस्मात् सर्वे प्रत्ययाभि धानौ च स्वत एव भवन्ति सासत्त्वाभ्युपेत्यर्थः–तदेवेति । दार्ष्टान्तिके योजयति–यथा दण्ड इति । एवं सत्तादिषु तादात्म्यात् स्वत एव सदभिधानप्रत्ययौ अतादात्म्यात् द्रव्यादौ न स्वत इति मनुषे तथा तद्गुणभिन्नत्वादपि–एवं तादात्म्यादिति । अतदात्मत्वात् सदभिधानप्रत्ययौ स्वत इति पराभिमतव्याप्तिप्रदर्शनाय यदप्युक्तमिति । व्याचष्टे–असत्तात्मकत्वादिति । दोषमाविष्करोति–अनैकान्तिकत्वादिति द्रव्यत्वादौ अतादात्म्यं वर्तते स्वत सदभिधानप्रत्ययौ च

20 स्तीति हेतुरतादात्म्यमनैकान्तिकमिति भाव । अनैकान्तिकत्वं भावयति–द्रव्यत्वादीनामिति द्रव्यत्वादीनां सत्तातो भेदात्त दात्म्यता हेतुरिति तस्मात्सत्त्वापि तत्र सत्तयाभिधानाभिधत्वं नास्तीति भाव । तत्र कारणमाह एकैकत्वादिति एकत्वादि स्यादेकत्वात्–कथमनेकत्वं सत्तायोगाभिरहितत्वम् द्रव्यत्वं हि एकमेव न तु व्यक्तिभेदेन तथा सत्तायोगाभावेऽपि द्रव्यत्वादौ न चाव्यवस्थेव अनवस्थेरस्य प्रसक्तत्वात् अनुगताभिधानप्रत्ययनिमित्तं हि सामान्यम्–अनुगताभिधानप्रत्ययार्थमनेकेषु व्यक्तिषु वर्तते, तस्मात्सत्त्वस्य अनवस्थेयात् अतादात्म्यम्, तथापि द्रव्यत्वं सदिति प्रतीयते अभिधीयते चेति भावः सदभिधानप्रत्ययविष-

30 यत्वमत्राप्यतादात्म्यस्यैकान्तिकत्व इति भाव । एवं च द्रव्यगुणत्वकर्मत्वादीनामैकैकत्वेऽपि सामान्यान्तरसंबन्धेन कथ एव स्वत सत्तावदित्यत्र–तस्मादिति । यथा सत्ताया एकैकत्वात् स्वत सत्त्वं तथा द्रव्यत्वादीनाम्, द्रव्यत्वादीनामिव च द्रव्यादेरपि स्वत सत्त्वं अभिधानप्रत्ययौ चेत्याह–स च दृष्टान्त इति । ननु द्रव्यत्वादौ सदभिधानप्रत्ययौ न स्तः, किन्तु

१ सि० क्ष० डे० वै० यदा० । २ सि० क्ष० कथो० ।

आह—

सत्तासम्बन्धरहितेषु द्रव्यत्वादिष्वौपचारिकौ तौ स्याताम्, असंसत्ययोर्गुणत्वकर्मत्वयोरेकाभिधानप्रत्ययवदिति चेत्तर्हि द्रव्यादिष्वपि द्रव्यत्वादि रहितेषु तावौपचारिकौ स्याताम्, मनुष्यसिंहत्वादिवत्तयाऽञ्जसाऽनुपपत्तेर्नेति चेत् ततस्ते स्वपक्ष एव दोषविधानम्, यदि तु सत्तासम्बन्धापेक्षौ सदभिधानप्रत्ययौ तर्हि कथं सत्तादिषु तावौपचारिकाविति, त्वमेवासि प्रष्टव्यः 5 यत् पुनरिदमुच्यते सत्तायां सिद्ध इति चेत्, यदा च आत्मानमात्मना न शुक्तमभियोक्तुम् तद्योगनिमित्तम्, तदयुक्तं न द्रव्यादिष्वञ्जसा सिद्धिः, असदात्मनिमित्तस्य सत्प्रत्ययस्यानुपपत्तेः, मनोरथवत् ।

सत्तासम्बन्धेत्यादि, गुणत्वमेक कर्मत्वमेकमित्येकाभिधानप्रत्ययावसंस्पयोरपि गुणत्वकर्मत्वयोरौपचारिकौ दृष्टौ तथा सदभिधानप्रत्ययौ द्रव्यत्वादिष्वौपचारिकौ स्यातामिति को दोषः ? अत्रोच्य 10 ते—द्रव्यादिष्वपीत्यादि तुल्यत्वापादनमौपचारिकत्वेन गतार्थम्, आह—मनुष्यसिंहत्वादिवत्तयाऽञ्जसाऽनुपपत्तेर्नेति चेत्—यथा शौर्यक्रौर्यादिधर्माः सिंहे मुख्याः सिद्धाः सन्तो मनुष्ये शक्या उपचरितुम्, नासिद्धास्तथा द्रव्यादिषूपचरितौ स्यातां यद्यन्यत्राञ्जसा सिद्धौ सदभिधानप्रत्ययौ, न तु तौ क्वचित् सिद्धौ, आञ्जस्यव्यवहारश्चाञ्जसा क्वचे नास्ति, तस्माद्द्रव्यादिष्वेव मुख्याविति, यद्येवंमन्यसे ततस्ते स्वपक्ष एव दोषविधानं तदुपपत्ति—यदि त्वित्यादि, सत्तादिष्वञ्जसयोरसिद्धत्वादिति भावार्थः, एतत्पुनः स एव 15 प्रष्टव्य इति समावसत्तापेक्षौ सदभिधानप्रत्ययाविष्यतां किं मः सत्तासम्बन्धकल्पनया, तत्र पुनः सत्तासम्बन्धमिच्छतः तु:प्रतिपाद्य[त्व]मावसत्ताव्यतिरिक्तवादात्स्ववादिनः तस्मात्त्वमेवासि प्रष्टव्य इति, यत्पुनरिदमुच्यते सत्तायां सिद्ध इति चेदिति समाप्य गतार्थम्, इयं पुनराशङ्का क्व भवति युक्ता ? द्रव्यादिव्यतिरिक्तं सत्ता स्वत एव सिद्धा तदात्मिकामिच्छन्त्यम्, स पुनर्नान्यो वैशेषिकात् तस्मादात्मानमात्मना

पचरिते एवमाशङ्कते—सत्तासम्बन्धेति ननु यथा द्रव्यादिता तुल्यतुल्या एकत्वे तौ ... 20 [illegible]

[illegible]

[illegible] —गुणत्वमेकमिति द्रव्यत्वादिष्विव ... 25 [illegible] —मनुष्यसिंहत्वादिवदिति ... [illegible]

[illegible] —यदि त्वित्यादि । ... 30 सत्तादिष्विति । ... एतत्पुनरिति । ... [illegible]

न पुनरभियोक्तुमिच्छुराहतो मन्यो गतार्थो यावत्पयोगनिमित्तमिति, यदा चैतावितरस्य यावत्प्रयोगनिमित्त-मित्येव प्रकार व्याहतो मन्यः पूर्वभाग्ये न तूत्तरमध्ये, तदयुक्त न द्रव्यादिव्यक्तता सिद्धिरित्यादिवत्समाप्त-मसम्बद्धम् तदात्मनिमित्तस्य सम्बन्धस्यानुपपत्तेः—असता मनो द्रव्यादीनां मुख्यो सदभिधानमसतो कथं मुख्यमिति पञ्चाचार्यवचनमन्तरे पठित परस्माकोपकस्याऽऽक्षेपासनार्थम्, मनोरथमिति, वैशेषिकस्य

5 मनोरथ एव द्रव्यादिभ्यतिरिक्ता सत्तेति, यदि भवेत् स्यात्, उभयो तु पूर्वोत्तरपक्षौ व्याख्यातावेव ।

द्रव्यादिमात्रत्वनिवृत्तिः स्वतः सत्त्वं सत्तादिपर्यवसितस्य वचनस्य व्याघात इत्येतद्दोषद्वय दर्शनादिति नैवैष च दोषः दण्डिस्वदण्डत्वयोर्यथायथं स्वत एव सतोः तत्सम्बद्धत्वात्, सत्त्वतः सत्त्ववत् सदेव सत् सत्त्वतः—सत्त्वात्, सदेव सत्, न सत्तातोऽन्यत् सत्, तस्मात् सर्वस्य सतो नास्त्यतादात्म्यं सदात्मैव सर्वमिति भाक्तत्वनिवृत्त्यात्ममाया, सत्ताविषयं स्वतः सत्त्वम् ।

10 (द्रव्यादीति) द्रव्यादिमात्रत्वनिवृत्तिः स्वतः सत्त्व सत्तादिपर्यवसितस्य वचनस्य व्याघातः, इत्येतद्दोषद्वयदर्शनादिति वैशेषिकेणोक्ते आचार्य आह—नैष चमारि, दण्डित्वं दण्डत्वञ्च यथायथं स्वत एव सतोः तत्सम्बद्धत्वात्—सत्तासम्बद्धत्वादित्यर्थः, सत्त्वतः—सत्त्वात् सत्त्ववत्, सदेव सत् सत्त्वतः सत्ता सत्त्वात् आत्मत्वात् स्वतः सत्त्वादित्यर्थः एवं तावद्भ्यायो भवत सदेव सत् सत्त्वमेव सत्, न सद्व्य-तिरिक्ता सत्ता न सत्तातोऽन्यत् सत्, तस्मात् सर्वस्य सतो नास्त्यतादात्म्यम्—असदात्मत्वं तदभावात्

15 सदात्मैव सर्वमिति भाक्तत्वनिवृत्त्यात्ममायः नायं दोष इत्यर्थः, सत्ताविषयं स्वतः सत्त्वमिति, आदिमत्त्वात् द्रव्यत्वगुणत्वकर्मत्ववत् ।

यतश्चैवं तदा सतो भावः सत्तेति द्रव्याद्यव्यतिरिक्तसत्तार्थैव ज्ञायते, कर्तरि षष्ठीयुक्तेः यच्च सन्नि सदित्यभिधानप्रत्ययकारणं सत्त्वम्, एवमपि यदुक्तं स्वतः सत्त्वमिति, एतदयुक्तं यत्र हि सत्तावदिति सर्वमिदं त्वदनुवृत्त्या,

20 न मम सत्ता द्रव्यादिव्यतिरिक्ता काचिदस्ति कर्तरि षष्ठीयुक्तत्वात्, ततोऽनुपपन्नं द्रव्यादी-नामनेकत्वम् ।

---

सत्त्वं न निर्णीतं सत्ता न द्रव्यादिमात्रत्वनिवृत्तौ स्वतः सत्त्वं विरुद्धम्, स्वतः सत्त्वे न द्रव्यादिमात्रत्वनिवृत्तिरित्येवं विरुद्धोभयदोषप्रसक्तिमाह वचन परस्परव्याघातकमिति वैशेषिक वदते—द्रव्यादीति । तन्निवृत्तिमते स्वत एव सत्त्वं भाव-मर्थितम्, तन्निवृत्तेरेव सत्ता भवन्त्व स्वात्मनोऽनुत्तरतो—दण्डित्वमिति एवं इत्यर्थः । स्वतः सतः सत्तासम्बन्धो भावे

25 एतत् आह—स्वतः सत्त्वादित्यर्थः इति सदेव सदेतदुच्यते न तस्य काचित् सत्ता सत्ता च सत्ता सत्ता सतः सती तथा व्यति-रिक्ता सत् स्वत सत्त्वमिति भाव । एवं वस्तुमात्रस्य स्वत सत्त्वात् न कापि सत्तासम्बन्धात् सदभिधानप्रत्ययौ किं तु स्वत सत्त्वादेव सर्वत्र सदभिधानप्रत्ययौ मुख्यावेवेति स्वतः सत्त्वस्य भावत्वनिवृत्त्या न विरोध इति सर्वमिदं सदेव सतोऽपि सर्व तदात्मकमेव, न चतादात्म्यमसत्त्वं स्वतस्तादात्म्यात् द्रव्यादौ सदभिधानप्रत्ययौ मुख्यौ न स्वत इति यदुच्यते तस्य तदनुचितमित्याशयेनाह—एवं तावदिति । ननु सत् सतोरेकत्वे सतो भाव सत्तेति नैतन्निष्पन्नं षष्ठी षष्ठ्यभिधानाभावादभावात्—यतश्चैवमिति । सतो भाव

30 सत्त्वमिति भावे षष्ठीति सूक्ते तथा च सतो सत्तारूपाद्भवत्व सैव हि सत्ता सत्त्वोपलक्षणस्य सदुपकारमुख्य सदभिधानप्रत्ययौ

---

१ सि. क. यथा यथा । २ सि क. [illegible] । ३ इत ऊर्ध्वं ग्रन्थ० [illegible] ।

यतश्चैवमित्यादि, यस्मात् सत एव सत्ताद्रव्यादीनां युक्ता, तस्मात् सतो भावः सत्तेति या सत्यभ्युपगतिर्भेदपक्षमुपादानाद्यां मा द्रव्याद्यव्यतिरिक्तसत्तार्थैव प्राप्यते सतो भावः सत्तेति, किं कारणम्? कर्तरि षष्ठीसूत्रेः, तद्व्याख्यानं यावत् सन्निरित्यादि गताथं भावत् सदभिधानप्रत्ययकारणं सर्वत्रेति, अथ एवमपीत्यादि पूर्वोत्तरपक्षौ सम्बध्यमानौ गतार्थौ वैशेषिकस्यैव प्रत्युपन्यस्तम्, यदुक्तं स्वतः सत्त्वमिति एतदयुक्तमिति आचार्यो यद्येतत्प्रत्ययोद्बाह भवति तथाऽऽह—अत्र हि सत्तावदिति सर्वमिव स्वयं तु सत्या 5 सत्तां प्रतिपादयितुमुच्यते, न मम सत्ता द्रव्यादिव्यतिरिक्ता काचिदस्ति, कर्तरि षष्ठीत्युक्तत्वात्, द्रव्यादीनामकारणत्वादिदोषाः प्रसक्ताः ततोऽनुपपन्नमिति, एषां तत्प्रसङ्गात्, कुतोऽनुपपन्नता? ममात्र नियतिताऽभ्यागता त्वन्मतेन तु सत्तामभ्युपगम्य मया सत्तावद्द्रव्यादीनामनिष्टापादनं कृतम्, मम तु द्रव्यगुणकर्मणां सामान्यविशेषसमवायानां चानेकत्वमनुपपन्नमिति ।

तद्व्याचष्टे—　　10

कर्तृणाऽकर्तृणा च यो भवति स एव भावः सामान्यं देशकालादिभेदेऽपि भवनतुल्यत्वात्, स एव विशेषोऽन्यभवननिरपेक्षः कर्ता उक्तवत्, भवदेव भवति तदेव द्रव्यं भव्यं कल्पनं गुणः युगपदयुगपत्पर्यायत्वेन भवनात्, स एव भावः क्रिया, स एव विशेषः भावान्तराद्विशिष्यमाणत्वात् अन्यनिरपेक्षत्वात् सदसदात्मकत्वात् वक्ष्यमाणवच्च, स एव समवायः, एवमेव भवतः कर्तृत्वेन सत्यैव कारणत्व तदेकीभावगत्या कार्यत्वापत्तेः, सदसत्त्वेन कर्तृत्वात् 15 नार्थयोगः, कार्यकारणप्रतिपादनात् नासमवायः, ताभ्यां सम्बन्धत्वाभिन्नत्वस्यासत्त्वे न सः ।

कर्तृणाऽकर्तृणा चेत्यादि, भवतीति भाव इति कर्तरि, भवनं भाव इति भावे, इत्यादि कारकविवक्षायां यो भवति स एव भावः सामान्यम्, देशकालादिभेदेऽपि भवनतुल्यत्वात्, स एव विशेषोऽन्यभवननिरपेक्षः कर्ता, उक्तवत् कर्तरि षष्ठीति, भवतो भवनात् भवदेव भवति तदेव द्रव्यं भव्यम् भवद्भवनादेव कल्पनं गुणनं गुणः युगपदयुगपत्पर्यायत्वेन भवनात्, स एव भावः क्रिया 20

करोतीति भावं [illegible]—सा द्रव्यादीति द्रव्यादेः सतो [illegible] भवति—[illegible] [illegible] इति एतत् कर्तृत्वम्, [illegible] यतः सत्ता भूयते तदेव सत्ता सामान्यं [illegible] सर्वत्रेति भाव । हेतुमाह—कर्तरीति सतो भाव इति कर्तरि षष्ठी सा सतो भवनक्रियाकर्तृत्वं [illegible] द्रव्यगुणकर्मणां सामान्यविशेषसमवायानामनेकत्वमेवोपपद्यते—कर्तृणेति [illegible] तदेव भवद्यदि [illegible] भवतीति भाव इति [illegible] भवति [illegible] हि [illegible] भवति [illegible] 25 [illegible] देशकालभेदेऽपि भवनसमानत्वात् भाव एव सामान्यमुच्यते न ततो भिन्न [illegible] भाव । पूर्वोत्तरभावानपेक्षं वर्तमानभावमात्रत्वं द्रव्यमेव विशेष न हि विशेष सामान्यादिव्यतिरेकेण—स एवेति सामान्यरूपो भाव एवेत्यर्थः । ननु कर्तृभिन्नत्वेन [illegible] स हि विशेषे न कर्तृत्व[illegible]—उक्तवदिति [illegible] भेदमापाद्य स एव कर्तेति भाव । तदेव समर्थयति भवतो भवनादिति भवद्रूपमेव तदेव भवनम् तेनैव तथा तथा भूयते नामधातुमिति, अपि तु भवदेव भवति पूर्वोत्तर[illegible] तदेव द्रव्यमुच्यते तदेव च भवतो भवनात् भवदेव भवतीति 30 द्रव्यमुच्यते स एव च गुणः [illegible] युगपदयुगपत्पर्यायत्वेन च भवनात्, तेन क्रियाऽपि भवनात् स एव भावान्तरेभ्यो विशिष्यमाणत्वात् भावान्तरनिरपेक्षत्वात् विशेषः [illegible] हि सामान्यमेव स्यात्, स एव सत्त्वेनासत्त्वेन च विशिष्यते इति

१ सि क्ष °पक्षमित्येषा तत्र । २ सि क्ष. पाठो न्त्रुटितः । ३ सि क्ष °भावाद्यनेकत्वमनुप । ×× सि ।

भवन भाव इति, स एव विशेषः सामान्याद्विशिष्यमाणत्वात् अन्यनिरपेक्षत्वात्, सदसदात्मकत्वात्-सत्त्वेनासत्त्वेन च तथैव विशिष्यमाणत्वात् वक्ष्यमाणवदेति कारणाकारणयोश्चानन्तरं वक्ष्यते, स एव समवायः एवमेवेति, भवतः कर्तृत्वेन तथैव कारणत्वं तदेकीभावगत्या कार्यत्वापत्तेः, प्रतिपादितेन विधिना सम्बन्धाभावः प्रत्याख्यातः, समवायव्याख्यानात्, सहासत्त्वेनेति, अनेनैवासत्त्वमपि प्रत्याख्या-5 तम् सदसदात्मकत्वात् कर्तृत्वात् संयुक्तमेव कार्येणेति नोऽसंयोगः कार्यकारणप्रतिपादनप्रसङ्गसमवायोऽस्ति, तस्माद्भेदेति संयोगसमवायाभ्यां सम्बद्धत्वात् भिन्नत्वासत्त्वे न स्तः, अजातिमन्ति स्विति प्रतिपादय एव द्रव्यव्यतिरिक्तत्वाः नैमित्तिकापेक्षित्वात्, एवं तावत् कारणवित्त द्रव्यादेः ।

अथ वा अकारणनित्यासम्बन्धाजातीनि द्रव्यादीनि स्वतः सत्त्वात् सामान्यादिवत्, कारणादि वा सामान्यादीनि स्वतः सत्त्वात् द्रव्यादिवत् तदात्मत्वात्, उभयं वा, इतरेतर 10 रूपैकभवनाविशेषात् ।

अथ वेत्यादि, अकारणनित्यासम्बन्धाजातीनि द्रव्यादीनि स्वतः सत्त्वादुभयत् सामान्यादिवत्, कारणादि वेति कारणनित्यसम्बन्धजातिमन्त्वानि सामान्यविशेषसमवायानां स्वतः सत्त्वाद्द्रव्यादिवत्, असत्त्वसत्त्वादिसर्पः तदात्मत्वात् यद् यदात्म तद् स्वतः सत् सत्तावदित्युक्तम्, उभयमिति, कारण-

---

विशेष अनुपमेव कारणकारणयोरैक्यमुच्यते तस्मात्तयोरैकरूपत्वात् स एव समवाय इति द्रव्यमेव सर्वं न द्रव्यात् गुणकर्मादि-15 भावमेवेति भाव । ननु सर्वमेव द्रव्य यदि वैविक्त्यात् समवाय कथं सम्बन्धी इत्यत्राह-एवमेवेति तत्कारणेन भवतो भवनात् कर्तृ भवतः कार्यस्य भवनस्य चैकीभावगतत्वेन समवाय इति भाव । एवं समवायस्य भावेनाद् कार्यकारणयोः सम्बन्धो न सम्भवतीति चेत् तत्राह-प्रतिपादितेनेति । यथा कारणं कार्येण संयुक्तमेव तस्मात् कार्यसहत्वेऽपि कारणं विधा-तम्, भवत सदसदात्मकत्वेन कर्तृत्वात्त्वेन कार्येण सह संयुक्तमेव, इत्यथा कर्त्रैव संयुक्तत्वेन असत्त्वे नासंयोग कार्य-कारणभावात तयोर्वा समवाय इत्यत्र-सहासत्त्वेनेति एवञ्च समवायोऽप्येतस्य सम्बन्ध एवोपग मेदरूप भेदाभेद-20 कार्यकारणयोरिति भाव । कारणं सत् कार्येणैकीभावं गच्छतो न भिन्नं भवत् कार्यं संयुक्तो भावोऽस्त्यत्र-संयो-गेति । ननु सामान्यादीन्य द्रव्यादिभ्यो व्यतिरिक्तान्यसम्बद्धे च द्रव्यादीनि सामान्यवन्ति भवन्तीत्यत्र-अजातिमन्तीति द्रव्यस्यैव सामान्यरूपत्वात् सामान्यापेक्षा नास्तीति भाव । एवं द्रव्यस्यैव गुणकर्मसामान्यविशेषसमवायात्मकत्वात् एकत्वात् सदसदात्मकत्वात् कार्यकारणविभागो नानुपपन्न अनेकत्वे तु कारणे कार्यस्यासत्त्वात् कारणत्वानुपपत्तिरेव प्रत्युक्तिविशेष-प्रसङ्गात्-एवं तावदिति । प्रकारान्तरेण द्रव्यादे कारणत्वाकारणत्व नित्यत्वानित्यत्व सम्बन्धासम्बन्ध च जातिमत्त्व-25 जातिमत्त्वयोरपि दर्शयति-अथ वेति । तान्याह-अकारणेति यथा सामान्यविशेषसमवाया न कारणात्मका न समवायि-कारणसमा भिन्ना अनन्त्या-समवायरहिता अजात्य -जातिशून्या स्वत सद्रूपत्वात् तथैव द्रव्यादीन्यपि स्वत सन्ति एवंरूपत्वात् तस्मात् अकारणनित्यासम्बन्धाजातीनीति भाव । स्वत सत्त्वादेव च सामान्यादीनां द्रव्यादिवत् कारणत्वमनित्यत्व सम्बन्धत्वं जातिमत्त्वञ्च भवन्तीत्यत्र-कारणेति । यदेव सत् तत् स्वरूपेण-स्वत- सत्त्वात्, सत्तैव सत्ता न तु सत्ता-पेक्षा तदात्मत्वात्, यद् यदात्म तद् स्वत सत् यथा सत्ता सत्तान्तरपेक्षा स्वत सतीति न स्वत- सत्त्वं द्रव्यादावसिद्धमित्या-30 शङ्क्यात्-असत्त्व सत्त्वादिसर्पं इति । द्रव्यादि सामान्याद्यात्मकं सामान्यादि च द्रव्याद्यात्मकम्, इतीतरेतरैकभवनात्मक वस्तु तस्मादितरेतरधर्मासत्त्वमपि तस्मात् सर्वं वस्तु कारणत्वेन कारणाकारणम्, नित्यानित्यं सम्बन्धासम्बन्धं जातिमज्जा-तिमच्चैकत्वेनात्-उभयमिति । ननु वैशेषिकेण समवायस्यैकत्वं नानात्वमुपेत्य सदृशत्वमात्रस्य यत्नस परिहारे विशेषे च

1 सि क्ष कार्ये योक्ष । २ सि क्ष- प्रतिपादितत्वात् । ३ सि क्ष द्रव्यत्वादेः ।

कारणनित्यानित्यसम्बन्धासम्बन्धजातिमदजातिमत्त्वानि द्रव्यादीनां सामान्यादीनाञ्च सर्वस्य वस्तुत्वात् प्रमात्मकत्वं सर्वत्रैव इतरेतररूपैकत्वनाविशेषात् ।

यदपि च समवायस्यैकत्वे सङ्करप्रसङ्ग इति दोष उक्तः स तदवस्थ एव, बहूनां सम्बन्धिनामेकसम्बन्धभावात्, वागादिगवाद्यभिधानवत्, तस्माद्द्रव्यत्वसम्बन्धाद्यथा द्रव्ये द्रव्यत्वबुद्धिं तथा गुणे कर्मणि च द्रव्यत्वबुद्धिं कुर्यादिति सर्वस्य सर्वाभिधानप्रत्ययौ स्याताम्, 5
पदार्थलक्षणव्यवस्थानस्याभावात् षडपि पदार्था निवर्तेरन् कथम् ? समवायस्यैकत्वात् द्रव्यत्वेन गुणकर्मणोः सम्बन्धाद्द्रव्यत्वापत्तयोश्च स्वरूपस्य हानिः, तत्त्वविशेषणमेवास्ति तत्रैव स्यात्, छत्रिदण्डिवत् ।

यदपि चेत्यादि, नित्यायाः सम्बन्धस्य च सर्वत्रैकत्वप्रतिपादनार्थं समवायस्यैकत्वादेकः कश्च इत्युक्त्वा पुनरत्र यो दोषश्चोदितः सङ्करप्रसङ्ग इति स तदवस्थ एव दुष्परिहारः, बहूनां सम्बन्धिना- 10
मेकसम्बन्धभावादिति हेतुः बहवो हि सम्बन्धेनैकेनसम्बन्धीभूताः ततः तेषां सङ्करः, वागादिगवाद्यभिधानवत् यथा गौरित्युक्ते वाग्दिग्भूरश्म्यादिभिरेकस्य गोशब्दस्य वागादिशब्दपर्यायत्वात्तत्र माऽसौ, तत्तदर्थप्रतिपादनात् तत्तत्सम्बन्धान्मुख्यैवेव सम्बन्धीति निर्धार्य व्यवस्थापयितुमशक्यत्वात् सर्वेषां इहानामिह कारणकार्याधारः समवायोऽपि तथा ज्ञेयः, द्रव्यत्वेनैव गुणत्वकर्मत्वादिभिश्च सम्बन्धः इह लिङ्गाविशेषाद्विशेषलिङ्गाभावाच्चैकः समवायः तस्माद्द्रव्यत्वसम्बन्धाद्यथा द्रव्ये द्रव्यत्वबुद्धिं तथा गुणे 15
कर्मणि च द्रव्यत्वबुद्धिं कुर्यादिति सर्वस्य सर्वाभिधानप्रत्ययौ स्यातामिति सामान्येन सङ्करदोष उक्तः, पदार्थेष्वपि द्वितीयः सङ्करप्रकारः पदार्थानां षण्णां द्रव्यादीनां लक्षणव्यवस्थानस्याभावात् षडपि पदार्था

---

पुनः स दोषस्तदवस्थ इत्याह—यदपि चेति । भाष्ये—नित्याया इति [illegible] तत्रैव कार्यस्य [illegible] तत्रैव अतस्तत् सम्बन्धः एकस्य प्रतिपादनार्थं समवायो ज्ञेय तस्मात् तत्रैव समवायः सम्बन्धस्तत् तत्रैव सर्वे तत्सम्बन्धिनोऽपि सम्बध्यन्त इतरथा समवायस्य नानात्वं स्यात्, यो हि तदा न सम्बन्धस्तत्समवायोऽपि तत्र नास्ति यथान् तत्सम्बन्धराशे भवतीति तत्र [illegible] 20
तस्मात् समवायस्यैकत्वाविरोधात् तदात्मा सम्बन्धस्य नैकः काल इति समवायस्यैकत्वं व्यवस्थाप्य ननु समवायस्यैकत्वे समवायसम्बन्धिनां सर्वेषामेकेन प्रकारेण सङ्करः स्यादिति सङ्करप्रसङ्गाभावोऽस्य तस्यैकत्वेऽपि यथा प्रतीति व्यवस्थेति निराकृतः तत्सङ्कर प्रसङ्ग परिहृतुमशक्य एवेति भाव । तत्र हेतुमाह—बहूनामिति [illegible] द्रव्याणां बहूनां सम्बन्धिनां समवायस्यैकत्वे सति सम्बन्धत्वाविशेषः । बहवो हीति अनेकेऽसम्बद्धाः एकेन समवायस्य- 
न्यस्यैकत्वेन सम्बन्धिनः यतः । न तु पृथक् पृथक् सम्बन्धिनः अत एव सङ्कर इति भावः । दृष्टान्तमाह—वागादीति 25
'वर्गोऽपशुवाग्वज्रदिग्नेत्रघृणिभूजले' । अनेकार्था निखिला पुंसि गौ इति कोषात् वागादिषु अर्थेषु गोशब्दो यः तत्र गौरित्युक्ते विशिष्यमाणाभावात् वागादिषु अर्थेषु विवक्षा वागादिशब्दपर्यायत्वमेतस्य गोशब्दस्य तत्र तत्र तस्य प्रयोगात्, अयमेतस्य गोशब्दस्यार्थो नान्य इति निर्धारितं अशक्या नियन्तुं न शक्यत इति सर्वार्थाभिधायित्वात् गोशब्दस्य सर्वार्थता, एवमेव अनेका- र्थसम्बन्धिताऽसम्बन्धिनः समवायस्यापि सर्वार्थत्वात् सङ्करप्रसङ्ग सम्बन्धिनां दुष्परिहार एवेति भावः । समवायस्यैकत्वं सर्वस्यैव—द्रव्यत्वेनैवेति [illegible] ज्ञानं सम्बन्धोऽपि वा समवायस्य किन्तु, द्रव्यत्वगुणत्वकर्मत्वादिषु तत्र गुणत्वविशिष्टम् 30
भेदव्यवस्थाभावात् तस्मादेकः समवाय इति भावः । तस्य तस्यैकत्वे सङ्कर दुष्परिहारमाह—तस्मादिति [illegible] समवायः तदा यथा द्रव्ये द्रव्यत्वबुद्धिः समवायात् तथैव गुणादावपि द्रव्यत्वसम्बन्धस्य समवायस्य सत्त्वात् द्रव्यत्वबुद्धिरपि स्यात् सम्बन्धस्य सम्बन्धित्वस्यानवस्थानादिति भाव । एवं द्रव्यत्वगुणत्वकर्मत्वादिसामान्यानां परस्परसङ्करप्रसङ्गमुक्त्वा पदार्थेषु षट्सु सङ्करं दर्शयति—पदार्थेति । कथं सङ्कर इत्यत्राह—लक्षणेति यस्य लक्षणधर्मो यस्य तत्र व्यवस्था कर्तुं न

निवर्तेत इति । कथमित्याह व्याख्या—समवायस्यैकत्वात् द्रव्यत्वेन गुणकर्मणोः सम्बन्धाद् द्रव्यत्वात् तयोश्च स्वरूपस्य गुणत्वस्य कर्मत्वस्य च हानिरिति दोषो तत्त्वविशेषणमेवास्ति [illegible] स्यात्, छत्रि-दण्डिवदिति वैधर्म्यदृष्टान्तः—छत्रविशिष्टः छत्री, दण्डविशिष्टो दण्डी, न तयोः द्रव्यत्वस्य कश्चिद्भेदोऽस्ति ।

कार्यकारणाधाराधेयसमवायाद्वौ गुणकर्मभावौ भविष्यत इति चेत्, न, तयोर्गुणकर्मणो-
5 र्गुणकर्मभावनिवृत्त्या प्रथमद्रव्यभावनिवृत्तिः, तद्यथा य उक्तः कार्यकारणाधाराधेयसमवाया तस्यैकत्वात् स द्रव्यभावेन सम्बध्नाति द्रव्यमेवैकं करोति, ततश्च द्रव्यलक्षणं नास्ति, क्रियावद्गुणवत् समवायिकारणमिति, तदभावाच्च द्रव्यम्, न गुणकर्मणी तथा लक्षणस्तीति द्रव्यस्यापि द्रव्यभावनिवृत्तिः, एवं गुणकर्मणोरपि ।

कार्यकारणेत्यादि, कारणमाधारश्च द्रव्यम् आधेयं कार्यं च गुणकर्मणी, तयोर्भिन्नयोः
10 कार्यकारणयोराधाराधेययोश्च समवायाद्वौ गुणकर्मभावौ भविष्यत इति चेत्— एवमेव मन्यसे मा मंस्थाः, अत्रोत्तरं तयोर्गुणकर्मणोरित्यादि यावत् प्रथमद्रव्यभावनिवृत्तिरिति तावदुपपत्तिवचनम् उपरितनो ग्रन्थव्याख्यास्या—गुणकर्मणोर्गुणकर्मभावनिवृत्तिद्वारेण द्रव्यस्य द्रव्यभावनिवृत्तिराख्यायते तद्यथा—य उक्तः कार्यकारणाधाराधेयसमवायः तस्यैकत्वात् यो द्रव्यभावेन गुणकर्मणोः समवायः स एकः, तेन द्रव्येण सम्बध्नाति गुणकर्मणी द्रव्यमेवैकं करोति ततो गुणकर्मणी निवर्तेते तन्निवृत्तौ द्रव्यस्य [illegible]
15 न च कारणम् समवायिनो गुणकर्मणोरसमवायात् ततो द्रव्यस्य द्रव्यलक्षणं नास्ति क्रियावद्गुणवत् समवायिकारणमिति —क्रियागुणसमवायाच्च द्रव्यं तदभावे गुणकर्मणी तथा समवायिनीति, इतिशब्दो हेत्वर्थे, समस्त

---

[illegible] इति पदार्थानां [illegible] व्यवस्था [illegible] इति भाव । [illegible] सर्वमपि—समवायस्यैकत्वादिति गुणकर्मणो हि गुणत्वं कर्मत्वं कारणम्, [illegible] समवाय एकत्वाद् गुणत्वकर्मत्वसमवायस्यैव द्रव्यत्वसमवायत्वात् तत्र गुणत्वादिसम-वायात् [illegible] गुणस्य गुणत्वमेव कर्मणश्च कर्मत्वमेव [illegible] न स्यात्, तथा च
20 द्रव्यगुणकर्मणां परस्परं भेदो न स्यात्, धर्मभेदप्रयुक्तो हि धर्मिभेदः [illegible] द्रव्यत्वादि सर्वत्रैकमेवेति कथं भेद [illegible] भाव । विशेषणभेदाद्विशेष्यभेदे दृष्टान्तमाह—छत्रीति छत्रविशिष्टो न दण्डविशिष्टः दण्डविशिष्टश्च न छत्रविशिष्ट इति छत्रदण्डविशेषण भेदात् विशेष्यस्य पुरुषस्यैकस्य भेदो न तथा द्रव्यत्वस्य सर्वत्र एकत्वेन भेदोऽस्तीति भाव । [illegible] गुणकर्मणोर्भेदप्रतिपत्तये [illegible] समावेशो—कार्यकारणेति । ननु समवायस्यैकत्वेऽपि [illegible] एकत्वं न [illegible], [illegible] सामान्यमेव न स्यात् [illegible] तस्मात् धर्मभेदाभावेऽपि कारणान्तरेण धर्मिभेदसिद्धिर्न [illegible]
25 [illegible] सम्बन्धस्य, तथा हि द्रव्यं हि गुणकर्मणोः समवायिकारणमत एवाधारश्च गुणकर्मणी च द्रव्यसमवेते [illegible] [illegible] कार्ये च तस्मात् गुणत्वात् क्रियावत्त्वात् समवायिकारणत्वाच्च [illegible] [illegible] द्रव्यमिति द्रव्यगुणकर्मणोर्भिन्नत्वात् समवायस्यैकत्वेऽपि गुणकर्मणोः [illegible] गुणत्व कर्मत्व [illegible] [illegible] व्याप्ते कारणमाधारश्च द्रव्यमिति । तदेतन्मतं निराकर्तुं प्रतिज्ञावाक्यमाह—तयोर्गुणकर्मणोरिति [illegible] गुणकर्मणोर्गुणकर्मभावो निवर्तते ततश्च द्रव्यभावनिवृत्तिरित्यर्थः । तदेव [illegible]
30 इति द्रव्यभावेन—द्रव्यत्व [illegible] गुणकर्मणो समवाय एव स द्रव्येण सम्बध्नाति गुणकर्मणी द्रव्यमेव करोति, ते निवर्तेते द्रव्यस्वरूपत्वात्, एवम् गुणकर्मणोरभिन्नत्वात् [illegible] कारणं द्रव्यं भवेत्, तस्मात् क्रियावद्गुणवत् समवायिकारणमिति द्रव्यलक्षणमसम्भवदोषग्रस्तम्, तथैव द्रव्याभावात् गुणकर्मणी समाश्रयेताम्, [illegible] ते अपि न [illegible] भाव । [illegible] गुणानां [illegible] द्रव्याभावात् [illegible] द्रव्यत्वस्य निवृत्तिरित्याह—समस्तेति । क्रियादि-

---

१ सि क डे °द्रव्यभाविनस्तोश । २ सि क. °भावाभावा ।

सम्स्येवेरज्ञलक्षणानि गुणकर्माणि, तेषामाश्रयिणां समवायिनामभावाद्भावनिवृत्तौ द्रव्यस्यापि द्रव्यभावनिवृत्तिः,–गुणवत्समवायिकारणं क्रियावद्द्रव्यमनेकद्रव्यं वा द्रव्यं स्यात्, तदेतन्नाद्रव्यं नानेकद्रव्यं सम्भवति, तस्माद्गुणकर्मणां गुणकर्मभावनिवृत्तौ द्रव्यभावसम्बन्धेऽसति गुणकर्मण्यमनाश्रयत्वाद्द्रव्यस्य द्रव्यभावनिवृत्तिरिति द्रव्यपदार्थनिवृत्तिरुक्ता, अथवा ध्वविशिष्टेन द्रव्यत्वेन सर्वगतेन सम्बन्धे सति गुणस्य कर्मणो वा द्रव्यं द्रव्यत्वेनासम्बद्धमिति द्रव्याभावः, तदभावाद्गुणकर्मणी न द्रव्याश्रिते, ततो द्रव्यलक्षणायुक्तेर्द्रव्यभावनिवृत्तिः, किं द्रव्यलक्षणमिति चेदुच्यते क्रियागुणवत्समवायिकारणमिति, यत्तु कार्यकारणाधाराधेयसमवायस्यैकत्वात् गुणकर्मणोर्द्रव्यभूतत्वात् क्रियावत्त्वम् नास्ति यस्मान्न तु गुणकर्माणि तथा लक्षणानीति–गुणस्य द्रव्याश्रयादिलक्षणत्वात् एकद्रव्यादिलक्षणत्वात्कर्मणः एवं लक्षणभावापेक्षा द्रव्यस्य द्रव्यभावनिवृत्ति, गुणकर्मलक्षणायुक्तेरिति ततश्च द्रव्यस्यापीत्याह आश्रयाभावाद्गुणकर्मभावभावाद आश्रय्यभावेऽपि द्रव्यस्याश्रयस्याभाव इति गतार्थम्, एवं गुणकर्मणोरपि गुणकर्मलक्षणाभ्यवस्थानात गुणकर्मभावनिवृत्तिरुक्ता वेदितव्या एवं तावद्द्रव्यगुणकर्मणां व्यवस्थितलक्षणाभावात् निवृत्तिः।

तथा—

द्रव्यगुणकर्मणां द्रव्यत्वगुणत्वकर्मत्वादीनामाश्रयाभावादनुपपत्तिः, परस्पररूपापत्त्या परस्परभावनिवृत्तौ द्रव्यादिषट्पदार्थनिवृत्तिः, यथाधाराधेयभावभेदे संयोगवद्द्विवृत्तिः स्यात् समवायस्यानित्यत्वं स्यादिति पूर्वपक्षं कृत्वा परिहारमाह वैशेषिकः, न बहूनामेकत्वात्, न तु द्वयोर्द्वयोः सम्बन्धत्वं संयोगवत् समवायस्येति एतेनापि सङ्करप्रसङ्गः, पदार्थलक्षणव्यवस्थानासम्भवात् षट्पदार्थनिवृत्तिर्या, यत्तु प्रत्युक्तं नाधाराधेयनियमात्–यद्यप्येक एव समवायः तथाप्याधाराधेयनियमोऽस्ति द्रव्य एव द्रव्यत्वं गुण एव गुणत्वं कर्मण्येव कर्मत्वं सर्वत्र चैकः समवाय इति एतदपि प्रत्युक्तं सर्वत्र सर्वाधेयवृत्तौ सर्वाभिधानप्रत्ययसांकर्यात् कथं द्रव्यादीनि प्रतिनियतानीति।

द्रव्यगुणेत्यादि, द्रव्यत्व[गुणत्व]कर्मत्वादीनामाश्रयाभावादनुपपत्तिः सामान्यविशेषाणाम्, भावितमप्यात् सत्तायाः, तत्प्रायस्ते–परस्परेत्यादि भावितार्थं यावत् षट्पदार्थनिवृत्तिरिति, यथेत्यादि,

रयादिलक्षणमेव द्रव्यत्वं वा भावान्तरत्वं वा उभयमपि नास्तीति प्राह–गुणवदिति। निगमयति द्रव्यपदार्थनिवृत्तेरुपायम्–तस्मादिति। प्रकारान्तरेण व्यतिरेको वर्णयति अथवेति, सर्वगतस्य द्रव्यत्वस्य सम्बन्धाद्गुणकर्मणी द्रव्यम्, न तु द्रव्यं द्रव्यत्वेनासम्बन्धात्, अत एव ते न द्रव्याश्रिते इति द्रव्यलक्षणाभावम् द्रव्यं नास्ति क्रियावत्त्वं गुणवत्त्वं हि द्रव्यलक्षणम्, एवम् क्रियागुणयोर्द्रव्यत्वात् तल्लक्षणमिति भाव। तथा गुणकर्मणोरपि नास्ति लक्षणं तयोरभावश्च भावसिद्धेः–समवाय इति द्रव्याश्रयी अगुणवान् संयोगविभागेष्वकारणमनपेक्ष इति गुणलक्षणम्, एकद्रव्यमगुणं संयोगविभागेष्वनपेक्षकारणमिति कर्मलक्षणम्, गुणकर्मणोश्च द्रव्यत्वादेव लक्षणे अभावत्व एवं लक्षणाभावाद्भावनिवृत्तिरिति भावः। उपपत्तिः एवमभावाद्भावस्य द्रव्यस्याभावे गुणकर्मणोरभाव इत्याह आश्रयाभावादिति। द्रव्यभावनिवृत्तिरिति गुणकर्मभावनिवृत्तिरपि वर्णितेति द्रव्यगुणकर्मणोरिति विवेचयति एवं गुणकर्मणोरपीति। द्रव्यादीनामभावमाह द्रव्यगुणेति। तदभिप्रायम्–परस्परेति द्रव्यादीनां परस्परेण गुणकर्मणामपि परस्परकर्मत्वप्रसक्त्या द्रव्यादिनिवृत्तौ द्रव्या-

1 मि. वृ क्रियावत्त्वम्।

आधाराधेयभावेन भेदे सति संयोगवद्द्विवृत्तित्वात् समवायस्य तदभावनिरूपणं स्यादिति पूर्वपक्षं कृत्वा परिहारमाह वैशेषिको–न बहूनामेकत्वात्–बहूनां द्रव्यादीनामेकः समवाय इति स्वरूपवर्णनं द्विवृत्तिप्रतिषेधार्थम्, न तु द्रव्योर्द्वयोरिवाविसंयोगेन वैधर्म्यं गवार्थं यावत् समवायस्येति आचार्य आह–एतेनापीत्यादि एतेन अभिन्नत्वपरिहारवचनेनापि सङ्करप्रसङ्गः, सामान्येन व्यवस्थाभावात् सर्वत्र सर्वापेक्षत्वात्

5 सर्वाभिधानप्रत्ययसङ्करः, विशेष्य च पदार्थव्यवस्थानासम्भवात् षट् पदार्थनिवृत्तिर्वेश्वरूप्यप्रसङ्ग एव दर्शितः बहूनामेकसमवायाभ्युपगमात् तदा सङ्करयुक्तात् षडपि पदार्था निवर्तिताः, तन्निवृत्तौ समवाय्यभावात् समवायनिवृत्तेरसत्त्वं खपुष्पस्येव कुतो नित्यत्वमनित्यत्वं वा ? यत्तु प्रयुक्तमित्यादि सङ्करदोषस्य यत्तूत्तरमुक्तं न आधाराधेयनियमादिति यद्यप्येक इत्यादि तद्व्याख्या यावत् कर्मण्येव कर्मत्व मिति, सर्वत्र चैकः समवाय इत्यनेन द्विवृत्तित्वपरिहारेणाभिन्नत्वमपि परिहृतमिति वैशेषिकः, आचार्य

10 आह–एवमपि प्रयुक्तमित्यादि गवार्थं यावत् प्रतिनियतानीति द्विवृत्तित्वमेवास्येति च वक्ष्यति ।

यत्तूच्यतेऽभ्यगम्यतां तावत् यथा कुण्डदधिसंयोगे दध्येवाधेयं कुण्डमेवाधार इति नियमस्तथा द्रव्यादीनां समवायैकत्वेऽप्याधाराधेयनियमः स्यादिति इदमपि स्ववादेनैवोत्तरमार्गविधानं कृतं त्वया, न तु तथा सङ्कराभावो घटते, यदि दधिमधूदकादिभिर्बहुभिराधेयैः कुण्डाधारः संयुक्तो भवति ततः किमिति सङ्करो नास्ति ? यदि सर्वात्मकः समवाय एक एव

15 भवति तदा किमिति संकरो न स्यात् ? नापि च द्विवृत्तित्वनिवृत्तिः समवायस्य, यतः संयो-

व्यवस्थाभावात् सामान्याधिकरण्यभावे षट्पदार्थनिवृत्तिरिति भावः । बहूनामेक समवाय न तु संयोगवत् द्वयोर्द्वे तथा सति संयोगवदनेकत्वं स्यादिति वैशेषिकमताकूतं आधाराधेयेति आधाराधेयभावेन समवायस्य भेदे द्विवृत्तित्वात् संयोगे यथाद्विवृत्तित्वमपि स्यादिति पूर्वपक्ष विधाय प्रकृतमपि तदेव भेद समवायस्य, बहूनामेकत्वाभ्युपगमेन संयोगवैधर्म्यात् नानित्यत्वमिति भावः । अनेनाप्यसमुक्तत्वेन सङ्करप्रसङ्गो दुर्वार इत्याशयं आह आचार्य इति । सामान्येनेति

20 समन्वयविशेषेण सामान्यस्य प्रतिनियतपदार्थानां प्रतिनियतधर्मेषु प्रसिद्धो यथा विशिष्य पदार्थेषु व्यवस्थाभिधानं भवति, ता च प्रसिद्धिरिति तत्र मते बहूनां समवायाधीनत्वेऽपेक्षत्व सर्वेषां निखिलेषु पदार्थेषु सर्वविशेषसमन्वयानुगमाभिधानां द्रव्यगुणकर्मादीनां एकाभिधानमिति प्रसङ्गः सामान्यात् कथं प्रतिनियतानि वचनानि भवेयुः यतो व्यवस्थासामान्यात् षट् पदार्था इति व्यवस्था न स्यादिति भाव । न च समवायोऽप्येकैवेति कथं षट्पदार्थनिवृत्तिनिमित्ता तन्निवृत्ताविति, इत्यादिना पदार्थनिवृत्तौ समवाय्यभावात् समवायोऽपि नास्ति तदभावेऽनित्यत्वमपि निराकृतमिति भावः । नन्वित्युपनिबन्धो हि

25 समवाय इतीव प्रतिनियत एव तदनुपपत्त्या कथ्यमानो हि समवाय एको वा स्यादनेको वा तदविरोधेनैव कल्पनीयः प्रमाणं वाऽ८ प्रमेय तदिदम् नाम इतीव द्रव्यं गुणकर्मसामान्याधारत्वेन विपरीतरोधी न तु गुणकर्माद्याधारतया द्रव्यमाधारत्वं वा गुणकर्मसामान्यानि च द्रव्याधेयत्वेन विपरीतरोधेऽप्याधाराधेयनियमात् समवायस्य बहूनां एक त्वेऽपि न सङ्कर इति वैशेषिकाद्याशयवती–यत्तूत्तरमुक्तमिति । तदेवमाधाराधेयनियमात् सङ्करानुपपत्तौ न समवाय निराकरणम् संयोगवन्नित्यत्वप्रसङ्गोऽपि तु एव सर्वत्र भावो वैशेषिकस्य तूच्यते–सर्वत्र चैक इति । अत्र वैशेषिके

30 ननु समवायो यदि एक तदा द्रव्यादीनां सङ्करप्रसङ्ग गुणकर्मादिसमवायस्य द्रव्ये सम्बन्धित्वात्तु आधाराधेयनियमादिदमपरं यद्यपि द्रव्यगुणकर्मसामान्यसमवाय एक तथापि तथा न द्रव्याधार तत्र वैयधिकरण्यं द्रव्ये चाश्रयो हि द्रव्यं गुणैरेव गुणत्वं कर्मैव कर्मत्वं सामान्यसम्बन्धित्वेऽपि तदेकत्वादेव नियम यथा कुण्डाभ्यां संयोगविशेषेऽपि कुण्डमाधारो न दधीत्याधाराधेयविभागनियम इति सामान्यसमवायविशेषप्रतिपादनेनापि नियम यदाशङ्क्य इत्याह तदेतदसङ्गतमेवेति ज्ञापयति नि भाति–यत्तूच्यत इति । नियमोऽनियमाभावत्वामतत्त्वानियमोऽभ्यवम्, अन्यत्र एतदाशयस्य पर्यनुयोगे [illegible]

१ डे० न तु इत्यादि ।

गाद्वैधर्म्यमुच्यते सर्वत्रैव च द्रव्यद्रव्यत्वादिसमवाये द्विवृत्तित्वं त्वयैवोपवर्ण्यते, द्वयविशिष्टाभिधानप्रत्ययत्वात् कुण्डदध्यादिसंयोगवत्, यथा कुण्डदध्नोः संयोगे दध्ना कुण्डेन वा विशिष्टे तन्निमित्तमभिधानं प्रत्ययश्च दृश्यते तद्द्विवृत्तित्वाच्च तथा समवायेऽपि द्रव्यगुणयोः विशिष्टे तन्निमित्तमभिधानं प्रत्ययश्च स्यात् तद्द्विवृत्तित्वाच्च, तथा च समवायस्य संयोगवत् द्विवृत्तित्वादनित्यतैव ।　5

यत्तूच्यतेऽभ्यगम्यतां तावदित्यादि, इह तस्य दोषपरिहारमाणसर्वसमन्वयव्यतिरेकाभ्यां नियमातिप्रसङ्गा[1]भावगतं गतार्थं यावत् समवायैकत्वेऽप्याधाराधेयनियमः स्यादिति आचार्य आह—इदमपीत्यादि, स्वभावेनैवोत्तरमार्गो विहितोऽस्य त्वया—इहेदमित्यादिना समवायलक्षणं व्याचक्षाणेनाधाराधेयसम्बन्धज्ञानलक्षणत्वात् कार्यकारणयोराधाराधेयभावसम्बन्धिनोः कुण्डबदरादिदृष्टान्तेन च सुभावितोऽपसर्पः तेनैव वयं ब्रूमः—न तु तथेत्यादि, न तु तथा सङ्करभावो घटते यत्प्रकारेण, कुण्डबदरसंयोगदृ- 10 ष्टान्ते यदि दधिमधु[2]कादिभिः बहुभिराधेयैः कुण्डाधारः संयुक्तो भवति ततः किमिति सङ्करो नास्ति ? तथा यदि सर्वात्मकः समवायो द्रव्यगुणकर्मद्रव्यत्वगुणत्वकर्मत्वसत्ताद्याधार एक एव भवति तदा किमिति संकरो न स्यात् ? नापि च द्विवृत्तित्वनिवृत्तिः समवायस्य, यतः संयोगाद्वैधर्म्यमुच्यते त्वया द्वयोर्द्वयोरित्यादिना, तत्र साधनं सर्वत्रैव च द्रव्यद्रव्यत्वादिसमवाये द्विवृत्तित्वं त्वयैवोपवर्ण्यते, साधयामश्चैतद्विवृत्तित्वं समवाये द्वयविशिष्टाभिधानप्रत्ययत्वात्, कुण्डदध्यादिसंयोगवत्, यथा कुण्डदध्नोः संयोगे विशिष्टे 15 तन्निमित्तमभिधानं प्रत्ययश्च दृश्यते दधिकुण्डं कुण्डदधि चेति तद्द्विवृत्तित्वाच्च तथा समवायेऽपि द्रव्यगुणयोरित्यादिद्विवृत्तित्ववर्णनम् तस्मात्त्वदुपन्यस्तदोषासङ्ख्यत्वदवस्थः समवायस्येत्यत आह—तथा चेत्यादि यावदनित्यतैवेति गतार्थम् ।

---

[illegible] —द्रव्यत्वादिनिमित्ताना [illegible] । इदमनेकदोषपरिहारत्वात्सर्वत्र तत्र पूर्वपक्षे इति वर्तमानि—इदं तस्येति । उत्तरवादि—इदमपीति । इहेदमित्यादिनेति इहेदमिति यत कार्यकारणयो स समवाय इति सूत्रम्, कार्यकारणयोरित्य- 20 नेनाकार्यकारणयोरपि महणम्, असम्बद्धयोरपि [illegible] तत्र इह कुण्डे दधि इह कुण्डे बदरादीनित्यत्र [illegible] पट इह वीरणेषु कट इह द्रव्ये गुण कर्म वा इह गवि गोत्वमित्यादिप्रत्ययस्य सर्वं तन्त्वादिपटादेरिव सम्बन्धमन्तरेण नोत्पद्यमानेति तस्मात् [illegible] समवायोऽनुमीयत इति [illegible] भावो [illegible] इति भाव । [illegible] एकसमवायत्वे न स्यादेव [illegible] तेन च सङ्करो दुर्वार एव न [illegible] समवायस्य [illegible] त्वद्विवक्षितसमवायव्यापृतो भवते [illegible] सङ्कर 25 दोषनिवृत्त्य यदि दृष्टान्त स्यात्, [illegible] सङ्करदोषाभाव तथा तु नास्तीत्यभिप्रायेणाह—न तु तथेति [illegible] —यदीति । न वा समवायस्य द्विवृत्तित्वनिवृत्ति [illegible] द्वयोर्द्वयोरेव विशिष्टाभिधानप्रत्ययदर्शनात् तथा त्वयाऽपि तत्र तत्र द्वयोरेव समवायप्रदर्शनत्वेन [illegible] चेति । द्विवृत्तित्वं समवायस्य साधयाम इत्याह साधयामश्चेति यतस्त्वया समवायस्य द्विवृत्तित्वमुपवर्ण्यते तथैव वयं समवाये साधयाम इत्यर्थः । दृष्टान्त [illegible] —यथेति । एवं द्विवृत्तित्वसिद्धौ संयोगदृष्टान्तेन तत्साम्यमनित्यत्वमित्याह—तथा चेति । अथ 30 समवायसर्वगतत्वेऽपि द्रव्यगुणकर्मणां [illegible] विशेषणविशेष्यभावेनाधाराधेयानां द्रव्यादीनां नियमो भवति उच्यते हि [illegible]

---

1 सि क्ष °ग्राभावमिति । २ सि है. °दधिमधुकासा । ३ सि क्ष °बाल. स । ४ सि क्ष °वद्दर्शं । ५ सि क्ष सर्वेद्वयात्मक ।

यस्त्विदं स्वतत्त्वानुरूपप्रत्ययोत्पत्तेः परस्परव्यतिरिक्तैराधेयैर्द्रव्यत्वादिभिराधाराणां द्रव्यादीनां नियमेन द्रव्येष्वेव द्रव्यमिति ज्ञानमित्यादि, अनेन स्वपक्षे प्रत्यक्षविरोध उद्भाव्यते त्वया, न हि समवायस्यैकत्वे व्यतिरेको नियमश्चास्ति, अविशिष्टत्वादतो न स्यात् द्रव्येष्वेव द्रव्यमिति ज्ञानम्–एवं ते द्रव्येष्वपि गुणज्ञानं स्यात्, गुणज्ञानकारणत्वात् समवायस्य, गुण-
५ वत्, एकत्वे योऽयं द्रव्यस्य द्रव्यभावेन सम्बन्धः स एव गुणस्यापीति प्राप्तं द्रव्यस्यापि गुणत्वम् तस्य गुणभावेन सम्बद्धत्वाद्गुणवत् द्रव्यभावनिवृत्तिरिति । तस्य द्रव्यस्य गुण-भावेन सम्बद्धत्वाद्गुणभूतस्य गुणानामाश्रयस्याभावः, असति द्रव्ये कस्य गुण इति गुण-भावनिवृत्तिः लक्षणानुपपत्तेः क्रियावद्गुणवत्समवायिकारणमिति द्रव्यलक्षणम् द्रव्याश्रय्य-गुणवान् संयोगविभागेष्वकारणमनपेक्ष इति गुणलक्षणमिति, ततश्च गुणेष्वपि द्रव्यज्ञानं
१० स्यात् किं कारणम्? द्रव्यज्ञानकारणत्वात् समवायस्य, द्रव्यवत्, एकत्वे योऽयं गुणस्य गुणभावेन सम्बन्धः स एव द्रव्यस्यापीति प्राप्तं गुणस्यापि द्रव्यत्वम्, द्रव्यत्वाभिसम्बन्धाच्च तस्य द्रव्यत्वापत्तिर्गुणत्वस्याभावश्च इ अनवस्थाने ।

यस्त्विदमित्यादि यदेकमेव समवायविनिवृत्ति यावज्ज्ञानमित्यादि, द्रव्यादीनामाधाराणां द्रव्य-त्वादिभिराधेयैः परस्परव्यतिरिक्तैर्विशेषैर्नियमो भवति स्वतत्त्वानुरूपप्रत्ययोत्पत्तेरिति, अत्रोच्यते–
१५ अनेन स्वपक्षे प्रत्यक्षविरोधः उद्भाव्यते त्वया कथम्? न हीत्यादिना भावयति, हि यस्मात् हेत्वर्थे यस्मात् समवायः एकः तस्मादेकत्वादविशिष्टत्वात् द्रव्यत्वादिभिरविशिष्टत्वात् व्यतिरेको नियमश्च नास्ति, अतो द्रव्येष्वेव द्रव्यमिति ज्ञानं न स्यात् तस्य व्याख्या एवमित्यादि–एवं ते समवायैकत्वे द्रव्येष्वपि गुणज्ञानं स्यादविशिष्टत्वात्, गुणेष्विव अविशिष्टत्वात् कर्मस्वपि किं कारणम्? गुणज्ञानकारणत्वात् समवायस्य, किमिव? गुणवदिति गुणेष्विव गुणवदिति साधनं तदेव व्याचष्टे–एकत्वे योऽयमित्यादि यावत् द्रव्यस्यापि
२० गुणत्वम् यदि यथाभिमतद्रव्यादीनां द्रव्यत्वादीनामविवेके विवक्षमाणस्यैव तत्रायं इत्यस्यापवादरहितं

गुणत्व एव प्रसक्ते द्रव्यमिव न गुणो न कर्म वा गुणोऽपि न द्रव्यं न कर्म [illegible] यद्वते–यस्त्विदमिति । तदेव व्याचष्टे–परोक्तमथाह वैशेषिकमतेऽयं समस्ता पदार्थविशेषेऽपि [illegible] [illegible] भूतत्व इति च विशेषणस्य पदार्थे इदं द्रव्यं कर्म गुण इदं [illegible] भवन्ति ता [illegible] इति [illegible] विशेष [illegible] [illegible] धर्मो द्रव्यमिदं गुणोऽयं [illegible] [illegible] [illegible]
२५ भावार्थ । [illegible] [illegible] न हि [illegible] न सर्वत्र सत्ते [illegible] [illegible], तथा च द्रव्यत्वस्यापि सर्वत्र सत्त्वात् न [illegible]? [illegible] [illegible] [illegible], [illegible] [illegible], तथा तु नास्ति [illegible] सर्वत्र [illegible] द्रव्यं [illegible] [illegible] ज्ञानं नैव [illegible] [illegible] [illegible] इति [illegible]–[illegible] सर्वत्र द्रव्यबुद्धिः स्यात्, न तु द्रव्य–एवेति भाव । [illegible] [illegible] एवं च इति द्रव्येऽपि गुणज्ञानं स्यात् यथा गुणेषु गुणज्ञानं भवति, तथैव हि गुणत्वं [illegible]-
३० [illegible] द्रव्येऽप्यस्ति [illegible] भाव । [illegible]–गुणज्ञानकारणत्वादिति [illegible] गुणेष्विव द्रव्येष्वपि सत्त्वादिति भाव । [illegible] [illegible] [illegible] भाव तेन द्रव्यस्य [illegible] एकत्व इति,

१ सि क येविद० । २ सि क े `भ्याविष । ३ सि क के. प्रत्येकित ।

संयोगे दधिकुण्डमेव मधुकुम्भमेवोदकुम्भमेवेति, एकत्वात् संयोगस्य सर्वेष्वपि सम्बन्धात् तथात्रापि यो द्रव्यभावेन सम्बन्धः स एव गुणस्यापीत्येतस्मात् कारणात् प्राप्तं गुणत्वं-द्रव्यस्यापि गुणभावः, द्रव्यं गुणो भवतीत्यर्थः गुणत्वाभिसम्बन्धाच्च तस्य द्रव्यभावहानिः, एवं गुणभावापत्तौ द्रव्यभावो हीयत इति पररूपतामापाद्य स्वरूपत्यागमापादयति, तस्येत्यादि व्याख्यानसाधनं यावन्निवृत्तिः, द्रव्यं गुणभावेन सम्बद्धत्वात् त्यक्तद्रव्यभावं गुणवदिति एवं तावद् द्रव्यस्य गुणत्वापत्तिर्द्रव्य[त्व]त्यागश्च[द्वे अ]- 5
नवस्थाने, तस्य द्रव्यस्येत्यादि, तद्द्रव्यं गुणभावेन सम्बद्धमतो गुणभूतं नाश्रयो गुणान्तरस्येति द्रव्यानाश्रितस्य च गुणस्याभावस्ततो गुणनाशयस्य द्रव्यस्याप्यभावः, तदभावादसति द्रव्ये कस्य गुण इति गुणभावनिवृत्तिर्गुणस्य तल्लक्षणानुपपत्तेः क्रियावदित्यादिसूत्रक्रमेण लक्षणं दर्शयति, तदप्येवमुपदिष्टार्थोपनयः किं कारणमित्यादि कारणप्रश्नपूर्वके पूर्ववत्त्रापि द्रव्यत्वापत्तिगुणत्वत्यागौ द्वे अ[न]वस्थाने ।

तथा— 10

**योऽयं गुणस्य कर्मत्वेन सम्बन्धः स एव द्रव्यस्यापीति प्राप्तं गुणस्य कर्मणश्च द्रव्यत्वम्, द्रव्यत्वाभिसम्बन्धाच्च तयोर्द्रव्यत्वापत्तिः गुणकर्मभावत्यागश्च, तस्य द्रव्यस्य गुणभावेन कर्मभावेन च सम्बद्धत्वात् गुणभूतस्य कर्मभूतस्य च गुणक्रियानाश्रयत्वाभावः, असति द्रव्ये कस्य गुणः कर्म चेति न गुणकर्मणी तथा लक्षणे, तयोरलक्षणत्वादसत्त्वात् आश्रयोपलक्ष्यद्रव्याभावः, तस्मिंश्चासति निराश्रययोर्गुणकर्मणोरभावाद्द्रव्यस्य चाभावादाश्रयिणां द्रव्यत्वादीनामप्यभावः, तथा कार्यकारणयोः गुणस्येत्यादिः ।** 15

योऽयं गुणस्य कर्मत्वेनेत्यादि कर्मणा सह पररूपापत्तिः स्वरूपत्यागश्च द्वे अनवस्थाने लक्षण[ा]योगद्वारेण सैव व्याख्याने गतार्थे यावत् गुणकर्मणी तथा लक्षणे इति लक्षणाभावापादनम्, तयो[र]लक्षणत्वादसत्त्वात्-तयोर्गुणकर्मणोरलक्षणत्वात् असत्त्वं खपुष्पवत्, तदसत्त्वादाश्रयोपलक्ष्य-

कुण्डत्वाभ्य दधिमधूदकानीव संयोगसम्बन्धे यथाऽसंयोगेन संयोग इति नियमसिद्धिर्न स्यादिति दधिमध्वादीन् [illegible] 20
विशेषविशुमसम्बन्धात्, [illegible] दधिकुण्डमेवेदं मधुकुम्भमेवेदमिति न नियम तथैवात्र समवायो द्रव्यस्यैव न गुणस्येति नियमासम्भवात् द्रव्यसमवाय एव गुणसमवाय इति कृत्वा तत्सम्बन्धाद्द्रव्यस्य गुणत्वात् द्रव्यत्वं निवर्तत एवेति पररूपापत्तिरिति भावः । एवं पररूपापत्तौ स्वरूपस्य त्याग इत्याह गुणत्वाभिसम्बन्धाच्चेति । एवं तावत् द्रव्यस्य गुणत्वापत्तिरेकम-नवस्थानम्, द्रव्यत्वत्यागश्चापरमित्यनवस्थानद्वयमापादयितुमित्याह-एवं तावदिति । प्रोक्तविधयैव गुणस्यापि द्वे अनवस्थाने दर्शयति-तस्य द्रव्यस्येति । व्याचष्टे-तद्द्रव्यमिति समवायस्यैकत्वात् द्रव्यं गुणत्वेन सम्बद्धं अत एव गुणात्मकमतो गुणान्त- 25
राश्रयत्वात् तदपि तत्स्थाने गुणोऽप्याश्रितः ततश्च द्रव्याश्रयगुणाभावात् [illegible] गुणाभावः एवं च गुणेषु गुणत्वं न स्यात्, द्रव्यविशेषेण तु भावं स्यात्, द्रव्यत्वापत्तेः समवायस्य द्रव्य इव गुणेऽप्यविशिष्टत्वात्, एकत्वे हि समवायस्य य एव गुणसमवायः गुणेऽपि स एव द्रव्यत्वस्यापि समवाय इति गुणेषु द्रव्यत्वादिसमवायसत्त्वात् द्रव्यत्वं प्राप्तम्, तथा च सम्बन्धमात्राद्द्रव्यत्वापत्तिर्गुणस्य गुणत्वत्यागश्चेति गुणाश्रये द्वे अनवस्थाने भवत इति भावः । एवं द्रव्यस्य कर्मत्वापत्तिर्द्रव्य-त्वत्यागश्च कर्मत्वेन द्रव्यत्वादिति- कर्मत्वस्यापि [illegible] भाव्यम्. तदेवमेव समवायापादनद्वारेणाव्यवस्थामुपदर्श्य कर्मद्वयसंयोगेना- 30
व्यवस्थामाहात्रापि-योऽयमिति । व्याचष्टे-कर्मणा सहेति कर्मणा सह गुणस्य द्रव्यत्वापत्तिः गुणकर्मभावत्यागश्चेत्यर्थः, कर्मसमवायस्य द्रव्यस्य गुणेऽपि सत्त्वात् योऽयं गुणस्य कर्मत्वेन सम्बन्धः स एव द्रव्यस्यापीत्यनन्तरं योज्यम्, सिद्धं सर्वं पूर्ववदितिविधम्, कर्मणोऽपीत्यादि-लक्षणायोगद्वारेणेति । आश्रयेति आश्रयो द्रव्यम्, आश्रयिणी गुणकर्मणी तयोरुपलक्ष्ये

१ सि॰ क्ष॰ द्रव्यमथा । २ सि॰ क्ष॰ संस्थाने ।

द्रव्याभावः—गुणकर्मणोरपक्षभूतयोरुभयोरभावादाऽऽश्रयो द्रव्यं नास्ति, औष्ण्याभावेऽग्न्यभाववत्, उपलक्षणाभावात् खपुष्पवद्वा, तस्मिन्नसति द्रव्ये निराश्रययोर्गुणकर्मणोरभावाद्द्रव्यस्य चाभावात्ताभ्यामपि त्रयं द्रव्यत्वादीन्यसम्भावाः उक्तं हि 'द्रव्यसमवायसमवायस्वाश्रयिणः' (वैशे०) इति एवमेतानि द्विकसं-योगेन द्रव्य[स्य]गुणेन सह, कर्मणा च द्वे, गुणस्य द्रव्येण कर्मणा च सह द्वे कर्मणो द्रव्येण गुणेन च सह 5 द्वे इति षट् चक्राणि, द्रव्यत्वेन गुणस्य कर्मणश्च द्वे गुणत्वेन द्रव्यस्य कर्मणश्च द्वे कर्मत्वेन द्रव्यस्य गुणस्य द्वे इति षट् एवं द्वादशचक्राणि एवं द्रव्यत्वस्य कर्मणा गुणेन च, गुणत्वस्य द्रव्येण कर्मणा च कर्मत्वस्य द्रव्येण गुणेन च षट् चक्राणि द्रव्यस्य गुणत्वेन कर्मत्वेन च गुणस्य द्रव्यत्वेन कर्मत्वेन च, कर्मणो द्रव्यत्वेन गुणत्वेन च षट् तान्यपि द्वादश, एवं द्विकसंयोगेन चतुर्विंशतिरन्यथाचक्राणि भवन्ति। कस्मात् ? तथा कार्यकारणयोरविनाभावित्वात् गुणकेशादिरिति हेतुं व्याख्यातमेवोपनयति ।

10 आह—

ननु सर्वगतत्वात् समवायस्य स्वतत्त्वेनापि सम्बन्धात् द्रव्यभावः गुणभावः कर्मभावो वा सिद्धसतीत्यभोच्यते, नन्वत एव सङ्कर उच्यते, परतत्त्वेनापि सम्बन्धादतत्त्वमपीति सङ्करदो-षाविमोक्षः एवञ्च स्वविषयसर्वगतानि हि तत्त्वानि समवायस्य सर्वगतत्वे तान्यधुना सर्वगतानि भावानीत्यभ्युपगमविरोधः अतो द्रव्यगुणकर्मणां व्यवस्थितानामभावात् कथं द्रव्येषु द्रव्य-15 ज्ञानं ? गुणेषु गुणज्ञानं ? कर्मसु कर्मज्ञानमिति ।

नमु सर्वगतत्वादित्यादि, समवायस्य सर्वगतत्वात् स्वतत्त्वेनापि सम्बन्धोऽस्ति द्रव्यस्य द्रव्यत्वं स्वतत्त्वम् एवं शेषयोरपि शेषद्वयम् सर्वेण सह समवायसद्भावात् स्वेनापि तत्त्वेन सम्बन्धात्, तथोभयत्र सत्त्वम् [?] द्रव्यभावो गुणभावः कर्मभावो वा सिद्धसतीत्यभोच्यते—नन्वत एव सङ्कर उच्यते, परतत्त्वेनापि सम्बन्धात् अतत्त्वमपीति, इति[सङ्करो]हेत्वर्थे यस्मात् परतत्त्वेनापि सम्बन्धः तस्मात्तद्भा-20 वोऽप्यतद्भावोऽपीति सङ्करदोषाविमोक्षः अविशेषेण लघुत्वेनैव समर्थितत्वात् किञ्चान्यत् दोषोपच-यश्च—एवञ्च स्वविषयेष्वपि स्वविषयसर्वगतानि हि तत्त्वानीष्यन्ते तत्समवायस्य सर्वगतैकत्वाभ्यां

---

द्रव्यं उपलक्षणं गुणकर्मणीति तयोरभावे द्रव्यमपि नास्तीति भावः । आश्रयाभावेन दृष्टान्तं आश्रयाभावाद् आश्रयिणो-रभावादिति । उपलक्षणाभावादुपलक्षणाभावात्—उपलक्षणाभावादिति । एवं द्विकसंयोगेन सम्बन्धिचक्राणि सर्वत्र-पक्षमेतानीति धर्मिणि धर्मिद्वयेन धर्मिद्वये एकेन धर्मेण एकस्मिन् धर्मे धर्मिद्वयेन एकस्मिन् धर्मिणि धर्मद्वयेनान्यथात्वानि 25 भवन्ति । ननु द्रव्यादौ गुणत्वादिसमवायवत् द्रव्यत्वादिसम्बन्धोऽप्यस्ति, समवायस्य साधारणत्वात्सर्वगतत्वात्, तस्मात् द्रव्यमात्रमेतादिति व्याचष्टे—समवायस्येति साधारणानुविवृत्तत्वात् समवायस्यैकत्वं शेषयोरपि—गुणकर्मणोरपि गुणत्वं कर्मत्वं स्वतत्त्वमित्यर्थः । समाधत्ते—नन्वत एवेति साधारणानुविवृत्तत्वात् स्वतत्त्वेन समवायसम्बन्धवत् शेषतत्त्वाभिव्यक्तत्वैरपि सम्ब-न्धात् द्रव्यादेः द्रव्यत्वादिवत् परतत्त्वैरपि सङ्कर एवेति सङ्करे दूषणं एवेति भावः । इदं परतत्त्वसम्बन्धत्वं स्वतत्त्वेनापि सम्बन्धादिसम्भवापि सर्वैरेव प्रसज्यत इत्यभिप्रायः—अविशेषेणैवेति। दोषान्तरमाह किञ्चान्यदिति स्वस्मिन् सामान्यं स्वविषयगते-30 नाभिन्नम्, न तु सर्वगतम्, यत्सामान्यं यत्र वर्तते स स्वविषयः तत्रापि सर्वस्मिन् वर्तते स्वविषयसर्वगतम्, सर्वव्यापकत्वात्तु स्वरूपतः सर्वगतत्वमनभ्युपगतम्, समवाये त्वेक सर्वगतत्वे तदा तत्त्वानामपि सर्वगतत्वं प्रसज्यतीति तदभ्युपगमविरोधप्रसङ्गः इति भावः ।

---

१ सि. क्ष. °व्यवस्थितानि । २ सि क्ष. डे. तथाभूतं । ३ सि. क्ष डे. सर्वगतैकत्वाभ्यां ।

तान्यधुना सर्वगतानि प्राप्तानि, ततोऽभ्युपगमविरोधो जायत इति, क्षेपपक्षार्थोऽयम् उच्यते— अतो द्रव्यगुणकर्मणामित्यादि प्राक्तन एव ग्रन्थो यावत् कर्मसु कर्मज्ञानमिति, तत्र व्यवस्थितलक्षणानामसमवायादिति लक्षणाभावद्वारेण निराकरणम्, इह तु व्यवस्थितानामसमवायादिति सह तस्यैकत्वेन तेषां निराकृतत्वादिति विशेषः, आधेयज्ञानमेवनिमित्तनियमनिराकरणद्वारेण चेति ।

यदपि कुण्डदधिसंयोगवद् द्रव्यादीनामाधाराधेयनियम इत्युक्तं तदपि नैव, कुण्डदध्या- 5 धाराधेयभावसमवायानामप्येकत्वात् तदवस्थः सङ्करदोषः, यत्प्रसङ्करेण नियमेन चाऽर्थो भय- मेव स्पष्टतरं ब्रूमः, समवायनिमित्तस्य तत्त्वस्य स्वत एवात्मप्रतिलम्भः, तयोश्च लोकसिद्धिश्च भेदः स्वप्रवृत्तिप्रतिलम्भादेव, दधिकुण्डयोर्लोकसिद्धिश्च भेदाभावात् कारकशक्तित एव तु प्रति पद्यते भेदसिद्धिः, तयोः संयोगैकत्वेऽप्याधारशक्तिः कुण्डस्य, आधेयशक्तिर्दध्न इत्यसङ्कीर्ण आधाराधेयनियम इति, अथ यद्येतदेवं त्वयाऽपि प्रतिपत्तव्यं यथा त्वमेवात्र न समानत्वाद् 10 इत्युत्तरमात्थ, समवायस्यैकत्वेऽपि कारकशक्तेरेव नियममेव इत्युत्तरमात्थ द्रव्यत्वादिसमवायो न सर्वत्र किन्तु कस्मिंश्चिदेवेति ।

यद्यपीत्यादि, यद्यपि परेणोक्तं यथा कुण्डदधिसंयोगे दध्येवाधेयं कुण्डमेवाधार इति नियमस्तथा द्रव्यमेवाधारो गुणकर्माण्येवाधेयम् द्रव्यगुणकर्माण्येवाधारो द्रव्यत्वगुणत्वकर्मत्वान्येवाधेयानीति तदपि नैव कुण्डदध्याधाराधेयभावसमवायानामप्येकत्वात्—तत्रापि त्वन्मतेनाधारयोः कुण्डद्रव्योराधेययोश्च 15 कुण्डत्वदधित्वयोस्तत्त्वयोः, द्रव्यत्वादीनाञ्च तत्त्वानां ये समवायास्तेषामप्येकत्वात् समयभेदोपचरितमेवा- भमाश्रयेनैकत्वात् पूर्वोक्तविधिना तदवस्थः सङ्करदोषः, यत्प्रसङ्करेण नियमेन चाऽर्थः अयमेव स्पष्टतरं ब्रूमः तद्यथा—समवायनिमित्तस्येत्यादि—समवायस्य यन्निमित्तं तत्त्वं कुण्डदध्नोः कुण्डस्य दधित्वञ्च तस्य स्वत

---

समवायस्यैकत्वे पदार्थानां द्रव्यादीनां व्यवस्थाभावे तत्त्वेन न सम्बन्धसम्भवात् यथा द्रव्येषु द्रव्यत्वं गुणेषु गुणत्वं कर्मसु कर्मत्वं व्यवस्थितं अतो द्रव्यगुणकर्मणामिति द्रव्यादीनां समवायैकत्वेन व्यवस्थानामभावप्रदर्शितं । द्रव्यादीनां पूर्वं निरा- 20 कृतानां पुनरत्र यत् निराकरणमित्याह—तथेति पूर्वोक्तम् —[illegible] [illegible] उक्त इह तु [illegible] [illegible] [illegible] तत्त्वान्तरस्याप्यनुपपत्तिरिति द्रव्यादयो निराकृता एवमाधेयज्ञानमेवैन [illegible] नियम तस्यापि निराकरणात् व निराकृता इत्यर्थ । [illegible] कुण्डदध्नो संयोगविशेषेऽपि कुण्डमेवाधारो न दधीत्याधाराधेयभावनियमस्तथा [illegible] [illegible] गुणत्वकर्म- त्वाद्यभिव्यक्तौ [illegible] [illegible] इति पूर्वपक्षं दूषयति—यद्यपीति । व्याख्याति—यथेति स्पष्टा 25 व्याख्या । एवं हेतुमाह—कुण्डदध्याधारेति [illegible] हि समवाय एक तथा च कुण्डत्वदधित्वद्रव्यत्वादीनां समवाय- स्यैकत्वात् सर्वं [illegible] वस्तुत एकमेव भेदस्तु [illegible] औपचारिक इति [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] इति भाव । यत्प्रसङ्करेण नियमेन चाऽर्थं [illegible] [illegible] [illegible] न [illegible] [illegible] [illegible] [illegible]—यत्प्रसङ्करेणेति । [illegible] समवायस्येति यदि समवायस्य तत्त्वं सामान्यं दधित्वकुण्डत्वादिरूपं [illegible] प्रतिलभते—[illegible] दधिकुण्डादिरूपं प्रति [illegible] न तु 30 समवायात्, त च कुण्डदधिनी [illegible] भिन्ने तयोः प्रतिलम्भादिति भाव । दधिकुण्डयोस्तु [illegible] भेदो पद्यते स्वत एव न तु [illegible] [illegible] [illegible] एव भेदस्तथा भेदो भवतु, [illegible] भेदो नास्ति दधिकुण्डयोः संयोगपरिणामैकत्वात् भेदव्यवहारस्तु औपचारिक कारकशक्तिभेदात्, एवञ्च [illegible] [illegible] वा स्वत

पृथगाश्रयिसम्बन्धः, तयोश्च लोकप्रसिद्धिपक्षेऽयुतसिद्धत्वादेव त्वन्मतेऽप्याकाशशकुन्योरिव दधिकुण्डयो-र्लोकेऽपि प्रसिद्धो भेदो नार्थान्तरत्वात्, तस्मात् ततो वयमपि लोकप्रसिद्धं मा बाधामेति लोकप्रसिद्धिवद् भेदाभावात् कारकशक्तित एव तु प्रतिपद्यते भेदसिद्धि[ः]संयोगपरिणामकृत सम्बन्धमनादृत्य, तयोः संयोगैकत्वेऽप्याधारशक्तिः कुण्डस्याधेयशक्तिर्दध्न इति नियममसङ्कीर्णमाचक्ष्महे, अस्यार्थस्य भावनाम्भो

5 गवाश्वौ यावदाधाराधेयनियम इति अयमर्थं नैवदेव त्वया समवायमपि कल्पयित्वा एतदेव प्रतिपत्तव्यं त्वद्वचनप्रामाण्यादेव यथा इमेपात्रेति, संयोगैकत्वेऽपि कारकशक्तित एव कुण्डदध्नोराधाराधेयनियमो भिन्न इत्युत्तरमात्र किं तदुत्तरमिति चेदुच्यते न समानत्वादिति, यथेहापि समानमुत्तरं समवायैकत्वेऽपि कारकभेदेनैव नियमभेदः, तन्मात्रा गवाश्वौ यावत् कर्मभिरेवेति।

यदुच्यते व्यंग्यव्यञ्जकत्वभेदाद् द्रव्यद्रव्यत्वादीनां भेदो घटप्रदीपवत् सम्बन्धैकत्वेऽपीति

10 न सङ्करप्रसङ्ग इति, एतच्च व्यङ्ग्यव्यञ्जकत्वं द्रव्यद्रव्यत्वादेस्तदा स्याद्यदि प्रदीपघटदृष्टान्तवत् पृथक् सिद्धं स्यात्, न तु तदात्मभेदनियमः, सिद्धे हि तदाधाराधेयभेदनियमोऽपि स्यात्, ततो न दृष्टान्तसाधर्म्यं भवत एतदिति नासङ्करः स्यादेवम् समवायस्यैकत्वेन व्यतिरेकनिय-मयोरभावात् तथा यदि य एव गुणकर्मभावाभ्यां सम्बन्धः स एव द्रव्यस्यापीति प्राप्त गुण कर्मणोरपि द्रव्यत्वम् द्रव्यत्वाभिसम्बन्धाच्च तयोर्गुणकर्मभावविनिवृत्तिरिति सर्वं प्रपञ्चनीयं

15 यथास्वार्थमिति।

यदुच्यते व्यङ्ग्यव्यञ्जकेत्यादि, व्यङ्ग्यव्यञ्जकत्वभेदाद् द्रव्यद्रव्यत्वादीनां भेदो घटप्र-दीपवदिति परिहारान्तरं तत्राह यावत् सङ्करप्रसङ्ग इति वैशेषिकस्य, आचार्यवचनम् एतच्च व्यङ्ग्यव्यञ्ज-केत्यादि स्यादेवेति यदि दार्ष्टान्तिकस्य [द्रव्य]द्रव्यत्वादेर्व्यङ्ग्यव्यञ्जकभावः प्रदीपघटदृष्टान्तवत् पृथक् सिद्धः स्यात् न तु तदात्मभेदनियमः सिद्धे हि तदाधाराधेयभेदनियमोऽपि स्यात्, तदर्थोऽयं

---

20 पृथगाश्रयिसम्बन्धात्, लोकप्रसिद्धसम्बन्धात् धर्मान्तरत्वसम्बन्धात्तदाधारत्वाऽऽधाराधेययोरवश्यं नियम उपपद्यत इत्याकाशशकुन-दधिकुण्डयोरिति दधिकुण्डयोरपि संयोगपरिणामकृतभेदसमित्व तथापि लोकप्रसिद्धं मा बाधामहीति तस्मात्तत्र कारक-शक्तितो भेदाभिव्यक्ति लोकसिद्धिरेवेत्युच्यते यदि ततो वयमपीति। कारकशक्तित एव गवाश्वयोरपि समानमनुमेयमपि संयोगात्मकेऽपि तदाधाराधेयभावनियमोऽनुमेय तथा च समवायस्याभिन्नत्वेऽपि कारकशक्तित एवाधाराधेयनियमसिद्धेः किं समवायैकत्वानेन भवताभ्युपगतेनेति। यदेवमुक्तं त्वया इह तिष्ठति-यथा इहेमेपात्रेति, एवं कारकशक्तित एव

25 निर्वाहे समवायकल्पना निरर्थकेति भावार्थ। समवायस्यैकत्वे सङ्करस्तो व्यञ्जकेति वैशेषिकेण तस्यैकत्वे आधाराधेयनियमा-भाव आपन्नीत कारकशक्तित आधाराधेयनियमे प्रतिपादिते च वैशेषिकेणापि तथैव नियममुपपादयितव्यम्—न समानत्वादिति। यथा संयोगैकत्वेऽपि तत्र कुण्डदध्नोराधाराधेयभावनियम [illegible] तथा समवायस्यैकत्वेऽपि द्रव्यत्वादिभिरभिन्नाव [illegible] नियमो [illegible] यदुच्यत इति। [illegible] नियमात् सङ्कर इति [illegible], द्रव्यत्वाद्यभिव्यक्तिः [illegible] व्यञ्जका च [illegible] नियम [illegible]

30 प्रदीप एव [illegible] घट एव [illegible] इति [illegible] इति न सङ्कर इति भाव । समाधत्ते-आचार्यवचनमित्यादि [illegible] पृथक् [illegible] तयोर्व्यङ्ग्यव्यञ्जकभावनियम स्यात्, द्रव्यं द्रव्यत्वस्य न पृथक् सिद्धम् तदात्मकत्वात्

---

१ सि. क [illegible]।

भावद्सङ्करः स्यादेवमिति, तस्य हेतोरसिद्धिप्रतिपादनार्थमाह—समवायस्येत्यादि, चक्रोत्तरमेवैतदाधाराधे-यभेदनियमाभावस्य तुल्यत्वात् दृष्टान्तसाधर्म्य न भवत एवेति प्राग्विस्तरेण स्याद्वादार्थत्वात्, तदेवं स्मारयति—तथा यदि च द्रव्येत्यादि यावद्गुणकर्मभावविनिवृत्तिरिति तत्र—सर्वविकल्प प्रपञ्चनीयमिति पूर्वोक्तार्थातिदेशः क्व—कुतः ? इति चेदुच्यते—अस्माद् भावधेः यथास्वार्थमिति—यो यः स्वार्थो यथा स्वार्थं द्रव्यगुणकर्मद्रव्यत्वगुणत्वकर्मत्वसंयोगाभ्यवस्थानचक्राण्यथ स्याद्भेयानि पूर्ववदिति । 5

यत्पुनरिदमाशङ्कितं समवायैकत्वं पञ्चत्वव्यवहारेण विरुध्यत इति तदेवमेव ममापि प्रतिभाति यत्पुनरिदं प्रत्युच्यते, न आश्रयविशेषात्, भाववत्, अलक्षणत्वाच्च तथा समवायस्यैकत्वेऽप्याश्रयाणां नानात्वादुपचारेण नानात्वव्यवहारो भविष्यतीति, इदं निर्मूलमेव, व्यङ्ग्यस्याऽऽधेयनियमादाश्रय एवासिद्धेः कुतस्तत्कृतो व्यञ्जको वाऽऽधेयोऽर्थः ? कुतो वाऽऽश्रयाणां वैचित्र्यम् ? समवायैकत्वे षट्पदार्थनिवृत्तेः सुभावितत्वात्, अलक्षणत्वस्यैकत्वात्,[1] 10 समवायस्य भावस्य च अलक्षणत्वेन साधर्म्याभावात्कुतो नानात्वोपचारः ? छायामात्रस्यास्य अलक्षणत्वस्य, भावो वा कुत इत्यलमतिविकासिन्या शङ्कया ।

यत्पुनरिदमाशङ्कितमित्यादि, समवायैकत्वं पञ्चत्वव्यवहारेण विरुध्यत इति यदाशङ्कितं त्वया तदेवमेव ममापि प्रतिभाति विरुध्यत एवेति यत्पुनरिदं प्रत्युच्यते—तदाशङ्कितस्योत्तरं वैशेषिकेण, न, आश्रयविशेषात्, भाववदित्यादि द्रव्यादिसङ्करायत्र दृष्टान्तौ, अतिदृष्टान्तश्च अलक्षणत्वं, तथा 15 समवायस्यैकत्वेऽपीत्यादिर्दार्ष्टान्तिकं गतार्थं यावद् भविष्यतीति, अस्योत्तरमाहाचार्यः—इदं निर्मूलमेव व्यङ्ग्यस्याऽऽधेयनियमात् पूर्वोक्तन्यायेन एवासिद्धो व्यञ्जको व्यङ्ग्यो वा स्वसिद्धः कुतस्तत्कृतो व्यञ्जको वा

तस्य कथं प्रतीतदृष्टान्तस्य व्यङ्ग्यव्यञ्जकत्वमिरन्वयो भेद, ततो दृष्टान्तसिद्धत्वात्, तस्माच्च दृष्टान्तस्तुल्य इति सङ्करो दुर्वार एवेति भाव । व्यङ्ग्यव्यञ्जकत्वसिद्धिं दर्शयति—तस्य हेतोरिति समवाये हि एक एवः तथा यदि द्रव्यत्वसम्बन्धो द्रव्य-मेवेति न तु गुणादीनामिति नियमो व्यतिरेकेण न भवत एव तत्समवाये चाधाराधेयभावनियमाभावात्। तदेव व्यङ्ग्यव्यञ्जकत्वाच्च न 20 दृष्टान्तसाधर्म्यमिति भाव । पूर्वोक्तिमभावैकत्वप्रमुखमादर्शयन् स्मारयति तथा यदि च यदेवेत्यादि । अतिदेशसमानमर्थाद विभाव—क्व कुत इति स्याद्वादार्थप्रकारेणैव यावद्गुणकर्मभावविनिवृत्तिरिति द्रव्यगुणकर्मसत्तावत्कादि पूर्ववदेव व्याख्येय-मौचित्यं । ननु समवाये यदेकत्वमिति कथमयमसिसमवायोऽस्य गुणसमवायोऽयं कर्मसमवायोऽयं द्रव्यादिसमवायः कथं विशेष-समवाय इत्येवं समवाये पञ्चत्वव्यवहारः, एकत्वपञ्चत्वयोर्विरोधादिति वैशेषिकेणाऽऽशङ्क्य आश्रयाश्रयभेदस्याधीना पञ्च-त्वादेव समवाये पञ्चत्वव्यवहार औपचारिको न तु वास्तविक एकत्वात्तस्य, यथा सत्ताया एकत्वेऽपि द्रव्यसत्ता गुणसत्ता 25 कर्मसत्ता इति एवं सतेति वैचित्र्योपचार यत्र तु नास्त्याश्रयभेदो यथा आकाशस्य, न तत्र नानात्वव्यव-हारोपचार भिन्नत्वोपचार एवेति समाहितम्, तत्रायमाह त्वदीयसमाधानं निरोधकम्. स पुन एवैतदर्थमाह—यत्पुनरि-दमिति । व्याचष्टे—समवायैकत्वमिति सम्बन्धिभेदात् सम्बन्धभेदस्याप्यवश्यकत्वात् यदि सम्बन्धिन एव तर्हि सम्बन्ध समवाय एको न स्यादेकत्वे वा सम्बन्धिन पञ्चत्व न स्यात् विरोधमिति यदाशङ्कितं तद्युक्तमेवेति भाव । वैशेषिकेणोक्तमुत्तरं निराकुर्वन्नाह—यत् पुनरिदमिति आश्रयनिमित्ताभेदेऽपि समवाय पञ्चत्वनिमित्तं यथा सत्ताया आश्रयो द्रव्यादयः 30 व्यञ्जकत्वात् एका व्यञ्जकाना द्रव्यादीनां भेदात् द्रव्यविशिष्टा सत्ता गुणविशिष्टा सत्ता कर्मविशिष्टा सतेति भिन्ना व्यपदेश औपचारिक यथा वाऽऽकाशमेकमाकाशं घटे चन्द्रस्यैकत्वात् प्रतिभासेऽपि एकस्यैकोपचर्यते चन्द्रता समवायेऽपि पञ्चत्वोपचार औपचारिक एवेति भाव । एतदुक्तं निराकरे—इदं निर्मूलमेवेति व्याख्यातं निमित्त आश्रय एवासिद्ध द्रव्यव्यञ्जकादेराधाराधेय-

[1] इदं वाक्यं मि प्रती नास्ति । [2] द्र का. व्यङ्ग्यस्याधाराधेयनियमात् ।

भावेयोऽर्थः ? कुतो वाऽऽश्रयाणां नैमित्तम् ? समवायैकत्वे पदपदार्थनिवृत्तेः सुग्मपिहितत्वात् अवस्थाभूवत्–व्योमकल्पत्वदेकत्वात् समवायस्य भावस्य च सत्ताख्यस्य अजभ्रमेण सह साधर्म्याभावात् कुतो नान्यत्वोपचारः ? छायामात्रत्वात् अजभ्रमस्य पुरुषाद्या भावो वा कुतः ? भावोऽपि द्रव्यादिव्यतिरिक्तो नास्त्येवैकः स्वभूतसत्त्वेतरेतरसमविभिन्नसिम्या सङ्ख्या ।

5 एवं समावस्तसम्बन्धसद्भावमेवमाविवेचयितृमतनिराकरणमपोह्य नैयायातमिति दर्शयति—

एवमेतदुभयमुभयभागित्वस्य नयस्य स्वरूपम्, यद्यत्सामान्यं तदपि विधीयते नियम्यते च, योऽपि विशेषः सोऽपि विधीयते नियम्यते च, सामान्यं भावः प्रकृत्यर्थः यद्भवनेन भूयते सा सत्ता भू सत्तायामिति पाठात् सामान्यम्, विशेषोऽपि प्रत्ययार्थः सः, तस्यैव भवितृत्वाभिप्रत्ययार्थत्वात्, योऽसौ भवति स विशेषः सामान्यमपि भवनात्मकत्वात् भवन10 सामान्यमन्तरेण तस्याकर्तृत्वात् स एव प्रकृत्यर्थानतिक्रमेण वृत्तः ।

एवमेतदित्यादि, उभयमुभयभागित्वस्य नयस्य स्वरूपम् यद्यत्सामान्यं तदपि विधीयते नियम्यते च योऽपि विशेषः सोऽपि विधीयते नियम्यते चेति, तद्यथाचष्टेऽवयवं प्रदर्शयन् प्रकृतिप्रत्ययार्थाभ्यां सामान्य भावः प्रकृत्यर्थो, तद्दर्शयति—यद्भवनेन भूयते सा सत्ता, भू सत्तायामिति(धातुपाठे १) पाठात् सामान्यम् तत् किं प्रकृत्यर्थमात्रमेव ? नेत्युच्यते—विशेषोऽपि[1] प्रत्ययार्थः सः, तस्यैव भवितृत्वाभिप्रत्ययार्थत्वात्, 15 स एव प्रकृत्यर्थः प्रत्ययार्थोऽपीत्युक्तः योऽसौ भवति कर्तृवाभिप्रत्ययार्थः स विशेषः सामान्यमपि भवति सत्ता भावः भवनात्मकत्वात् भवनसामान्यमन्तरेण तस्याकर्तृत्वादभवितृत्वात् स एव प्रत्ययार्थः प्रकृत्यर्थानतिक्रमेण वृत्त इति ।

---

भावस्य पूर्वं विधिकृतत्वात् [illegible] समवायैकत्वे हि पदार्थद्रव्यत्वमेव भावाभिहितं समवायस्य [illegible] । एवं समावस्तत् [illegible] निरूढे [illegible] दर्शयति—एवमेतदिति सामान्य
20 विशेष सामान्यविशेष [illegible] दर्शनमिति । तत्र भाष्ये—यद्यत्सामान्यमिति सामान्यं प्रवर्तते निवर्तते च विशेषोऽपि प्रवर्तते निवर्तते चेत्यर्थः । तत् कथमिति दर्शयितुं प्रकृतिप्रत्ययार्थकल्पनाद्वारेण सामान्यविशेषौ दर्शयति—सामान्यं भाव इति भवन प्रकृत्यर्थः भवितृ प्रत्ययार्थः भवनमेव सामान्यमनुप्रवृत्तिधर्मत्वात् तदेव सतोऽप्यते सर्वार्थेषु [illegible] [illegible] भवन मूलप्रकृतिनिष्पन्नं भूयतइव सत्तायामनुविद्धोऽप्योऽपि भवनं सामान्यं सत्ता यत्रोभा इति भाव [illegible] प्रकृतसामान्यं व्यतिरिक्तेति भाव । सा किं केवल प्रकृत्यर्थः एवैतावद्युज्यते [illegible] सत्ता दर्शयति—विशेषोऽपीति
25 प्रत्ययार्थप्रकृतिविशेषोऽपि सामान्यस्य प्रत्ययार्थोऽपीति भाव । हेत्वाह तस्यैवेति [illegible] । भवति भाव [illegible] च कर्तरि च भावे भावकर्मणोः इति कर्तरि इत्यपि सूत्राभ्यां कर्तृरि विधानात् कर्ता विशेषोऽपि सन् सामान्यं प्रकृत्यर्थो भवतीति निरूपयति—योऽसावित्यादि भवतीत्यर्थे योऽसौ कर्तृत्वाभिप्रत्ययार्थं इत्यर्थ । एवं च सामान्यात्मकेन भवनेन कर्तारपोऽभिधीयन्ते यदि कर्ता भवनमन्तरेण भवति तत्स्वरूपेणाभिधीयमानत्वा विशेषोऽपि सामान्य सत्ता भाव एवेति प्रत्ययार्थोऽपि सामान्यं विशेषोऽपि प्रत्ययार्थोऽपि विशेष सामान्यमपीत्युभयमुभयात्मकमिति भाव । ननु विधिविधिविधिन्यायेन सामान्यविशेषयोरेकत्वात्स-
30 विधम्, तदेवैकरूपात्वात् भवत्याकेनापि भावम्, तस्मात् पौनरुक्त्यमिव स्यात्, तथा सूर्येण सामान्यविशेषयोरेकैकस्य [illegible]

---

१ सि ×× । २ डा. प्रकृत्यर्थ(थ)र्थे । ३ डा. भवितृत्वा ।

साम्प्रत विधिविधिभिर्भवद्देकत्वापत्तिः सामान्यविशेषयोरिष्टा सैषा त्वदुक्तन्यायेनैव स्वेक-स्वापत्तिरपीति, सा मा भूदिति सर्वविकल्पसमावेशत्वम्भुदासेन विशेषलक्षणमनयोः पर्यायाविभिरुक्त मनुवाम आह—

सामान्य प्रवृत्तिः द्रव्यमन्वयो धर्मी विधिर्भाव इति, विशेषोऽपि निवृत्तिः पर्यायोऽन्यत्व धर्मो नियमोऽभाव इति, द्वावेतौ भावौ पूर्ववदेकमेवेदमित्येवंविध भावमनापद्यमानौ सामान्यमपि सामान्यं विशेषश्च भवतः, विशेषोऽपि विशेषः सामान्यश्च भवतः, प्रवृत्तिः निवृत्तिरित्यादुभ-यमन्योऽन्याविनाभाविभावः तस्य सतो भावः सत्ता, येन हि सता यथा भूयते सततनियमेनेति तमयोर्नियमो विधिश्च । यदि स्यात्          खपुष्पवत् ।

सामान्य प्रवृत्तिरित्यादि भावश्चिधिर्भाव इति तथा विशेषोऽपीत्यादि यावन्नियमोऽभाव इति द्वावेतौ भावौ—पर्यायमेवादेवतुभय पूर्ववत् विधिविध्यरविकल्पपुरुषादिवादवदेकमेवेदमित्येवंविध भाव मनापद्यमान सामान्यमपि सामान्य विशेषश्च भवतः, विशेषोऽपि विशेषः सामान्यश्च भवत इति तद् दर्शयति—प्रवृत्तिर्निवृत्तिरित्यादुभयमन्योऽन्याविनाभाविभावो वस्त्वित्यर्थः, भावाभावरूप भवन सद्वस्तु, तस्य सतो भावः सत्ता येन सता भूयते सततनियमेनेति प्रकृतिप्रत्ययार्थयोरुभयोर्नियमो विधिश्च, तावेव दर्शयति—येनेति प्रत्ययार्थं यथेति प्रकृत्यर्थश्च, येन हीत्यादि कर्त्रा क्रियायां नियतेन नियतायां भवनमाह, यदि स्यादित्यादि अन्यथाऽनिष्टापादन यावत् खपुष्पवदिति भवननियमेनास्मत्क्रमो भवद् उक्तः, तदभाव-रणेन[?]भविनुनियमेन भवनाख्यस्वाम इत्येवदुभयमुभयत्र विधिर्नियमश्चेति सामान्येनोक्तम् ।

विशेषयापि वक्ष्यति—

एव द्रव्यक्षेत्रकालभावैः घटपटघटान्तरगृहवहिःस्वपरक्षेत्रान्तरवर्तमानातीतानागतक्ष

वर्णेनद्वारेव विधिविधिभिरतेर्द सर्वविकल्पात्मकं मावैकत्वमुपलम्भेत्याह स्याम्मतमिति सामान्यादेः पर्यायस्याह—सामान्यं प्रवृत्तिरिति । विशेषस्य पर्यायानाह विशेषोऽपीति । द्वावेव पर्यायमेवतो द्विविधौ भावौ सामान्यविशेषरूपौ प्रत्येकमुभय-रूपौ अत एव च विधिविधिमत्पुरुषनियत्यादिवादवदैकविधौ भवत इत्याह द्वावेतावितीति । प्रवृत्तिरिति प्रवृत्तिर्निवृत्त्य-विनाभाविनी, निवृत्तिश्च प्रवृत्त्यविनाभाविनी एवम प्रवृत्तिनिवृत्त्यात्मको भाव एवं द्रव्यं पर्यायाविनाभावि पर्यायश्च द्रव्याविना-भावी द्रव्यपर्यायात्मको भाव. अन्वय –एकत्वं तदन्यत्वाविनाभावि अन्यत्वमप्येकत्वाविनाभावि एकान्यत्वात्मको भावः धर्मी धर्माविनाभावी धर्मश्च धर्म्यविनाभावी धर्मधर्म्यात्मको भाव विधिर्नियमाविनाभावी नियमो विध्यविनाभावी विधिनियमात्मको भाव भावोऽभावाविनाभावी अभावो भावाविनाभावी भावाभावात्मको भाव इति भाव । एतदुभयात्मकमेव वस्तु सदुच्यते भवनात्मकत्वात् तथा च सत् येन रूपेण भवति तद्रूपं प्रकृत्यर्थ. यो भवति स कर्ता प्रत्ययार्थ सततनियमेन भवती वस्त्विति नियमाविधिसमवायेनात्मन्यपि–तस्य सत इति । भावार्थमाह–कर्त्रेति नियतो हि कर्ता नियतक्रियाया भवति नानियतक्रियायां भवति एवम भवतो वस्तुन आत्मलाभो न यथा तथा किन्तु भवननियमेनेति सामान्यमपि सामान्यं विशेषश्च भवतः विशेषोऽपि भविनुनियमेनैव आत्मलाभं लभत इति विशेषोऽपि विशेष सामान्यञ्च भवत इति भाव. । इत्येवाह–भवननियमेनेति । अथ सर्वसर्वात्मकत्वेन एव भावाभावात्मकमिति निदर्शनप्रदर्शनेन व्याचष्टे–एवमिति स्वक्षेत्रद्रव्यत्वेनभवनभावरूपत्वेन भवद्

१ सि क्ष डा विधिनियमत्व । २ सि क्ष डा. पर्यायाविभिर्विरुद्ध । ३ सि क्ष पूर्वं च द्विविधविकल्प । ४ सि क्ष डा वसवा । ५ सि. क्ष कर्ता । ६ सि क्ष यदि लोपादि ।

न्तरैः घटशिवकस्तूपकादिकपालादिपूर्वोत्तरभावैः वर्तमानयुगपदयुगपद्भाविभावभावान्त-
रैर्वा भावाभावाभ्यां भवतीति घटस्य सदसत्त्वम्, प्रतिवृत्तिवस्तुप्रवृत्तेः घटादि मृदादिकारण-
मपेक्षते निर्विशेषत्वे भावाभावत्वेनाविशेषः कण्ठकपालादिभावाभावात्मना परस्परतश्चात्मसु
भेदं प्रति वृत्तत्वादिति स्वावयवभेदेषु सदसत्त्वेन वृत्तिः, तद्भावाभावात्मको घटस्वभावे न
5 भवति, तद्भावभावे च भवतीति, तथा घटपटादिद्रव्यक्षेत्रकालभावसत्तायां घटसामस्त्येपि
न कश्चिद्विशेषः वस्तुत्वात्, असामान्यवत्, यथैव गुणाद्
स्यनावृत्तिभेदेषु विवक्षया चैव विशेष उभयोरपि तत्त्वात्।

एवं द्रव्यक्षेत्रादि, यावत् स[द]सत्त्वमिति, द्रव्यतो घटो भवभावात्मानुवृत्त्या पटादिव्यावृत्त्या
घटान्तरव्यावृत्त्या च भावाभावात्मभ्यां भवति, क्षेत्रतो गृहे घटो न बहिर्नान्यत्रेति स्वक्षेत्रे भवन् परक्षेत्रे
10 क्षेत्रान्तरे चाभवन् भवति, कालतो वर्तमाने काले भवन्नतीतानागतयोः कालान्तरयोरभवन्[भावतो घट
वस्थायां घटत्वेन भवन्] शिवकस्तूपकादिभिः पूर्वैरुत्तरैश्च कपालादिभिरभवन्, शिवकावस्थायमेव वा
पिण्डस्तूपकाभ्यां पूर्वोत्तराभ्यामभवन् शिवकत्वेन भवन् भवतीत्युच्यते अथ वा भावतो शिवकादिभि-
राकारैर्भावैः वर्तमानै[र]युगपद्भाविभिः युगपद्भाविभिश्च रूपरसादिभिर्भवन् भावान्तरैरुपयोगप्रतिभिश्चाभवन्
भवतीति सदसत्त्वमेव सर्वभावानां भावाभावात्मकत्वम्, अथवा प्रतिवृत्तिवस्तुप्रवृत्तेः—वस्तुनि वस्तुनि
15 वृत्तिः प्रतिवृत्ति घटादि मृदादिकारणमपेक्षते, आदिग्रहणात् पटादि तन्त्वाद्यपेक्षते, निर्विशेषत्व इति,
कारणान्तरानपेक्षत्वात् स्वकारणमपेक्षत्वाच्च भावाभावत्वेनाविशेषः कण्ठः स्वेनात्मना भवति, कपालाद्या-
त्मना न भवति कपालानि स्वात्मना भवन्ति न कण्ठाद्यात्मनेति भावाभावात्मना परस्परतश्च

---

भवति परनिरपेक्षरूपेण न भवति एवं भवतो भावाभावरूपाभ्यां भवनं विकल्प्य इति सामान्यमपि समानं
विशेषं विशेषोऽपि [illegible] विशेष सामान्योऽपि [illegible] पृच्छत इति [illegible] तत् सत्त्वं [illegible] [illegible] तद् [illegible],
20 तेन घटो भवति, [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] न भवति, [illegible] [illegible]
[illegible] [illegible] [illegible] [illegible] घटो [illegible] [illegible] [illegible] भवन् स [illegible] [illegible] [illegible] [illegible] भवति
भावाभावात्मकमिति दर्शनम् [illegible] [illegible]। क्षेत्रत इति [illegible] क्षेत्रम्, यथा गृहादि, [illegible] [illegible]
क्षेत्रं [illegible] एव वा प्रदेशान्तरं परक्षेत्रम्, तत्र स्वक्षेत्रे भवन् परक्षेत्रे चाभवन् भवतीति क्षेत्रतो भावाभावाभ्यां [illegible] भवतीति
भाव। कालत इति [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible]
25 [illegible] [illegible] भवन् परकाले चाभवन् भवतीति भाव। भावत इति पर्यायो भाव [illegible] [illegible] [illegible]
[illegible] [illegible] घटो भवति पूर्वोत्तरभाविपर्यायापेक्षया च न भवतीति भावाभावात्मकं वस्तु इति भाव। [illegible]
[illegible] [illegible] [illegible] [illegible]—अथ वेति [illegible] [illegible] [illegible] [illegible] भवन्
[illegible] [illegible] [illegible] [illegible] [illegible] [illegible] घटो भावाभावात्मकः [illegible] [illegible]
[illegible] [illegible], [illegible] [illegible] [illegible] भेद [illegible] तत्र [illegible] [illegible],
30 [illegible] [illegible] तत्र [illegible] भेद [illegible] [illegible] भेद एवं भाव्य —यदा [illegible]
[illegible] तदा न [illegible] [illegible] भवन् [illegible] च न भवति सोऽपि घट [illegible] भवन् [illegible]
[illegible] च न भवतीति [illegible] [illegible]। एवं [illegible] [illegible] भावाभाव[illegible]
[illegible] [illegible] [illegible]—अथ वेति वस्तुनि वस्तुनि इति प्रतिराति, प्रतिवस्तुनि [illegible] [illegible]

१ सि. क. भंग भव इति। २ सि क प्र प्रतिपत्तिवत् । ३ सि भावाभावाभ्या।

[तस्य]तस्य च भेदं प्रति द्रव्यत्वादिति न्यायवचनेषु सत्[स]त्वेन वृत्तिः, तस्यार्थस्य भावना—तद्भावा-
भावात्मको घट इति—तद्भावे न भवति—भावाभावाभावे न भवति भावाभावभाव एव च भवति—तद्भाव
एव भवतीत्यर्थः, एतस्यैवार्थस्य भावनार्थं साधनमाह—यथा घटपटादिद्रव्यक्षेत्रकालभावभावाभावसत्ताया
अन्यासामस्त्येऽपि न कश्चिद्विशेष इति प्रतिज्ञा घटपटघटान्तरेत्यादि द्रव्यक्षेत्रादिचातुर्विध्यस्य सदसत्त्वस-
सामस्त्येन भावित सामस्त्येऽपि तथेति साध्यार्थः, वस्तुत्वादिति हेतुः, असामान्यवदिति दृष्टान्तः, यथैवेत्यादि 5
चातुर्विध्येन दृष्टान्तवर्णना गतार्था यावद् गुणावृत्त्यनावृत्तिभेदाभ्यामिति, द्विगुणत्रिगुणकृष्णशुक्लत्वादिरावृत्तिः,
शुक्ल[ः]कृष्ण इत्यनावृत्तिः तत्रैकगुणसत्त्वं द्विगुणासत्त्वं द्विगुणसत्त्वमेकगुणासत्त्वं शुक्लसत्त्वं कृष्णासत्त्वं
कृष्णसत्त्वं शुक्लासत्त्वमित्यादिभावाभावात्मकत्वाविशेषे सामस्त्यासामस्त्यविशेष क इति चेदुच्यते—विरूपया
चैव विशेष उभयोरपि सामस्त्यासामस्त्ययोः कस्मात्? तस्मात्—तद्भावस्यैव भावाभावत्व तथाभावत्वात्—
भावभावत्वात् विषमाविशेषादेवैव विशेषः, समस्तो घटोऽसमस्तः कण्ठकपालादिरित्यादिभागुक्त यावत् 10
एतच्च सकलादेशवशाद्विकलादेशवशाच्च प्रतिपादनोपायत्वात् ।

एवं भावाभावात्मकत्वं सर्वस्य सकलादेशेन भावितम्, विकलादेशेन प्रत्येकं भावयिष्यामः, तत्र
भावात्मकत्व तावत्—

यथा घटस्तावदस्त्येव, क्रियागुणव्यपदेशभाक्त्वात्, पटरूपवत् खपुष्पवैलक्षण्येन सर्वस्य-
सर्वसमवायासत्त्वात्, योग्यस्यैव योग्येषु समवायात्, यथा रूपे घटोऽस्त्येव रूपं वा तदाधारो 15

---

भेदभावात् घटस्यान्येऽत्र प्रकारे घटादिद्रव्यस्य प्रत्येकं भावाभावात्मकत्वेऽपि कश्चित् विशेषः तथा च घटस्य भेदभावेऽपि स्वेन
निरूप्य रूपेण भावात्मना भवतीति यथा स्वभावो नाभिन्नत्वे निरूप्य रूपाद्यभावात्मना न भवतीति तेष्वव्यवस्थेषु परस्परत एतत्स्वत्
भावस्वरूपे प्रकारे भावाभावात्मकत्वस्य कथंचिद्भेदेन द्रव्योऽक्षरसमस्त्येनापि तत्सत्त्वेन तस्य सदसत्त्वम्, तदेवं स्वपरद्रव्यक्षेत्रकाल-
भावैरेव घटादेः भावाभावात्मकत्वं केवलं न वाच्यम् प्रत्यक्षं वस्तुतत्त्वमपेक्षते भावाभावात्मकत्वेऽपि सामस्त्याऽविशेषः स्यादिति
तात्पर्यं सर्वमिति प्रतिभाति । एवं भावयति—तद्भावेति तस्मात् भावाभावात्मको घट इत्यर्थः तत्र प्रकारेण भावाभावात्मको 20
घट इति वा स्वपरद्रव्यादिना भावाभावात्मको घट सामस्त्येन भावाभावात्मकत्वाभावे न भवति तेन भावाभावात्मक एव
भवतीत्यर्थ । अमुमेवार्थमनुमानेन दर्शयति—यथा घटपटादीति यथा स्वद्रव्यगुण(स्वक्षेत्र)स्वकालभावाः घटपटघटान्तर
पूर्वोत्तरपिण्डत्वादिपरस्परविशुद्धरूपादिविशेषगुणैर्भावाभावात्मकत्वं भावितं तथा सामस्त्येन घटोऽपि भावा
भावात्मकत्वोऽविशेषेण वस्तुत्वात्, असामान्यवत्—विशेषवदिति । रूपात्मना घटोऽस्ति रसाद्यात्मना नास्ति रूपवानपि
घट शुक्लरूपेणास्ति कृष्णरूपेण नास्ति कृष्णरूपेण वाऽस्ति शुक्लरूपेण नास्ति, एकगुणोऽपि घट एकगुणरूपेणास्ति द्विगुण- 25
कृष्णादिना नास्ति, द्विगुणकृष्णे नास्ति एकगुणकृष्णेन नान्यैरेवं घटो भावाभावात्मा यथा तथा समस्तोऽपीति दृष्टान्ते यथैवेति-
चातुर्विध्येनेति द्रव्यक्षेत्रकालभावैरित्यर्थः । ननु समस्तस्यासमस्तस्य च भावाभावात्मकत्वे यदि न कश्चिद्विशेषस्तर्हि सामस्त्यासा-
मस्त्ययोः कथमित्याह—विरूपतयेति यद्यपि सामान्यं विशेषोऽपि विशेष सामान्यमपीति न प्रतिनियतत्वं सामस्त्यासामस्त्ययो
एकगुणद्विगुणवत्, तथापि विरूपतयैव सामस्त्यासामस्त्यविशेष यथा घटः समस्तोऽसमस्त कपालकण्ठादिरसमस्त इत्यादि परस्पर-
पेक्षया विरूपतयैव तयो सामस्त्यासामस्त्यम्, न केवलं घट समस्त एव कपालादिरसमस्त एव अन्यापरापेक्षया 30
तयोरपि समस्तासमस्तत्वात् सर्वस्यापि वस्तुनोऽनेकधर्मात्मकत्वेन तत्प्रतिपादनस्य विकलादेशसकलादेशाभ्यां तद् सकलादेशेन विकला-
देशेन च वस्तुन प्रतिपादन एव तत्करणोपायत्, तत्र प्रमाणप्रतिपन्नानन्तधर्मात्मकवस्तुन एकधर्मावलम्बनेन द्रव्यार्थत्वानाश्रय-
णात् कालादिभिरभेदवृत्त्या पर्यायार्थत्वाश्रयणात् अभेदोपचारेण वा यौगपद्येन प्रतिपादनं तत्र सकलादेश भेदप्राधान्याद्रूपचाराद्वा
तथा प्रतिपादनं क्रमेण विकलादेश इति । अत विकलादेशेन प्रत्येकं घटादेर्भावाभावात्मकत्वं भावयत—यथा घट इति । भावात्मके-

वा एकैकस्मिन् वृत्तत्वात्, अथैवं न स्यात्ततोऽसावयवसमेवापद्यते सिकतास्विवाविद्यमानं तैलम्, अनिष्टञ्चैतदेवम् रूपादीनां प्रत्येकं सत्त्वात्, परस्परं व्याप्त्याधारभावाच्च रूपादयः सन्ति न च तथास्थितो घटो न भवति, तयोरितरेतराभूतयोराधारभूतस्य वा घटभावात् असामस्त्येन वा भावाभावात्मको घट इति ।

5 (तथेति) तथा घटस्यापवस्त्येव, क्रियागुणव्यपदेशभाक्त्वात्–उत्क्षेपणादिरूपं क्रिया गुणो रूपादि व्यपदेशो लिङ्गं हेतुरपदेशो लिङ्गमित्यादि शब्दो वा पटस्तन्तव इति भावात्मकत्वे दृष्टान्तः, तद्गुणसैकरूप्येण–वैधर्म्येण सर्वसर्वसमवायासत्त्वादिति भावनाहेतुः, न हि सर्वं सर्वत्र समवैति तन्तुषु पटः कपालेषु वा पटः, तस्मात् सर्वसर्वसमवायासत्त्वात् योग्यस्यैव योग्येषु समवायात् अस्त्येवेति वर्तते, यथा रूपे घटः–गुणसमुदायभावदर्शनेन, रूपं वेति गुणभावभावे तदभावे वैलक्षण्यविचारे, यथा
10 रूपे घटोऽस्त्येवेत्यादि तथा रसादिष्वपि भावनीयम्, एकैकस्मिन् वृत्तत्वात् अथ पुनरेव न स्यात्–घटरूपादिसाधर्म्येण तद्गुणसैकरूप्येण एकैकस्मिन् सिकतास्विव तैलं ततोऽसावयवसमेवापद्यते किमिव ? सिकतासि-वाविद्यमानम्–यथा सिकतासु प्रत्येकं समुदायेऽपि तैलं नास्त्येव तथा घटो रूपाद्येकैकस्मिन्नसत्त्वात् समापद्यत अनिष्टञ्चैतत् एवं सामस्त्येन घटाद्यवस्थितत्वं रूपादीनां प्रत्येकं सत्त्वात्, इतरथा रूपमपि रसोऽपि रूपं स्यात् तद्व्यापकत्वात् न च रूपमपि रसोऽपि रूपं भवति रूपं वा रसमपि रसो भवति तदभिन्नत्व
15 स्यात् यस्माद्रूपमेव रूपं रस एव रसो भवति नेतरभावमापद्यते तस्माद्रूपादयः सन्ति, एवं तर्हि रूपादिमात्रलाभं घट इति स्यादाशङ्का सा मा भूत्–न च तथास्थितो घटो न भवति–यथा परस्परव्याप्त्या

---

उत्क्षेपणादिरूपमिति कर्म क्रियागुणव्यपदेशानां सद्भावात् भावात्मकत्वम्, यदि तद्गुणस्य कैकत्व क्रियागुणव्यपदेशाः सन्ति तस्मात् भावात्मकं तत्, भवन्तीव क्रियादिमान्, तस्मात् ते सन्तीति भावः । ननु कथमसौ घटो भावात्मकः सामस्त्येन भावाभाव-रूपैकाध्यवसायेन भावनामाह–सर्वसर्वेति न ह्येव सर्वं सर्वत्र न समवैति, अत च नियमात्सम्यक्त्वेन तदन्तः अत एव योग्यं
20 योग्य एव समवैतीत्यतश्च भावात्मकमिति भाव । दृष्टान्तमेवेह निदर्शनमाह–यथा रूप इति, गुणसमुदायो द्रव्यमिति सांख्यमते द्रव्यलक्षणम्, रूपादिगुणसमुदाय एव घटादिरूप समुदायरूपत्वा घट समुदायमिति प्रत्येकं रूपादौ वर्तते तथा रसस्येव रूपं न तत् निरिच्छ निधित्सयेति पौनमते प्रत्येकं रूपादिरेव घट एवं गुणसमुदायमिति वैशेषिकमत प्रत्येकं घट एव वर्तते एवं योग्यस्यैव योग्येषु दृष्टान्तस्मरणं भावात्मकमिति भाव । यदि प्रत्येकं कथमपि न वर्तते तदा दृष्टान्त यथा सिकतासु तैलं प्रत्येकमभावान्न सर्वं यदि घटादिसाधर्म्येण तद्गुणसैकरूप्येण सिकतासु प्रत्येकं तैलस्य सद्भावः न विद्यते घटादि तर्हि नासौ भावसिद्धान्तेनाह–
25 अथ पुनरिति यथा तैलं प्रत्येकं सिकतासु समुदाये च नास्ति तथा घट प्रत्येकं रूपाद्यभावे समुदायेऽप्यसत्त्वादनेन स्यादिति प्रत्येकमित्र तत्समुदायरूपम्, तस्मात् प्रत्येकमसत्त्वे एवं सामस्त्येन भावाभावात्मकमनिष्टमिति भावः । एतमभावात्मकत्व-मापादयन् भावयति–एकैकमिति पुनः एवं सामस्त्येन घटाद्यवस्थितत्वमनिष्टमित्याह रूपादीनामिति तत्र रूपादय प्रत्येकं सन्त यदि हि न प्रत्येकं सन्तो न भवेयुः तर्हि तदा समुदायेऽपि न स्यात् इतरथा रूपमपि च रूपस्य रूप एव कुतो रसत्वमपि न रूपत्वम् ? रूपस्य वा रसत्वं रसत्वम् ? यथा च यथा रूपमेव रूपं भवति न रसः रस एव च रसो भवति न रूपमिति परस्पर
30 व्यापकत्वाभावात् [illegible] तदर्थं रूपादिस्वभावरूपतापत्ती [illegible] रूपरसाद्यभावे घट-भावात्, प्रत्येकं रूपादिभावे वा घटभावात् रूपादीनामाधारत्वे वा घटत्वात्, तस्मात् रूपादिस्थितस्यापि प्रत्येकं तत्र एव सम-स्तेनावस्थितं वर्तते तैलं नाभाव न भावाभिन्नमनिष्टमसौ भाव । प्रत्येकमसत्त्वे दोषमाह–इतरथेति । एवं रूपस्य परस्पर-व्याप्त्या प्रत्येकं परस्परस्य तदुपपत्तिरित्याह–न च तथास्थितेति । तस्मात् असामस्त्येनापि घटो भावाभाव

चास्तत्वे सत्यपि रूपादयो भवन्तीति स्थितिः, तथा स्थितिः, एवं स्थितौ तथा घटोऽपि भवति, न न भवति रूप-रसयोर्भेदाभावात् तयोरितरेतराभूतयोरेव घटत्वात् तयोराधारभूतयोर्वा घटत्वात्, तदुपनयति—असामस्त्येन वा भावाभावात्मक एव घट इति ।

ननु घटरूपादिवत् पृथिव्यपि मृदादिर्विशेषः, यथा स्वाधारेषु घटो भवति रूपादय एव वा, न निर्मूलः तथा पृथिव्यपि मृदादिषु तदात्मिका वा तस्या एव ते विशेषाः, नाभावाः, 5
इतरथा निर्मूलत्वाद्घटस्य रूपादीनाञ्चासत्त्वं खपुष्पवत्, न चैतदिष्टम्, तथा च रूपादयो मृदादयश्च भावविशेषा एव, एकभवनात्मकत्वात्, घटघटस्वात्मवत्, न चैवमविशेषः, तद्विशेष एव विशेषः पृथिवीसामान्ये सत्येवोर्ध्वविस्तृततरवादिः घटोऽपि मृदेकभवनात्मकाकारविशेषो भाव एव, न घटाद्यभाव इति ।

ननु घटेत्यादि, वैशेषिको विशेषं भावात्मकमेव वाञ्छन् भ्यावृत्त्या मरु विशेषं निराकुर्वन्नाह—यथे 10
त्यादि, स्वाधारेषु घटो भवति, रूपादय एव वा, सिद्धान्ताभ्यन्तरदर्शनेन, घटो न निर्मूलः तथा पृथिव्यपि मृदादिषु—मृदश्मसिकतावालोष्टमरुमगुल्मलतावृक्षविवीरुधादिषु तदात्मिका[वा],तस्या एव ते विशेषाः रूपादय इव घटस्य, नाभावो विशेषः इतरथा निर्मूलत्वादभावविशेषत्वे घटस्य रूपादीनाञ्चासत्त्वमापद्यत्, खपुष्पवत्, न च तदिष्टम् एवं न्यायात् रूपादयो मृदादयश्च घटस्य पृथिव्याश्च विशेषो भाव इत्युक्तम्, यथा चैवमादि भावविशेषत्वभावनामयो भावइ विस्तृततरादिः, एकभवनात्मकत्वादिति हेतुः—एकमेव 15
भवनमेकस्यैव वा भवनमात्माऽस्येति विग्रहः, घटैकभवनात्मकं तथाभावविशेषः दृष्टान्तो घटघटस्वात्म वत्—यथा घट एव घटस्वात्मा नान्यत् खपुष्पादिवत् स्यान्मतमविशेषस्तर्हि भावः वैकभवनात्मकत्वात् मृदादिरूपादीनाम् घटघटस्वात्मवत् अभिन्नत्वमिति—अत्रोच्यते—न चैवमविशेषः घटस्वात्मन एव

एवं सर्वमपि—असामस्त्येनेति । अत्र द्रव्यात्मा एव पदार्थो पृथिव्यादिभेदेन द्रव्याणि नव रूपादिभेदेन चतुर्विंशतिर्गुणा-स्त्वेतस्यतीति एवं भ्यायाधिगमं वदन् वैशेषिको द्रव्यादीनामभ्यन्तरमेवान् भावरूपान् विशेषान् वाञ्छति न तु विशेषं भ्यावृत्ति- 20
रूपम्, खपुष्पमिति वर्तुं तन्मतमाश्रयन्नपरयति—ननु घटेति । भ्यावरेति—वैशेषिक इति द्रव्यादयो न निराधारा भवन्ति खपुष्पादिवत्, किन्तु घटो यथा स्वाधारेषु भवति घटस्य स्व आधार गुणसमुदायस्तदाधारे रूपादि गुणस्तद्द्रव्याधारेऽपि तथा समवेतेन तु भवतो रूपादिरस्यो वा स्वाधार तत्र भवति एवं द्रव्यस्याधार पृथिव्यादिरेव पृथिव्याधाधारे मृदादयस्ता त एव तद्विशेषा न तु भावात्मको द्रव्यादेरभावो विशेषो भवितुमर्हति निर्मूलत्वप्रसङ्गात् द्रव्यादीनामप्यसत्त्वमापद्येत द्रव्यस्य मूल-भावादेव भावस्य एव विशेषो नाभावरूप इति भाव । यथा घटस्य रूपादयो विशेषाः तथा पृथिव्या मृदादयो विशेषा 25
इत्याह—तथा पृथिवीति । यदि घटाभावो विशेषः स्यात्तदा निर्मूलत्वाद्घटो न स्यात् खपुष्पवदित्याह—इतरथेति । भावादिर्घ रूपादि भावरूपविशेषे इत्यत्र हेतुमाह—एकभवनात्मकत्वादिति । एकमनुगतत्वादभिन्नभवनात्मकत्वं द्वितीयमुक्तरूपा एकस्यभिन्नभवनात्मकत्वं हेत्वर्थं घटस्वात्मानुभवन प्रथमो हेतुर्द्वितीयस्यान्यतरत्र वर्तत इति विवेक । यथेति घटस्वात्मनोर्हि भवनं नान्यत् किं त्वेकमेवेति भावविशेष एव घटात्मा न तु खपुष्पादिवदसत्, एवं मृदादिरूपादीनामपि भाव । ननु एकभव-नात्मको घटघटस्वात्मानौ न परस्पर भिन्नौ किन्त्वेकौ अत एव च तयोर्न सामान्यविशेषत्वमपि मृदादिरूपादीनामपि पृथिव्यादिव- 30
त्याविशेष प्रसज्यत इत्याशङ्कते—स्यान्मतमिति । समाधत्ते—न चैवमिति घटघटस्वात्मवदेकभवनात्मकत्वादविशेषत्व-

१ सि क्ष. डे छा. यथा स्वाधिष्ठानाधारेषु । २ सि. क्ष छा यथा निर्मूलविस्तृतविवृताद्भिः भव । ३ सि क्ष "रूता-वल्लवीरुधादिषु छा "रूपादयः नहीं" । ४ सि क्ष एवम ।

देशकालरूपादिविशेषणतत्सम्येव भावविशेषसद्भावात्, अत आह—तद्विशेष एव विशेषो नामायः, कोऽसौ पृथिव्यादिविशेष इति चेदुच्यते पृथिवीसामान्ये सत्येवार्थविशेषणतयाविशिष्टो नामतः तथा घटोऽपि घटैकभवनात्मताकारविशेषो भाव एव न घटाघभाव इति ।

अत्राचार्य आह तदभिमत भैकभवनात्मत्व पृथिवीमूलेऽपि कुतो घटकात्मनः ? कस्मात् ? ५ तस्या अपि पृथिवीमूर्तेः—भूमिभवनस्य भावाभावात्मकत्वात्, तदभिदर्शयति—

ननु पृथिवीभवनमुदकाद्यभावभवनम्, एकदेशास्य मूलम्, तन्मूलत्वात् किमितरस्य सत्त्वापत्तिः ? ।

नन्वित्यादि पृथिवीभवनमुदकाद्यभावभवनं मतदेवास्य मूल—अभावविशेषभवनम् तन्मूलत्वात् किमितरस्यासत्त्वापत्तिः ? एवमभावविशेषसिद्धिरभावविशेषसिद्धौ मां प्रति न [1]किञ्चिदनिष्टमित्यभिप्रायः ।

10 पर आह—

न तन्तोपन्यासवद् द्रव्यमिति भवनात् पृथिव्यादिद्रव्यभवनाविनाभावेनैव भवति, ननु द्रव्यमपि गुण इति न भवति, न सदिति भवनात्, सत्त्वभवनस्यास्याभावस्यैव विशेष इति पूर्ववत् यदि सदित्येव भवति तर्हि सत्त्वाविशेषात् द्रव्यगुणकर्मणामव्यतिरेकात् केन विशेषहेतुना सदेव सर्वमिति भवति ? न द्रव्यमेव गुणकर्मणोरपि सद्भावात्, गुणकर्माभावा- १५ द्रव्यं सदिति भवति गुणकर्मणी च सद्भावात् यतस्तु पटः ।

(नति) न तन्तोपन्यासवत् द्रव्यमिति भवनात् पृथिवी द्रव्यभवनाविनाभावेनैव भवति पृथिव्यु दकादि पृथिव्युदकादिषु वा द्रव्यम्, इतरथा निर्मूलत्वादित्यादिः स एव ग्रन्थो यथायोगं वाच्यः ।

---

तस्य विशेषस्य भावरूपस्य सामान्यभावत्वात् न हि तन्तो भिन्नम्, घटत्वस्यैव हि भावविशेष घटाद्यार्थैरस्य पर्या- लोचनाविशेषस्य रूपादिभावाभाव भवत्वभावत्वेन विशेषत्वाद्भावविशेष एव विशेषो भवति न त्वभाव पृथिव्यादेरुक्तमिति २० तत्त्वादिविशेषाणामेव भावविशेषत्वमिति भाव । घटोऽपि च भैकान्तेन सामान्यस्यापि तु विशेषोऽपीत्याह तथा घटोऽपीति वस्तुत्वादिसामान्यापेक्षया सामान्यमपि घटो घटो भावविशेष भवत्यविनाभावात्, न तु घटाभाव एव विशेष इति भाव । तदभिमतं भवत्सम्मतैकान्तरूपं तत् कथं पृथिवीभवनस्यैव न भवति कथं तर्हि घटकत्वात्मनोऽभावात्मकत्वं पृथिवी- भवनं पुरुषत्वाद्यभावात्मकमिति न पुरुषाद्यभावात्मकत्वमेव पृथिवीभवनस्येति पश्यति पदम्, तस्मात् पृथिवीभवने तदभावभवनं मूलं यत्र मूलं तदेव विशेषभवनमतो भाव एव विशेष इति कथं पक्षे युक्तमित्यस्यैव भावाभावयोः विशेषित्वम- २५ इत्यं तदपि तदभिमतमिति । अत्राचार्य प्रश्नयति—नन्विति । अभावभवनस्यैव मूलत्वात्तन्मूलत्वेनाभावस्य विशेषत्वे निर्मूलत्वादिदोषप्रसङ्गात् इति चेदुच्यते तथा तत्र युक्तम् अभावविशेषसिद्धिरभावस्य विशेषत्वप्रसिद्धेः पृथिवी- भवनादिविशेषत्वात्तत्त्वाभावात् भावमात्रत्वमेव—एतदेवेति । ननु विशेषस्य सामान्यभवनाविनाभावित्वमेव एकभवनात्मकत्वात् विशेषाणां समुदाय तथा सा तदाधारे वा द्रव्यं भवति यदि विशेषोऽभाव स्यात् तर्हि कथं द्रव्यं भाव न तदभावतन्तुपटोऽ- भावात्मा तदभावभवने वा द्रव्य भवति तद्व्यतिरेकत्वाभावो विशेष इति पक्ष—नेत्याहेति । एतदेव विवृणोति—नतन्तोपन्या- ३० सवदिति । विशेषस्याभावरूपत्वे ऐवमाह—इत्यादि अभावभवनेन द्रव्यस्य निर्मूलत्वं रूपादीनामभावत्वाभावात् इति भाव । ननु द्रव्यमपि गुणो न भवतीत्यभावभवनम्, अन्यथा गुण इति द्रव्ये न भवेत्, द्रव्यभवनात् तदभावभवनस्य गुणाभावभवनावि-

---

1 सि छ. किञ्चिदनिष्टमिति ।

अत्रोत्तरं—ननु द्रव्यमपि गुण इति न भवतीत्यभावाविनाभाविभवनवचनं, न, सदिति भवनादिति, सत्त्व-भवनव्याप्त्या भावस्यैव विशेष इति पूर्ववत्, अभावबाधात्—यदि सदित्यादि, अनिष्टापादनमुखेनास्यार्थ समर्थनमिदम्, यदि सदित्येव भवति सत्त्वाविशेषाद् द्रव्यगुणकर्मणामव्यतिरेकात् पर्यायमात्रत्वे केन विशेष-हेतुना सदेव सर्वमिति भवति, न द्रव्यमेव इति, दृष्टत्वाद् द्रव्यमेव न भवति, गुणकर्मणोरपि सद्भावात्, गुणकर्माभावाद् द्रव्यं सदिति भवति, गुणकर्मणी च तदभावात् सती भवतः, न च द्रव्यादिव्यतिरेकेण 5 सन्नाम किञ्चिदस्तीत्युक्तत्वात् दृष्टविरुद्धमुच्यते त्वयेत्यत्र वयं ब्रूमः—यदसदित्यादि घटकर्मकर्तृक्रियाऽभावा विनाभाविभावप्रतिपादनं यथा तन्तुषु पट इति गतार्थम्, एवं तावदभावैकान्तपक्षव्यावर्तनद्वारेणाभावसहितो भावः प्रोक्तः ।

अतः परमभावैकान्तपक्षव्यावर्तनद्वारेणाभावसहित एवं भाव इत्येतत्प्रतिपादयिष्यते—

यथेयं घटो भवतीत्युक्तेऽप्यभाव एवोक्तो भवति घटो न भवतीति तर्हि भवतीत्युक्तेऽपि 10 न भवतीत्येवोक्तं भवति, परितो भवनाभावात्, खपुष्पवत्, ननु परितो वचनेन स्वात्मन्यप्यभवनमुक्तं भवति तथा असत्त्वात् पक्षधर्मोऽनर्थस्ते व्यङ्ग्ये कण्ठः कपाले नास्ति घटः कटादिर्न भवति नापि स्वात्मादिरिति ।

यथेयमित्यादि, अभावैकान्तवादिनं भावैकान्तवादी उपालभते—यदि घटो भवतीत्युक्तेऽपि

भूयत इति भावनाति–घट इति । व्याचष्टे–घटः कर्तेति भवितैव भवनमनुभवति प्रधानत्वात्, न तु भवनं भवितुं भवनं कर्तुमलमिति भावः । भवितृत्वाभावेऽपि यदि भवनमनुभवेत्तर्हि खपुष्पमपि भवनमनुभवेदित्याह–तेन भवनेनेति । एतदेव व्याचष्टे–यदीति यदि भवनमपि भवनमनुभवेत् तर्हि तत्स्वमेव भवेत् इत्यतोऽपि द्रव्यमिति कर्तृत्वमात्रान्वयात् ।
25 भवितृत्वेऽभावत्–कस्मादिति । द्रव्यस्य कर्तृत्वप्रसङ्गं व्याचष्टे भावप्रत्ययाति–कृत्यल्युट इति । ननु यथा भवनं नास्तीति तद्वत् एवमभवनस्यापि भवितुर्भवनं न सावीति चेदे–एवं तर्हीति । व्याचष्टे यथा भवित्रेति, एवं भावभावयोरपि भावाभावाभ्यामिति पूर्वोक्तम् भवनं हि निर्विशेषं सामान्यमात्रं भवत् दृष्टमपि तु भवित्रा वशीकृतमेव न खपुष्पवदभावः । व्याचष्टे–सत्यमेतदिति । सामान्यविशेषयोरन्यो सामान्यविशेषात्मकत्वे निर्विशेष विशेषो नियम्यते न तदा विशेषो नियमो यदा विशेषो नियम्यते न तदा नियमस्य प्राधान्यं स्यात्, न
30 चेदृशं सामान्यस्य प्राधान्यमित्याह–किं तर्हीति । विशेषस्यैव प्राधान्ये दृष्टान्तमाह–क्रियापदेति । व्याचष्टे

क्रियाभवनं प्रकृत्यर्थं उपसर्जनमप्रधानम्, शिबिकावाहकयानेश्वरयानवदिति विशेषभवनमेव भावभवनमिति पर्यायनयभेदोऽयं सर्वद्रव्यार्थभवनप्रतिपक्षभूतः ।

क्रियाघटेत्यादि, क्रियायां कारक—कर्ता, घटे रूपादिः, ग्रीष्मे मूलादिः, देवदत्तादौ पाण्यादिः, एते भेदा यस्य तद्भवनसामान्यं भेदप्रधानं दृश्यते लोके विशेषेण—उपसर्जनीकृतप्रधानेनेत्युभयम्, अस्मात् कारणात् विधिर्नियमश्च नियम्येते—सामान्यमुपसर्जनमेव विशेष एव प्रधानमिति विधिनियमौ नियतौ, न 5 यथा पूर्वत्र—उभयमेतं व्यभिचारो वा, विधिर्विधीयते नियम्यते च, नियमो विधीयते नियम्यते चेति तुल्यकक्षौ, अनन्तरातीतनयमतवत् उभयत्रोभयं—भावोऽपि भावो भवत्यभावश्च, अभावोऽपि[अभावो]भावश्चेति, संकरदोषात्, इहेति, अस्मिन्नये तस्य घटो विशेषो न घटाद्यभावः, स एव—विशेषः प्रधानं भावः, सामान्यं क्रियाभवनं प्रकृत्यर्थं उपसर्जनमप्रधानम्, किमिव ? शिबिकावाहकयानेश्वरयानवत्—यथा शिबिकावाहकानां यानमीश्वरयानार्थत्वादप्रधानमतः शिबिकावाहका यान्तीति नोच्यन्ते तैरुह्यमान ईश्वर एव 10 प्रधानत्वाद्यातीत्युच्यते तथा सामान्येन भवतापि अप्रधानेन भविता घट एव भवतीति प्राधान्यादुच्यते, तस्मान्निरूपितवस्तुस्वरूपमुपनयति—विशेषभवनमेव भावभवनमिति दार्ष्टान्तिकसमर्पणमित्यम्, पर्यायनयभेदोऽयम्, अस्य नयस्य पर्यायनयभेदत्वात् सर्वद्रव्यार्थभवनं प्रतिपक्षः तत्र विध्यादयो द्रव्यार्थभवनभेदा व्याख्याता दर्शिताश्च 'समनन्तरानुलोमाः पूर्वविरुद्धाः निवृत्तिनिरनुशयाः' (     ) इति न्यायक्रमेण ते च द्रव्यार्थभेदाः । 15

नामस्थापनाद्रव्य[ार्थ]भवनयोरव्याख्यातयोर्व्याख्यानं कृत्वा दर्शयति—

तत्र नामद्रव्यार्थभवनं तावत्—स्वरूपतो नमयति प्रह्वीकरोति सर्वमारम्भस्वभावेनेति नाम कारणं द्रव्यं तदेव कार्यं नामत्, भवनात्मकत्वात्, स हि शब्दो भवनात्मकः, भवनान्वयस्वाविशेषाः, समाविषत् पुरुषस्य बालादिवद्वा, पिण्डादिरूपादिवद्वा घटस्य ।

---

क्रियायामिति क्रियाकर्तॄणां कारकव्यतिरिक्तेनापि [illegible] कारकमय एव प्रधानं क्रियाविशेषसामान्यं 20 उपसर्जनमेवेति भावः । अत एव सामान्यमुपसर्जनमेव विशेष एव तु प्रधानमिति नियम्यते न [illegible] भवनस्य [illegible] नियम्यते—अस्मात्कारणादिति । अस्मिं उभयस्मिन् अस्मिन्नय इति [illegible] घटो विशेषत्वेन [illegible] न विशेषत्वेन [illegible] तत्रापि [illegible] विशेष एव प्रधानं तदर्थं सामान्यस्य [illegible] अत एव सामान्यमप्रधानं भविता विशेषेण [illegible] । अत्र दृष्टान्तमाह शिबिकेति, [illegible] शिबिकावाहकानां [illegible] शिबिकावाहकानाम् [illegible] यान्तीति नोच्यन्ते [illegible] 25 ईश्वर एव यातीत्युच्यते तथा सामान्यं भवदपि अप्रधानत्वात् भवतीति नोच्यते किन्तु तेन भविता विशेष एव भवतीत्युच्यते प्राधान्यादिति भावः । निरूपितवस्तुस्वरूपं दार्ष्टान्तिकसमर्पणमुपनयतीत्याह—तस्मादिति । [illegible] प्राधान्येन प्रतिपत्तव्यत् पर्यायनयभेदोऽयं नय इत्याह—पर्यायनयेति । एतस्य प्रतिपक्षभूता द्रव्यार्थनयाः विध्यादयः, ते निरूपिता दर्शिताश्चेत्याह—सर्वद्रव्यार्थेति । [illegible] । नामस्थापनाद्रव्यभवनचतुर्विधभवनमध्ये नामस्थापनाद्रव्याणि [illegible] न निरूपितानि [illegible] अतस्तानि निरूपयति—तत्र 30

---

१ सि क्ष. क्रियां करोत्यादि । २ सि क्ष मता । ३ सि. क्ष. [illegible] यथावत् । ४ सि क्ष. 'भवनं प्रतिपक्षभूतमिव्या ।

(तमेति) तत्र नामद्रव्यार्थमतेन तावत्—स्वरूपतो नमयति प्रह्वीकरोति सर्वमात्मसमानभावेनेति नाम कारणं—करोतीति द्रव्य—प्राग्भावाद्यवार्थं भवद एव तावद्वचनं तद्रव्यं कारणनामेत्युच्यते—भवनेन भवत्सदसित विश्वस्य कारणं प्राग्भूत्पुरुषादिकारणवदेकमेव नाम—आत्मा, आह—करोतीति कारणमुक्तं कार्या-भावात् किं क्रियते? यत् कुर्वत् तत् कारणं स्यात्, तस्मात् कार्याभावात् कारणत्वाभावः, कारणत्वा-
5 भावात् स्वलक्षणाभावात् खपुष्पवदसदिति, उच्यते—तदेव कार्यं कारणमेव नाम कार्यं नासत्, कुतः? भवनात्मकत्वात् स हि भावो भवनात्मकः, भवनान्यत्वाविशेषाः, तत्प्रविभक्त् पुरुषस्य, बालादिवत्, पिण्डादिरूपादिवत् घटस्य, तस्मात् स एव कारणं स्वावस्थाविशेषात्मा कार्यात्मेति ।

अनयोरिदमस्य कार्यकारणभावस्य निरूपणार्थमुदाहरणं घट घटस्य हीत्यारभ्यते—

घटस्य हि कुम्भकारचेतना कारणं, नामूर्त्तात्मा, ततः किं कुम्भकारशरीरं कर्तृत्वात्
10 मूर्तत्वात् मृदाद्यात्मकत्वाद्घटस्य मूर्तस्य कारणं सम्भाव्येत? यदस्तु तदस्तु कार्यं कारणं सर्वथा चैतन्यरहितस्य मूर्तद्रव्यस्य मूर्तिरहितस्यापि वा चेतनस्य कारणत्वासम्भवान्मूर्तचै-तन्यात्मकः कुम्भकारः, सर्वमपि चैतन्यमेव ।

(घटस्य हीति) घटस्य हि कार्यस्य यस्मात् कुम्भकारचेतना कारणम्—कुम्भकारत्वसमर्थशरीर सहिता, चेतनारहितत्वादकारणत्वात्, आत्मा तर्हि कारणमस्तु चेतनत्वादिति चेत् तथाऽमूर्तात्मा, अका-
15 रणत्वात् ततः किं कुम्भकारशरीरं कर्तृत्वात् मूर्तत्वात् मृदाद्यात्मकत्वात् घटस्य मूर्तस्य कारणं सम्भाव्येत?— मृत्स्वक्रियाद्यात्मकत्वाद्घटस्य मूर्तक्रियाद्यात्मकमेव कारणं सम्भाव्येत?, यदस्तु तदस्तु कार्यं कारणं,

नामेति । व्याख्ये—स्वरूपत इति सर्वभावान् स्वसमानैव भवो नमयति तत् एकैकाम कारणं द्रव्यं भवति भवनक्रियाद्यना-नर्थान्तर द्रव्यत्वादिति भावः । [illegible] द्रव्यार्थं भवत एव कारणं द्रव्य-योगात्—प्राग्भावाद्यवार्थमिति । तत्र कारणमेकमेव पुरुषस्वभावादिनिमित्तादिरित्याह—भवनेनेति । यदि सर्वभावस्वभावेन
20 नमयति तदा सर्वं नाम भवति, नाम चैकमुच्यते तर्हि तत्कार्यं न भवेत् तत्कारणत्वस्य वस्तुनिरूप्यभावात्, तथा च किं कारणं तत् कारणं भवेत् तस्मात् कारणत्वमपि नाम नास्ति खपुष्पवदित्याशङ्क्यते—करोतीति । सर्वं स्वस्वभावमेव भवतीति नामोच्यते तदेव सर्वं कार्यमूर्तं नाम भवति तत्पूर्वेण वा तदैव भवनात् तत्कार्यमपीत्याह—तदेव कार्यमिति कारणमेव कार्यं भवनात्मकत्वादिति भाव । [illegible] तदेव कार्यं पुरुषस्य बाल्यादिवत् भवति [illegible] स हीति एक एव भावो [illegible]
25 [illegible] परस्परं भिन्ना अपि पुरुषस्यैव भवति तस्मात् [illegible] एव कार्यकारणभावोऽपीति भावः । मूर्तामूर्त वा सर्वं चैतन्यमेव [illegible]—घटस्य हीति । व्याख्ये घटस्य हि कार्यस्येति [illegible] चेतना कारणं [illegible], चेतना विना कार्याभावात्, किन्तु कुम्भकारत्वसमर्थशरीरसहितचेतना कारणं स्यात् यथा च [illegible] तत्कारणं परमाण्वादेरपि [illegible] भवति तदेव [illegible] तत्कारणस्यापि [illegible] सर्वं कार्यवत् चैतन्यमेव वा [illegible]
30 [illegible] भावः । कारणमिति [illegible] कारणता प्रतिषिद्धा । [illegible]—[illegible] मूर्तो यदि कारणता प्रतिषिद्धा । मूर्तस्य मूर्तमेव कारणममूर्तस्य [illegible] सम्भाव्येत—कुम्भकारशरीरमिति । तदेवाह—यदस्तु तदस्त्विति ।

1 डा॰ [illegible] ।

सर्वथा चैतन्यरहितस्य मूर्तद्रव्यस्य घटसजातीयस्यापि मूर्तिरहितस्यापि वा चेतनस्यासजातीय[स्य]घटकारण त्वासम्भवात् मूर्तचैतन्यात्मक कुम्भकार०–पृथिव्यप्तेजोवाय्वाकाशात्मानः संहत्य कुम्भकारात्मा भवन्ति; तच सर्वमपि चैतन्यमेव–शब्द एव, कुम्भकारवत् घटवत् चैतन्यविपरिवर्तस्वरूपं पृथिव्यादात्मविमूर्तामूर्तभेदप्रभेदं जगत् ।

अपर आह–शब्दस्तवत्समाकाशगुणो वा शब्दः श्रोत्रमात्रग्राह्यत्वस्य शब्दसंज्ञत्वादिति केचि- 5
त्कथितवन्तः, तत्कथोपपत्त्यर्थमुच्यते शब्द एव सर्वमित्यत्रोच्यते–

कुम्भकारो ह्यात्मा तत्सन्निविष्टशब्दानुविद्धचैतन्यस्वरूपत्वात्तच्छब्दात्मकः, तदनुरूपास्ता शब्दानुविद्धचैतन्यमेरितपिण्डशिवकाद्यनुक्रमप्रवृत्तयोऽपि तदात्मिकाः, तत्प्रवृत्तित्वात्, मृत्प्र- वृत्त्यात्मकघटवत्, तद्भावे तद्भावात्, तदभावे न प्रवर्तते, तन्तुवायवत् ।

कुम्भकारो हीत्यादि, हिशब्दो हेत्वर्थे, कुम्भकारस्तावदात्मा, तत्सन्निविष्टशब्दानुविद्धचैत- 10
न्यस्वरूपत्वात्तच्छब्दात्मकः, तदनुरूपास्ताः शब्दानुविद्धचैतन्यमेरितपिण्डशिवकाद्यनुक्रमप्रवृत्तयः–क्रिया अपि तदात्मिकाः, तत्प्रवृत्तित्वात्, मृत्प्रवृत्त्यात्मकघटवत्, तद्भावे भावात्, वैधर्म्येण तदभावे–तदनुरूपास्ताः सन्निविष्ट[शब्दानुविद्ध]चैतन्याभावे न प्रवर्तन्ते, तन्तुवायवत् ।

साम्प्रतं तदनुरूपचैतन्यात्मकत्वमस्तु, प्रवृत्तेश्चैतन्याविनाभावात् शब्दात्मकत्वं तु साम्यमित्यत्रो- च्यते, किमत्र साम्यम्? सिद्धमेवैतत्– 15

---

भावार्थमाह–सर्वथेति मूर्तत्वेन घटसजातीयस्यापि कुम्भकारशरीरमात्रस्यासजातीयस्य चात्ममात्रस्य घटकारणत्वासम्भवात् मूर्तचैतन्यात्मक कुम्भकार कारणम्, स च पृथिव्यप्तेजोवाय्वाकाशात्मक इति भावः । पृथिवीति अनेन वस्तुमात्रं प्रदर्शितं पञ्चमहाभूतात्मकत्वप्रदर्शनात् । तच सर्वमपीति, पृथिव्यप्तेजोवाय्वाकाशात्मकत्वेन सर्वमपीत्यर्थः । चैतन्यमेवेति चन्द्रा- श्रोतव्यात्मत्वात् पञ्चभूतात्मकं घटवदेवेति भावः । भावार्थमाह–शब्देति । ननु एवं श्रवणम्, शब्दात्मकत्वमेवानुपपन्नम्, इत्याशङ्क्य शब्दस्य केवलमाकाशगुणत्वतया वैशेषिकैराकाशगुणत्वेन व्यवहारात्, योऽर्थो हि श्रोत्रेन्द्रियेण गृह्यते स एव शब्द उच्यते न सर्वं 20
[illegible] समाधत्ते–कुम्भकारो हीति । ये शब्दाकाशानुसूताः तन्मयाः यथा कुम्भकारादयस्तावत् [illegible] पञ्चमहाभूतानि पृथिव्यादीनि प्रतिस्वरूपवाय्वाकाशानुसूतानि सर्वमात्मा एकत्र निर्विकल्पकं सविकल्पकं वा ज्ञानं बोधः इत्यादि किम इति तदभिनिविष्टमेवार्थमवबोधयति, शब्दानुविद्धं शब्दात्मकं विज्ञेयम् तस्य पुनः शब्देनैव सर्वमिति शब्दात्मकतया प्रत्यक्षादिवत् तदनुभूयमानं बोधयतीति सोऽपि विशेषः तस्य पृथिवी अन्य पदार्थोपलक्षणं प्रतिमादीनामपि तद्वत् कुम्भकारस्तावदिति अत्र विशेष्यो घटकत्वेन तत्सन्निविष्टशब्दानुविद्धचैतन्यस्वरूपत्वात्, शब्दात्मकत्वेन तदात्मकत्वम्- 25
त्मक एव कुम्भकार इति भावः । तदात्मकत्वात् शब्दानुविद्धचैतन्यमेरितपिण्डशिवकाद्यनुक्रमप्रवृत्तयः क्रियाः [illegible] तदात्मिका एव, पिण्डादीनां तत्प्रवृत्तित्वादित्यर्थः । व्याप्तिं दर्शयति–तद्भाव इति । मृदि प्रति चैतन्यस्य कारणत्वेन पिण्डादिभावतः पिण्डादि- प्रवृत्तेः शब्दानुविद्धचैतन्यात्मकत्वं भवतु सर्वं शब्दात्मकत्वं तत्साम्यमिति–साम्प्रतमिति । सर्वं प्रवृत्तं उपचारमात्रं वस्तु विनिविष्टं शब्दानुविद्धचैतन्यात्मकत्वेन शब्दानुविद्धत्वात्, एवं हेतुरपीति परामर्शादिति हि चैतन्ये चैतन्यात्मकत्वं 30

---

१ सि क. डे क. तदादिविनिविष्टशब्दा । २ सि. × × । ३ सि. × × ।

न हि काचिदपि चेतना अशब्दाऽस्ति, अनादिकालप्रवृत्तशब्दव्यवहाराभ्यासवासित्वात् विज्ञानस्य, चैतन्यमेव हि पश्यन्त्यवस्था मध्यमावैखर्योरवस्थयोरुत्थाने कारणं नामेत्युच्यते, कारणात्मकत्वात् कार्याणाम्, यथोक्तं 'वैखर्या मध्यमायाश्च पश्यन्त्याश्चैतदद्भुतम्' (वाक्य० का० १ श्लो० १४२) इत्यादि ।

5 (न हीति) न हि काचिदपि चेतना अशब्दाऽस्ति, अनादिकालप्रवृत्तशब्दव्यवहाराभ्यासवासितत्वात् विज्ञानस्य, चैतन्यमेव हि पश्यन्त्यवस्थानं मध्यमावैखर्योरवस्थयोरुत्थाने कारणं नामेत्युच्यते, कारणात्मकत्वात् कार्याणाम् यथोक्तं 'वैखर्या मध्यमायाश्च पश्यन्त्याश्चैतदद्भुतम्' ।' (वाक्य० का० १ श्लो० १४२) इत्यादि ।

साम्प्रतं शब्दव्यवहारानभिज्ञेष्वव्यक्तचेतनेषु विज्ञानोत्थापितप्रवृत्तिसम्भवे व्यभिचारमिति
10 चेन्नेत्युच्यते—

येऽप्यव्यक्तचेतना जङ्गमाः स्थावराश्च तेऽपि शब्दाभ्यासवासनाजनितान्तर्निविष्टत्वा नुरूपचैतन्याः, हिताहितप्रवृत्तिनिवृत्तिवृत्तत्वात्, कुम्भकारवत् ।

येऽप्यव्यक्तचेतना इत्यादि, कृमिपिपीलिकादीनां जङ्गमानां वनस्पतिप्रभृतीनां स्थावराणां च शब्दाभ्यासवासनाजनितान्तर्निविष्टतानुरूपचैतन्यास्तित्वं प्रतिज्ञायते, हिताहितप्रवृत्तिनिवृत्ति-
15 वृत्तत्वात्, कुम्भकारवत्—हिताहितयोः प्रवृत्तिनिवृत्ती निमित्तसप्तमी सम्बन्धषष्ठी वा, हिताहितप्र-

---

नास्ति चैतन्यस्य [illegible]—न हीति । व्याचष्टे—न हीति [illegible] विना ज्ञानं नास्ति [illegible] ज्ञानं [illegible] [illegible] [illegible] ज्ञानस्य च [illegible] [illegible] ज्ञानं न [illegible] चेतनेति भावः । न हि [illegible] चेतना [illegible] ना च [illegible] [illegible] [illegible] च, [illegible] [illegible]
20 [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] कार्यं [illegible] [illegible] कार्याणां कारणात्मकत्वात् [illegible] [illegible] [illegible]—चैतन्यमेव हीति [illegible] [illegible] [illegible] पश्यन्तीरूपा [illegible], न [illegible] [illegible] वर्तते [illegible] [illegible] [illegible] [illegible] पश्यन्तीरूपा [illegible] [illegible] मनो[illegible] मध्यमा [illegible] [illegible] [illegible] [illegible] [illegible] [illegible]
25 [illegible] [illegible] इति भावः । ननु [illegible] [illegible] [illegible] कार्याणां कारणात्मकत्वं व्यभिचरतीत्याशङ्कते—साम्प्रतमिति । समाधत्ते—येऽपीति । व्याचष्टे—कृमीति । [illegible] [illegible] स्थावराणां [illegible] [illegible] एव । सर्वं हि ज्ञानं [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] हि [illegible] न [illegible] [illegible] [illegible]
30 [illegible] [illegible] भावः । अनुमानं हेतुं दर्शयति—हिताहितेति । हिताहित[illegible] हिताहित[illegible] हेत्वर्थमाह—निमित्तेति । हिताहित[illegible] [illegible] हेत्वर्थमाह

१ सि क्ष डे. कारम् । २ सि. क्ष. [illegible] ।

चित्प्रवृत्त्योर्दृष्टत्वात्, इत्यमूर्तत्वेन तृतीया वा हिताहितप्रवृत्तिनिवृत्तिभ्यां दृष्टत्वात् तस्मादागमो-पदेशेन हितप्रवृत्तिपूर्वकत्वं गर्भान्मातृपितृप्रयत्नतो गमनमहितनिवृत्तिपूर्वकत्वमेवेति सिद्धो वेणुवर्धनसविष्यपि, कुम्भादीनामुपादानशब्दान्विताद्यायितगमनागमनादिक्रिया यथावदविनाभाविन्यः सिद्धा एवातो हिताहितप्र-वृत्तिनिवृत्तिपूर्वकत्वात् विद्यते शब्दानुविद्धचैतन्याविनाभाविनी यथा कुम्भकारे, तथात्वेपूपमेयेषु साध्यते, कुम्भ-कारादिषु तु दृष्टान्तेषु व्यक्तमेव प्राणिप्रसक्तोऽन्यथा विक्रियाऽलिङ्गम्, तेन विज्ञानमविनाभावित्वात् सिद्धमेव, 5 शब्दानुविद्धत्वं तु साध्यत इति ।

नैतत् स्वामिमतोपदिष्टमेव, किं तर्हि ?—

भगवदर्हद्वाक्यापि तथोपश्रूयते—'सव्वजीवाण पि य णं अक्खरस्स अणंतभागो णिच्चुग्घा-डिओ' ( नंदी० सू० ५१ ) इत्यादि,

(भगवदिति) भगवद्वाक्यादपि तथोपश्रूयते—'सव्वजीवाणं पि' (नंदी० सू० ५१) इत्यादि, अक्ख- 10 रानन्तभागत्वविशेषेण श्रुतज्ञानप्ररूपणावसरेऽकेन्द्रियादिस्वामिकमुक्तं सूत्रे तथा भाष्येऽपि 'त पि जदि आवरिज्जेज्ज, तेण जीवो अजीवत्तं पावे, सुट्ठुवि मेहसमुदये होइ पहा चंदसूराणं' (        )

अतो यथैव कुम्भकारकरणशब्दचेतनावैचित्र्यप्रवृत्तिविस्तारतत्प्रत्यासत्तिसमुपस्थितरूपा घटता मात्रः साक्षाद्भवति तथा तथा तत्प्रभवमेव कुम्भकारमनुष्यशरीरं मृदादि च, शब्दो-पयोगसम्बन्धात् योगपद्यकाललविसंवादनादेः, रूपादिमद्द्रव्यविरचनात्मकत्वात् कुम्भकारकार्य- 15 वत्, यथा हि घटपिठरादिकुण्डकार्यं तेन तेन मृन्मर्दनादिप्रकारेणान्तःसन्निविष्टशब्दा-नुविद्धकुम्भकारप्रवृत्त्या निर्वर्तितत्वात् तत्प्रभवं तदात्मकं रूपादिमद्द्रव्यविरचनात्मकत्वात् तथा कुम्भकारशरीरमृदाद्यपि ।

(अतो यथैवेत्यादि) तत्कार्योपलब्धरूपेण दृष्टान्तवद्घटो यावत्साक्षाद्भवति तथा तथेति, कुम्भ-कारः शब्दानुविद्धचेतनात्मकः तत्क्रियापि तदात्मिका विचित्रा पिण्डशिवकाद्यपर्यन्तस्पन्दभेदा शब्दचेतनैव, 20 तस्या वैचित्र्येण प्रवृत्तेस्तारतम्येनोत्तरोत्तरोत्कर्षपरम्परयाऽभ्यासनं, तेन समुपस्थितं रूपमस्या घटतायाः सा

भाव-इत्यमूर्तेति [illegible] तदाभासे पुरोवर्तिनः । पक्षे हेतुमपि दर्शयति-तस्मादिति । [illegible] [illegible] शब्दानुविद्धचैतन्याविनाभाविन्यः [illegible] [illegible] शब्दानुविद्धचैतन्य-[illegible] तत्र विज्ञानं तु [illegible] [illegible] साध्य इत्याह-सुसेति । न केवलं [illegible] साध्यते किन्तु [illegible] साध्यत इत्याह-भगवदिति । भाष्येऽपि-अक्खरेति । [illegible] कुम्भकारकार्ये 25 [illegible] दर्शयति-अतो यथैवेति । तदेव व्याचष्टे-कुम्भकार इति शब्दानुविद्ध[illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] वैचित्र्येण प्रवृत्तेरिति [illegible]

1 डा. भगवदर्हदा । 2 मि अत्तेतो ।

कुम्भकारकरणक्रमापेक्षमाणो मृत्पिण्डादिक्रमाभ्यासन[य]नुपातिरूपा घटता सा भावाभावो भवति यथा
तथा–तेन तेन प्रकारेण पिण्डशिवकादि[ना]रूपादिगुणपुद्गलादिना भवति दृष्टान्तः, दार्ष्टान्तिकोऽर्थोऽधुना–
तथा तत्कर्मैव–शब्दचलनात्मकमेव कुम्भकारमनुष्यशरीरं मृदादि–मृदादिवत्तदात्मकभावप्रतिबन्धनि-
बीजादिपदस्थानीयं आदिमदणुरसेभ्योऽगाद्युपनतजीवितपञ्चशरीरं देवशरीरं नारकीयम्, तदुपपत्ति-
5 संप्रयोगाभ्यासादि,–अध्यात्मकं परयोगः शुभाशुभं न्यायप्रत्ययं तत्कर्मयोगात्, 'कायवाङ्मनःकर्म योगः'
[तत्त्वा० अ० ६ सू० १] 'शुभोऽशुभस्य वा, स आस्रवः' [तत्त्वा० अ० ६ सू० २] 'पुण्यपापयोः'
एकेन्द्रियादिजाति नाम्नः तिर्यग्भेदस्य [अशुभस्य] योगवक्रताविसंवादनाम, [तत्त्वा० अ० ६ सू० २१]
तद्विपरीतं योगावक्रताविसंवादनं शुभस्य मनुष्यदेवपञ्चेन्द्रियजातिनाम्नः, आदिमदणुर् [योगवक्रता]विसं-
वादनमदस्मात् आदेरिति पञ्चमीनिर्देशाद्धेतोरित्यर्थः, कुम्भकारशरीरमृदादि तथा तथा तत्कर्मैवेति वर्तते,
10 तत्कर्मेदं सक्रियमुत्पत्त्या न पुनर्हेतुना क्रमानुविद्धैकस्वात्मकमिति चेत्तर्हि शृणु–रूपादिमदर्थविरचना-
त्मकत्वात् रूपरसगन्धस्पर्शशब्दसंस्थानसामान्यादयो रूपादयः, ते यस्य सन्ति सोऽर्थः रूपादिमदर्थः, तस्य
विरचना–परस्परसम्बन्धानुरूप्येण घटना [सा] आत्मा यस्य स्वरूपं मनुष्यतिर्यग्देवनारकादिमनुष्यकुम्भ-
कारशरीरपदादेरिति भाविसेवेन सम्पद्यते कुम्भकारकार्यमिति दृष्टान्तः यथाहि घटपिठरादि कुम्भकर्म
तेन तेन घट्टनादिप्रकारेणान्तःसमभिनिविष्टक्रमानुविद्धकुम्भकारस्वभावतया निर्वर्तितत्वात् तत्कर्म तदात्मकं–
15 कुम्भकारस्वभावात्मकं रूपादिमदर्थविरचनात्मकत्वात् तथा कुम्भकारशरीरमृदाद्यप्यन्तःसमभिविष्टक्रमानु-
विद्धैकस्वभावात्मकमिति ।

---

एतस्य कार्येऽपिण्डसमेतादिविधिवस्य कार्यस्य समारम्भप्रवृत्तिभेद इतिवाचः तथा च विशिष्टकालस्य पायस्यादिसाधर्म्येण
संविधिनिर्माणविवक्षयोक्त इति भावः । एवं दृष्टान्तमभिधाय दार्ष्टान्तिकमर्थं व्याचष्टे–तथा तत्कर्मैवेति तत्कर्मस्वरूपेण
कुम्भकारादिमनुष्यशरीरं पृथिव्यादिजीवशरीरं देवशरीरं नारकशरीरं चेति भावः । [illegible] दर्शयति शब्दोपयोगेति मनुष्यादिकर्मणः
20 कारणानां कर्मादीनां व्यापारस्य पुद्गलानामभ्यासादिकत्वं । कायवागिति वीर्यान्तरायक्षयोपशमजन्यकर्मनिमित्तः आत्मप्रदेश
परिस्पन्दोऽयमेवाधिकृत [illegible] वाचकम्, काय शरीरं पुद्गलद्रव्यघटित आत्मन उपभोग्यः तदेव
[illegible] काययोगः [illegible] वाग्द्रव्यमूल [illegible]
[illegible] मनोयोगः [illegible] कारणं वाग्विधि, [illegible]
[illegible] मनोयोग एते योगाः शुभाशुभभेदेन द्विविधाः एषु त्रिविधोऽपि योगः पुण्यपापयोरास्रवो भवति तदेवेविधा-
25 [illegible] शुभ एव आस्रव इति भावः ।
[illegible] आस्रवान्तरमाह–योगवक्रतेति [illegible]
[illegible] आस्रव इत्यर्थः । शुभनाम आस्रवमाह–तद्विपरीतमिति ।
[illegible] कुम्भकारशरीरादिभिन्नत्वाभावेन तथा–रूपादिमदिति । इदं व्याचष्टे–रूपर-
सेति । दृष्टान्तं स्मरति–यथा हीति स्पष्टम् । ननु च शब्दादयो मनसोऽपुत्वं तद्युक्तं [illegible]

---

१ सि × × । २ सि क्ष क्ष तदात्मकं ।

अत्राह—ननु भवत एव दण्डादिबहिर्निमित्तात्स्वे घटादयो निर्वृत्ताः कथमिदमवधार्यते नाम्ना साक्षाद्भवति च दण्डादिभ्य इत्यत्रोच्यते—

नाम्न एव च प्रभावात् तत्प्रेरितप्रयत्नपरिस्पन्दजनितनिष्पत्तिवस्तुनो वस्तुत्वं लभ्यते न बहिर्निमित्तापेक्षम्, दण्डप्रभृतीनामपि स्थाने स्थाने शब्दचेतननियोजितानामात्मलाभात् तदात्मत्वम्, इतरथा स्वरूपप्रवृत्तिरेव दुर्लभा, कुतो वस्तुत्वम्? तस्मात् सर्वकारकसान्निध्येऽपि [5] कर्तुरौदासीन्ये तदभावे वा क्रियायाः कार्यस्य चाभावाच्छब्दप्रभावमयं सकलं जगत्, तथा हि स्कन्दरुद्रेन्द्राः स्कन्दनरोदनेन्दननिमित्तानुपपत्तावपि जीवस्याजीवस्य वा निमित्तनिरपेक्षाः संज्ञाः क्रियन्ते ।

नाम्न एव चेत्यादि, दण्डादीनां तावदप्यभिज्ञत्वात्[illegible]शब्दचैतन्यस्यैव प्रभावात् तत्प्रेरितप्रयत्नपरिस्पन्दजनितनिष्पत्तिघटाख्यस्य वस्तुनः तद्वस्तुत्वं घटत्वं नाम्न एव महिमा लभ्यते, न बहिर्निमित्तापे- 10 क्षम्, दण्डप्रभृतीनामपि स्थाने स्थाने शब्दचेतननियोजितानामात्मलाभात्तदात्मत्वम्, इतरथा—तेषामतदात्मत्वे स्वरूपप्रवृत्तिरेव दुर्लभा, कुतो घटस्य घटत्वं वस्तुत्वम्? तस्मात् सर्वकारकसान्निध्येऽपि कर्तुरौदासीन्ये तदभावे वा क्रियायाः कार्यस्य चाभावः घटोपजनपर्यायादेः अतः शब्दप्रभावमयं सकलं जगदिति, यथा हीत्यादिना निरूपयति, हिरण्यगर्भो निदर्शने—एतच्च कृत्वा स्कन्दरुद्रेन्द्राः—स्कन्दिर् शोषणे, रुदिर् अश्रु- विमोचने, इदि परमैश्वर्ये इति स्कन्दनेन निमित्तेन स्कन्दः, रोदनेन रुद्रः, इन्दनेनेन्द्र इत्येतेषां निमित्ताना- 15 मनुपपत्तावपि गोपालपशुपालादेर्जीवस्याजीवस्य वा काष्ठपाषाणादेर्निमित्तनिरपेक्षा[ः]संज्ञा[ः]क्रियन्ते[1] स्कन्दो रुद्र इन्द्र इति, गोपालादीनामेव तैस्तैः शब्दैः सर्वोऽपरथाऽऽरोपवशाद्योच्यते ।

स्यान्मत भवतीति भवो रोदितीति रुद्रः इन्दतीति इन्द्र इति देवताविशेषाख्यनिमित्तभूतार्थमात्राः सम्यक्संज्ञाः समयान्तरप्रसिद्धाः तन्मुख्यप्रवृत्तेरितरत्रोपचारो भविष्यतीत्येवमाशुक्तम्—

स्वेनाभिधानवाच्ये—अत्राहेति । शब्दचैतन्यव्यतिरिक्तमात्मकारणत्वेऽपि कुम्भकारादिचैतन्यवत्त्व एव कार्यार्थस्वात्म- 20 मात्रिकशुद्धत्वात्म्यात्र भवनकारणं शब्दचैतन्यमिति मन्योत्तरयति नाम्न एव चेति । नाम्नोऽपि—दण्डादीनामिति सर्वं दण्डादिकार्थानां शब्दचैतन्यवत्त्वेन प्रवर्तते न तु तामन्तरेण सर्वेषां शब्दचेतनप्रयोगित्वेन तदात्मत्वात्, यदि तेषां तदात्मता न स्यात् शब्दचैतन्यं न प्रवर्तत एव यस्मात् प्रवर्तन्ते हि शब्दज्ञानात् प्रवृत्तिः तस्मात् [illegible] साक्षादात्र एव भवतीति भवः । तत्प्रेरितेति तेन प्रेरितो यः प्रयत्नरूपः परिस्पन्दस्तेन जनिता निष्पत्तिर्यस्य घटादेस्तम् । दण्डादिवस्तुप्रवृत्तौ तत्रान्यत्र दण्डप्रभृतीनामपि नाम्न प्रभावादेवेत्याह—दण्डप्रभृतीनामपीति दण्डादिबहिर्निमित्तप्रवृत्तीनामपीत्यर्थः । तदप्रवृत्तावतदात्मतया- 25 नुपगमे यातद्[illegible]प्रवृत्त्यन्तरं प्रति [illegible] न प्रवर्तेतेत्याह—तेषामतदात्मत्व इति । अथ निमित्तान- पेक्षत्वात् साक्षात् शब्दादेव सर्वेषु भवनात् सर्वभावानां शब्दात्मकत्वाय स्कन्दनरोदनादिनिमित्तापेक्षामन्तरेणैव [illegible] जीवस्याजीवस्य वा क्रियन्त इत्याह—तथा हीति तदर्थस्य [illegible] शब्दप्रभावमयत्वसाधीयस्त्वं । हि शब्दो न हेत्वर्थे अपि तु निदर्शनार्थं इत्याह हिरण्य इति । भावं निरूपयति—एतच्च कृत्वेति । स्कन्दनेनेत्यादि स्कन्दनादिनिमित्तस्तु समयान्तर- प्रसिद्धदेवताविशेषेषु मुख्यया वृत्त्या वर्तमानाः [illegible]गोपालादिषूपचारेण प्रवर्तन्त इत्याशङ्कते—स्यान्मतमिति । 30 गोपालेष्वेव मुख्यया वृत्त्या स्कन्दादिशब्दैरभिधेया [illegible] [illegible]

1 सि. क्ष. डा. [illegible] । 2 सि. [illegible] । 3 सि. क्ष. [illegible] । 4 सि. क्ष. [illegible]रोपवशात् । डा. सम्यगारोपवशात् ।

प्रत्यक्षत्वात् गोपालादय एव तद्भूता मुख्यया वृत्त्योच्यन्ते, ते तु भवत्कल्पितेन्द्रादयः समयान्तरप्रसिद्धसम्बन्धपरिकल्पनगम्या न सर्वलोकप्रसिद्धशब्दाभिधेयाः, तस्मात्त एव तेषु प्रत्यक्षाः, येऽपि च ते स्कन्दादयस्तेष्वेकस्मिंश्चिदितरयोरपि संज्ञयोः प्रवृत्तिनिमित्तसद्भावात् त्रयोऽपि परस्परसंज्ञानिर्देश्याः सङ्कीर्णाः स्युः, अन्यतमनिमित्तमात्रतत्त्वयाऽप्रभूतया संज्ञया 5 विवक्षितेतरार्थव्यवहरणात्तु अन्तर्निविष्टशब्दानुविद्धचैतन्यनिमित्तः संज्ञाव्यवहारोऽभ्युपगतो न बहिर्निमित्त प्रत्यक्षम् ।

प्रत्यक्षत्वादित्यादि यावच्च यत्र तेषु प्रत्यक्षाः, ते भवत्कल्पितेन्द्रादयः समयान्तरप्रसिद्धसम्बन्धपरिकल्पनगम्या न सर्वलोकप्रसिद्धशब्दाभिधेयाः यथा गोपालादयः प्रत्यक्षाः सर्वलोकप्रसिद्धशब्दाभिधेया इति, तेषां सत्त्वं तच्छब्दमात्रसमन्वयमात्रप्रत्यक्षम् उपचारगम्यत्वात्तेभ्यः कारणेभ्यः तद्भूताः—स्कन्दादिशब्दभूताः, 10 प्रत्यक्षाश्च गोपालादयो मुख्यया च वृत्त्योच्यन्ते तस्मात्त एव—ते गोपालादय एव स्कन्दादयो न समयान्तरपरिकल्पिताः सन्तीति, तथाप्यन्यथाऽतिप्रसङ्गाभावादेव शब्दसन्निवेशो न निमित्तान्तरात्, अभ्युपेत्यापि समयान्तरपरिकल्पितानां स्कन्दादीनामस्तित्वं निमित्तनियमाभावदोष उच्यते—येऽपि च त इत्यादि स्कन्दोऽपि येनैन्द्रचमे [ततः] स तत्र इन्द्रो वा किं न भवति ? तथा शक्रोऽपि स्कन्दनेन्द्रने, ततः स इतर इतरश्च किं न भवति ? एकस्मिंश्चिदितरयोरपि संज्ञयोः प्रवृत्तेर्निमित्तसद्भावेन तस्मात् त्रयोऽपि परस्परसंज्ञानिर्देश्याः 15 सङ्कीर्णाः स्युः अथ मा भूदेष दोष इत्यन्यतमदेव निमित्तमेक तत्त्वमित्यस्तेऽसङ्कीर्णसंज्ञाव्यवहारार्थं तस्य एव न स्त्री नग्न इतीष्टार्थविवक्षया, एवं तर्ह्यन्यतमनिमित्तमात्रतत्त्वयाऽप्रभूतया संज्ञया विवक्षितेतरा-

---

समयान्तरप्रसिद्धसम्बन्धपरिकल्पनगम्याः [illegible] न स्कन्दादिशब्दभूताः [illegible] प्रत्यक्षत्वादिति । व्याचष्टे—ते इति भावमात्रेषु स्कन्दादिशब्दवाच्यत्वेन परिकल्प्यन्ते [illegible] तेऽनभिधेया इति, न तु सर्वलोकप्रसिद्धशब्दाभिधेयाः [illegible], सर्वलोकप्रसिद्धशब्दाभिधेयत्वं भवत्कल्पितेन्द्रादीनाम्, तस्मात् सर्वलोकप्रसिद्धशब्दाभिधे- 20 [illegible] प्रत्यक्षत्वात् [illegible] गोपालादय एव स्कन्दादिशब्दभूता मुख्यया वृत्त्योच्यन्ते ते तैः शब्दैरिति भाव । स्कन्दादीनां सत्त्वं [illegible]—तेषां सत्त्वमिति, एवं च भवत्कल्पितेन्द्रादयः न सर्वलोकप्रसिद्धशब्दाभिधेयाः [illegible] कारणेभ्यो न तद्भूता न वा स्कन्दादिशब्दैर्मुख्यया वृत्त्योच्यन्तेऽतो न [illegible]—न सन्तीति । [illegible] निमित्तान्तर[illegible] निमित्तान्तरस्य [illegible]—अभ्युपेत्यापीति । 25 निमित्तव्यभिचारं दर्शयति—स्कन्दोऽपीति [illegible] स्कन्दोऽपि [illegible] भाव । हेतुमाह—एकस्मिन्निति । फलमाह—त्रयोऽपीति [illegible] भाव । अथ स्कन्दादौ [illegible] समाधत्ते—अथ मा भूदिति । एवं तर्हीति, [illegible] 30 [illegible] भाव । [illegible]

१ सि. क्ष. येनैन्द्रं च स्कंद । २ सि क्ष डा. ये इतरत्र । ३ क्ष. संज्ञामन्वस्तु ।

र्थव्यवहरणाद्वस्त्वनिर्दिष्टसम्प्रत्ययानुविद्धचैतन्यनिमित्तः संज्ञाव्यवहारोऽभ्युपगन्तव्यो [न] बहिर्निमित्त प्रत्ययमिति दोषः, द्रव्यभावनिर्दिष्टपरिमाणेऽवगाते विशेषयति ।

किञ्चान्यत्—

निमित्तप्रत्ययेन संज्ञाप्रवृत्तेश्च यावत् सम्भवं संज्ञासन्निवेशो सर्वव्यपदेशसमाप्त्यात् भाव-कार्यादयोऽपि ते प्राप्ताः, यथा च यावत् किञ्चित् भवननिमित्तमस्ति तस्य सर्वस्येन्द्रस्कन्दादिरर्थः, तद्भाविनश्च पर्यायशब्दा एव, घटकुटशब्दवत्, एवं तावत्सर्वसर्वत्वमविशेषात् ।

निमित्तप्रत्ययेनेत्यादि, यदि स्पन्दनादिनिमित्तप्रत्ययेन संज्ञाप्रवृत्तिस्ततो यावत्सम्भवं याव-न्निमित्तानि भवनकरणशमनभावनबाहुमवर्तनपरिणमनादीनि सम्भवन्ति तावद्भिर्निमित्तैः संज्ञासन्निवेशो भवति रोदनाद्रुद्रो भवनाद्भवो भावकः करणात् कारक इत्यादि सर्वव्यपदेशसमाप्त्यात् भावकार्यादयोऽपि ते प्राप्ताः उक्तञ्च—तथा च यावदित्यादि, यत्परिमाणमस्य—यावत्, यावदेव किञ्चिद्भवननिमित्तमस्ति सर्वस्मिन्नर्थः, तस्य सर्वस्य घटपटादेरिन्द्रस्कन्दादिरर्थः, सर्वभावस्वर्थानामन्वर्थत्वात् पर्यायः, तद्भाविनश्च पर्यायशब्दा एव किमिव ? घटकुटशब्दवत्—सर्व एव सर्वः—घटः स्तम्भः, पटः स्तम्भः, वैयोऽपि स्तम्भः, एवं रूपेन्द्रादयश्च, स्तम्भोऽपि घटः पटश्चेत्यादि भावम्, एवं तावत् सर्वभावेनामन्वर्थत्वात् सर्वसर्वत्वमविशेषात् ।

किञ्चान्यत्—

विशेषतोऽपि सम्भवघटनादिस्पन्दनादित्वाच्च सर्वसर्वत्वम्, कतमद्रूप्यं कतमेन निमि-त्तेन नाभिधीयते ?,

(विशेषतोऽपीति) विशेषतोऽपि सम्भवघटनादिस्पन्दनादित्वाच्च सर्वसर्वत्वम्, चेष्टाकोटि स्थापनिसम्भवनमिसम्भिपूर्वकपरिसमाप्तत्वात्—परिणामर्थत्वात् सर्वेषां ज्ञानगत्यर्थानां स्पन्दनशोषणविसर प्रवेशनेष्वनगमनापर्यानां यावतां यस्मिन्नर्थे सम्भवः तस्य तस्य तदर्थत्वे सर्वसर्वत्वं, यसमाद्दत्तु

---

द्रव्यभावादिति । यदि व्यवहाराद्वे बहिर्निमित्तापेक्षः स्यात्तर्हि निमित्तानां बहूनां सम्भवात् प्रतिनिमित्तं संज्ञासन्निवेशे भवितव्यं सर्वसंज्ञासमावेशः स्यादिति दोषान्तरमाह—निमित्तप्रत्ययेनेति । भावके—यदीति गत्यादिनिमित्तं नामभिधानार्थाः तैरर्थ-सम्भवाभ्युपगमेऽसमञ्जसत्वं व्यवहारे यदि स्यादित्यर्थं । एकस्मिन् वस्तुनि नानानिमित्तानि वर्तन्त इति भवतीति भावकत्वनिमित्तं भवनं करणत्वनिमित्तं करणं शमनत्वनिमित्तं शमनं भावकत्वनिमित्तं भावनं बाहुमवत्वनिमित्तं बाहुमवनं वर्तनत्वनिमित्तं वर्तनं परिणामकत्वनिमित्तं परिणमनमित्येतानि निमित्तानि भवघटादिष्वर्थेषु प्रत्येकं सम्भवन्तीति तत्सञ्ज्ञैरपि ते व्यपदिश्येरन्निति भावः । तदाह भो दोष इत्याह—तथा चेति यत्स्यादित्यर्थपदार्थस्येन्द्रस्कन्दादिरर्थं पर्याय इत्यादिभावस्वर्थस सम्भवात्, तद्भावस्थानाश्च पर्यायशब्दा भवेयुः एवञ्च घटः इन्द्रस्कन्दादिनिमित्तकशब्दाभिधेयः स्यादेवं पटादयोऽपीति सर्वं सर्वात्मकमिति सर्वसर्वत्वं प्रसज्यत इति भावः । भवननिमित्तमस्तीति यावन्निमित्तसम्भवमित्यर्थं । सर्वभावार्थानां प्रतिवस्तु सद्भावत्वात् पर्यायत्वमित्याह—सर्वेति । इन्द्रस्कन्दभवनभावकादिशब्दवाचिन इन्द्रस्कन्दभवनभावकार्थाः पर्यायशब्दा एवेत्याह—तद्भाविनश्चेति । भावयितुम्—सर्वे एवेति । एवमविशेषतश्चोपदर्शितमधुना विशेषतोऽपि तदापादयति—विशेषतोऽपीति ।

---

१ भा सर्वभावार्थानामन्वर्थत्वात् । २ सि भ डा. सर्वभावानुगमन्वर्थत्वात् । ३ सि क. डा. सम्भवतीति च ।

मेलूनां प्रयमस्यामासनापेक्षत्वाच गतिनिवृत्तिपर्यायाणां क्षेपमात्रत्वाच वस्तवीनतिवृत्तेः अवमर्थं क्रमेण निमित्तेन नाभिधीयते ? ततः सर्वसर्वत्वम् ।

स्यान्मतमेवं तर्हि मुख्यमभिमतप्रपादानद्वारेण त्वयैव सर्वस्य बहिर्निमित्तापेक्षत्वं समर्थितम्, त्वत्पक्षेऽपि च सर्वसर्वाभिधानाभिप्रसङ्गो दुर्निवार इत्येतदाशङ्क्य उच्यतेऽनेन—

5 एवमपि तु स्थिते सर्वसर्वाभिधानलक्षणाव्यवस्थाव्यावर्तनार्थं बहिर्निमित्तनिरपेक्षसंज्ञामात्रसन्निवेशिनियतार्थाभिधायित्वं कुम्भादित्वमभ्युपगन्तव्यम्, एवं हि सङ्केतमात्रत्वाच्छब्दार्थसम्बन्धस्य मुख्यार्थाः सर्वदेशभाषा इत्येतदपवादसिद्धम्, नियतनिरपेक्षत्वात् सङ्केतस्य, स्वोपयोगप्रतिपादनसमर्थत्वाच्च शब्दानाम्, डित्थादिवत्, अत एवेदमप्यभियुक्तानां स्मरणमुपपन्नं 'अनेकार्था धातवः' इति इत्यवतामिति ।

10 एवमपि तु स्थित इत्यादि यावत् कुम्भादित्वमभ्युपगन्तव्यमिति, तत्प्रतिपिपादयिषितार्थप्रतिपादनार्थत्वाच्छब्दप्रयोगस्य मतभेदेऽपि सर्वसर्वत्वे सर्वसर्वाभिधानलक्षणाव्यवस्था प्राप्तैव सा मा भूदिति तद्व्यावर्तनार्थं कुम्भादिशब्दाः कस्मिंश्चिदर्थे बहिर्निमित्तनिरपेक्षाः संज्ञामात्रत्वेन सन्निवेशिताः शब्दो नियमेन तमेवार्थमभिदधातीति प्राप्तम्, इतरथा सर्वसर्वाभिधानाव्यवस्थाऽवश्यम्भाविनी, तस्मात् संज्ञासन्निवेशात् न मे कश्चिद्दोष इति तवाचोपाभासमेतत् समानदोषत्वादिति, एवं हीत्यादि, अस्य न्यायस्य व्याप्तिप्रदर्शनम्, एवञ्च कृत्वा सङ्केतमात्रत्वाच्छब्दार्थसम्बन्धस्य मुख्यार्थाः सर्वदेशभाषा इत्येतदपवादसिद्धम्—घटः कुटः कुम्भः, क्षीरं पयः पाठि दुग्धम्, अभिप्रायतुरः किन्तु मन्त्रस्य इत्यादीनाञ्च सङ्केतवशात् निमित्तवैकार्थवाचित्वं सिद्धम् नियतनिरपेक्षत्वात् सङ्केतस्य, स्वोपयोगप्रतिपादनसमर्थत्वाच्च तेषां तेषां

---

ननु मां प्रति दोषं प्रतिसर्वंधितुना भवतापि सर्वाभिधेयानां बहिर्निमित्तापेक्षत्वं समर्थितमेव एवं समर्थिते भवतोऽपि सर्वसर्वाभिधानप्रसङ्गो दुर्वार इत्याशङ्कते स्यान्मतमिति । यद्यपि बहिर्निमित्तापेक्षाभिधानप्रवृत्तिरभ्युपगम्यैव, न चैवमभ्युपगम्यते तत्रोपायेन किन्तु शब्दप्रमाणप्रमाणाभिधानप्रवृत्तिरिष्यते इत्याशङ्कोपशमनार्थं—एवमपीति । यथा हि परस्य सामिवशिनार्थं प्रतिपादयितुं शक्यम्, यथोक्तमभिधाच्छक्तिः न च शब्दप्रयोगे यदि बहिर्निमित्तसापेक्षोऽर्थं प्रतिपादयेत् तर्हि सर्वसर्वत्वप्रसङ्गेन प्रोक्तदोषः सर्वसर्वाभिधानलक्षणाऽव्यवस्था स्यादिति तद्व्यावर्तनाय नियतार्थाभिधायित्वं शब्दानामभ्युपेयम्, तच्च बहिर्निमित्तानपेक्षं शब्दप्रमाणाख्येन सम्बन्धमात्रेण भवति नान्यथेति । समभावत्वे नियतार्थनियमप्रमाणमनुगम्ये दोषमात्रवर्जनार्थं—इत्यतोऽपीति । अत्र सन्निवेशितशब्दानामर्थ इति संज्ञामात्रत्वात् एवमभ्युपगम्यते मे न कश्चिद्दोष इत्याशङ्कोपशमनार्थं—तस्मादिति । यथोक्त-

15 सङ्केतमात्रेण शब्दानामर्थेषु प्रवृत्ति निमित्तविनाभावनानामपि सङ्केतेन नियतत्वात् मुख्यार्थाभावस्यापेक्षानपेक्षत्वेन सङ्केतस्यानुकूलत्वं व्याप्तिप्रदर्शनार्थ—अस्य न्यायस्येति । नानादेशेष्वेकस्यैव घटस्याभिधाने पर्यायशब्दा घटः कुटः इति । तथैवान्यत्राप्याह—क्षीरं पय इति । म्लेच्छभाषास्वप्याह—अभिप्रायतुर इति । शब्दो हि यथाऽभिधातुमिष्टं वस्तु सङ्केतवशेन प्रतिपादयति, सङ्केतस्तु बहिर्निमित्तानपेक्षेण नियत एव नियमनिरपेक्षत्वात्, सङ्केतमात्र एव शब्दोऽभिधेयमर्थं प्रतिपादयितुं क्षम इत्याह नियतनिरपेक्षत्वादिति शब्दस्यार्थप्रतिपादने सङ्केताधीनत्वमुक्तं निरवकाशमित्याह । सङ्केतस्य

---

१ ध है प्र. चलनी । २ प्र. सर्वसर्वे पर्वा ।

सम्बन्धानाम्, इत्यादिवत्, इदमप्यभिमुख्यनामत एव कारणमुपपन्नम्—नान्यथा, यथा 'अनेकार्था धातवः' इति, गतार्थं यावद् द्रव्यतामिति ।

चेतनाचेतनभेदस्यास्य जगतो भावकं नाम, तस्मादेव घटो भवति, घटस्य द्रव्यं कारणम्, घटं भावयति नाम, घटस्य ततो भवनात्, यद्यतो भवति तत्तस्य कारणं दृष्टम्, यथा मृत्, अनया यथा घटस्तथा नाम्ना, घटक्रियात्मकत्वं वा भावकत्वम्, तस्माद् घटं भावयति 5 नाम, रूपाद्युपयोगभवनं वाऽन्तर्निविष्टशब्दानुगतम्, रूपणाद्रूपम्, रस्यत इति रसः घ्रायत इति गन्धः श्रोत्रग्रहणः शब्द इति लक्षणात् रूपादिरपि शब्दो भवति, तस्मान्नामद्रव्यस्यानुपसर्जनतैव ।

चेतनाचेतनेत्यादि, अनेन प्रकारेण यदुक्तं नाम तच्चेतनाचेतनभेदस्य कुम्भकारघटादेः पृथिव्यादिमनुष्यनारकतिर्यक्सिद्धपरमाणुप्रभृत्याकाशादेः समस्तस्यास्य जगतो भावकं नाम—समस्तं जगन्नाम्नो 10 भवतीति भावितम् तस्मादेव घटो भवति घटस्य द्रव्यं कारणं घटं भावयति नाम, ततो भवनात्, ततो भवतीति प्रतिपादितत्वात् सिद्धो हेतुः । यद्यतो भवति तत्तस्य कारणं दृष्टम्, यथा मृत्—यतो मृदो घटस्य कार्यं, तथा नाम घटस्य कारणमित्येतमर्थमुपनयति अनयेत्यादि, यथा घटस्य मृद्द्रव्यं भवति तथा नामेत्यर्थः, घटक्रियात्मकत्वं वा भावकत्वम्, नाम इति वर्तते, शब्दो द्रव्यं तावत् घटकरणात्मकत्वात् पूर्वोक्तात् प्रतिपद्यते, तस्माद्घटं भावयति नाम, नाम्नो घटो भवतीत्यर्थः, रूपाद्युपयोगेत्यादि, अथवा 15 रूपाद्युपयोगो—रूपादिज्ञानं तस्य भवनमन्तर्निविष्टशब्दानुगतं तच्छब्दात्मकं रूपणाद्रूपं रस्यत इति रसः, प्राप्य

---

सम्बन्धापेक्षस्य च सर्वेष्वेषु सम्बन्धिष्वभिमुखार्थप्रतिपादकत्वं तावदाभिमुख्यमित्युक्तं दृष्टान्तमाह—इदमपीति । गतार्थमिति, अत्र सूत्रं सुगमम् । अत्र कुम्भकारघटादिषु पटादिभिः अन्यत् सम्बन्धिनं सम्बन्धस्य रूपादिभिः शब्दैः समानात्मकत्वात् कुम्भकारघटादिप्रवृत्तिः तदुक्तं तस्यैव नामनिमित्तं व्याचष्टे—चेतनाचेतनेति । व्याचष्टे—अनेनेति । विशिष्टं वस्तु दर्शयति—कुम्भकारेति । नाम कुम्भकारादीन् भावयति तथापि परिणमयतीति भावकमिति तत्सर्वमाह—समस्तमिति । भावकत्वमेव स्फुटीकरोति—20 तस्मादेवेति, नाम एवेत्यर्थः । तत्स्पष्टीकरणार्थमन्ये नामघटयोस्तादात्म्यं कारणमिति नामप्रभवत्वं साधयितुमाह—ततो भवतीति । अत्रैव व्याप्तिं दर्शयति—यद्यत इति । दृष्टान्तमाह—यथेति । नाम्न इति भावकस्य भावो भावकत्वमित्याशयेनाह—घटक्रियात्मकत्वं वेति नाम्न एव भवतीति शब्दो भवनात्मकः भवनान्यत्वाभावात्, अतस्तदात्मकत्वादेव नामैवात्मना भवनं तत्स्वभावस्य तदात्मत्वेन भावात्, अतः घटक्रियात्मकत्वान्नाम्नो द्रव्यम्, न हि तदनात्मकत्वे घटक्रिया भवति तत्करणं भवितुमर्हतीति तस्माद्घटं भावयति नामेति भावः । किञ्च विज्ञानमात्रस्य शब्दानुविद्धत्वात् यद् वैयाकरणैः उपपादितं 25 तदिति व्याख्या रूपादिविज्ञानं शब्दात्मकत्वादेवेत्याह—अथवेति रूपादेर्ज्ञानं शब्दसंस्पृष्टं भासते निर्विकल्पकं सविकल्पकं वा, शब्दानुवेधेन शब्दस्वरूपतापन्नमेव भवतीति भावः । रूपादिविषयं ज्ञानं यदा रूपमिति रूप्यते तदा तद्रूपमुच्यते यदा रस इति रस्यते तदा रस इति गन्ध इति घ्रायते यदा तदा गन्ध इत्युच्यते स्वाकाराकारेण विज्ञानस्यावभासनात्, तच्च ज्ञानं शब्दानुविद्धत्वात् शब्दात्मकमिति विज्ञानात्मना रूपादयोऽपि शब्दात्मका एवेति सर्वस्य शब्दमात्रत्वात्तत्र एव प्रधानमित्याह—रूपणादिति ।

---

१ सि. क्ष. डे. नाम्नोऽपि नास्ति । २ लि. क्ष. भवो ।

इति गम्यः श्रोत्रग्राह्य शब्द इति श्रवणात् तस्योपयोगस्य शब्दात्मकत्वात् रूपादीनाञ्च तदात्मकत्वात् शब्दो रूपादिरपि भवति, तस्मान्नामद्रव्यस्यानुपसर्जनतैव—प्राधान्यमेवेत्यर्थः, एष नामद्रव्यार्थनयपूर्वपक्षः।

अत्रोत्तरमुभयनियमस्याराः शब्दनयो वक्ष्यमाणः—

अस्यापि नियमः, प्राधान्येन तु विशेषो नियत इत्युक्तः, अर्थार्थत्वाच्छब्दप्रयोगस्यार्थः ५ प्रधानं न शब्दः अर्थस्यापि ज्ञानोत्पत्तिनिमित्तत्वात् ज्ञानमेव प्रधानम्, न च ज्ञानशब्दयो-रैक्यम्, प्रत्यक्षप्रतीतिविरोधाभ्याम्, प्रत्यक्षमेव हि न नाम्नो घटादिर्भवति, ततस्तु श्रोत्राभि-घात एवोत्पद्यते।

अस्यापि नियम इत्यादि, यथोऽपि नामद्रव्यार्थभावो नियतः उपसर्जनत्वेनेष्यते, न प्राधा-न्येन, प्राधान्येन तु विशेषो नियत इत्युक्तः, न भूमः शब्दो निमित्तमात्रव्यापृतो ज्ञानोपकारी नार्थीति १० ज्ञानस्येव प्रधानस्योपकारकत्वेन वर्तते, ज्ञानेनैव चोत्पाद्यते, अर्थप्रकाशनार्थत्वाच्छब्दप्रयोगस्य, तस्मात् अर्थार्थत्वाच्छब्दप्रयोगस्यार्थः प्रधानं न शब्दः, तस्माच्छब्दार्थत्वात् अर्थस्यापि ज्ञानोत्पत्तिनिमित्तत्वात् ज्ञानमेव प्रधानम् न च ज्ञानशब्दयोरैक्यम्, प्रत्यक्षप्रतीतिविरोधाभ्याम्, यस्मात् प्रत्यक्षमेव न प्राधा-न्यात् श्रोत्राभिघातकत्वात् घटादिर्भवति—न शब्दः कारणं घटस्य ततोऽनुत्पत्तेः, ततस्तु—शब्दात् श्रोत्राभिघात एवोत्पद्यते, तस्माच्छब्दः श्रोत्राभिघाते हेतुर्न घटे न ज्ञाने।

१५ तथा च यदि शब्दस्य घटोत्पत्तौ द्रव्यत्वं स्यात्ततो घटार्थिनो भवतु घट इति मन्त्रयीरन्, अरिविनाशार्थिनश्च राजानः परबलमेति मा भूदिति वा ब्रूयुः, तस्मात् प्रवृत्तिनिवृत्तिकारणम-र्थार्थिनाञ्च क्षायोपशमिको भावः, सोऽपि द्रव्यार्थतां हित्वा भवति, क्षणिकत्वात्, तेनापि

---

तदात्मकत्वादिति, तस्योपयोगस्याविशेषात्। एवं शब्दप्राधान्यात्तिनामद्रव्यार्थनयमतमित्युपसंहरति—एष इति। उभयनियमस्याराः [illegible] उक्तं नामप्राधान्यमतं निरस्यति—अस्यापीति। तदभिमतो द्रव्यभूतः शब्दो न प्रधानम्, विशेषस्यैव २० प्राधान्यात् [illegible] एषैव व्याख्या—यथोऽपीति। [illegible] शब्दोऽनुपकारित्वान्नार्थीति [illegible] विवृणोति—न भूम इति। तर्हि किंकृतात् ज्ञानस्यैवेति। यस्तु वर्णं ज्ञात्वा घटं बोधयितुं शब्दं व्याप्रियते, तस्मादर्थेन शब्दः प्रयुज्यते तेन च [illegible] ज्ञानमेव प्रधानं शब्दः उपसर्जनमित्याह—ज्ञानेनैवेति। नै [illegible] अर्थोऽपि ज्ञानार्थ इति ज्ञानमेव प्रधानमुपसर्जनत्वं इत्याह—तस्मादर्थार्थत्वादिति। ननु ज्ञानं शब्दानुविद्धमेव [illegible] २५ [illegible] इत्याह—न च ज्ञानशब्दयोरिति। विरोधं स्फुटयति—यस्मादिति नामरूपो हि शब्दः केवलं श्रोत्रा-भिघातकारीति [illegible] श्रोत्राभिघातकारणं स न तु घटादि [illegible] यदि शब्दः कारणं स्यात् [illegible] एव तत्रैव [illegible] ज्ञानोत्पत्तौ [illegible] इति भाव। शब्दस्य घटादिकारणत्वेऽनुपपत्तिं प्रदर्शयति—तथा चेति। तदेव भावो

---

१ सि. क्ष. डा. नार्थीति।

विशेषेणैव भूयते, उक्ता शब्दार्थव्युत्पत्तिर्वस्त्वर्थश्च, स हि भावागमः, ततः उत्पाद्यते शब्दः, तस्माच्छब्दो द्रव्यागमः, तथा ह्याहुः 'आगमतो जाणए अणुवउत्ते दव्वसुतं' ( अनु० १२ सू० ) इति ।

तथा चेत्यादि यावत् प्रब्रवीरन्नित्यनिष्टापादनम्, यदि शब्दस्य घटोत्पत्तौ द्रव्यत्वं स्यात् ततो घटार्थिनो भवतु घट इति प्रब्रवीरन्, अरिविनाशार्थिनश्च राजानो विजिगीषवो न इन्द्रार्थं विब्रूयुः, 5 परचक्रमेति मा भूदिति वा ब्रूयुः, न च तद् दृष्टमिष्टं वा, तस्मात् प्रवृत्तिनिवृत्तिकारणसमर्थोऽर्थिनाश्च क्षायोपशमिको भावः–ज्ञानावरणक्षयोपशमनिमित्त ज्ञानमित्यर्थः, तत एव प्रवृत्तिनिवृत्तिदर्शनात्, सोऽपि द्रव्यपर्यायतां हित्वा–क्षायोपशमिको भावः क्षणे क्षणेऽन्यत्वात् द्रव्यपर्यायतां त्यक्त्वा भवति, क्षणिकत्वात्, तेनापि विशेषेणैव भूयते [सोऽपि] विशेष एव भवति, उक्त[ा]शब्दार्थव्युत्पत्तिः, भवति भवत् प्रधान भाव इत्युपक्रम्य घञ्ज्ञानविधेयं इत्यत एवेत्यस्यार्थो गतः वस्त्वर्थश्च भावितः–सामान्यमुपसर्जनं विशेषः प्रधान भावः, 10 शिबिकावाहकयानेश्वरयानवदिति स हि भावागमः–यस्मात् क्षायोपशमिको भावो ज्ञान भावागम उच्यते तस्मात् प्रधानं भवति, [आ]मर्यादया अभिविधिना [वा] गमोऽवबोधः ततः शब्दस्यागमस्य तत उत्पाद्यते शब्दो ज्ञानात्, तस्माच्छब्दो द्रव्यागमः, तथा ह्याहुरिति–शब्दद्रव्यागमत्वे ज्ञापकमार्षम् 'आगमतो जाणए अणुवउत्ते दव्वसुतं' ( अनु० १२ सू० ) इति ।

इतश्च ज्ञानमेव प्रधानम् 15

तत एव हि चास्योत्पत्तिः, प्रवृत्तोऽपि शब्दः परतन्त्रः, ज्ञानार्थत्वाच्छ्रोतरि प्रवृत्तेश्च, तादर्थ्येन ज्ञानं प्रधानं शिबिकावाहकयानेश्वरयानवत्, अतस्त्वयुक्तिवत् उपयोगविशेषभवनं प्रधानम्, तत्कार्यत्वाच्छब्दस्य ।

---

यदि शब्दस्येति, यदि शब्दो घटार्थिनां स्यात् तर्हि घटाख्यमात्रे घटो भवतीति [illegible] घट इत्येव [illegible] घटार्थिनामप्रवृत्तिप्रसङ्गात्, परविनाशार्थिनश्च राजानः [illegible] परचक्रं मा भूदिति शब्देनैव तद्विनाशं कुर्युः [illegible] 20 [illegible] भावः । किं तर्हि कारणं प्रवृत्तौ निवृत्तौ चार्थक्रियासमर्थमित्यत आह–तस्मादिति [illegible] कारणत्वे [illegible] ज्ञानावरणक्षयोपशमसमुत्थत्वात् प्रवृत्तिनिवृत्ती तत एव तयोर्दर्शनादिति भावः । यद्यपि हि ज्ञानं प्रवृत्ति निवृत्ति वा करोतीति द्रव्यं स्यात् [illegible] आह–सोऽपीति ज्ञानावरणक्षयोपशमजन्यो भावोऽपीत्यर्थः [illegible] क्षणे क्षणेऽन्यत्वात् [illegible] द्रव्यत्वं जहातीति किन्तु विशेष एव भवतीति प्रधानमेवेति भावः । भवत् प्रधानं [illegible] भाव उपसर्जनं सामान्यं [illegible] विशेष एव भवतीति भाव इत्यादि [illegible] 25 मुखेन विशेषस्यैव प्राधान्यं प्रतिपादितमिति सूचयति–उक्तेति । तथैव मर्थ व्याचष्टे–भवतीति । भावार्थोऽपि [illegible] घटो विशेषे न घटाख्यमात्र [illegible] प्रधानं भाव सामान्यं [illegible] उपसर्जनमप्रधानम् शिबिकावाहकयानेश्वरयान- वदिति भावित एवैतद्–वस्त्वर्थश्चेति । सोऽयं क्षायोपशमिको भावो भावागम उच्यते तच्च ज्ञानं प्रधानम् [illegible] [illegible] परप्रबोधार्थं [illegible] उत्पाद्यते शब्दो द्रव्यागमो भवति, ज्ञानस्य कारणत्वात्, [illegible] हि [illegible] भवति, [illegible] इति [illegible] [illegible] स इति । 30 [illegible]–यस्मादिति । आ मर्यादयेति [illegible] मर्यादयेत्यर्थः । अनुपयुक्तो ज्ञाता [illegible] [illegible] तथा ह्याहुरिति । [illegible] प्रवृत्तो शब्दो [illegible] [illegible] ज्ञानं [illegible] ज्ञानमेव प्रधानमित्याह–तत एव हीति [illegible]

(तत एवेति) तस्मादेव एव चात्मोत्पत्तिः—शब्दस्य ज्ञानादेवोत्पत्तिः, तदुच्चारणेनोत्पादितत्वात् ज्ञानमेव शब्दस्य कारणम् प्रयुक्तोऽपि शब्दः परतन्त्रो ज्ञानार्थत्वात्—परतन्त्रो ज्ञानोत्पादनार्थत्वात् कोऽपीत्यत आह—मैत्रतेत्य तादर्थ्येन—तदुत्पत्तिविवर्तत्वाभ्यां ज्ञानं प्रधानमित्येतस्मिन्नर्थद्वये दृष्टान्तः—शिबिकावाह-प्रधानेश्वरज्ञानवदिति वैतनिकानां यान वाहनमेतिरित्येव प्रवृत्तं ईश्वरज्ञानार्थमतोऽपि द्विधापि ईश्वर[यान]प्राधा-
5 न्यवत् ज्ञानप्राधान्यमिति, अतस्तत्प्रयुक्तिपरित्यादि [उप] सामीप्येन सर्वात्मना योग उपयोगः—रूपादर्थ-समीपे सदात्मप्रदेशानां तत्परता, तस्यो[प]योगात्मयोगत्वादेः तिर्यग्मनुष्यनामनिर्वर्तित वर्तते कुम्भभवादि च यथासंख्य भवति रूपादिसमर्थविरचनात्मकत्वात् कुम्भभवादिकार्यवत् नामो भवति, 'आत्मा बुद्ध्या समेत्यार्थान् मनो युङ्क्ते विवक्षया' (पाणिनिशिक्षा श्लो ६) इत्यादि सर्वं तदुपयोगपरि-णामजुपयोगविशेषमपनप्राधान्यं साधयति, तत्कार्यत्वाच्छब्दस्य—उपयोगस्य शब्दः कार्यं स एव कारणमु-
10 पयोगस्य कुम्भभवशरीरादेरिति तत्कारण तदिति त्वयैव प्राग्भावितं विस्तरेणैवत् ।

अयोऽप्येव सामान्यमविशेषः तच्चयनमात्रम्, उभयोः परस्परकारणत्वाविशेषत्वादित्य-प्रोत्तरम्, अथ कस्मात् उपयोग एव नामत्वमापद्यते? उपयोगत्वप्राप्तेर्नामः सर्वत्र विशेष-प्रधानत्वम्, तस्यापि वा नामशब्दस्य तत्प्रभृति द्रव्यमिति नामद्रव्यार्थं हित्वा द्रव्यद्रव्या-र्थोऽङ्गीकृतः अतो मूर्तद्रव्यकारणत्वाभ्युपगमः ते विरोधाय आपद्यते, मूर्तममूर्तस्य हि द्रव्यं
15 न भवति नामशब्दो मूर्तः कुड्यादि प्रतिहतगतित्वात्, यथा लोष्टादि, तस्मात् नोपयोगस्य द्रव्यम्, मूर्तत्वात्, घटवत्, वैधर्म्येणाकाशवत्, उक्तं हि 'न हि मूर्तममूर्तत्वं नामूर्तं याति मूर्तताम् । द्रव्ये त्रिष्वपि कालेषु नात्मभावं जहाति हि' ॥

अथोऽप्यतेत्यादि पूर्वपक्षो गतार्थो वा यदविशेषत्वादिति, सामान्यमविशेषः तच्चयनमात्रं न विशेष

---

वैतनिकानां । आत्मोत्पत्ति—यस्मादिति शब्दस्य तदनुपेक्षत्वानित्यात् ज्ञानादेवेति शब्दोत्पत्तिज्ञानमिति भावः । तादर्थ्येनेति,
20 तादर्थ्यं हि शब्दस्योत्पत्तेर्ज्ञानार्थत्वं चेति ज्ञानं प्रधानमिति भावः । शब्दस्याप्रधानत्वे ज्ञानस्य च प्रधान्ये वैतनि-कानां दृष्टान्तः शिबिकेति यथा यानार्थं ईश्वर वाहकाः यानं प्रेरयन्ति तत्र प्रवृत्तं तथापि यानार्थं भवति [illegible] ईश्वरस्य प्रधाने वाहकाः यानं तत्प्रधानमिति भाव । कुम्भभवमनुष्यशरीरप्रभृति नामप्रभवम्, शब्दोपयोगस्य [illegible] [illegible] स्पर्शरसगन्धवर्णसंस्थानात्मकत्वात् कुम्भभवादिकार्यमिति भवत्येव तदनुपयोगविशेषप्राधान्यं साधयति—अतस्तत्प्रयुक्तिपरिति । आत्मा हि सर्वात्मना [illegible] शब्दस्य तदुपयुक्तो तदा तत्र तदुपयोग भवति
25 [illegible] तस्मै तदुपयोगविशेषप्राधान्यं कुम्भभवशरीरादि भवतीति यतः तदेव [illegible] [illegible] तस्य प्राधान्यमिति दर्शयति—आत्मेति । शिक्षावचनं दर्शयति—आत्मेति आत्मा बुद्ध्या [illegible] [illegible] [illegible] मनो युङ्क्ते इति उक्तं तदुपयोगविशेषप्राधान्यं साधयतीत्याह—तत्कार्यत्वादिति । [illegible] [illegible] [illegible] यथा च हि शब्दो [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible]

---

१ सि क्ष. डे का [illegible] । २ सि क्ष डे का "[illegible]" । ३ सि क्ष. डे. "[illegible]" ।

इत्येतद्वाच्यमिति भावितार्थः, उभयोः परस्परकारणत्वाविशेषत्वादिति, अत्रोत्तरम्–अथ कस्मादित्यादि यावत् सर्वत्र विशेषप्रधानत्वमिति, उपयोग एव नामत्वमापद्यत इति ? विशेषस्योपयोगस्य प्राधान्यम्, उपयोगस्य प्राप्तेर्नाम्नः, तस्यापि वा नामशब्दस्येत्यादि, नामशब्द इति वीणावेणुघटशब्दादिभ्यो विशिष्यते, प्रकृतस्या-त्रोपयोगित्वाच, तस्य उरःप्रभृतीत्यादि, नामद्रव्यार्थं हित्वा त्वया द्रव्यद्रव्यार्थोऽङ्गीकृतः तदुपयोक्तम् 'आत्मा बुद्ध्या समेत्यार्थान् मनो युङ्क्ते विवक्षया । मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् ॥ मारुत- 5
स्तूरसि चरन् मन्द्रं जनयति स्वरम्' (पाणिनिशिक्षा श्लो० ६–७) इत्यादिना मूर्तद्रव्याभ्युपगमात् आर्षमपि ज्ञापकं 'नो आगमतो द्रव्य शरीरमुक्त तद्यथा–'अहो ण इमे ण सरीरसमुस्सयेण आघविए त्ति पद आघवित पण्णवित' (अनुयो० सू० १६) इत्यादि, तस्मात्शब्दकारणत्वत्यागेन मूर्तद्रव्यकारणत्वाभ्युपगमस्ते विरोधायापद्यते, अत आह–मूर्तममूर्तस्य द्रव्य न भवति–परिणामिकारणमित्यर्थः, यथा मूर्तममूर्तस्य कारणं न भवतीत्ययमभ्युपगमः तथा नामशब्दस्य मूर्तत्वादमूर्तोपयोगकारित्वं न युज्यते स्यान्मतं 10
कथं मूर्तः शब्दो यतोऽस्यामूर्तज्ञानकारित्वं न भवेदित्यत्र ब्रूमः, नामशब्दो मूर्त इति प्रतिपद्यताम्, कुड्यादिप्रतिहतगतित्वात्–यस्य गतिः कुड्यादिभिः प्रतिहन्यते तन्मूर्तं दृष्टं यथा लोष्टादीति, तन्नाम नोपयोगस्येत्यादि अर्थप्रदर्शनसाधन–उपयोगो न मूर्तद्रव्यहेतुकः, अमूर्तत्वादाकाशवत् न ह्याकाशं मृदादि दण्डादिमूर्तद्रव्यस्य कार्यमिति साधर्म्यदृष्टान्तः घटादीति वैधर्म्येण, अमूर्तद्रव्यहेतुकं न तन्मूर्तं यथा

---

घटः अविशेषत्वाच्च प्रतिपाद्यते–अथोच्यतेति । टीका–उभयोरिति शब्दोपयोगयोः परस्परमविशिष्टं कारणत्वम्, यदो- 15
दीरि कारणं द्रव्यं तदविशिष्टं सामान्यमेव तच्छब्दोपयोगयोः परस्परकारणत्वे कारणधर्मानुसृतत्वेनोपयोगस्य शब्दात्मकत्वं स्यात्, सर्वस्याकारानुवर्त तदात्मकमिति व्याप्तेरिति भाव । समाधत्ते–अथ कस्मादिति उभयोः परस्परकारणत्वे उपयुक्त्यैव एव शब्दत्वमापद्यते न तु शब्द उपयोगत्वमिति न चात्र विशेष हेतुः तस्मादुपयोगस्य विशेषस्य प्राधान्यादभेदोपयोगस्य नामत्वमापद्यत इति भावः । किञ्च त्वन्मतेन शब्दस्य न नामद्रव्यत्वं सम्भवति, उरःप्रभृतिभ्यो द्रव्येभ्यस्तदुत्पत्त्यभ्युपगमात्, तथा च द्रव्यद्रव्यत्वं प्रसज्येत-इत्येनाह–तस्यापि वेति नामशब्दस्यापि वेत्यर्थः । शब्दे नामत्वविशेषणस्यार्थमाह–नामशब्द इतीति । शब्दस्योरआदिभ्य 20
उत्पत्तिप्रदर्शकपाणिनीयशिक्षां प्रमाणयति–तदुपयोक्तमिति । आत्मेति अन्तःकरणावच्छिन्न आत्मा संस्कारवशेन ज्ञातानर्थान् बुद्ध्या–धारणया समेत्य–एकबुद्धिविषयान् कृत्वा तद्विवक्षया मनो युक्तं करोति, तत्प्रेरितमनश्च कायाग्निमाहन्ति स कायाग्निः प्रेरयति मारुतम्, स उर्ध्वो मारुत शब्दप्रयोगनियोगानुसारात् [illegible] मूर्तं प्रेरितो येनामूर्तपर्यन्तं गत्वा प्रतिनि-वृत्त्य [illegible] भावार्थः ।
उरःप्रभृतिस्थानजन्यत्वेन शब्दस्य मूर्तद्रव्यजन्यत्वमभ्युपगतं भवतीति नामद्रव्यार्थस्य द्रव्यद्रव्यार्थतापत्तिमेवाह–मूर्तद्रव्येति । 25
आर्षागममपि प्रमाणयति–आर्षमपीति । नामद्रव्यस्य मूर्तत्वादमूर्तोपयोगस्य कारणं न भवतीत्याह–मूर्तममूर्तस्येति । परिणामीति उपादानकारणत्वेऽपि न भवति निमित्तकारणत्वादिति भावः । शब्दस्य मूर्तत्वं साधयितुं शङ्कते–स्यान्मतमिति शब्दो हि पुद्गलद्रव्यविशेषपरिणामः मूर्तत्वाच्च तन्मूर्तं [illegible] अपि तु मूर्तः शब्दो हि कुड्यादिप्रतिहतगतित्वादिति [illegible] यस्य च गतिः कुड्यादिना प्रतिहता भवति तन्मूर्तं दृष्टं यथा लोष्टादि, तथा शब्द इति, तस्मादमूर्तस्योपयोगस्य नाम परिणामिकारणं भवितुमर्हतीत्याह–तन्नामेत्यादि इति । एतदेव प्रयोगमपि नामशब्दोपयोगस्य द्रव्यं नैव [illegible] 30
तत्र नाम उपयोगकारणं न [illegible] मूर्तद्रव्यम् [illegible] अमूर्तत्वादाकाशवदित्याह–उपयोग इति मूर्तं नामशब्दं पक्षीकृत्य योग-योगस्य द्रव्यमिति साधितं मूर्तद्रव्यहेतुना तत्र तदुपयोगे न मूर्तद्रव्यहेतुकः किन्तु [illegible] भावार्थः

---

१ सि. क्ष. मूर्तत्वात् । २ सि. क्ष. डे. यथा इ वृत्ति । ३ सि. क्ष. डे. डा. °दमूर्तोपयोगकारित्वं ।

मूर्तिरिति, अथवा नामूर्तस्य द्रव्यं नामरूपं मूर्तत्वमाप्नोति, यदमूर्तस्याकाशादेर्द्रव्यं न तन्मूर्तं यथाऽऽत्म-
द्रव्यमिति तच्च हीत्यादि यावत्कृत्वाह—न हि मूर्तममूर्तत्वं—धर्मविशेषद्रव्यस्य मूर्तं सद्धर्मोपात्तरूपत्वममूर्तत्वं
न गच्छति न तथा परिणमति जीवाजीवधर्माधर्मयोरिव न याति, नामूर्तमेति मूर्तत्वं—नाप्याकाशाद्यमूर्तं मूर्तत्वं
प्रयाति, द्रव्यं त्रिष्वपि—अतीतानागतवर्तमानेषु कालेषु न कदाचिदित्यर्थः यस्मात् नात्मभावं—स्वात्म्य-
भावी यो धर्मः स आत्मभावः, तमात्मभावं न कदाचित् परित्यजति द्रव्यमिति ।

अत्राह—

नन्वन्योन्यानुगतस्वरूपत्वात् निर्वृत्त्युपकरणेन्द्रियज्ञानतन्मात्मद्रव्यवत् घटाकाशवच्च,
द्रव्यं कारणं ज्ञानस्य—द्रव्येन्द्रियं मूर्तममूर्तस्य ज्ञानस्य द्रव्यं शरीरादि कारणं भवान्तरा-
त्मनः, घटश्च घटाकाशस्य ।

नन्वन्योन्यानुगतेत्यादि यावद्घटाकाशस्येति, नात्मभावं त्यजति पररूपं माप्नोतीत्युक्तं,
अन्योन्यानुगतस्वरूपत्वात् क्षीरोदकवत् अन्योन्यानुगतस्वरूपत्वनिदर्शनं निर्वृत्तीत्यादि यावद्घटाकाशवत्,
तत्रच निर्वृत्त्युपकरणेन्द्रियज्ञानवत् तन्मात्मद्रव्यवच्चेति प्रत्येकं परिसमाप्यते, द्रव्यं कारणं मूर्तममूर्तस्य
ज्ञानस्य द्विविधं द्रव्येन्द्रियं निर्वृत्त्युपकरणाख्यं निर्वृत्तिः पक्ष्मपुटकृष्णतारादिद्रव्यनिष्पत्तिः, निर्वृत्त्युप-
करोतीत्युपकरणं मसूरकाकारप्रत्युर्मध्यप्रदेशः यथाऽऽस्यतायमनोपकरणानि, एतद्द्विविधमपि ज्ञानस्य द्रव्ये-
न्द्रियम् तस्य व्याख्यानं—द्रव्येन्द्रियं मूर्तममूर्तस्य ज्ञानस्य द्रव्यम्, तथा तन्मात्म[द्रव्य]वदित्यस्य व्याख्या—
शरीरादि कारणं भवान्तरात्मनः, घटश्च घटाकाशस्येति—मूर्तो घटोऽवगाहानुमेयस्याकाशस्याकाशात्मन
इति ।

---

१ सि. क्ष. डे. कारणात्मना । २ सि. क्ष. घटस्य ।

अत्रोच्यते—

आगतं सर्वोत्तयोऽर्थो द्रव्यं विशेषो वा योऽस्तु सोऽस्तु सर्वथाऽसावस्वतन्त्रो विशेषेण ज्ञानेन तथा तथा भाव्यते सर्वात्मनेति प्रधानं विशेष एव भवतीति, तत्र यदि सेन्द्रियाणि ज्ञानानि तानीन्द्रियकृतत्वादज्ञानानि स्युः, केवलमेवैकं ज्ञानं स्यात्, आत्मानश्च चेतनत्वात् स्वतन्त्राः यदि तच्छरीरं स्वतन्त्रश्च कर्ता, ततश्चाशरीरेण शुद्धेन सिद्धकेवलिना कृतं कर्माप्येष्यं 5 स्यात्, अनिष्टं च न रागिकृतम्, इष्टमपि स्यात्, आत्मनोऽनन्यत्वात्, तथाऽऽकाशघटयोरनात्म्यात्म्यात्मकयोरात्म्यनात्म्यात्मकघटाकाशभवने घटाकाशमिति स्यात् तत्तु त्वन्मतेनाकाशमेवामूर्तं तद्विपरीतो घट इति कुतो घटाकाशमुदाहरणं घटते ? एवं द्रव्यस्य भवने दृष्टान्तस्य विपर्ययसाधनत्वात् कुतः साऽन्योऽन्यानुगमकता ? द्रव्यस्य सदा रूपापरित्यागात् ।

आगतं सर्वोतदित्यादि यावद्विशेष एव भवतीति, योऽर्थो द्रव्यं सामान्यं विशेषो वा-भवत्यर्थः 10 प्रत्ययार्थो वा भवनं भाव इति योऽस्तु सोऽस्तु सर्वथाऽसौ अस्वतन्त्रो विशेषेण ज्ञानेन तथा तथा भाव्यते द्रव्येन्द्रियादि वस्तु सर्वात्मना ज्ञानमात्मा, च विशेषः, स भावयति यद्यपि भवत्सामान्यं भावकत्वतोऽप्युपसर्जनम्, विशेषः प्रधानमित्युक्तं भवति, तत्र पक्षीभूतमिद्यापादनं परस्य, यावदेकं ज्ञानं स्यादिति, हेतुहेतुमद्भावेन गतार्थम्, सेन्द्रियाणि मतिश्रुतावधिमनःपर्यायज्ञानानि तानीन्द्रियकृतत्वादज्ञानानि स्युः, केवलज्ञानमेवैकं ज्ञानं स्यादिति, किञ्चान्यत्—आत्मानश्चेतनाः, आत्मैव स्वतन्त्रश्चेतनत्वात्, यदि तच्छरीरम्, स्वतन्त्रश्च कर्ता 15 ततश्चाशरीरेण शुद्धेन सिद्धकेवलिना कृतं कर्माप्येष्यं स्यात्, तथा [illegible]दुर्लभम्, मुक्तसंसारप्रसङ्गात्, अनिष्टं चेन्न रागिद्वेषिकृतम् इष्टमपि स्यात् कर्म, तस्यैव संसारित्वेऽपि पूर्ववद्धेतुहेतुमद्भावेनापादनं यावदात्मनोऽ[न]न्यत्वात्, एवं भाष्योदाहरणार्थं व्यभिचारितम् तृतीयमपि-तथाऽऽकाशघटयोर्यथासंख्यमनात्म्यात्म्यात्मकत्वादाकाशमनात्म्यात्मकघटीभवति, घटश्चानात्म्यात्मकाऽऽकाशीभवत्यनात्म्यात्मकः सन्,

यत्र चैतन्यमिष्टं [illegible] मूर्तस्यामूर्तस्य वा सामान्यस्य प्रधानस्य विशेषस्य प्रत्ययार्थस्य वा सार्वभ्याभावाच्च कर्तृत्वं किन्तु ज्ञानं 20 चेतनत्वं कर्तृ, तेनैव सर्वं भाव्यते तस्मात् स एव विशेषः प्रधानमेवेत्यावर्त मूर्तस्याप्यमूर्तात्मकत्वं यस्मात् तन्मतेऽपि [illegible] [illegible] चैतन्यादेव [illegible] भवनानुगमार्थस्य [illegible]—आगतं सर्वोति । व्याचष्टे—योऽर्थ इति भवनं सामान्यं प्रधानः भावो विशेषः प्रत्ययार्थः योऽस्तु सोऽस्तु मूर्तोऽमूर्तो वा भवतु तत्सर्वमचेतनमकर्तृ, न भावकं [illegible] चेतनो हि कर्ता तच्च ज्ञानमात्मा वा, तस्यैव सर्वभावकत्वमिति भावः । [illegible] [illegible]—तत्र यदीति [illegible] ज्ञानस्य, आपादकत्वं [illegible] यदि ज्ञानं सेन्द्रियं स्यात् तर्ह्यज्ञानं स्यात्, ऐन्द्रियत्वस्य 25 [illegible], [illegible] च ज्ञानस्य [illegible] [illegible] मतिश्रुताव-धिमनःपर्यायज्ञानस्य [illegible] केवलज्ञानमेकमनिन्द्रियज्ञानं स्यादिति भावः । तस्मात् [illegible] [illegible]—किञ्चान्यदिति आत्मैव स्वतन्त्रः चेतनत्वात् स्वतन्त्रश्च [illegible] [illegible]—आत्मैवेति [illegible] [illegible] सोऽचेतनो भवेत् [illegible] स्वतन्त्रश्चेतनस्तु अशरीरी सिद्धकेवल्येव स्यात्, [illegible] कर्मानुपपत्तिः तर्हि 30 मुक्तस्यापि संसारागमः [illegible] स एव संसारी च एव च मुक्तः [illegible] भवति तथा [illegible] कर्म [illegible] भावः । तृतीयं [illegible]—तृतीयमपीति [illegible]

---

१ सि. प्र दे का. तथा । २ ह. क्ष अनिष्टंवत । ३ सि °आमात्म्यनात्म्यात्मकाद्घात्म्यात्मकघटी । ४ °सात्म्यनात्म्यात्मकघटी । क्ष °आमात्म्यनात्म्यात्मकं घटी ।

ततो घटाकाशमिति स्यात्, तत्तु त्वन्मतेनात्मसमेवामूर्त तद्विपरीतो घटो-मूर्त एवेति कुतो घटाकाशमनुकारस्य घटते? घटारम्भानपेक्षत्वादाकाशस्य, आकाशानारम्भापेक्षत्वाद् घटस्य आकाशः घटो वा तद्विपरीतगुणः[न]उत्पादरणमिति । एवमित्यादि अनेन प्रकारेण द्रव्यस्य भवने परिगृहीते दृष्टान्तस्य विपर्ययसाधनत्वात् कुतः साऽन्योऽन्यानुगमरूपता? या त्वया प्रतिज्ञाता, एव मयुक्त्यभावात् त्वन्मतेन च द्रव्यस्य स्वात्मना स्वरू-
5 [प]रूपापरित्यागानिरयुक्त परस्याभिप्रायापादनम् ।

अत एव स्वात एव समस्तविशेषप्रधानभवनसामान्योपसर्जनभवनप्रतिपादनार्थमाह–

अन्यरूपानुगमात्तु चेतनाचेतनयोरारम्भाभावस्यागमाद्द्रव्यस्य सामान्यभवनमुपसर्जनीकृत्य भवदेव च भवति तस्मात् केनचिद्विशेषः, तदसत्त्वात् सामान्यासत्त्वमापन्नम्, तथा च विशिष्टे स्वविषयेऽप्येकवृक्षादिभवने द्विवचनादिविशेषान्तरनिरपेक्षेणैव तेन भवितव्यम्, न
10 पुनस्तथा भवति सः, नक्षत्रपुनर्वस्वादिसमानाधिकरणवचनछिन्नादिभेददर्शनात् ।

अन्यरूपानुगमादित्यादि, तुल्यः परमतव्यावृत्तिः ममतत्सिद्धिश्च विशेषवति, चेतनाचेतनयोरारम्भाभावस्यागमात् त्वदुक्तात् द्रव्यस्य सामान्यभवनं यत्[ सर्जनीकृत्य ] भवदेव च भवति, तस्मात् सर्वान्तराभावात् भवत एव भवमात्र केनचिद्विशेषो न गम्यते, यथोक्तं त्वया प्राक् 'वृक्षो द्रव्यसामान्यमुपसर्जनीकृत्यैव भवति न वृक्षादिरपि विशेषरक्षनार्थित्वात् भावाः' इत्यादि, तस्मादिदमनिष्टं विशेषासत्त्वं प्रसक्तम्, तदसत्त्वात्
15 सामान्यासत्त्व दृष्टविरुद्धमापन्नमिति, किञ्चान्यत्–तथा च विशिष्ट इत्यादि, यथा च सामान्येन प्रतिपक्षेण विना विशेषः तन्निरपेक्षो भवति भवतैव विशिष्टः, तथा स्वविषयेऽप्येकवृक्षादिभवने द्विवचनादिविशेषान्तरनिरपेक्षणैव तेनाभिन्नलिङ्गवचनवृत्तिना भवितव्यं त्वन्मते न पुनस्तथा भवति स विशेषः, नक्षत्रपुनर्वस्वादिसमानाधिकरणवचनलिङ्गादिभेददर्शनात् ।

---

[illegible] स्यात्, तत्तु न सम्भवति त्वन्मते [illegible]
20 [illegible] स्यात्, [illegible]
[illegible] मूर्त एव [illegible]
[illegible] अतएवेति । [illegible]
[illegible] अनेन प्रकारेणेति । [illegible]
छत्रनिमित्तश्छत्री, दण्डनिमित्तो दण्डी भिन्ननिमित्तत्वात् परस्पर[ा]समानाधिकरणौ तथा व्यावृत्तिमत्त्व-
घटत्वपक्षेऽपीति भेदाद्व्यावृत्तिसामान्यानामित्यादिविधिपक्षदूषणवदिहापि व्यावृत्तिसामान्यपक्षेऽवान्त-
रैकासद्व्यावृत्तिसामान्यात् [अ]घटनिवृत्तिसामान्यमतः सन् घट इति भिन्नव्यावृत्तिविशिष्टसद्घटत्वसामा
न्ययोर्भेदात्तिमत उक्तं तुल्यगमनीयमेव विधिपक्षदूषणेन सर्वमिति ।

तद्व्याख्या एकस्मिन्नर्थे घटादौ घटत्वपृथिवीत्वद्रव्यत्वसत्त्वादिभिन्ने वक्तृषु कश्चिद्घट ⁵
इति ब्रूते कश्चित् पृथिवीत्यादि यावत्सदिति, तत्र सोऽर्थः घटरूपेण कृत्स्नो वाऽभिधीयेत ?
एकदेशेन वा ? न तावत् कृत्स्नः तस्मिन्नेव काले वक्तुं शक्यः, तस्य पृथिवीत्वेनाभिधाना
सम्भवप्रसङ्गात्, न ह्यघटव्यावृत्तिरूपसामान्यं गृहीत्वाऽतद्रूपाभिधायिशब्दप्रयोगो युक्तः,
स चेतरवक्तृवशादपि कृत्स्नो घटरूपेण स्थित इत्यसम्भवो रूपान्तरस्य, कृत्स्नस्यैकव्यावृत्ति
सामान्यरूपप्रतीतेः, अथास्यैकदेशः घट इत्यघटनिवृत्त्या गृह्यतेऽन्यैः, अपरोऽपार्थिवनिवृत्त्या देशः ¹⁰
पार्थिव इति मतं तदयुक्तम्, अप्रतीतेरतद्रूपत्वस्यसामान्यविषयत्वाच्च, यथाऽऽचार्यो मातुल इति ।

(तद्व्याख्येति) तद्व्याख्यैवेयं क्रियते—एकस्मिन्नर्थे घटादौ घटत्वपृथिवीत्वद्रव्यत्वसत्त्वादि
भिन्ने वक्तृषु कश्चित् घट इति ब्रूते कश्चित् पृथिवीत्यादि यावत् सदिति, तत्र-घटाभिधाने सोऽर्थो घटरूपेण
कृत्स्नो वाऽभिधीयेत ? एकदेशेन वा ?, न तावत् कृत्स्नस्तस्मिन्नेव काले वक्तुं[शक्यः],तस्य पार्थिवत्वे-
नाभिधानासम्भवप्रसङ्गात्, न हि[अ]घटव्यावृत्तिरूपसामान्यं गृहीत्वाऽतद्रूपाभिधायिशब्दप्रयोगो युक्तः, ¹⁵
स चेतरवक्तृवशात् [अपि] कृत्स्नो घटरूपेण स्थित इत्यसम्भवो रूपान्तरस्य, कृत्स्नस्यैकव्यावृत्तिसामान्यरूप-
प्रतीतेः तद्वचनस्यात्मत्वेन युगपद्वक्त्रभिप्रायभेदे न युक्तो भावः सन् घट इति प्रयोगः, अत्र साधन—अत्र

---

घटसामानाधिकरण्यादौ व्याघातेन न विधिनिमित्तमपि व्यभिचारौ च व्यावृत्तिनिमित्तस्य सद्भावेऽपि व्यवच्छेद्यव्यावृत्त्यव-
च्छेदकत्वाभावादिति परस्परं सामानाधिकरण्यमेकार्थाभावादित्याह—निमित्ताभावादिति । तदभिप्रेत्याह—व्यावृत्तिमदिति
घटत्वमपार्थिवत्वसमानं घटत्वमपार्थिवत्वव्यावृत्तिमान्, तथा पार्थिवत्वम्, व्यावृत्तिमत्सम्बन्धसामान्याद्व्यावृत्तिमतो भेदादेकत्वाद ²⁰
युगपद्वृत्तिरूपत्वात्तदा सम्बन्धान्यसामानाभिधानं न सामानाधिकरण्यमिति पूर्वोक्तविधेया अनाश्रितमिति भाव । तमेवार्थं भाव उक्तमिति ।
व्यावृत्तिसामान्यपक्षेण समर्थयति—तद्व्याख्येति । एकस्य हि घटस्य बहवो बहुधा प्रतिपत्तारो भवन्ति कश्चिद्घटत्वेन कश्चित्
पृथिवीत्वेनापरो द्रव्यत्वेनान्यः सत्त्वेन च तत्तदभिप्रायेणैतस्य तत्र घटेत्वेन घट इत्यभिधीयते तदा स किं घटत्वेन रूपेण
कृत्स्न एव घटोऽभिहित उत देशेनेति व्याचष्टे—एकस्मिन्नर्थ इति । यदि तेन रूपेण कृत्स्न एव घटोऽभिधीयेत इत्युच्यते
तत्राह—न तावत् कृत्स्न इति यदैव स घटत्वेन कृत्स्नोऽभिधीयते तदैव तस्य पृथिवीत्वाभिधानं न सम्भवति न हि ²⁵
पृथिवीत्वेनास्य प्रतीतिः घटत्वेनैव रूपेण तस्य कात्स्न्येन ग्रहणेन रूपेण न तस्य प्रतीतिः तत्र तद्रूपान्यभिधायकशब्दप्रयोगो न
युक्त एवेति भाव । ननु तस्य वक्त्रन्तराभिधानासम्भवेऽपि वक्त्रन्तरेण स तथाभिधीयतामित्याह—स चेतरेति न केवल
घटोऽपरस्य न च रूपेण घटत्वेन कृत्स्नस्य घटस्याभेदेऽपरस्यापि तथैव बोधात् पृथिवीत्वेन रूपान्तरेणाभिधानासम्भव
एवेति भाव । तत्रार्थे हेतुमाह—कृत्स्नस्येति एकधर्मावच्छिन्नत्वेन कृत्स्नस्य ग्रहणे प्रतीतेरेकत्वात्तदभिधानेऽपि न रूपान्तरान-
भिधायकोऽन्यसमाश्रयणस्य भावो घट सन् घट इत्येवमिति भाव । एकवचनानुपपत्त्यापत्तेश्च सर्वत्र—अत्र साधनमिति । ³⁰
एकधर्मावच्छिन्नत्वेन वाच्येन प्रतीयमाने घटोऽन्यतरधर्मावच्छिन्नत्वेनाभिधानस्य प्रयोगेऽनुपपन्न इति प्रतिज्ञार्थः कृत्स्नस्याभिधेय-

---

१ सि. क्ष छा विशेषु । २ सि क्ष छा डे °वैतत्त्व इति ।

तन्मतरसामान्यविशेषप्रयोगाभाव इति प्रतिज्ञा कृत्स्नाभिधेयस्वरूपोपादानसमर्थाभिहितत्वात्, यत्र कृत्स्ना-भिधेयस्वरूपं वस्तूपादानसमर्थेनाभिधीयते तत्रान्यस्य सामान्यविशेषप्रयोगस्याभावो दृष्टः, यथा पटं प्रति-त्वतुशब्दात्पटपार्थिवत्वोक्तौ यदि पटत्वेन समस्तं वस्तु विशिष्टं ततः पार्थिवत्वस्यानन्तराभावाभाव युज्यत इति दृष्टो दोषः तथा यदपटनिवृत्तिविशिष्टं वस्तु समस्तमुक्तं ततोऽपार्थिवनिवृत्तिविशिष्टं न युज्यत इति
5 समानः, यथासैकदेशो घट इत्यघटनिवृत्त्या गृहीतमेकः अपरोऽपार्थिवनिवृत्त्या देशः पार्थिव इति गृह्यतीति मत तदयुक्तम् अप्रतीतेः न हि निमित्तान्तरैरभ्यमानस्यैकदेशप्रतीतिर्दृष्टा, यथाऽऽचार्यो मातुल इति, तथा न हि व्यावृत्तिसामान्यस्यैकस्य एकदेशो गम्यः, कस्मात् ? अर्थैकसत्त्वसामान्यविषय-त्वात्-अपसामान्यस्य व्यावृत्यात्मत्वं तदस्माकं सत् घट इत्यादिसामान्ये स विषयोऽस्य शब्दस्य सोऽप्य-पृथक्त्ववत्सामान्यविषयः यावदसत्त्व[व]त्सामान्यविषयत्वं शब्दे तदेकदेशो न शक्यो वक्तुम्, किमिव ?
10 आचार्यो मातुल इत्यादिनिमित्तान्तरोक्तैकदेशानुक्तिवत् ।

अथापि स्यादसद्व्यावृत्तिजातिमत्येकमसदसत् घटते साक्षात् सतो महत्यां सत्ता, तस्मात्र सत्या घटादिभेदवादिभिः शब्दैः सामानाधिकरण्यं भविष्यति, सत्सामान्यगुणत्वात्, तद्वाचिशब्दस्यापि तद्व्यवच्छेदविषयत्वात् तद्यथा—अनन्यद्रव्यवर्तिनीलगुणसामान्येऽनील-निवृत्तिसामान्यस्य नीलत्वादिद्रव्यवृत्तित्वात् तैस्तद्वाचिभिः सह सामानाधिकरण्यं भवति,
15 यथा नीलतरः पटो नीलतम इति चेति ।

अथापि स्यादित्यादि, परमताशङ्का यथा विधिवादिमतमाशङ्क्यते तथापोहवादिमतमशङ्क्या

[illegible] प्रतिपादकवचनेनाभिहितत्वादिति हेत्वर्थः । अभिधानार्थं व्याचष्टे-यत्रेति । यत्र यदभिमतार्थो [illegible] [illegible] पार्थिवत्वोक्तौ [illegible] इत्याभिहितमिति पार्थिवत्वस्य [illegible] [illegible] दृष्टान्त स्पष्ट-यथा पटं प्रतीति । दार्ष्टान्तिकमाह-तथा यदीति । ननु [illegible] [illegible] परेण [illegible]
20 [illegible] [illegible] द्वितीयं विकल्पं दर्शयति-अथासैकदेश इति । निमित्तान्तरैस्तु नो देशो न प्रतीयत इति व्याचष्टे-अप्रतीतेरिति [illegible] घट इति तत्र [illegible] [illegible] भावः । [illegible] [illegible] उपाध्याय एव मातुलः [illegible] शिष्यो मातुलस्य [illegible] [illegible]—उपाध्यायं [illegible] न [illegible] मातुलमभिधास्यते तथा मातुलस्य [illegible] उपाध्यायस्य शिष्यं [illegible] मातुलं [illegible] त [illegible] [illegible] [illegible] पुत्रस्य वस्तुनो [illegible] भाव । [illegible]
25 [illegible] एकदेशो नोच्यते इत्यत्र हेतुमाह अर्थैकसत्त्वविषयत्वादिति [illegible] [illegible] [illegible] [illegible] [illegible] इति [illegible] [illegible] [illegible] न स्यात्, तत्र [illegible] तेन च तेन तावत्तु एकदेशो न शक्यते वक्तुम्, यथाऽऽचार्यो मातुल इत्यादौ निमित्ता-न्तरोपन्यासमात्रात् [illegible] एकदेशो नोच्यत इति भाव । [illegible] [illegible] [illegible] [illegible] [illegible] तस्मात्तदा महत्यां सत्ता आधारत्वं [illegible], एवम [illegible] सा [illegible]
30 [illegible] सह [illegible] सामानाधिकरण्यं स्यादित्याशङ्कते-अथापि स्यादिति । विधिवादिना [illegible] [illegible] [illegible] [illegible]-यथा विधिवादीति । [illegible]

१ सि क्ष डे प्र. [illegible] । २ सि क्ष डे प्र [illegible] । ३ सि क्ष प्र. डे [illegible]
४ सि. [illegible] क्ष. परमताशङ्का ।

पृथिव्यादिमतीत्यादिद्रव्यविशेषितमव्यभिचरितवस्तुत्वं यावन्नीलत्वम् इति चेति, अस्य व्याख्या—यद्यप्यसत् सत् घटादिषु न वर्तते, तथाप्येकत्रासद्व्यावृत्त्याधारे वर्तते सामान्यतो बहुधा शक्तास्ति, तस्मात्तु सत्त्वं घटादिभेदपादिभिः शब्दैर्येषु मा मया वर्तते तैस्तद्वद्भिः सामानाधिकरण्यं भविष्यतीति प्रतिज्ञा, तत्सामान्यगुणत्वादिति हेतुः—सा सामान्यगुणो येषां ते बहवोऽर्थाः [सत्] सामान्यगुणाः तद्भावात् तत्सामान्यगुणत्वात् तद्व्यतिरिक्तस्यापि तद्व्यवच्छेद्यविषयत्वात्—यथा सत्तया व्यवच्छेद्याः सर्वे विषया 5 भवाः, ते विषया —अर्थाः [यस्य] शब्दस्य स तद्व्यवच्छेद्यविषयः तद्भावात् तद्व्यवच्छेद्यविषयत्वात्, यत्र यत्रेत्याद्युपनयः कार्यः दृष्टान्तस्तद्यथा—अनेकद्रव्यवर्तिनी[ति]त्यादि, अनीलेतरे हि नीलगुणोऽनेकद्रव्य-वर्ती-द्रव्ये नीलगुण एव वर्तते नीलेतराद्व्यवर्तमानेऽपि तस्मिन् नीलगुणसामान्येऽनीलनिवृत्तिसामान्यस्य नीलेतरादिद्रव्यवृत्तित्वात् तैः सह सामानाधिकरण्यं भवति यथा नीलतरः पटो नीलतम इति चेति ।

सोदाहरणोपसंहारे वचनमत्र भूयः— 10

तच्च न, सामान्यविशेषभावस्य नीलत्वनीलगुणद्रव्यादेरनीलत्वानीलगुणद्रव्यनिवृत्ति लक्षणस्य तच्छब्दार्थाभावात् सम्प्रधार्यत्वात्, नीलशब्दोऽपि हि न द्रव्यं नीलत्वेनाह यत्तत्तर तमातिशयार्थभेदस्य सामान्यं स्यात् किं तर्हि ? अनीलव्यद्भावम्, तत्रच न नीलनीलतरनील-तमानां कस्यचिदपि सम्भवः, अनीलाभावभावत्वादेवेति चेत्, एवं विधिवाक्यार्थता तर्हि तैव, एवं हि सतोऽपि न सामानाधिकरण्यम्, अभूतसामान्यविशेषविषयत्वात् । 15

(तच्च नेति) तच्च न सामान्यविशेषभावस्य नीलत्वनीलगुणद्रव्यादेरनीलत्वानीलगुणद्रव्यनिवृत्तिलक्षणस्य तच्छब्दार्थाभावात् सम्प्रधार्यत्वात्—नीलत्वजातिशब्दार्थस्यानीलव्यावृत्तिलक्षणस्य [नीलगुणद्रव्य-व्यावृत्तिलक्षणस्य]नीलगुणद्रव्यार्थस्य चाभावादनीलेतरजातिगुणद्रव्यशब्दान्तराभावात् तत्सामान्यविशेषभा

---

वद्द्रव्यार्थोऽसत्सत्त्वसामान्यं तच्छब्दा सामान्यद्रव्यादिषु यावत्तया न वर्तते अपि त्वसत्सामान्यं त्वेकाधारे वर्तते एव तस्मादर्थं दर्शयति—यद्यपीति असत्सद्द्रव्यार्थो सत्त्वाधारे वर्तते तद्वाचिशब्देन तद्वाचकशब्दस्य सामानाधिकरण्यं भविष्य- 20 तीति प्रतिज्ञायत इत्याह—तस्मात्तु सत्त्वामिति । हेतुं वक्ति—तत्सामान्यगुणत्वादिति असत्सत्त्वसामान्यस्य बहु-वृत्तिसामान्यगुणत्वादिति तदर्थः असत्सत्त्वव्यावृत्तसत्त्वसामान्येन व्यवच्छेद्यभूता ये बहवोऽर्था विषयास्तत्त्वादित्यर्थः । यत्र यत्र तस्य बह्वर्थसामान्यगुणत्वं तद्वाचिशब्दस्य च तद्व्यवच्छेद्यविषयत्वं तत्र तत्र तद्वाचिशब्दैस्तद्वाचिशब्दस्य सामाना-धिकरण्यं दृष्टम्, यथा नीलतर पटो नीलतम पट इति चेति दृष्टान्तं दर्शयति दृष्टान्तस्तद्यथेति अनीलेतरसामान्यवाच्यो नीलगुण सोऽनेकद्रव्यस्य सामान्यगुण नीलद्रव्यमात्र एव वर्तते, न तु नीलतरनीलतमादिद्रव्यविशेषेषु सामान्यतो नील- 25 द्रव्यमात्रत्वात्, यतु नीलतरादिद्रव्येषु पटादिषु च नीलगुणोऽनीलनिवृत्तिसामान्योऽस्ति तद्वाचिनामेव सामानाधिकरण्यं भवतीति भाव । उपसंहरति—तच्च नेति । नीलसामान्यनीलगुणद्रव्याद सामान्यविशेषभावस्य नीलत्वाद्यर्थकं तावत्सम्प्रधार्यम् न तु निश्चितम्, नीलत्वाद्यनीलत्वनिवृत्तिमात्रवत्त्वात् अनीलगुणव्यावृत्तिमात्रवत्त्वात् द्रव्यस्यापि चाद्रव्यनिवृत्तिमात्रत्वात्, उभयोश्च तयोरभावार्थत्वेनोपचारे दृष्टान्ताभावः सामान्यविशेषभावस्यापि प्रमाणत्वादिति व्याचष्टे—सामान्यविशेष-भावस्येति नीलत्वं सामान्यं नीलगुणो विशेषः नीलगुणः सामान्यं द्रव्यं विशेष इत्येवं सामान्यविशेषभावस्येत्यर्थः । अनीलत्व- 30 व्यावृत्तित्वं नीलत्वमनीलगुणव्यावृत्तिलक्षणो नीलगुण अद्रव्यनिवृत्तिलक्षणं द्रव्यमित्येवं सर्वेषामभावरूपत्वा न सामान्या

---

१ क यदमिदं नास्ति। २ क का. तत्तत्पद्य । ३ क वह्ना। ४ सि क का डे न त्वद्रव्य ।

योऽपि सम्बन्धार्थः सम्बन्धनाहेतुर्यतश्च नीलशब्दोऽप्युत्पलादि–सोऽपि हि नीलशब्दो न द्रव्यं नीलत्वेनाह, [illegible] सामान्यं स्यात्, किं तर्हि [अ]नीलव्यवच्छेदं–अनीलत्वजातेरनीलगुणस्य वा निवृत्तिमाह, तत्र च–अभावे न नीलनीलत्वनीलत्वमानां भेदानां कस्यचिदपि सम्भवः तस्मात्स्वामाभिधानामास्ति सामान्यविशेषभावः, अनीलाभावमात्रत्वादेति चेत्–स्यान्मतमनीलत्वजातिगुणाभावो नील-
5 गुणद्रव्यभाव एव, स च सामान्यं नीलविशेषाणामिति चेन्मन्यसे अत्रोच्यते–एवं विधिशब्दार्थता तर्हि सैव नीलत्वजातिगुणभावरूपस्य विधेः तस्तु को दोष इति चेदुच्यते–यस्मादेवं सतोऽपि न सामान्याधिकरण्यं त्वदुक्तन्यायेन अभूतसामान्यविशेष[विषय]त्वात्, अनन्यद्रव्यवर्तिनि नीलगुणे नीलत्वनीलत्वप्रकर्षभेदाभावात् सामान्यविशेषत्वाभावः तस्मादभूतसामान्यविशेषविषयत्वात् त्वदुक्तनीलनीलत्वादिविषय सामानाधिकरण्याभाव इति दृष्टान्तासिद्धेः सच्छब्दा[र्थो]सङ्कीर्णवृत्त्या भेदानामसङ्कीर्णवृत्तिपक्षे विधिपक्षे
10 वा नास्ति सामानाधिकरण्यम् ।

उपेत्यापि तु व्यावृत्तिमदभिधानं सामान्यविशेषत्वाभावोऽसत्पटादिव्यावृत्तिमताम्, जातेरजातित्वः न ह्यभिधानप्रत्ययहेतौ सत्त्वादौ पटत्वजातिरस्ति, यथा नीलगुणे द्रव्ये नीलप्रकर्षभेदः यतोऽसदसत्त्ववतो वस्तुनोऽपटभावपटत्वादीनुपादाय प्रवर्तेत, द्रव्याणि तावदपोहवादिनस्तेऽस्माकमिव न पटादभिधानानां हेतवः, यानि तत्कारणान्यपटासत्त्वादीनि
15 तानि नासदसत्त्वापाम्, न चाविद्यमानः स्वात्मन्यर्थः शक्यते विशेष्यवस्तुन्यध्यारोपयितुम्, खपुष्पवत् तस्मादविद्यमानतद्रूपं नीलमिव मधुरं न सदादीन् विशेषयिष्यतीति क्व सामानाधिकरण्यं स्यात्[1] ।

( उपेत्यापीति ) उपेत्यापि तु व्यावृत्तिमदभिधानं–सच्छब्देनासङ्कीर्णवृत्तिमतः सतोऽभिधान-

---

निर्विशेषत्वं सामान्यविशेषभाव उपपद्यत इति न दृष्टान्तत्वसम्भव इति भावः । व्याख्याति हेतुत्वेन यावत्–सम्बन्धना-
20 हेतुरिति नीलशब्दस्य नीलत्वेन द्रव्यमेवाभिधत्ते हि नीलजातिप्रकर्षभेदस्य नीलत्वं सामान्यं भवेत् न चैवम्, [illegible] [illegible] भाव । [illegible] [illegible]–अभाव इति [illegible] निर्विशेषत्वाच्च सामान्यविशेषभाव इति भाव । [illegible] [illegible]–अनीलाभावमात्रत्वा-दिति अनीलत्वाभावो नीलगुणस्य [illegible], नीलगुणद्रव्यस्य तत्र प्रकर्षाभावात् सामान्यविशेषभावो [illegible] भाव । [illegible] [illegible]–एवं विधिशब्दार्थ-
25 तेति । दूषयति दोषमाह–यस्मादेवं सतोऽपीति [illegible] [illegible] [illegible] सामानाधिकरण्यं न सम्भवतीत्यर्थः । हेतुमाह अभूतसामान्येति नीलशब्दस्य सामान्यविशेष[illegible] । [illegible]–अनन्यद्रव्यवर्तिनीति, अनन्यद्रव्यवर्तिनीलगुणसामान्यं न नीलत्वनीलत्वादिप्रकर्षभेद [illegible] नीलगुणस्य नीलत्वादयो न प्रकर्षभेदा तेन ह्यभूतसामान्यत्वादिति सामान्यविशेषत्वाभावेन दृष्टान्ताभावेन सच्छब्देनापोहपक्षे विधिपक्षे वा नैतस्य योगाभावात् तत् च दृष्टं समानाधिकरण्यमनुपपन्नमेव स्यादिति भाव । [illegible] न [illegible], [illegible]
30 [illegible] [illegible] [illegible] भाष्यानुसारेण–उपेत्यापीति । [illegible] [illegible] [illegible]-मतोऽपि तत् [illegible] सामान्यविशेषभावो न [illegible] [illegible]–सच्छब्देनेति, सच्छब्देनासङ्कीर्णवृत्तिमतो [illegible]-

---

1 हि प्र. का. है. [illegible] ।

मभ्युपगम्यापि सामान्यविशेषस्वाभाव्योऽसद्धटाभिन्याद्वृत्तिमताम्[सद्]घट[त्वीनां,] कुतः ? जातेरजा
तितः–भासा जातिर्विषय इति [अ]जातिरिति विग्रहात् सामान्यानां सामान्यानाधारतां दर्शयति,
न ह्यभिधानप्रत्ययहेतावित्यादि यावत् प्रवर्तेतेति सदभिधानप्रत्ययहेतुरसदघटाभावात्मिका सत्ताजाति –सत्ता,
तस्मात्स्वघटाभावात्मिका घटत्वजातिर्नास्ति, यथा नीलकुसुम द्रव्ये नीलप्रत्ययभेद इति दृष्टान्तदार्ष्टान्तिक-
योर्वैधर्म्यं दर्शयति यतोऽसदसत्त्ववतो वस्तुनः अघटाभावघटत्वादीननुपादाय प्रवर्तेत इत्यसम्भवमन्योऽन्येषु 5
दर्शयति द्रव्याणि तावद्घटोद्भावितत्वेऽसाधकमसम्योगाभिमतविशेषविधिविनाशिव घटाद्यभिधानप्रत्ययानां न
हेतवः, मान्यघटासत्त्वादीनि तत्कारणानि, तानि नासदसत्तायां सन्ति, तस्माज्जातिरजातिरिति सिद्धम्,
ततः किं ? ततो–न चाविद्यमानः स्वात्मन्यर्थः–सत्तामीलत्वादिविशेषणे न शक्यते विशेष्यवस्तुनि–घटो-
त्सत्तायामध्यारोपयितुम्, किमिव ? स्वरूपवदिति वैधर्म्यदृष्टान्तः–यथा स्वरूप शब्दो विशेषेऽध्यारोप-
यति न तथेदेति, तस्मादित्यादि प्रस्तुतोपसंहारो यावत् सामानाधिकरण्य स्यादिति, गतार्थः प्रयोगश्चात्र न 10
सद्घटादि विशेषयिष्यति अविद्यमानतद्रूपत्वात्, अविद्यमानस्वरूपत्व प्रतिपादितत्वात् सिद्धम्, नीलमिव
मधुरमिति दृष्टान्तो गतार्थः ।

अर्थाक्षिप्तस्तर्हि, असद्व्यावृत्तिमतोऽन्यतमघटत्वादिसामान्यविशेषानुपपन्नत्वात्, नैत
दस्ति, अर्थाक्षेपेऽप्यनेकान्तात्, असद्व्यावृत्तिमता

---

घटादिव्यावृत्तिमतो योऽन्योऽपि न सामान्यविशेषत्वमर्थ । तदाह–जातेरजातित इति जातेर्जातिमत्त्वाभावाभिप्रायेणे । जातौ 15
जात्यभावं दर्शयति–न ह्यभिधानेति सदित्यभिधाने प्रत्यये च हेतुरसद्व्यावृत्तिरूपा सत्ता जाति तथाच घटाभिधानप्रत्ययहेतु-
रघटाभावात्मिका घटत्वजातिर्नास्ति तथाच सामान्यविशेषत्वाभिमान । अत्रार्थे वैधर्म्य निदर्शनमुपन्यस्यति–यथा नील-
कुसुम इति तत्र परस्परसम्बन्धे परस्पराभिधानप्रत्ययहेतुत्वे सत्यपीति भाव । एवञ्च सम्बन्धेऽपराभिधानप्रत्ययहेतुत्वस्य
एव तद्रूपत्वस्य प्रवर्तेत न चैवमस्तीति यदि–यतोऽसदसत्त्ववत इति असदभावाभावेऽसत्त्ववति घटाभिधानप्रत्यय-
हेत्वोरघटाभावघटत्वयोस्तत्त्वे तदुपादाय तत्प्रत्यय प्रवर्तेतेत्यर्थ । इतो नास्तीत्याह–द्रव्याणि तावदिति, घटासत्त्वाभि- 20
धानप्रत्ययनिमित्तभेदस्य तदर्थं घटासत्त्वं मते द्रव्याण्यघटत्वमुपाति यथा च तदभिधानहेतुभूतानि तथैव तत मतेऽपि,
तन्मते घटाभिधानेऽघटाभावस्यैव हेतुत्वात् स च सदभिधानेऽसत्त्वतत्सत्ता नास्तीति जातेरजातित्वं सिद्धमिति भाव । एवञ्च
तत् यथो नीलमधुरत्वभिन्नत्वे विशेषणेऽसत्त्वतद्रूपत्वतया नीलत्वादिवन्नीलत्वे चाविद्यमानत्वमात्रतद्रूपत्वाभावान्
न्यायविरुद्धतरेतत्त्वं धर्मं विशेषे घटे तत्त्वे च समध्यारोपयेत्, न हि यथा कुसुमेऽविद्यमानं स्वरूपं तद्विशेषेऽध्यारोपयितुं
शक्यमित्याह–न चाविद्यमान इति । दृष्टान्तमाह–स्वरूपवदिति धर्मो धर्मे स्वरूपं स्वाधारगतं योऽत्यन्ताभिमाति 25
विवक्षिते तदभावाभावस्यान्यतमघटादीनां योऽयमितराभावमनु घटादेरध्यारोपत्व कल्पना क्रियते तदन्यस्वरूपतिरोहिते
नीरूपत्वं स्वरूपासत्त्वा घटादेर्भेदात्, सामानाधिकरण्याभावात्तदुपपत्त्याऽध्यारोपः सम्भवत कल्पना घटेऽस्त्येव घटे सम्बन्ध
त्वादिति भाव । तथा चाध्यारोपासम्भवेऽसद्व्यावृत्तिमतोऽसामान्यविशेषाभावे सत्तया घटपदाभिधानात् सामानाधिकरण्यं कथं
मत्यनिरूपणेनाह–तस्मादित्यादीति । पर्यवसितमनुमानप्रयोगमाह–प्रयोगश्चात्रेति स्पष्टमन्यत् । अथ सदादिभ्योऽन्यो
घटादिभेदाना भेदाज्जातेरजाति आक्षेपासम्भवेऽप्यर्थतः घटादिभ्य एवाशङ्कत–अर्थाक्षिप्तस्तर्हीति । भावते– 30

---

१ सि क्ष डा दे °भावमसद् । २ सि डा॰ सामान्यानां सामान्याधारताम् य क्ष दे सामान्यसामान्या
धारताम् य । ३ सि क्ष डा. दे अघटाभाव । ४ सि क्ष. डा. दे. शब्दो विशेषे ।

विशेषाक्षेपो युज्यते चेद्भेदानां व्यभिचाराद्द्रव्यत्वमात्राक्षेपस्तर्हि भविष्यति, तदपि न गुणादि-
व्यभिचारात् एतावच्च ।

अर्थाक्षिप्तास्तर्हीत्यादि, यदि घटाद्यसत्त्वेऽप्यन्यत्वादनभिहिताः सामान्यान्यत्वसामान्यत्वादर्थत
एवाक्षिप्ता भवितुमर्हन्ति, कुतः? असद्व्यावृत्तिमतोऽन्यत्वमन्यत्वादिसामान्यविशेषानुपपत्तेः—असद्व्या-
5 वृत्तिमति वस्तु घटत्वादीनां सामान्यविशेषाणामन्यतमेनावश्यमनुगतम्, असत्त्वं न भवत्यवश्यं भवति,
तच्च घटत्वाद्यन्यतमदिति परो मन्येत, अत्रोच्यते—नैतद्युक्तं, अर्थाक्षेपेऽप्यनैकान्त्यात् अस्य भाष्य व्याख्यान
गतार्थं यावदसद्व्यावृत्तिमता विशेषाक्षेपो युज्यते चेत् घटादिभेदानां व्यभिचाराद्द्रव्यत्वमात्राक्षेप
तर्हि भविष्यति मात्रग्रहणात् द्रव्यत्वसामान्यविशेषमात्र गृह्यते सविशेषणनेति, अत्रोच्यते—तदपि न,
गुणादिव्यभिचारात्—गुणकर्मणोरपि भावात् किं द्रव्यं गुण कर्म वा स स्यादसद्व्यावृत्तिमदिति संशय
10 एव एतावच्चेत्यनुपसंहारः पूर्वविधिवादिरूपस्योपसंहारवदन्यापोहमात्रेऽप्युपसंहारस्य नास्ति सम्भवः ।

एतेषां विकल्पानां दोषवत्त्वात् तेन चापोहकृच्छ्रुतिरिति यथा विधिवादिनामपोहवादिनश्च दोषास्तथा
सामान्योपसर्जनविधिप्रधानवादिनोऽपीति—

मा मंस्था अन्यापोहवादिस्वलक्षणवदतिप्रसक्तत्वादपवादोऽस्याप्यारब्धव्यो लक्षणस्येति
किमन्यस्त्वे न सामान्यभेदपर्यायवाची? किं त्वन्यसोऽन्यस्त्वे सामान्यभेदपर्यायशब्दाना-
15 मर्थं वृक्षश्रुतिर्नापोहतेऽविरोधात् विरोधाच्च घटादीनपोहते अस्य हि विरुद्धाविरुद्धयोर-
न्यत्वादपोहानपोहप्रसङ्गे तुल्ये त्वयैव मयाऽपवादो नारभ्योऽनारभ्यविधित्वात् विधिना हि
सामान्योपसर्जनं विशेषं शब्दोऽभिदधानो विरोधाभावात्तानपि गमयति, त्वया पुनरुत्सर्गवाक्ये

यदि घटादय इति [illegible] तथा न्यायतो भेदात्, तथा [illegible] इति भावः । [illegible]
[illegible] —अर्थतस्त्वर्हीति, [illegible] सामान्यविशेषात्मेन [illegible]
10 [illegible] सम्भवतीति
भावः । एतदेवाह—असद्व्यावृत्तिमतीति । [illegible] —असत्त्व इति, [illegible]
[illegible] । [illegible] —तच्चेति । [illegible] —अर्थाक्षेपेऽपीति [illegible]
[illegible] व्यभिचारो [illegible]
[illegible] व्यभिचार इति भाव । द्रव्यमात्राक्षेपे न दोष [illegible] —द्रव्य-
15 मात्राक्षेप इति । [illegible] व्यभिचार इति [illegible] —गुणादिव्य-
भिचारादिति [illegible] किं द्रव्यं किं गुणः किं वा कर्मेति [illegible]
[illegible] व्यभिचारो दुर्वार एवेति भाव । विधिवादिपक्षवदत्रापि दोषोपसंहारमाह एतावच्चेति । [illegible]
[illegible] एतेषां विकल्पानामिति, [illegible]
[illegible] । [illegible] सामान्योपसर्जनविशेषप्रधानशब्दा-
20 [illegible] इति मा मंस्था इत्याह मा मंस्था इति । [illegible]

१ सि. क्ष. डे. [illegible] । २ सि. क्ष. डे. [illegible] । ३ सि. क्ष. डे. [illegible]
[illegible] सं ।

महता क्लेशेन प्रतिपाद्यान्यापोहोऽस्वादेन त्यक्तः, अनिर्वाहकत्वात्, सामान्यादिशब्दान्तरार्थापोहानिष्टेः, ततः सामान्यादिशब्दान्तरार्थात्यागात्तु नन्वयमेव परमविधिः विधानं विधिः लक्षणतस्त्वनपायाद् प्रतिपत्त्याधानम्, स च शब्दार्थः सामान्यादिशब्दार्थैर्व्यभ्याहतत्वाद् परमः।

(मा मंस्था इति) मा मंस्थाः—मा च मंस्था अन्यापोहकादिलक्षणपदप्रतिप्रसक्तत्वादपवादोऽस्मा प्यारभ्यमाणो लक्षणस्येति, अत आह—किमन्यत्वे न सामान्यमेवपर्यायवाची ? अपवादविरोधादिति वाक्य- 5
शेषः—किमिति प्रश्ने, किं त्वं मन्यसेऽन्यत्वे सामान्यमेवपर्यायशब्दानामर्थं शृङ्गग्राहिकयानिर्पोह्यते ?—पृथिवी-
भिन्नपार्थवादिशब्दानाम्, अविरोधात् विरोधाच्च घटादीनपोह्यते ? इति, यतोऽस्य विरुद्धाविरुद्धयोरपवादत्वात्
अपोहानपोहमङ्गे तुल्ये त्वयैव मयापि [ अपवादो मारभ्यम् ] यथा शब्दान्तरार्थापोहं हि स्वार्थे कुर्वती
श्रुतिरभिधत्त इति लक्षणस्यातिप्रसङ्गभयादारभ्यम्, अन्यत्वेऽपि न सामान्यमेवपर्यायवाची अपवादविरो-
धात्, किं कारणम् ? अनारम्भविधिः, विधिना हि सामान्योपसर्जन विशेष शब्दोऽभिदधानो विरोधा 10
भावाद्यानपि गमयति, तदनु सामान्यादिभ्योऽर्थभूतार्थत्वादिति कारणं वक्ष्यति नन्विदमेव विधिना वाच-
कत्वेऽनुमानं शब्दस्य यदन्यत्वेऽपि सामान्यादीनां विशेषानुगुणानां गतिः समूहस्य प्रकृतिप्रत्ययादीनां
तदर्थान्तरवाचक इति युक्त्या वक्ष्यामः त्वया पुनरुत्सर्गवाक्ये महता क्लेशेन प्रतिपाद्यापोहेन त्यक्तः,
किं कारणं ? अनिर्वाहकत्वात् किमनेन प्रतिज्ञातमर्थमनिर्वहता ? शब्दान्तरार्थापोहं स्वार्थे कुर्वती तदर्था-
न्यापोहार्था स्यात्, तत्तु नोक्तं अतस्त्व सामान्यादिशब्दान्तरार्थापोहानिष्टेः तस्मात्त्यक्तोऽन्यापोहः, 15

सामान्यमेवपर्यायादेः पृथिवीभिन्नपार्थवादीन् नापोह्यते अविरोधात् घटादींस्त्वपोह्यते विरोधादिति किमत्र तुल्यमन्यापोहता-
विति अपवादेनापि सामान्यमेवपर्यायादीनामन्यत्वे तुल्ये सामान्यमेवपर्यायवाचा किं शब्दाविशब्दो न वाचक इति मन्यसे इत्याह—
किमन्यत्व इति अन्यापोहमतेऽन्यत्वे अपवादो सामान्यादौ समानं शब्दाविरोधः किं सामान्यादीन् ब्रूते अपवादेन
शब्दान्तरार्थापोहमित्याशङ्क्यान्यापोहानुकूलिति वाक्यापवादभूतेन विरोधात् पृथिवीभिन्नपार्थवो हि शब्दान्तरार्थो तदपोह-
स्वधर्मः अपोहेति भावः अनुवादिविरोधादिति पाठस्तु प्रमादकृतः शब्दान्तरार्थविरोधान्यस्य वचनं करोति स्वपरपक्षानुगामि- 20
त्वान्यापोहानुकूलिति वाक्यं तत्र सह विरोधविरुद्धौ विशेष । प्रश्नार्थं स्फुटयति—किं त्वं मन्यस इति एवमप्यनुमतेऽप्यन्यत्वे
सामान्यादीन् अपवादविरोधाद् विरोधाच्च नापोहतेऽपोहते चेति भावः । यतोऽस्येति अपवादिसामान्यमेवादेर्विरुद्धाविरुद्धयो-
रपवादस्य तुल्यत्वात् सर्वथापोहानपोहस्य वा मया शब्दान्तरार्थापोहानुकूलिति अपवादातिप्रसङ्गभयात्त्वयाऽपवाद आरम्भ
मया तु नारभ्यम इति भावः । तथा च समर्थयन् आरम्भं दर्शयति—यथा शब्दान्तरेति । इष्टो मया नारम्भस्तत्र कारणमाह—
अनारम्भविधिरिति अत्राप्यनारम्भ विधिसामर्थ्यादिति भावः । अत्राऽनारम्भमेव दर्शयति—विधिना हीति तदविरोधात् 25
सामान्योपसर्जनं विशेषं विधिनाऽभिदधानः पृथिवीभिन्नपार्थवादीनपि अत्रसामर्थ्यात्प्रत्याययत्येव इति भावः । तदनुसामान्यादिभ्योऽर्थभूतार्थ-
त्वमत्र कारणमेव शब्दो विधिरूपेणार्थस्य वाचक इति प्रदर्शयन्नाह—नन्विदमेवेति । ननु भवतु विशेषो विधिरूपत्वात्
सामान्यादीन्यपोहत्यमेवेत्याह—यदन्यत्वेऽपीति अन्यत्वेऽप्यपोह्य सामान्यमित्यत्वे सोऽपि यदि विशेषस्यानुगुणो भवेत्तदैव
तस्य धर्मेण परिगमयति नान्यथेति युक्त्याऽऽह इति भावः । त्वया तूत्सर्गवाक्ये प्रतिपाद्यापोहेऽप्यवादेन त्यक्त इत्याह—त्वया
पुनरिति । त्यागे कारणमाह—अनिर्वाहकत्वादिति । अनिर्वाहकत्वमेवाह—शब्दान्तरेति 30

१ सि. क्ष. डा. दे. वाक्यनुगामि विरो । २ सि क्ष डा दे मन्यसे त्वमेव सा । ३ सि क्ष. डा दे. मयापि यथा । ४ सि क्ष डा. दे अनुवाद । ५ सि. वादेनैनुक्तः ।

ततः किं ? ततः सामान्यविशेषयोरपत्यागात् स्वनिष्ठो न्यायसमेव परमविधिः, कोऽसावर्थो विधेरित्यत आह–विधान विधिरिति अप्रणतस्यनरवात्प्रतिपस्याधानं विधि स च–विधिरेव शब्दार्थः सामान्यो गम्यश्चार्थोऽन्यत्वात् परमः ।

तत्र तावत्सामान्यायुक्तिः सामान्ये विशेषविध्यया न व्याहन्यते, त्वयैव सामान्य नाप-
नुवर्तीत्युक्तत्वात्, असंदिष्ट उपसर्जनीकृतसामान्यो विशेषो विधिनैवोक्तः, यथा न हि पटादि
पाद्यवस्तु सामान्योपसर्जनमन्तरेण भवितुमर्हति वस्तुत्वात्, आत्मवत्, यथा नामरूपसन्ता
नास्य आत्मा शरीरादिप्रतिक्षणदेशभिन्नरूपादिसुखविज्ञानादिविशेषतत्त्वार्थो नरकमनुआदि
निपतत्य आमुक्तः सन्तानास्यसामान्योपसर्जनमन्तरेण न भवितुमर्हति, एवं पटशब्देना-
प्यागृहीता मृदादयस्तच्छब्दार्थान्तःपातित्वात्, आकारादिवत्, एवं तावत्तटे विशेषशब्दार्थे
10 पार्थिवद्रव्यसत्त्वादिसामान्यात्यागो युक्तो विधिप्रधानशब्दार्थत्वात् ।

( तत्रेति ) तत्र तावत् सामान्यायुक्तः सामान्य विशेषविध्यर्थो न व्याहन्यते, त्वयैव सामान्यं न [प] नुवर्तीत्युक्तत्वात्, असंदिष्टे उपसर्जनीकृतसामान्यो विशेषो विधिनैवोक्त इति, तस्य निदर्शनम् यथा न हि पटादीन्यपि साधनमिद–सामान्योपसर्जनमेव–न सामान्यानुपसर्जनं भवितुमर्हति पटपदा दिवाच्यवस्त्विति प्रतिज्ञा वस्तुत्वादिति हेतुः, आत्मवदिति दृष्टान्तः, आत्मवदेवार्थो नामरूपसन्तानस्य आत्मा यथा न शरीरादिप्रतिक्षणदेशभिन्नरूपादिसुखविज्ञानादिविशेषतत्त्वार्थः सन्तानास्यसामान्योप-
सर्जनमन्तरेण भवितुमर्हति नरकमनुजादिविनिपतनस्य [आ] मुक्त – यावन्मोक्षसन्तानविषयः सामा-
न्यानुविद्ध एव तथा पटादयोऽपि भावा इत्यत आह–एवं पटशब्देनाप्यगृहीता मृदादय इति शब्दे वाच्ये

[illegible] । विधिरेवेति [illegible] । [illegible] तावदिति । [illegible] तत्र तावत्सामान्या
युक्तिरिति [illegible] इति [illegible]
25 [illegible] यथा न हीति [illegible]
[illegible] इति [illegible]
[illegible] यथा न हि इति [illegible]
[illegible] एवं पटशब्देनेति [illegible]

१ [illegible] । २ [illegible] । ३ [illegible] । ४ [illegible] ।

सामान्यसत्त्वाद्युपसर्जनं घट[।शि]विशेषार्थं दर्शयति, तच्छब्दार्थान्तःपातित्वादिति आत्मघटादिविशेषवा-
चिना सर्वनाम्ना वस्तुत्वसामान्यस्य साध्यत्वानुगतस्य विशेषाविनाभाविनो दर्शयति, आकारादिवदिति,
प्रतिक्षणभेदाविभिन्नरूपादिविशेषपरमार्थस्योर्ध्वमीयपुद्गलस्कन्धत्वादिसामान्योपसर्जनस्य सद्भावात्, एव
वाच्यघटे विशेषशब्दार्थे पार्थिवद्रव्यसत्त्वादिसामान्यालम्बनो युक्तो विधिप्रधानशब्दार्थत्वात् ।

एवं तर्हि वृक्षः शिंशपेति शिंशपाविशेषो विधिना कथमुच्यते वृक्षविधायनुपसर्जनः ? इत्यत्रोच्यते— 5

भेदास्तूच्यन्त एव, घटसामान्यस्य तदङ्गत्वात्, तदात्मकत्वात्, रूपादिस्वरूप-
शब्दार्थत्ववत् सामान्योपसर्जनद्वारेण प्रतिपादनार्थं सामान्यशब्दाः प्रयुज्यन्ते न तु परमार्थ-
सता कश्चित्तेन वा विना तेन शब्दार्था भवितुमर्हन्तीति सामान्यशब्दप्रयोगो विशेषप्रति-
पादनार्थः, विशेषास्तु विवक्षिता एव विशेषपरमार्थत्वादस्य नयस्य ।

( भेदा इति ) भेदास्तूच्यन्त एव वृक्षः शिंशपेत्यादिवत् घटस्य विशेषाः रूपादयो युगपद्युग- 10
पद्भाविनश्च एव तु रसशब्दार्थत्वादुच्यन्ते, घटसामान्यस्य तदङ्गत्वात्, घटाद्युपसर्जनरूपादिविशेषपरमार्थत्वात्
तदात्मकत्वात्—स वि[शि]ष्टो भवन भावः प्रत्येकं निर्विकल्पस्वरूपाविभवनमात्मलाभः, तदात्मकभावात्मा
ऽस्य घटस्येति तदात्मकत्वं घटः, शिबिकावाहकधानेश्वरस्येव यानपतित्वं भावः, तमित्यपरि—रूपादिस्व-
रूपशब्दार्थत्ववदिति यद्यपि युगपद्भाविनो रूपादिसमावा एव रूपरसगन्धस्पर्शशब्दा एव निर्विकल्पा
वस्तुत्वाच्छब्दार्थः प्रतिक्षणसर्वयुगपद्भाविनो वा विशेषास्तथा[पि]सामान्योपसर्जनद्वारेण प्रति[पाद 15

साध्ये चाम इति । इदं दर्शयति—तच्छब्दार्थान्तःपातित्वादिति । यत्र यत्र तच्छब्दार्थान्तःपातित्वं तत्र तत्र सामान्यो-
पसर्जनविशेषत्वं दृष्टम् यथाऽऽत्मा, दृश्यते तच्छब्देनाऽऽत्मा माय सार्वनिके च तच्छब्देन चाहि भावम्, तच्छब्देनाऽऽत्म-
घटादिविशेषाभिधानात्, सर्वनाम्न वस्तुपरिस्थितवस्तुसामर्थ्यत्वात्, एवं घटघटादिवस्तुभावस्य तच्छब्दार्थान्तःपातित्वादस्तु-
सामान्यं हेतुः साध्याविनाभावीति विवक्षतीति दर्शयति—आत्मघटादीति । आकारवदिति, यथाऽऽकाराद्य ऊर्ध्वग्रीवा-
द्यो यथा सोपसर्जनप्रतिक्षणभिन्नरूपादिविशेषात्मा तच्छब्दार्थान्तःपातित्वादिति भाव । तदर्शयति—एवमेतावस्तु इति । 20
ननु एवं वस्तुत्वपृथिवीद्रव्यत्वसत्त्वादिसामान्योपसर्जनो घटशब्दार्थविशेष उच्यते न तु वृक्षसामान्योपसर्जन शिंशपादिविशेष-
त्वम् तथा च वृक्ष शिंशपेति वृक्षविधौ वृक्षोपसर्जनः शिंशपादिः कथमुच्यत इत्याशङ्कायामाह भेदास्त्विति, शिंशपादि-
व्यतिरिक्तस्य वृक्षसामान्यस्य शिंशपादेरात्मत्वात् वृक्षत्व च शिंशपात्वात्, वृक्षोपसर्जनाः शिंशपादयोऽप्युच्यन्त एवेति भावः ।
घटादिशब्दैर्विशेषा युगपद्योऽपि उच्यन्त एव यथा घटशब्देन घटत्वभिन्नरूपादिविशेषपदार्थो युगपद्भाव्युच्यन्ते वस्तुसामान्योपसर्जन-
तया तादृशमाह—वृक्षः शिंशपेत्यादिवदिति । के युगपदयुगपद्भाविनो घटस्य विशेषा इत्यत्राह—घटस्य विशेषा इति । 25
युगपद्युगपद्भाविविशेषपरमार्थत्वया घटसामान्यमुपसर्जनत्वोच्यते तथा च घटाद्युपसर्जनयुगपद्युगपद्भावि-
रूपादिविशेषा घटादिरूपा घटसामान्यस्य इत्याह घटसामान्यस्येति । रूपादयो युगपदोऽपि घटस्य उपसर्जनभूतानां इति रूपादि-
भाव तदात्मकत्वमिति यद्येवं हि रूपादेरात्मभावं तदतिरेकेण तदसम्भवात् उपनीतघटस्वभावमेव घटात्मा तथा च रूपादिनगरात्मक-
त्वाद्वस्तु घटाद्युपसर्जनरूपादिप्रधानं घटप्रत्यय । घटस्य विशेषत्वे दृष्टान्तमाह—शिबिकेति शिबिकावाहकात्मा यानमीश्वर
यानाधीनत्व ईश्वरत्वमनुभवतीति भावः । सामान्यसोपसर्जनत्वाऽभिधाने कारणमाह—रूपादिस्वरूपेति रूपादिविशेषघटरसादि-30
वदित्यर्थः । भावार्थमाह—यद्यपीति प्रत्यक्षप्रत्ययाः यथा निर्विकल्पा रूपादिविशेषघटसामान्यविशेषाः परस्परभिन्ना नोच्यन्ते दृष्टे-

1 क. तच्छब्दार्थेन । × × क 2 भि घ क पे घटात्मापेक्षया । × × सि ।

नार्थ]सामान्यशब्दाः प्रयुज्यन्ते, न तु कश्चित्तेन परमार्थसता वा विना तेन-स्वसामान्येन शब्दार्थो भवितुमर्हतीति तस्मात् सामान्यशब्दप्रयोगो विशेषप्रतिपादनार्थो विशेषास्तु विवक्षिता एव, [विशेष]परमार्थत्वादस्य न-यस्येति ।

पर्यायशब्दा अपि तद्विधानाः, घटनविशेषस्य कुटनकुम्भाद्यपर्यायसम्भवत्वात्, कुटनस्य ५ नाम्ना विना नास्ति कुम्भता नाम काचित्, तथा वा विना न घटनकुटने स्त इत्येतदवगम्यतां घट इत्युक्ते तत्प्रतिपत्तशब्दार्थवदप्रतिपन्नसामान्यविशेषपर्यायशब्दार्थो अन्ये ततस्तेषामन्यत्वे तुल्ये विधिप्राधान्यादेव तावापोह्यते अतोऽस्माकमपवादलक्षणान्तरारम्भक्लेशादृते व्यापि युक्ताभासस्योपाधिसत्यविध्यर्थलक्षणशब्दार्थकथनम्, भवतस्तु विध्यतिक्रमेण प्रस्तुतासत्य-शब्दार्थानापत्तिरन्यापोहायुक्तिश्च ।

१० पर्यायशब्दा अपीत्यादि, ये पुनः पर्यायशब्दास्ते तद्विधानाः—एवमेव विशेषं विदधति, घटनविशेषस्य कुटनकुम्भाद्यपर्यायसम्भवत्वात् तस्य कुटिलता कुटनं घटन चेष्टा कुम्भता इत्यत नाम्ना कुटन-घटनाम्नो विना नास्ति कुम्भता नाम काचित् तथा वा विना न घटनकुटने स्त इति हि कुटनेत्यविना-ऽन्योन्याविनाभाव दर्शयति, प्रकृतमुपसंहरति-इत्येतदवगम्यतामित्यादिना, इत्थं प्रतिपत्तव्यं यथा घट इत्युक्ते घट इति तत्प्रतिपन्नशब्दार्थोऽन्यः, तथैवाप्रतिपन्नसामान्यविशेषपर्यायशब्दार्थो अन्ये, ततस्तेषामन्यत्वे १५ तुल्ये विधिप्राधान्यादेव तावापोह्यते नान्यत्वात्र्त विधेः अतोऽस्माकमपवादलक्षणान्तरारम्भक्लेशादृते व्यापि युक्ताभासस्योपाधिसत्यविध्यर्थलक्षणशब्दार्थकथन मेवोपयुक्तमर्थयुक्तिश्च भवतस्तु विध्यतिक्रमेण प्रस्तुतासत्यशब्दार्थो[ना]पत्तिरन्यापोहायुक्तिश्च ।

तत्सत्पर्यायस्वभावात्, किन्तु अभेदमुखेन येनचित्सत्त्वा कल्प्यते तेन तदात्मेत्यापत्तेव घटादयस्त्वविना न तथा न रूपादिव्यति-रिक्ता रूपादिसमाजा एव रूपादिसमाजसमर्थाः एवं सामान्यशब्दा अपि सामान्यभेदेन स्वमुखमनन्यत्वात्तस्मात्स्वरूपमुपादायैव २० वर्त्ये प्रयुज्यन्ते तदा समानमनन्तरमतस्तदारम्भत्वाद्यन्तात् विशेषप्रतिपादनोपायत्वात् सामान्यशब्दा प्रयुज्यन्ते सामान्येनाविष्टरूपैव विशेषा परस्तीपादिनु अन्यत्वात्तत्र सामान्यं परमार्थसत्त्वेन वाच्यत्वात् कश्चित् वा सत् सामान्यं विना तु न शब्दार्थो भवितुमर्हतीति । एवं सामान्यशब्दप्रयोगः सामान्यद्वारेण विशेषाणां प्रतिपादनार्थं विशेषा एव न विवक्षिता भवन्त एव प्रधानभिन्ना-तस्मादिति । पर्यायसामान्यविशेषस्वरूपस्य पर्यायशब्दा अपि तत्सामान्योपसर्जनविशेष-प्रधानत्वादेव इत्याह पर्यायशब्दा अपीति । व्याख्या-ये पुनरिति । हेतुमाह घटनविशेषस्येति घटनकुटनकुम्भानां २५ परस्परमविनाभावित्वं । एतमर्थमाह-तस्य कुटिलतेति तस्य कुटिलता कुटनमुच्यत इत्यर्थ एवमन्येऽपि । अविनाभावं दर्शयति-नाम्नामिति । एवं घटकुटकुम्भादिपर्यायशब्दार्थानां परस्पराविनाभावित्वेऽपि घटकुटकुम्भादीनां पर्यायशब्दानां परस्परस्वरूपत्वात्, घटशब्दाप्रतिपन्नकुटकुम्भादिशब्दार्थानां घटशब्दकुम्भादीनामन्यत्वमित्याह-इत्थं प्रतिपत्तव्येति । तत्रैवमन्यत्वे तुल्येऽपि शब्दा एव न अन्यार्थाः पेह्यन्ते विधिप्राधान्यादित्याह-ततस्तेषामिति, तेषामन्यत्वे तुल्ये सामान्यभेदपर्यायशब्देषु घट न तु तान्यपोह्यते, एवं विधे नान्यत्वमपि विना स्वरूपान्तरम्भक्लेशोऽस्माकमनवसर एवेति विधि-३० व्यापीति भाव । युक्त्याभासस्योपधिसत्यविध्यर्थलक्षण शब्दार्थकथनमुक्ते युक्ताभेति मवतस्त्वनुमानयुक्तिश्च । अन्योपदर्शने दोषमाह भवतस्त्विति अन्यापोहमुखेनेति विशेषात्मनाऽन्यापोहस्तस्माद्यस्य शब्दार्थानापत्ति युक्त्या विरुद्धार्थाभावा-

१ सि डा डे 'भावान्यादेवस्पापा । ब 'भावान्य देवस्पापा । २ सि ब. का. हेतात्ते । ३ सि तत्सदि नर्थक ब का. सत्सदि नर्थक । ४ सि ब का पुनरि ।

यदि विधिर्नेष्यते ततो न केवलमिष्टविप्रसङ्गदोष एव, किं तर्हि ?—

एषोऽप्यनिष्टोपचयः उदकमाहरणार्थिने घट इत्युक्तेऽप्रस्तुतव्यावृत्तिशब्दार्थतापत्तिः, विधिपक्षे च साक्षादेव स्वार्थं भूत इत्येष च विशेषः, पर्यायशब्दस्य तावत् घटकुट्यादेर्विधेय एवार्थः, दर्शनात्, तदेव हि विधेयं घटनं कुटनमुभयं वा, द्विमातृवत्, यथा विशेषणद्वारेण विशेष्यप्रधाने निर्देशे राघकमाता पूर्णकमाता राघकपूर्णकमातेति द्वाभ्यामन्यतरेण वा विशिष्यते सैव, तथा विशेषणस्वरूपापन्नविशेष्यप्रतीतित्वात् युगपत्प्रयोगेऽपि स एव निमित्तोपश्लिष्टो भेदः प्रतीयते, न हि स्वार्थानुपातित्वाद्विधिः स्वरससमापतितः प्रतिक्षेप्तुं युक्तो निमित्तान्तरेणापि तस्यैव प्रतीतेः ।

(एषोऽपीति) एषोऽप्यनिष्टोपचयः उदकमाहरणार्थिने घट इत्युक्ते यत्राप्रस्तुतस्य पटादेरघटस्य व्यावृत्तिरविवक्षितोऽप्यस्वार्थ एव शब्दार्थ इत्येतदापन्नम्, अनिष्टञ्चैतदिति, किञ्च विधिपक्षेऽस्मदिष्टे साक्षा- 10 देवौप्यव्यवहितमेव स्वार्थं भूत इत्येष च विशेषः, तद्यथा—पर्यायशब्दस्य तावदित्यादि यावत् प्रतिक्षेप्तुं युक्त इति, पर्यायशब्दस्य घटकुट्यादेर्विधेय एवार्थः, कस्मात् ? दर्शनात्—विधेयत्वदर्शनात्, तदेव हि विधेयं घटनं कुटनं उभयं वा, किमिव ? द्विमातृवत्—यथा विशेष[ण]द्वारेण विशेष्यप्रधाने निर्देशे राघकमाता पूर्णकमाता राघकपूर्णकमातेति द्वाभ्यामन्यतरेण वा विशिष्यते सैव, तथा विशेषणस्वरूपापन्नविशेष्यप्रतीतित्वात्—अन्य न्यविशिष्टरूपप्रतिपत्तेरित्यर्थः, युगपत्प्रयोगेऽपीति, निमित्तभेदेऽप्यैकत्वात् युगपत्प्रयोगेऽपि स एव निमि- 15 त्तोपश्लिष्टो भेदः प्रतीयते स्यान्मतं निमित्तभेदे निमित्तिभेदात् किमर्थं निमित्तान्तरापोहो न भवतीति, तच्च न, न हि स्वार्थानुपातित्वाद्विधिः स्वर[स]समापतितः प्रतिक्षेप्तुं युक्तो निमित्तान्तरेणापि तस्यैव

---

भेदस्याप्रस्तुतस्यापोहात् एव । तत्र दोषान्तरमव्यवहितस्वार्थप्रतीत्याह—एषोऽपीति । किं दोषान्तरमित्याह—एषोऽपीति इत्यपि ते दोषाभिमतमित्यर्थं । अर्थनमीप्सितव्यस्यार्थतापत्तिदोषमाह—उदकमिति उदकमाहरणार्थिने यदि घटमानयेत्युक्ते तस्य घट शब्देनाप्रस्तुतव्यावृत्तिरेव प्रतीयेत न घट इति स्वार्थत्यागः न स्वार्थ इति भावः । विधिपक्षे च साक्षादेव घटस्वार्थत्वप्रतीतेर्न दोष 20 इत्याह—विधिपक्ष इति । एतदेव विवृणोति—पर्यायशब्दस्येति । हेतुमाह—दर्शनादिति तथैव दर्शनादित्यर्थः । दर्शनमेव प्रकटयति—तदेव हीति । कथं घटादिशब्दस्य स्वार्थ घटनमुभयं वा विधेयमित्यत्र निदर्शनं निदर्शयति—द्विमातृवदिति विशे- षणद्वारेण विशेष्यप्रधाने निर्देशे एकमेव वस्तु द्वाभ्यामन्यतरेण वा विशेष्यते मातुर्विशेष्यस्य राघकपूर्णकरूपविशेषणनिर्देशस्य मातैव राघकमातृत्वेन पूर्णकमातृत्वेन राघकपूर्णकमातृत्वेन निर्दिश्यते एवं घटकुटशब्दाभ्यां विशेषणाभ्यां विशेष्यमाणो घटो घट नेन कुटनेनोभयेन वा विशेष्यत इति भावः । हेतुमाह—विशेषणस्वरूपापन्नेति घटादिशब्दाः घटनादिविशेषणानुरूप 25 विशेष्यमात्राः एवञ्च यावतो विशेष्यस्य सम्भवत्यसाधारण स्वार्थो विधीयते निमित्तभेदेऽपि वस्तुतो वस्तुन एकत्वात्, केवलं निमित्तमात्रभेदप्रयुक्त औपाधिको भेदो न स्वरसत इति भावः । तदेवाह—युगपदिति । ननु निमित्तभेदे निमित्तिनो भेदस्यावश्यक- त्वात् निमित्तभेदे निमित्तं निमित्तान्तरं नापोहत इत्याशङ्कते—स्यान्मतमिति युगपत्प्रयोगे निमित्तनिमित्तिभ्यां इष्टे निमित्तस्वरूप- प्रकाशे वाक्यार्थ प्रत्येकं निरपेक्षेव दर्शयति तथापि निमित्तान्तरापोहो भवत्येवेति भावः । तत्प्रतिक्षिपति—न हि स्वार्थानुपाति-

---

१ सि० क० केवल निष्प्रागविप्रसङ्गदोषानेव डा० केवलमप्यनिष्टविप्रसङ्गदोषाणेव । २ सि० क० °देवानभिव्यक्तमेव, डा० °देवाव्यवहितमेव ।

विशेषार्थस्य प्रतीतेः स घटार्थः स्वेनैव रसेन समापतितः प्रतिपादयितुमिष्टश्च किमिति प्रतिक्षिप्यते ? न हि स्वार्थप्रतिक्षेपो युक्तः ।

किं कारणम् ?–

सुदूरमपि गत्वा तेन विना तदगतेरक्लेशेनागतो विधिरेव शब्दार्थः पर्याय इति अत

5 एव चाविनाभावात् सामान्यशब्देनापि स एव विशेषार्थः साक्षाद्विधिना प्रतीयते सर्वथाऽन्य वहितविधिवृत्तिना विधिना स्वभेदाः समाक्षिप्तास्तद्रूपपरमार्थत्वेनाङ्गाङ्गिभावगत्या, प्रतिषेध व्यापारनिराकार्यं विधिरूपेण विवक्षितविपर्यस्य प्रतिपत्तौ तस्योपसर्जनत्वेनापोहयुक्तेरनुत्पत्तेरेव स्वात्मा विधिः प्रधानोऽपोहोऽप्रधानः, शिंशपायुपहारिवृक्षशब्दार्थेऽपटावतारवत्, यथा वृक्ष इत्युक्ते शिंशपादिभेदानामन्यतमेन विनाऽर्थवान् भवति वृक्षशब्द इति शिंशपाद्युपहारसमर्थ-

10 वान् तस्मिन् मूलादिमति शिंशपाद्यन्यतमाविविशेषस्वभावेऽर्थेऽपटानवतारः अघटो न भवतीत्यस्य तु दूरत एव ।

(सुदूरमपीति) [सु]दूरमपि गत्वा तेन विना तदगतेः–घट इत्युक्तेऽघटो न भवतीति प्रतिषेधा येनार्थान्तरं व्यावर्त्यापि घट एवावश्य प्रतिपत्तव्यः स च कुट एवेति कुटत्वेन विना घटत्वाभावात् कुटत्व-स्याप्यविनाभाविनः स्वेनैव रसेन प्रतीयमानत्वादक्लेशेनाऽऽगतो विधिरेव शब्दार्थः पर्याय इति विज्ञा

15 यते–अत एवाविनाभावात् सामान्यशब्देनापि घटस्य पार्थिव[त्व]विना सामान्यसामान्यशब्देन वा द्रव्य-त्वाविना विधीयमानः स एव विशेषार्थो घटाख्यः साक्षात्–अव्यवहितत्वाद्विना विधिना प्रतीयते–यानि हि भेदरूपाण्यनेकात्मकस्य वस्तुनः सामान्याद्याकारेणापि गृह्यमाणानि कथं न विधीयन्ते ? सर्वथाऽपि तस्मादव्यवहितविधिवृत्तिना क्रमेण घटस्यैव स्वभेदाः समाक्षिप्ताः यथोक्तं–'सत्त्वपृथिवीत्वद्र[व्य]त्वविस-न्वयादविरुद्धं पार्थिवो मार्त्तिको घट इति घटे सम्प्रत्ययः' ( ) इति, तत्कथमिति चेदुच्यते

20 तद्रूपपरमार्थत्वेन–यानि भेदरूपाण्येव सामान्यविशेषसमानासमानाव्यतिरेकवदयमानान्येव वा सामान्यविरूपाणि

---

त्वादिति विधिर्हि ..... स च तथाव एव वर्तते न निमित्तान्तरमपेक्षते, स्वार्थमुपादित्सात्, निमित्ता-न्तरेणापि तस्यैवार्थस्य प्रतिपत्तेः प्रतिक्षेपो युक्त इति भावः । निमित्तान्तराभावे कारणमाह सुदूरमपीति । ..... अघटो न भवतीति प्रतिपिपत्ते ..... न भवतीति ..... न भवतु नाम एवं ..... अनिष्टेरपरं ..... इति ..... न हि ..... भवति

25 ..... तेन विना ..... मतीतीति विधिरेव ..... इत्युक्ते इति । ..... विना ..... विधि-रूपेण प्रतीयते तथा त एव ..... सामान्यशब्देन पार्थिवत्वेन ..... वा द्रव्यत्वत्वादिना विधीयमाने ..... प्रतीयन्त इत्येवार्थ इत्याह तदविदि । एवं ..... अपि .....

30 ..... इत्याह–तस्मादव्यवहितेति ..... भावो ..... प्रतिपाद्य यथाक्रमेण समा-क्षिप्ता इति न ..... भाव । सामान्याद्याकारेण ग्रहणार्थं ..... स्वभेदाः समाक्षिप्तास्तत्र ..... यथाक्रममिति । तन्नयमतौ–तद्रूपपरमार्थत्वेनेति ..... । तदेवाह–यानि भेदरूपा

भेदप्रतिपादनपरतया तस्यैव विशेषस्य परमार्थरूपत्वेनाङ्गाङ्गिभावं गतानि, असत्योपाधिसत्यशब्दार्थत्वात् तथा चाङ्गाङ्गिभावगत्या तद्रूपपरमार्थरूपया, अभ्युपगमवर्तिना विधिना समेताः समाश्रिता इति वर्तते, प्रतिषेधव्यापारनिरपेक्षमित्यादि यावत् [अ]घटावतार इति, योऽपि स्वपाऽन्यापोहः इष्टः सोऽपि विधि-
मन्तरेण न भवति, यस्मादघटो न भवतीत्येवंविवक्षितं हि प्रतिषेधमनाश्रित्यानपेक्ष्य विधिरूपेण विवक्षित विपर्यस्य घटस्य प्रतिपत्तौ सत्यामुत्तरकालं भवति नाप्रतिपत्तौ, तस्यैव चरितविपर्यस्य घटस्योपसर्जनत्वेना 5
पोहमुखेऽघटमात्रमुखेऽनुसरणेन स्वात्मविधिः प्रधानोऽप्रधानोऽपोह इति, किमिव ? शिंशपाद्युपहारिवृक्ष-
स्यार्थेऽघटानवतारवत्, यथा वृक्ष इत्युक्ते शिंशपादिभेदानामन्यतमेन विनाऽर्थवान् भवति वृक्षशब्द इति शिंशपाद्युपहारसमर्थनात् तस्मिन् भूतमिमति शिंशपाद्यन्यतमविशेषस्याभावेऽर्थेऽघटानवतारः, अघटो न भवतीत्यस्य तु दूरत एव—नैवासौ शब्दार्थो गुणमाधुर्यगतिवदर्थोपचितत्वात्, घटानवतार इत्येव वा पाठः—घटस्य वृक्षार्थेऽनवकाशाभावादनुपातादपोहस्य कोऽवकाश इति । 10

साम्प्रतमत्रापि वृक्ष इत्यत्रघटो न भवतीत्यपोह एवोच्यते, नहि शिंशपाद्युपहारः, तस्यैव विसंवाद स्थानत्वात् स्वार्थं इत्यत्रोच्यते—

यदि तु सोऽप्यपोहपर एव स्यात् ततः सोऽवृक्षव्यावृत्तिवृत्तत्वाद्वृक्षभेदशिंशपादीना क्षिपेत् नानुमन्येत न व्युदस्येत वा, अनर्थित्वादवृक्षाभवनवत्, अवृक्षो घटादि तदभवनस्य भेदानाक्षेपवृक्षशब्दस्य व्यावृत्तिवृत्तत्वाद्भेदाक्षेपे व्यापार एव नास्ति, यदसौ वृक्षार्थे 15
घटादिभ्योऽन्यत्वेन शिंशपादिभेदात्मकं स्वार्थमनन्यत्वेनाक्षिपति तस्मात्तेन सह सामानाधिक-

ण्येनेति । भेदरूपाणामङ्गित्वं सामान्यस्य च तदङ्गत्वमित्याह—अङ्गाङ्गिभावं गतानीति । तस्मादत्रापोहस्य विधि-
पूर्विका घटस्य भेदा यथाश्रित्यन्त इत्याह—तथा चेति । केन पुनरित्यत आह—अभ्युपगमवर्तिनेति । सत्यस्यासत्योपाधित्वविधिनोक्ते
प्रतिषेधव्यापारोऽपेक्षा भवतीत्याशङ्क्याह—प्रतिषेधव्यापारेति इतरप्रतिषेधव्यापारानपेक्ष स्वरूप स्वार्थं विधिरूपेण प्रतिपाद
यति, विवक्षितविपर्यासानन्तरमर्थोपगमादघटो न भवतीत्यपोहप्रतिपत्तिर्न तु प्रधानत्वेन विपर्यस्योपसर्जनतया प्रतिषेधमुखे 20
विवक्षितविपर्यासानन्तरमुपसर्जनत्वेन घटस्य सामान्योपसर्जनविधिप्रधानत्वेन चरितार्थतया पश्चादविप्रधानोऽन्या-
पोह शब्दार्थो नोपसर्जनं नापि प्रधानं किन्तु स्वात्मा विधिः प्रधानमप्रधानमन्यापोह इति भावः । उपमार्थमघटस्यान्यापोहस्य
नावतार इत्यत्र निदर्शनमाह—शिंशपादीति वृक्षस्यान्यतमभेदाभेदशिंशपादिभेदोपहारार्थे वाक्यार्थेऽन्तर्भा-
वमभिप्रेत्य तदेव भवतीत्येति—यथा वृक्ष इत्युक्त इति । यथा च वृक्षशब्दार्थोऽन्यघटितमर्थं अन्यार्थेन भावसम्बन्धात्स्वतः
तत्स्वैवान्यापोहस्य चरितार्थत्वात् । नास्तीत्याह तस्मिन् भूतमिमतीति । गुणमाधुर्येति गुणप्रधानभावा माधुर्य- 25
प्रतीतिरपरत्वा तथाऽन्यापोहप्रतीतिरप्यर्थोपरमेव न तु शब्दार्थत्वेति भावः । अघटानवतार इत्यत्र घटानवतार इत्यपि पाठ-
मत्सुपलभ्यत इत्याह—घटानवतार इति । वृक्षशब्दार्थे घटस्य यथा नावकाशस्तथा व्यापोहस्यापीत्याह—घटस्येति । अत्र
शिंशपाद्युपहारिवृक्षार्थेऽघटानवतारवदिति दृष्टान्तेन वृक्षशब्दार्थोऽयमुपहार इति यदुच्यते तद्विचारसामर्थ्यात् किमपि तु वृक्ष
इत्यत्राघटो न भवतीत्येव इत्याशङ्क्य समाधत्ते—यदि त्विति । व्याचष्टे—यदि तु सोऽपीति । ततः विशेषैर्न दत्त्वा

१ सि. डी. छ चरमत्व । २ सि छ डा गवेक्षविधि । ३ सि. छ. डा डे °पर्यवसानुक्त । ४ सि छ. डा भा भवति । ५ सि छ डा डे इदेरघते । ६ सि. छ. परमधानत्वात् । ७ १ छ. डा. °र्थवद्यत्वात् ।

इतर आह—

कुतोऽस्य भेदस्य भेदत्वम्? वृक्षसामान्यस्यावृक्षाभावत्वे सत्यसिद्धत्वात्, कथं सोऽपि तद्भेदो न भवति शिंशपादिर्वृक्षः? अनिवृत्तेः, शिंशपा वृक्षाभावाव्यावृत्तो वृक्ष एव न भवति कुतोऽभेदः, अत्रोच्यते यद्यसावपि भेदो न भवति न तर्हि वृक्षो वृक्षो भवति, अमूर्तशिंशपादिभेदत्वात्, घटवत् सोऽप्येवमेव, अमूर्तनीलादिभेदत्वात्, वृक्षवत्, एवं नीलादिरमूर्तकपालादित्वा दित्वादि यावत् परमाणुर्न भवत्यमूर्तरूपादिभेदत्वात्, विज्ञानवत्, रूपादिरप्यरूपादि, अमूर्तरूपलक्षणभेदत्वात्, विज्ञानवदेव, सर्वत्र वा सामान्येन न भवन्त्यतोऽर्थाः स्वभेदशून्यत्वात् खपुष्पवत्, एवञ्च सर्वमिदं दृश्यादिवस्तु शून्यमापद्यते त्वन्मतेनैव कः किं केन कस्मादपोह्यते?

(कुत इति) कुतोऽस्य भेदस्य भेदत्वं?—शिंशपादेर्वृक्षभेदाभिमतस्य तद्भेदत्वं, वृक्षसामान्यस्या-वृक्षव्यावृत्तिलक्षणस्य[अ]वृक्षाभावत्वे सत्यसिद्धत्वात् कस्य भेदः शिंशपादिः?, तस्मात्तस्य शिंशपादेर्भेदत्वं कुतः? भेदाभावोऽर्थः, कथं सोऽपि तद्भेदो न भवति शिंशपादिर्वृक्षः,[न]अभेदो ऽन्यापोहवादिनोऽन्यपोहः, शिंशपा वृक्षाभावाव्यावृत्तो वृक्ष एव न भवति, कुतोऽभेदः शिंशपादिर्वृक्ष इति, अत्रोच्यते—यद्यसावपीत्यादि—अनिष्टापादनसाधनम्, यद्यसावपि भेदो न भवति शिंशपादि न तर्हि वृक्षो[वृक्षो]भवतीति वृक्षस्यैवावृक्षत्व-मवस्तुत्वं प्रतिज्ञायते, हेतुः—अमूर्तशिंशपादिभेदत्वात्, घटवदिति दृष्टान्तः, सोऽप्येवमेवेत्यादि—यदि तु सोऽपि घटो न भवति भेद इतीष्यते तस्याप्यघटत्वममूर्तनीलादिभेदत्वात्, वृक्षवत्, एवं नीलादिरमूर्तकपाला दित्वादित्वादि यावत् परमाणुर्न भवत्यमूर्तरूपादिभेदत्वाद्विज्ञानवत्, रूपादिरप्यरूपादि, अमूर्तरूपलक्षण-भेदत्वात् विज्ञानवदेव, सर्वत्र वा सामान्येन न भवन्त्यतोऽर्थाः स्वभेदशून्यत्वात् खपुष्पवदिति, एवञ्चे-त्यादि अपुष्प[म]त्वदोषापादनोपसंहारः एवमनेन विधिना सर्वमिदं दृश्यादि—भवताभिमतमनुमेयमभि-

---

[illegible] वस्तु भेदाभावेऽपि न स्यात्तादित्यम् अभावत्वात् वन्ध्यापुत्रवदिति भावेन उक्तोऽर्थः । ननु भेदाभावेऽपि कस्याचे तत्र कुत्रम्। शिंशपाभावात्, न हि वृक्षसामान्यस्यावृक्षाभावस्य शिंशपादयो भेदा भवितुमर्हन्ति तद्वेलक्षण्योपादानमहते—कुतो-ऽस्येति । भवतावेदे—शिंशपादेरिति । हेतुमाह—वृक्षसामान्यस्येति तदि वृक्षसामान्यमवृक्षव्यावृत्तिलक्षणमवृक्षाभावरूपम्, अत एव न तद्भेदत्वं शिंशपादेरिभिति भावः । अथ यदि शिंशपादेर्वृक्षस्य भेदो न भवति भवतु तर्हि वृक्ष एव शिंशपादिरिव इति, न [illegible] यदि—कथं सोऽपीति । अभेदत्वा स्वपरा शिंशपादिवृक्षाभावव्यावृत्ता स्यात्, यया तु न वृक्षाभावव्यावृत्तः स्वरूपतः तु एव न भवति कुतस्तदभेद इति यदी समाधत्ते—अत्रेदं इति । विशेषेण विना सामान्यं न भवतीति सर्वसिद्धम्, तथा च यदि शिंशपादेर्वृक्षभेदो न स्यात् स्यात्तर्हि वृक्षो वृक्ष एव न भवेदिति भवतोऽनिष्टमापद्यते—यद्यसावपीति । वृक्षो न वृक्षो भवतु केन हेतुना अमूर्तेति । अमूर्तः शिंशपादिभेदो यस्य सः तस्य भावः, यत्र यस्य शिंशपादिभेदो न भवत्यसत्त्वा-विशेषे, यदि यथाऽमूर्तशिंशपादिभेदोऽस्य च न तथाऽसौ घटोऽप्यमूर्तशिंशपादिभेदो न वृक्षोऽपीति भावार्थः । तद्वेदेन घटादिरपि घटादिर्न भवत्यमूर्तनीलादिभेदत्वादित्याह—यदि त्विति । यो घटो घटादेर्भेद इतीष्यते सोऽपि न घटोऽमूर्तभेदत्वादिति भावः । एवं नीलादयो न नीलादयोऽमूर्तकपालादिभेदत्वात् घटवत् स कपालोऽप्यकपालोऽमूर्तभेदत्वाद्विशेषमपरमाणु सर्वेषां भेदो सर्वमपि नैवाह—एवं नीलादिरिति । परमाणोरप्यभावमाह—परमाणुरिति, स्यादयो हि तद्भेदेषु भेदत्वाभावे परमाणुरपि न स्यादिति भावः । रूपादीनामप्यरूपादित्वमाह—रूपादिरपीति । एवं विशेषे वस्तुत्वं प्रसाध्य सामान्यतोऽभावं साधयति—सर्वत्र वा सामा-न्येनेति । तदा विधिसमर्थकप्रयोगेन दर्शयति—एवमनेन विधिनेति, भवताभ्युपगतं वस्तु शून्यमापद्यते त्वदुक्ते-

चेय वा वस्तु शून्यमापद्यते, तन्मतेनैव कः किं केन कस्मादपोह्यते ? सर्वस्य शून्यत्वे कः किमिति कर्मकरणापादानभूतानां शब्दादीनामभावेऽपोहाभाव एवमित्यर्थः ।

अथ कथञ्चित् भवत्यपि वृक्षोऽवृक्षो न भवति शिंशपा न भवति शिंशपाभवत्यपीतीष्यते ततो ब्रूमः स्वार्थे इत्युक्तविधिर्विषयः संवृत्तोऽर्थः, तदुपसर्जनस्त्वपोहोऽसत्त्वादसत्यः, उक्त-
5 वदेवेत्येष शब्दस्य विशेषार्थविधिः, एतेन सामान्यशब्दार्थविशेषताप्युक्तैव ।

अथ कथञ्चिदित्यादि, मा भूदेव सर्वशून्यत्वदोष इति मत्वा भवनाभवनमात्रार्थापोह-कल्पनां केनचित्प्रकारेण भवत्यपि वृक्षोऽवृक्षो न भवति शिंशपा न भवति शिंशपा भवत्यपीतीष्यते शब्दार्थशून्यत्वदोषभयात् ततो वयं ब्रूमः, स्वार्थे इत्युक्तः-स्वार्थे कुर्वती श्रुतिरभिधत्त इत्यादिवचनोक्त एव विधिर्विषयः संवृत्तोऽर्थः, तदिदानीं प्रस्तुतनयमतेन शब्दार्थं योजयति—तदुपसर्जनस्त्वपोहोऽसत्त्वादसत्यः
10 विशेषार्थस्य विधेरुपसर्जनोऽपोहः, स चासत्त्वादसत्यः उक्तवदेव प्रागित्युक्तप्रकारेणासत्त्वोपाधिरसत्यः शब्दार्थः, स च विशेषमेव विदधाति नापोहत इत्येष शब्दार्थविधिरिति, एतेन सामान्यशब्दार्थविशेषताप्युक्तैव ।

यथाऽन्यत्वे विशेषप्राधान्यात् सामान्यभेदपर्यायशब्दार्थास्तदङ्गत्वात्तदुपसर्जनत्वाच्चा-मापोह्यन्ते तथा विवक्षितशब्दादन्यस्याविशेषशब्दस्य स्वार्थे विशेषशब्दोऽभिधत्तेऽन्यत्वेनात्मानं विदधत् अभेदत्वाच्च सत्त्वापत्तिपरित्यागेनैकान्तं विविक्तम्, नाप्यपूर्वासत्त्वापत्तिमेव, किन्तु
15 शिंशपादिशब्दः सत्सम्परिग्रहेण शिंशपादि, अत्यजन्नेवानुवृत्तिव्यावृत्ती तदुपसर्जनार्थिंशपाऽभवनशीलतां यन् स्वार्थमभिधत्ते इतरथा किमित्यसावपोहेतामप्रतिपादयन् किञ्चित् ! यदि सोऽप्यपोहपर एव स्यात् शिंशपाशब्दो न विदध्याद्वृक्षार्थम्, शिंशपाविशेषात्माभावाभ्या-युपत्वात्, मानुमन्येत नाप्यपोहेत वाऽर्थापत्तिशब्दत्वाद्वृक्षार्थो मा भूत् तथा चोपात्तार्थ-विरोध इति, कुतोऽयमनुमत्यपोहदोष इति चेदनर्थित्वात्, अनर्थी हि शिंशपाशब्दो
20 वृक्षादिना सामान्येन, अशिंशपाभवनवत्, अशिंशपा घटादि तदभवन एवापवादवीप्सितया वृक्षादिसामान्यात्मकशिंशपाभिधाने व्यापार एव नास्ति, यदसौ शिंशपाशब्दो शिंशपार्थं घटादिभ्योऽन्यत्वेन वृक्षादिसामान्यात्मकं स्वार्थमनन्यत्वेन विदधाति ततस्तेन सह वृक्षः शिंशपेति सामानाधिकरण्यं प्रतिपद्यते । वृक्षः शिंशपेति तद्भवनविध्येकार्थीभावात् तद्भवन-

विनेति वाच । एवं [illegible] ... इति किमिति ।
25 [illegible] ... नाप्यपि शिंशपा एव शिंशपेति [illegible],
[illegible] ... न भवति शिंशपा न भवति, [illegible]
अथ कथञ्चिदिति । व्याख्ये मा भूदेव इति [illegible]
[illegible] । [illegible] ... न एव शिंशपा [illegible]
न [illegible], [illegible] ... इति । [illegible]
30 [illegible] ... 
[illegible]—स्वार्थे इत्युक्तेरिति [illegible] । [illegible]—तदिदा-
नीमिति [illegible] । तदुपसर्जन इति [illegible]

1 सि. [illegible] । 2 सि. [illegible] ।

विधिविनाभावे तु न युज्यते, भवनविधिविनाभूतं सामान्यानाक्षेपि न समानाधिकरणं, वृक्षः शिंशपेति त्वदभिमतं वस्तु स्यात् भावत्वाद्वृक्षस्याद्रव्यापुत्रवत्, कुतोऽस्य सामान्यस्य सामान्यत्वम् ? शिंशपादि-भेदस्याभावत्वे तस्यासिद्धत्वात्, कथं तर्हि सोऽपि भेदो न भवति वृक्षः शिंशपादिः, अन्यसादृश्यावृत्तेः, वृक्षः शिंशपाभावादभावेरन्यावृत्तेः शिंशपैव न भवति कुतो भेदः ? अत्रोच्यते यद्यसावप्यभेदो न भवति न तर्हि शिंशपा शिंशपा भवति, अभूत 5 वृक्षादिभेदत्वात् घटवत् सोऽप्येवमेव, अभूतभूताद्यभेदत्वात्, एवं सर्वत्र सामान्येन न भव न्त्यर्थाः स्वसामान्यशून्यत्वात्, खपुष्पवदेवात्र सर्वमिदं द्रव्यादिवस्तु शून्यमापद्यते त्वन्मते-नैवेति कः केन कस्मादपोह्यते, अथ कथञ्चित् भवत्यपि वृक्षो वृक्षो न भवतीति शिंशपा भवत्यपि शिंशपा न भवतीतीष्यते ततो विधिर्विषयः संवृत्तस्तदुपसर्जनस्त्वपोहोऽसत्त्वादसत्त्वः पक्षवदेवेत्येष शब्दस्य विशेषार्थविधिरिति । 10

( यथेति ), यथाऽन्यत्वे विशेषप्राधान्यात् सामान्यमेवपर्यायशब्दार्थोऽन्तर्भूतस्तदारमकत्वात् अपोह्यते तथा विवक्षितशब्दार्थोऽन्यस्य विशेषशब्दार्थस्य[।]विशेषशब्दार्थस्य वा सामान्यस्य स्वार्थे विशेषशब्दोऽभिधत्ते, कथम् ? तत्स्वेनात्मना—सामान्येन सहैकीभाव विभृयेत् आत्मनः उपसर्जनभाव स्वार्थमधिकारयन्, किं करोति ? स्वार्थं विभक्त इति वर्तते, अभेदत्वात्,[न]तस्यापत्तिपरित्यागेन—न च वृक्षपार्थिवद्रव्यसत्त्वसामान्यानि त्यक्त्वा विशेष तैरेकान्तेन विविक्तं प्रतिपादयति, तथारूपार्थासम्भवात् 15 सामान्योपसर्जनत्वोपायप्रतिपाद्यविशेषासम्भवात्वात् नाप्यवृक्षादिशिंशपापि न भवतीत्यसत्त्वापत्तिमेव स्वार्थप्रतिपत्तिरहितौ ब्रूते, अभिधेयाभावे शब्दार्थव्यवहारोच्छित्तिप्रसङ्गात्, कोऽसौ विशेषशब्दस्तदर्थो

उभेदः संवृतिसत्यात्मकत्, गुणभावमात्मन्येव हि विशेष एव सन्, वृक्षत्वपार्थिवत्वद्रव्यत्वसत्त्वोपाधिकत्वात् तदर्थो समन्वयः तत्र च विविक्तविधिविधा सामान्योपसर्जनं विशेषमभिदधानः शब्दो न विविक्तोऽर्थे, अन्यस्याप्रतिपत्तिरूपत्वात्तदीयैस्तूपसृष्ट-मिति भावः । सामान्यशब्दस्य सामान्ये विशेषाभिव्यक्तत्वात् न विविक्तसामान्यस्य प्रवृत्तस्य एवैकानेकेनाह—यथेमेति । इत्येव 20 समर्थयति—यथाऽन्यत्व इति । पृथक्त्वसत्त्वात्मत्वविविक्तत्वविविधप्राधान्येन विशेषमभिदधत्युच्यमानेऽपि पृथिवीत्वपार्थिव-द्रव्यत्वसामान्यमेदपर्यायशब्दार्थाभ्यन्तरस्य द्रव्यत्वादिशेषाभिधेयाभ्यासभेदोपयोगभेदे वदतस्तद्गुणसम्बन्धात् न सामान्या-दपोह्येतान्य इत्याह—यथाऽन्यत्वे विशेषप्राधान्यादिति । तत्र विवक्षितार्थाभिधानेऽस्य सामान्यशब्दस्य स्वार्थं पृथिव्यादिकं विशेषशब्दः सामान्येन सह तादात्म्यैकीभावं विभृयात् प्रतिपादयतीत्याह—तथा विवक्षितेति । सामान्येनात्म-नाऽभेदभावं विभृयात् कस्मादित्यत्राह—आत्मन इति । न सामान्यं परित्यज्य केवलं विशेषं विशेषशब्दः प्रतिपादयितुं क्षम 25 इत्याह—न तस्यापत्तीति । सामान्यासम्भूतविशेषासम्भवात्तदुपेक्षणमनापत्तिरिति हेतुमाह तथा रूपार्थेति । सामान्योपसर्जने-नाप्यविशेषप्रतिपादनोपायत्वात्तस्यैव विशेषस्य परमार्थेन तथाभावे सत्यपि न तत्परित्यागेन विशेषं विशेषशब्दोऽभिधत्ते इत्याह—सामान्योपसर्जनत्वेति । नापि केवलं विशेषं विविक्तमाश्रयभेदेन शब्दस्तो ब्रूत इत्याह—नाप्यवृक्षेति । अभावमात्रार्थत्वे भेदाभावेऽस्याभेदात्मकत्वात् एवं शब्दार्थाभावादभिधेयाभावप्रसङ्गादर्थव्यवहारोच्छेदप्रसङ्ग इत्याह—अभिधेयाभाव इति । शिंशपादिविशेषस्य तद्गुणीभूतसामान्यस्य सम्बन्धिनैकत्वात्तस्यापत्तिपरित्यागेन न शिंशपादि ब्रूत इत्याह 30 कोऽसाविति, शिंशपादिरूपः स्वार्थसामान्यसम्बन्धिनैकत्वापत्तिपरित्यागेन अनुवृत्तिव्यावृत्ती अवस्थाप्य स्वार्थमात्रे इति

१ विवक्षितस्यात्मत्वाविशेषस्य सामान्यशब्दस्य स्वार्थे विशेषशब्दोऽभिधत्त इति पाठः स्वार्थविवक्षितात्मके सामान्यशब्दार्थे विशेषस्य प्रतिपादकत्वात् । २ सि क्ष डे. °न्यत्व भवत्य । ३ सि क्ष. डे. विशेषयैत्य ।

भेदि चेदुच्यते शिंशपादिः, तत्सम्परिग्रहेण वृक्षादेः सत्त्वसामान्यवृत्तेः स्वसामान्यस्य सम्परिग्रहेण तदभावाद्भा-
वस्य तत्त्व्यावृत्त्यपोहपरिग्रहेण चात्मवत्त्वेनानुवृत्तिव्यावृत्ती। किं कारणं न ते लभ्यन्त इति चेदुच्यते-
यस्मात् तदुपसर्जनाशिंशपाऽभवनवीर्यत्वं यत् स्वार्थमभिधत्ते, तच्छब्द-प्रवृत्तिनिमित्तं, स्वार्थानुवृत्ति-
सामान्योपसर्जनस्वस्वाशिंशपाभाव-घटादेः तत्राभवनलक्षणस्य च व्यावृत्तिसामान्यस्य स्वार्थः-
5 शिंशपाशब्दस्य शिंशपार्थः स बीजं तयोरनुवृत्तिव्यावृत्त्योः, इतरथा किंनिमित्तत्वापोहेन अप्रतिपादनं
किञ्चित्? यदि तु सोऽपीत्यादि पूर्ववत्त्वस्य ईदृग्विशिष्टः प्रसङ्गो यावद्विशेषार्थविधिरित्युपनयः, तत्र विशेष
उच्यते-वृक्षः शिंशपेत्यत्र शिंशपाशब्दो न विरुध्यात् वृक्षार्थं शिंशपाविशेषात्सामान्यानुवृत्तत्वात् इति
पूर्ववत्क्रमोऽर्थापत्त्या नानुमन्येत वा अन्यो न भवतीत्युक्तेऽर्थापत्त्या वृक्षो भवतीत्यवगमो मा भूत्, इत्यत्रे
चासौ कुतः? तथाचार्थविरोधात्, तथाचार्थविरोधे इतरेतरविरुद्धस्य हेत्वर्थत्वात्, अशिंशपाभवनवति
10 स्वविरुद्धाभवनवत्त्वादित्युक्तः, सामान्याभावविपर्ययेण तद्विभागविशेषार्थो गमनिकया नेया,
अभावत्वाद्वृक्षत्वादिभावविरोधुकः, अभावमात्राभ्युपगमात्र हेत्वसिद्धिः तद्विपर्ययेऽप्रसज्यमानापत्तिः, शेषमत्र
भावना पूर्वमेवभावनानुसृत्या, एवं तावत् सामान्यमेवपर्यायशब्दार्थमपोहवत् सामान्यसामान्यशब्दार्थता-
भेदोऽन्तर्भिन्नविशेषाभिधायिसामान्यशब्दार्थविधिरुक्ता, विधेरेव शब्दार्थत्वात्।

यस्त्वविरोधादित्युक्तं सोऽप्येवमेषाविरोधो घटते भवनविध्येकार्थीभूतसामान्यापोहे,

---

15 यदत्र सत्त्वमनुवर्तत सामान्यमर्थो अन्यसामान्यापोहस्तस्मादपि विधानादुपसर्जन इति चेत्स्मृ। तदनुवृत्तिव्यावृत्त्योरुच्यते
कारणमाह-यस्मादिति। शिंशपाशब्दो स्वसामान्योपसर्जनस्वभाविसामान्यादिविशेषमपहन्त्ये स्वार्थे विवक्षा वृक्षेऽत्र एव
विवक्षा स्वोपसर्जनत्वसामुदये अशिंशपाभवनस्य व्यावृत्तिसामान्यस्य च बीजमेवेति भाव अथवा प्रवर्तिते गतिरिति
यस्तार्थं। यदि शिंशपाशब्दं शिंशपां नाभिदधीत वृक्षादि यस्य सामान्यं स्यात्, अपोहो वा यस्मादन्यस्य स्वतस्त्वापित्त्वा
इत्येवीयमित्याशङ्क्याह-इतरथेति अन्यथा विशेषणस्य स्वार्थं स्वोपसर्जनं यदीति भाव। यदि तु स सामान्योऽपीत्यत्र
20 व्यावृत्तिमात्रं यदीति न तु स्वोपसर्जनविधित्वमित्युच्यते तर्हि वृक्षादिसामान्यस्वरूपस्वभावो न भवतीत्यपोहमात्राभिधायी
यदि तु सोऽप्यपोहपर एव शब्दापरित्यज्येव दोषा प्रसज्यन्त इत्याह-यदि तु सोऽपीत्यस्यादीति।
एवं शिंशपेत्यत्र शिंशपाशब्दस्यापोहमात्रपरत्वे वृक्षाभिधित्वं न स्यात् शिंशपापरतयाऽर्थापत्त्यत्वात्, तत्सामानाधिकरण्य-
व्यावर्तनाच्छेदे न भवतीत्येवमर्थापत्त्या वृक्षार्थं वा नानुमन्येत शिंशपात्वम् अनुमन्यते तु, शिंशपाशब्दोपदर्शनादिरो-
धादीति पूर्ववच्चोऽत्र विशेषमात्रमेवाह-तत्र विशेष इति। शिंशपाशब्दो वृक्षादिसामान्येनाभिधानादुपसामान्यं च विरुधीत
25 नानुमन्येत वाच्योऽन्त एवात्र स्वान्ते विधिमाह-अशिंशपाभवनवदिति शिंशपाशब्दस्य अभवशिंशपानामतिस्वरूप
इत्येतद्वीभावितत्वेन वृक्षादिभिरभावे व्यापार एव नास्तीति भावः। अतश्च वृक्षादिसामान्यार्थस्य शिंशपादि च विरोधस्य एव
तदनुवृत्तिविधेरभावे तत्सामानाधिकरण्यं भवति तदनुवृत्तिविधिनाभावे न भवेदत्र एवं शिंशपेति तथा भवतीत्येवमर्थ
सामान्याभिधायि न सामानाधिकरण्यं तदभिमतं वस्तु स्यात् अभावत्वाद्वृक्षत्वाद्यनुपपत्तिरिति साधनहेतुमात्रमेवाह पूर्वमर्थ-
व्यतिरिक्त हेतुं दर्शयन्-अभावत्वाद्वृक्षत्वादिरिति। शेषमत्रा पूर्ववद्भावनेत्याह-शेषेति उपसंहरति-एवं ताव
स्याद्वेतदेव यद्यन्य एवान्यत्वे स्थितोऽनन्य उच्येत परापेक्षान्यत्वात् स एवान्य इति, किन्तर्हि स्वापेक्षान्यत्वादेव, योऽसौ तद्वतस्तत्त्वातुल्यः स स्वतोऽन्यत्वादेवान्यत्वात् अन्यः सन् घटात् पटानन्यत्ववदनन्यः, न हि घटस्य इतरापेक्षान्यत्ववदन्यत्वम्, पटस्य वाऽनन्यत्वं
5 घटान्यत्ववत्, यथोक्तद्वित्वतुल्यतायामपि सत एवात्मनोऽनन्यस्य सत्त्वम् तस्मादन्यत्वमपि स्वत एव, अनन्यत्वमपि तथेति व्यवस्थिते भवत्यन्यापोह इति ।

( स्याद्वेतदेवमिति ) स्यादेतदेवं यद्यन्य एवान्यत्वे स्थितोऽ[न]न्य उच्यते परापेक्षान्यत्वादन्यः स एवान्य इति किं तर्हि ? स्वापेक्षान्यत्व एवान्य इत्युच्यते, तद्भावयितुमाह—योऽसावित्यादि यावद् घटात् पटानन्यत्ववदनन्यत्वमिति योऽसौ तथान्यस्वात्मभावेन—अतत्त्वेनातुल्यः आत्मीयेन स स्वतो-
10 ऽन्यत्वादेव अन्यत्वात्—आत्मान्यत्वा[द]न्य सन् अ[न]न्य इत्युच्यते निदर्शनं अतुल्यं हि घटस्यान्यत्वं पटा-[न्य]त्वादन्यत्वात् न हि घटस्येत्यादिना घटान्यत्वस्य पटानन्यत्वेनासंकरं दर्शयति घ[ट]स्येतरान्यत्वव-दन्यत्वम्, पटस्य चेत्यादिना पटा[न]न्यत्वस्य घटान्यत्वासङ्करं यावद्घटान्यत्ववदिति भावितार्थमेव यथान्योऽन्य-मर्थोपनयः यथोक्तद्वित्वतुल्यतायामपीत्यादि—स्वतुल्या ये द्विप्रत्यायत्वा—परस्परापेक्षता तयो तुल्यतायामपि
परेतरापेक्षान्यत्वात् तत एव—स्वत एवात्मनोऽनन्यत्व तत्त्व स एव यतोऽनन्य[:] स्वेषः पूर्वेण तुल्योऽन्यत्वमा-
15 त्मान्यत्वेनासङ्करदर्शनमन्यः, तस्मादन्यत्वमपि स्वत एव अनन्यत्वमपि तथेति व्यवस्थिते भवत्यन्यापोह इति।

अत्रोच्यते तत्र दोषः—

नन्वेवं सोऽपि अन्यस्मात् अन्य एव भवन् अनन्यो भवति, तस्यान्यस्य स्वात्मनि व्यवस्थितस्य तदनन्यस्य सत्त्वमपोहमानोऽन्यापोहस्तदपोह एव भवति नान्यापोह इति स्ववचनाद्यक्षेपपक्षविरोधापत्तिः विधिवादापत्तिश्चैवम्, अथान्यापोह इति चानन्योऽपोहो न
20 भवतीत्यपि न परिहार एव अन्यापोह इत्यनन्याभावापोहो न भवति, यतोऽर्थान्तरापोहेन स्वार्थेऽपोहे वृत्त्यर्थेऽन्यविशिष्टोऽपोह इति, ।

नन्वेवमित्यादि यावत् स्ववचनाद्यक्षेपपक्षविरोधापत्तिरिति, नन्विति अनुज्ञापयति परम् नन्विदं

[illegible] स्यात्, न चैतदस्ति [illegible] न [illegible] इति स्यादिति भाव । [illegible]
25 तदेतत् [illegible] स्याद्वेतदेवमिति । व्याख्यो—यद्यन्य इति [illegible] किन्तु [illegible] इति भाव । इत्येव [illegible]—योऽसाविति [illegible] न [illegible] किन्तु [illegible], यथा [illegible] तुल्यत्वम्, तथा [illegible] न परस्परापेक्षत्वं किन्तु स्वत एवेति भाव । [illegible] न हि घटस्येत्यादिनेति [illegible] इति [illegible] परस्परापेक्षतायां तुल्यतायामपि [illegible] स्वत एव न तु परापेक्षमित्याह—यथोक्त-
30 द्वित्वेति [illegible] इति [illegible] इति [illegible] भवति, [illegible] अन्यथा [illegible] अन्यापोहः स्यात्, [illegible] इति भाव । [illegible]—तस्मादन्यत्वमिति । [illegible]—नन्वेवमिति । व्याख्यो—नन्विदमिति

१ लि. [illegible] । २ लि [illegible] ।

सोऽपि योऽन्योऽन्यस्मात्—अन्यस्वरूपात् स्व एव सिद्धान्यस्मात्—अन्यात्स्वार्थात् अन्य एव भवन्—अन्यः सन् अनन्यो भवति स एव भवति तस्मान्यस्य स्वात्मनि व्यवस्थितस्य तदनन्यस्य सतः—आत्मान्तरमपोहमानो ऽन्यापोहः तदपोह एव भवति—स्वापोह एव, नान्यापोहस्तदभिमतः परापोह इत्यर्थः इति—इत्थं स्ववचनविरो- धोऽन्यापोह इति वचनात्, तथाभ्युपगमादभ्युपगमविरोधः, लोकविरोधश्चैवं लोकेऽदृष्टत्वात् स्वार्थप्रतीतेः, तथा प्रत्यक्षादर्शनात् प्रत्यक्षविरोधः, अनुमानविरोधश्चैवमनुमानादित्यशेषाः पञ्चदोषा आपन्नाः, विधिवादा 5 पत्तिश्चैवम् इत्येन तावद्वस्तुनो लक्षणानुसारेण दूषणमुक्तम्, साम्प्रतमन्यापोहशब्दार्थानुसारच्छायामात्रेण परिहरामीति तद्यथा—अन्यापोह इति चानन्यापोहो न भवतीति अन्यविशेषणविशिष्टापोहस्यानन्यविशेषण- विशिष्टापोहः प्रतिपक्षः स न भवतीत्यर्थः, स चान्योऽन्यस्मात्, अतोऽन्यापोह एवात्रापीति अत्रोच्यते— इत्यपि न परिहार एव, कस्मात्? अन्यापोह इत्यनन्याभावापोहो न भवतीति यतोऽर्थान्तरापोहेन स्वार्थे ऽपोहे इत्यर्थेऽन्यविशिष्टोऽपोह इति किमुक्तं भवति—अनन्यस्याभावोऽन्यः अन्यस्य वाऽभावोऽनन्य प्रतिपक्षः 10 तद्वदपोहस्यानपोहः प्रतिपक्षः, अनपोहस्यापोह इति भवति।

तं दृष्टान्तत्वेन न्यायं दर्शयति—

यथाऽपोह इत्यनपोहो न भवति तथा अन्यापोह इत्युक्तेऽन्याभावार्थान्यशब्दतायां सत्यामनन्याभावस्य व्यावृत्तेरपोहो भवतीत्यन्यापोहार्थः संवृत्तः तस्य चेदनन्याभावस्या- न्यस्यापोहो न भवति न तर्ह्यनन्यस्यानपोहो न भवति तत्प्रतिपक्षत्वादनन्यानपोहस्येति, 15 तथेहानन्य इत्यन्यशब्दार्थे स्वदीयेऽन्यापोह इति नान्याभावस्यापोहो न भवति, किन्तु स्वाभावस्यापोहो न भवतीत्यन्यापोह एव न भवति, किन्तु अनन्यापोहः स्वापोह एवेत्यनिष्टः ते भावः, अन्यस्यैवापोहो नानन्यस्येत्यवधारणादपि दोष इति तच्च, तत्रापि कोऽन्यः?

---

व्यवस्थितस्य तदपि—अनन्यदपि, अन्यदपि, तस्य तत्त्वमनन्यत्व तत एव तत्त्वन्तु नान्यत्वमन्यत्वमपि न तत्त्वम् तथा चानन्यरूपं तदपि तत सिद्धान्यत्वादन्यत्वेन भवदनन्यमुच्यते तथा तथा चानन्यत्वमपि व्यवस्थितस्तत्त्वम्, अन्योऽनन्यो न 20 भवतीति वक्ता च तथा तदपोह एव इत्य स्वापोह एव इष्टो न परापोह इति स्ववचनविरोध इति भावः। अभ्युपगमवि रोधमाविष्करोति—तथाभ्युपगमादिति परार्थाभ्युपगमादित्यर्थः। स्वार्थप्रतीतेरिति अन्यापोह इत्यस्मान्न परार्थ स्वार्थ- प्रतीतिर्लोकेऽदृष्टत्वाल्लोकविरोध इति भावः। अत्रैव पक्षे प्रत्यक्षेणादर्शनेन नैवानुमानात् प्रत्यक्षविरोध इत्याह—तथा प्रत्यक्षेति। तथैवानुमानस्यानुमानविरोधमाह—अनुमानेति। तत्त्वान्यत्वयोः तत्त्वत्वे निरपेक्षत्वेन विधिरूपतापत्तिः न तु व्यावृत्तिरूपत्व तत्प्रतिषेधमिश्रत्वेन लक्षणविरोध इत्याशयेनाह—विधिवादेति। अर्थान्तरापोहे स्वार्थे वृत्तौ वृत्तिरित्यादिलक्षणानुसारेण 25 व्यापोहलक्षणदूषणमभिधाय—इत्येवं तावदिति। ननु यथा घटादेरपि प्रतिपक्षः तदपोहः क्रियते तथाऽन्यापोहस्य प्रति- पक्षोऽनन्यापोहः तदपोहः क्रियते अनन्यापोहो न भवतीति चान्यस्यानन्य इत्यनन्यापोहोऽन्यापोह एवेति चोदयता इत्याशङ्क्य— साम्प्रतमिति। परिहरति—इत्यपीति अत सिद्धान्यस्मादन्यत्वादनन्योऽन्यदन्यत्वेनोच्यते तस्य प्रतिपक्षोऽनन्याभाव तदपोहो- ऽन्यत्वार्थं न भवतीत्यपोहस्यार्थं तथा चानन्याभावापोहो न भवतीत्यन्यापोहस्यार्थः। तदेव समर्थयति किमुक्तं भवतीति अनन्यस्य प्रतिपक्षोऽन्याभावः अन्याभावार्थोऽनन्यत्वात्, अन्यस्य चान्याभावः प्रतिपक्षः तथाऽन्याभाव 30 स्यान्यः अन्याभावस्यानन्यः प्रतिपक्ष अपोहस्यानपोह अनपोहस्यापोहः प्रतिपक्षोऽर्थान्तरत्वादिति भावः। अन्यशब्दार्थोऽनन्य तत्प्रतिपक्षोऽनन्याभावस्तदपोहोऽर्थान्तरापोहे स्वार्थे वृत्तीति व्याख्यानमन्यस्यार्थं तदपोहो न भवतीत्येव प्रतीयत इति अनन्याभावापोहो न भवतीत्यन्यापोहस्यार्थं इत्थं न्यायं दृष्टान्तेन समीकरोति—यथापोह इति। यथाऽपोहस्यानपोहोऽप्रति-

कोऽनन्यः ? कोऽपोहः ? कोऽनपोहः ? इति विचारणायामनन्याभाव एव, तदवधारणात् विधिवादापत्तेः सर्वथाऽन्यापोहनैर्मूल्यमिति स्थितमेतत्, अनन्याभावस्यापोहो न भवतीति ।

यथाऽपोह इत्ययमपोहो न भवतीति, यथाऽन्यविशेषणापोहप्रदर्शनार्थमिन्नाभिप्रायोक्तिकम्, किमुक्तं भवति यथाऽपोह इत्युक्तेऽनपोहो न भवतीति पदार्थे द्विःप्रतिषेधः प्रकृत्यापादनात् अपोह एवार्थो
5 भवति तथान्यविशेषणविशिष्टस्यापोहस्य प्रदर्शनार्थमन्यापोह इत्युक्तेऽन्यस्याभावः—अनन्यः सोऽर्थोऽस्येति अन्याभावार्थोऽनन्यः तदपोऽन्याभावार्थोऽन्यशब्दता तस्मात् तदर्थो—अन्याभावार्थोऽन्यशब्दतामन्यापोह इत्यनन्याभावस्यान्यापोहस्य तद्व्यावृत्तेरपोहो भवतीत्यन्यापोहार्थः संवृत्तः, तस्य चैवमनन्याभावस्यान्यस्यापोहो न भवति न सर्वमनन्यस्यापोहः न भवति, तत्प्रतिपक्षत्वात्[अ]न्यानपोहस्येति यथा विशेष्यविपक्षव्यावृत्त्या तदहैतस्मिन् अनन्यो भवतीत्यन्यशब्दार्थे तदपि अन्यापोह इत्यनन्याभावस्यापोहो न भवति [इति न भवति
10 किन्तु] तस्य अनन्यस्याभावो—अन्यः—अनन्याभावः तस्यापोहो न भवति इत्यन्यापोह एव न भवति अनन्यापोहः स्वापोह एवेत्यनन्याभावार्थः स चाभिहितो अन्यानुसारेणापि दोषः प्राप्तः, स्यान्मतम्—अन्यस्यैवापोहो नानन्यस्येत्यवधारणादेष दोष इति तच्च न, तत्रापि कोऽन्यः ? कोऽनन्यः ? कोऽपोहः ? कोऽनपोह ? इति विचारणायामनन्याभाव एव तदवधारणात्—अन्यस्यैव नानन्यस्येति विधिवादापत्तेः अनन्यस्यापोह एव, न्यनपोह इति तस्यापोहानपोहाभ्यामनवधारणाभ्यां विधिप्रतिषेधाभ्यामनन्यविचारे च विधिप्रसङ्गात्

15 पक्षस्यानपोहस्य व्याहति किमर्थेऽनपोहो न भवतीति तथाऽन्यापोहशब्देनापि अन्याभावस्य तदनन्यस्यान्यशब्दार्थो तत्प्रति-
पक्षस्यानन्याभावस्य योऽपोहस्तदाह—इति प्रतीयतेऽनन्याभावापोहार्थेनार्थ तस्य चैवं इति व्याचष्टे तथाऽन्यविशेषणेति,
अन्यस्वरूपं विशेषणं तद्विशिष्टापोहस्यान्यापोहदर्शनार्थत्वं । अनपोहो न भवतीत्यस्य तात्पर्यार्थोऽपोह एव भवतीति, ननु
इतेन सत्यमेवाभिप्राय—अनपोह इति । अन्यापोह इत्यनन्यशब्देऽन्यस्य अनन्यस्यान्यस्यान्यशब्दार्थ इति एवमपि—
तथाऽन्येति । अन्यस्याभाव इत्यर्थ—अन्यस्याभाव इति अन्यापोहशब्दार्थोऽन्यापोह इति भावः तथान्य-
20 स्यानन्याभावार्थोऽर्थस्तदपोहे सार्थं इत्येतदभिप्रायं प्रतीयते न च भवतीत्यपोहशब्दार्थ अनन्यार्थस्यापि
भवतीति भाव । एवमन्यापोह इत्यनन्यस्यानन्याभावापोहार्थ तत्र अनन्याभावस्यापोहो न विद्यते सर्वमनन्यस्यापोह एव
स्यात्, तथा चानन्यापोहस्याभावस्यापोह एव न स्यात् अनन्यापोहस्य हि प्रतिपक्षोऽनन्यानपोहः स्यादिति तदवस्था तत्प्रति-
पक्षासम्भवे तथैव अनन्यो न भवतीति तदिदमन्यशब्दार्थमन्यस्यापोहस्यान्यापोहशब्दात् अन्याभावापोहो न भवतीति न प्रतीयेत
किन्तु तस्यानन्यापोहो न भवतीति प्रतीयेत, तस्माभावस्यापोहोऽन्यापोह एव न त्वन्यापोह इत्याशङ्क्याह—तच्च चेदिति ।
25 अनन्यो भवतीति अन्यशब्दार्थोऽनन्यो भवतीति तदीये पक्षे तदर्थं अत्र पक्षेऽन्यापोहस्यार्थः, अनन्यस्याभावो न
भवतीत्येव न त्वन्याभावस्यापोहो न भवतीति, तदेवमन्यापोहो न यस्तुतोऽन्यापोह इत्यनन्यापोह एवेत्यभिप्राय इति
भाव । यद्यप्यन्यशब्दार्थोऽन्योऽनन्योऽपि भवति तथापि अन्यापोहशब्देनानन्यस्यापोहः क्रियते नानन्यस्येति योजनेन तत्स्याद्वै
स्यान्मतमिति । विचारणेति—तत्र नेति अभिप्रायमन्यस्यैवापोहो हि न एव भवति विशेषः, अनन्यो न तदन्यापोहोऽपि
विचारणायां विधिवादस्य विधिरूपेणान्यस्यैवापोहस्तदर्थविधिप्रतिषेधाभ्यां कोऽन्यः कोऽनन्यः कोऽपोहः कोऽनपोह इत्यन-
30 न्यविचारस्य च प्रसङ्गेन विधिवादापत्तेरन्यापोहनैर्मूल्याच्च तदवस्थाभाव इत्यर्थ भाव । अपोहस्यान्यविशेषणत्वाभावे-
तदभावाद् अनन्यस्यापोह एवेति । एवं अनन्यतेऽन्यापोहशब्दार्थोऽनन्याभावस्यापोहो न भवतीति विधिनिवारण—

१ सि० क० डे० य० °भावस्यानन्यस्य । २ डा० तदभिप्रायमनन्यस्य । ३ डा० °स्योपाभिप्रेतः ।

सर्वथाऽन्यापोहनैर्मूल्यमित्ययमपि न निःसरणोपायः, स्थितमेवानन्याभावस्यापोहो न भवतीति यतोऽर्थान्तरापोहेन स्वार्थाभिधानेन स्यात्।

एवं प्रक्रमेऽपि च न स कश्चिदर्थो भविता, उभयतोऽप्यभावप्रसङ्गात्, स्वार्थस्यांशोऽपि न दृश्यत एव, अनन्यो न भवतीत्युच्यमाने उभयतोऽपि न भवति न भवतीत्यनन्यस्यान्यावृत्तिरेव, न कश्चिद्विधिगन्धोऽपीत्यन्यथावृत्तेरभवनपरमार्थत्वादभूतस्यानन्यत्वादन्यापुत्रव- 5 दविषय एव, स च निवर्तनमन्यापोहस्य स्यात्, येषामपि चार्थान्तराणां मध्ये यत्तदर्थान्तरं तत् किं भवदेव भवति? अभवद्वा? यदि तावत् स एव भवदर्थोऽर्थान्तरत्वेन स्थितः तदा तच्छब्दोत्पाद्यविज्ञानविषयस्य सिद्धत्वात् तस्मिन्नन्यावृत्त्या विधिवृत्त्येकगतिगुरुतरप्रतिपत्त्यात्मके बहुतरविषये विधिवादे प्रतिपन्ने किमपोहेन पुनः क्रियते?

एवं प्रक्रमेऽपि चेत्यादि,—एवमापादितस्यार्थान्यायेऽपि च न स कश्चिदित्यादिनाऽपोहनैर्मूल्य- 10 मापादयन् उपसंहरति पूर्वोक्तविकल्पस्वरूप[म]तत् विपर्ययेणानन्यविकल्पस्वरूपम् यावदभूतस्यानन्यत्वादन्यापुत्रवदविषय एव, स च निवर्तनमन्यापोहस्य स्यादिति गतार्थम्, येषामपि चार्थान्तराणामित्यादि, यदप्युक्तमर्थान्तरापोहेन स्वार्थाभिधान इत्यत्रार्थान्तराणि—अर्थेभ्योऽन्यानि, तेषामर्थान्तराणां मध्ये यत्तदर्थान्तरं सोऽर्थोऽन्योऽर्थः तत् किमिति पूर्ववद्विकल्पद्वयम्, भवदेव अर्थान्तरमपोह्यं? उत न वा भवदिति प्रश्नः, यदि तावदित्यादि प्रथमविकल्पे दूषणम्—स एव भवदर्थोऽर्थान्तरत्वे[न] स्थितः स भवतीति चेदिष्ट. तच्छब्दोत्पा- 15 द्यविज्ञानविषयः तस्य विषयस्य सिद्धत्वात् तस्मिन्नन्यावृत्त्या सिद्धेः, सा च प्रतिपत्तिरन्यनिष्ठाया विधिवृत्त्येकगतेर्भूयसा एकार्थविषयाया गरीयसी तेषामर्थानां भूयसां प्रतिपत्तिः स च विधिवाद एव भूयोऽर्थविषयो गरीयःप्रतिपत्त्यात्मकश्च तस्मिंश्च विधिवृत्त्येकगतिगुरुतरप्रतिपत्त्यात्मके बहुतरविषये विधि

स्थितमेवेति निश्चितमेतत्सर्वं। ननु सोऽर्थो यो दोष इत्याह—एवं प्रक्रमेऽपि चेति। भवत्येति एवमापादितेति अन्योऽनन्यो न भवतीत्युच्यते तथापि अन्यापोहमात्रो भावोऽर्थान्तरात्मकोऽपि न सोऽन्यार्थो विधिरूप इष्यते अन्योऽनन्यो 20 न भवतीति सोऽप्यन्यो न भवतीत्युभयतोऽप्यभावप्रसङ्गात्, विधिरूपस्वार्थस्य गन्धोऽपि न सम्भवः उभयाभवनमेव परमार्थः स्यात्, अन्यत्वं च एव च नास्ति तस्यानन्यमपि अतोऽभूतस्यानन्यत्वादन्यापुत्रवदन्यापोहविषयत्वात्तस्यान्यापोहनिवर्तनमेवाविधिरेव स्यात्, स्वार्थस्यान्यापोहमात्रनिवर्तनात्, अन्यापुत्रप्रतिपत्तिनिवर्त्यापोहनैर्मूल्यमिति भावः। अन्यस्यार्थान्तरापोहेन स्वार्थाभिधानमर्थं पूर्वपक्षिणा यदुक्तं तत्रापोह्यं यदर्थान्तरं अन्यार्थरूपं तत् किं भवदेवार्थान्तरमपोह्यमुच्यते उताभवदर्थान्तरमपोह्यमिति पूर्ववत् विकल्प्य दर्शयन्नाह—येषामपि चेति। अर्थान्तराणां मध्ये निष्कृष्टस्यार्थान्तर- 25 स्यापोहस्य भवत एवापोहो यदि विवक्ष्यते तत्र दोषमाह—यदि तावदित्यादीति यदि स एवार्थो भवदर्थान्तरमुच्यते तर्हि स एवार्थान्तरमिति तत्र च इति तच्छब्दोत्पादस्य विज्ञाने विषयस्यैकार्थविषयम्, तस्यैव चार्थान्तरत्वे तद्विज्ञानं विषयात्मकबहुतरविषयम् अन्यानन्यविषय अर्थान्तरस्यातिविज्ञानविषयत्वाद्विधिविज्ञानविषयत्वात्, तस्माद्विधिरेवान्यावृत्त्या च इति विज्ञानविषयस्य प्रतिपत्त्यान्यापोहस्य किमर्थमिति भावः। एतदेवाह तच्छब्दोत्पाद्येति, स एवार्थान्तरमिति तच्छब्दोत्पाद्यं विज्ञानं तद्विषयो भवतीत्येवमेव सिद्ध इति भावः। सा चेति स एवार्थान्तराणीति प्रतिपत्तिर्गुर्वी 30 बहुतरार्थान्तरविषयत्वात् अन्यागुर्वी। अनेकविधिविषयत्वविषयत्वात् स इति प्रतिपत्तेरिति भावः। अर्थान्तराणाम् तद्रूपत्वे विधानस्वभावत्वादपोहस्यैव निष्प्रयोजनत्वात् स च विधिवाद एवेति। तत्र कारणमाह—सर्वार्थेति। तथापि प्रयोजन-

1 सि अ इा. पे तत्र भाग।

वारे प्रक्रिये किमपोहेन पुनः क्रियते ? स्वार्थविषयस्य स पतति विधिप्रविषये प्रागेव दृष्टत्वात्, तथैव हि वस्तुतदर्थविषयाभ्युपविधिवादी संवृत्तोऽनन्यार्थस्यवादी चेत्ततः किमपोहकल्पनया क्रियते ?

सदा त्वर्थापत्त्या अनुगतसामान्यज्ञानं व्यावृत्तिसामान्यज्ञानञ्च भवति यदि स्वार्थार्थान्तराणि चैतदुभयं स्वत एव सिद्धात्मस्वभावं विधिनैव भवतु, को वारयति ?
5 असत्योपाधिसत्यस्य स्वार्थत्वात् पूर्ववत् ।

सदा त्वर्थापत्त्येत्यादि, स्वार्थश्च विवक्षितोऽर्थः मे वाच्योऽर्थो अर्थान्तराणि तदेतदुभयं स्वत एव सिद्धात्मस्वभावं विधिनैव वस्तुनस्तत्र सन् घट इत्युक्ते सति अनुगमसामान्यज्ञानं असदघटश्च न भवतीति व्यावृत्तिसामान्यज्ञानञ्च तदुभयमर्थापत्त्या यदि भवति भवतु गुणभावपूर्वं वस्तुनः सर्वेनीहत्वात्मकरूपं को वारयति ? असत्योपाधिसत्यस्य स्वार्थत्वात् पूर्ववत् एष तावदर्थान्तरमेकं यदि तत उक्तो दोषः ।

10 अथार्थान्तरं न भवतीति मन्यसे ततोऽनवस्था प्रसक्ता, पूर्वव्याख्यातान्यशब्दार्थप्रसङ्गवस्थानवत्, अर्थान्तरस्य चोभयविषयत्वात्तद्ग्रहणे किं तदर्थान्तरम् ? कुतो वाऽर्थान्तरं न भवतीत्युच्यते ? इति द्विगुणत्वादर्थान्तरत्वं निर्धार्यम्, यदन्तु न स कश्चिदर्थो भविता, उभयतोऽप्यभावप्रसङ्गात् स्वार्थस्यापोहोऽपि न दृश्यत एव अर्थान्तरं न भवतीत्युच्यमाने उभयतोऽपि न भवति न भवतीत्यर्थान्तरस्याव्यावृत्तिरेव न कश्चिद्विधिगम्योऽपीति अन्यथा द्विधैव
15 भवनपरमार्थत्वादात्मार्थान्तरस्याभावः, तदभावभूतस्यार्थान्तरस्याद् व्यापुत्रवदविषय एव, स च निबन्धनमर्थान्तरापोहस्य स्यात् अपोह्यतेऽर्थान्तरमनर्थान्तरं न भवतीति अपोह्यत यदनर्थान्तरं न भवति ततोऽर्थान्तरस्यैवानुपपदनात् किमुक्तं भवति यदर्थान्तरं तदर्थान्तरमेव तदनर्थान्तरमुच्यते तदेव स्वयमेव भवति ततो यदिदमनर्थान्तरं नाम तदर्थान्तरमेव तदनर्थान्तरमित्युक्तं भवति तस्मात्तस्यैवानर्थान्तरशब्देनाप्यनुपपदनात् किं तदर्थान्तरं पृथक् ?
20 यदर्थान्तरं स्यादर्थान्तरार्थान्तरत्ववदनर्थान्तरत्वातुल्यः शब्दार्थः स्यात् यथा वैधर्म्येण घट इत्युक्तेऽघटो नार्थान्तरवदनर्थान्तरातुल्यो दृश्यते न तथेह कश्चिदनर्थान्तरशब्देनाभिधानमन्तरमस्ति यतोऽस्यार्थान्तरस्य पदवद्वृत्तिः स्यात् अर्थान्तरशब्दार्थस्य चानर्थान्तरशब्दार्थाभिन्नत्वेऽर्थान्तरमित्युक्तेऽनर्थान्तरं न भवतीत्यपोहार्थो विधिर्भिन्नः स्यात् अतुल्ये तस्मिन्वृत्तेः, घटपटवत्, स्यादेतदेवं यदर्थान्तरमेवार्थान्तरत्वे स्थितमनर्थान्तरमुच्येत परापेक्षार्थान्त-
25 रत्वादेवार्थान्तरमिति, किन्तर्हि ? स्वापेक्षार्थान्तरत्वादेव, योऽसौ तदतत्त्वातुल्यः तस्य स्वतः

यथाप्येतत्स चेतदि तत्र व्यक्तिरर्थपरत्वा [illegible] –सदा त्विति । [illegible] विधिना [illegible] ततोऽर्थान्तरं [illegible] न तु वस्तुपरिनिष्ठित एव, [illegible] भवतु नाम [illegible] असत्योपाधि [illegible] स्वार्थश्चेति । [illegible] सामान्य [illegible]
30 [illegible] सन् घट इत्युक्त इति । [illegible] –अथार्थान्तरमिति । [illegible] अर्थान्तर [illegible]

तस्मादेव पटाद्घटानर्थान्तरस्यघटमर्थान्तरत्वम्, नन्वेव तदप्यर्थान्तरं अर्थान्तरादर्थान्तरमेव भवदनर्थान्तरं भवति, तस्यार्थान्तरस्य स्वात्मनि व्यवस्थितस्य तदनर्थान्तरत्वं तस्यमपोह मानोऽर्थान्तरापोहस्तदपोह एव भवति नान्यापोह इति स्ववचनाद्यशेषपक्षविरोधापत्तिः, अथायान्तरापोह इत्यनर्थान्तरापोहो न भवतीत्यपि न परिहार एव, अर्थान्तरापोह इत्यन र्थान्तराभावापोहो न भवति यत इत्यादिः स एव ग्रन्थोऽत्र द्रष्टव्यः, एवमुपक्रमेऽपि च न स कश्चिदर्थो भविता, उभयतोऽप्यभावप्रसङ्गात्, स्वार्थस्यांशोऽपि न दृश्यत एव, अनर्थान्तरं न भवतीत्युच्यमाने उभयतोऽपि न भवति न भवतीत्यनर्थान्तरस्याव्यावृत्तिरेव, न कश्चित् विधिगम्योऽपीत्यन्यथावृत्तरभवनपरमार्थत्वादभूतस्यानर्थान्तरत्वाद्वन्ध्यापुत्रवदविषय एव स च नियमनमर्थान्तरापोहस्य स्यादिति ।

( अथेति ) अथार्थान्तरं न भवतीति मन्यसे ततोऽनवस्था प्रसक्ता, पूर्वव्याख्यातान्यथा र्थप्रमाणवस्थानवत्, अर्थान्तरस्य घोमयविपयत्वादित्यादिविक्षेपमन्यत्वस्य घोमयविषयत्वादित्यादिना तुल्य योगात् स च नियमनमन्यापोहस्य स्यादिति, [ अथोच्यत इत्यादि ] यावन्न भवतीति पूर्ववदेव पूर्वपक्षः, उत्तरपक्षोऽपि यदनर्थान्तरमित्यादि तथैव यावत्तुल्ये तस्मिन्नवृत्तेरिति, योऽसौ तदवस्थातुल्य इत्यादि पूर्ववदेव पूर्वपक्षः, यावत्तस्मादेव पटात् घटानर्थान्तरवदनर्थान्तरत्वमिति, तत्रोत्तरपक्षो नन्वेव तदप्य र्थान्तरमित्यादि यावदशेषपक्षविरोधापत्तिरिति इत्यक्षरविपर्यासेन गतार्थः, अपरस्तु तुल्याक्षर एवेति, अत्रार्थान्तरापोह इत्यनर्थान्तरापोहो न भवतीति पूर्ववत् परेण परिहारेऽभिहिते इत्यपि न परिहार एव, अन्यापोह इत्यनन्याभावापोहो न भवतीति यत इत्यादिः स एव ग्रन्थोऽत्रापि तुल्यार्थ इति न विशिष्य लिख्यते तथात्र द्रष्टव्य इत्यतिदिश्यते एवमुपक्रमे न स इत्यादि स एव ग्रन्थः तुल्यार्थो यावदन्यापोहस्य स्यादिति विक्षेपस्यार्थान्तरस्वार्थस्यांशेऽपि दर्शनात्, युक्तेः सम्यक्त्वमौकर्यमित्येवत्साधनस्य दूषितम् ।

चतुर्थपादेन यत्त्वयोक्तं न चास्ति व्यभिचारितेति सा तावदास्तां स्वपक्षगतापोहवादिनः तथाप्यव्यभिचारिता विप्रकृष्टत्वात्, भेदपक्षे संशयदोषापादनार्थं यदुक्तं त्वया व्यभिचारत इति, तत्र विधिवादे सदसद्भावात्मकस्य संशयज्ञानस्य प्राप्तत्वात् किमिव न प्राप्तमभिधानम्! मम तूक्तन्यायेन स्वपक्षे संशयाद्यनास्पदम्, सदसद्भावाभावात्मकशब्दार्थत्वात् तद्वत्केर स्वार्थत्वात् न भवति न भवतीत्युभयतोऽप्यभावविषयत्वात् ।

पुनरथार्थान्तरे पर्यनुयोगस्य चागतत्वात् तथापि पुनरित्यनवस्था प्रसक्तेत्याह—अथार्थान्तरं न भवतीति । अर्थोऽन्योऽर्थ परस्परापेक्षयार्थान्तरं भवत् अतोऽर्थान्तरमनुक्तविषयम्, तथैवमन्योऽपि विशेषाभावे भिन्नतदर्थान्तरं ! अस्येतरार्था- न्तरमेव स्यात्, अस्मादर्थान्तरं न भवतीत्युच्यते ! ततोऽस्यार्थान्तरत्वं तिष्ठेत्, अर्थस्यार्थान्तरस्य चाभावस्यैवाभावाद्भवस्य विधिमत्त्वसाम्यमात्रेणान्यथात्वेनमकस्मैव परमार्थं स्यात्, तदभावमार्थान्तरत्वाभावादभूतत्वार्थान्तरत्वात्स्थित एव वन्ध्यापुत्रवत् न तथाच अन्यार्थो भविष्यतीति तत्त्वाप्रतिपत्तिरेव स्यात् अथार्थान्तरमप्यनर्थान्तरं न भवतीत्युच्यते ततोऽर्थान्तरमेवानर्था- न्तरमप्येतावद्युक्तत्वात् किं तदन्यदर्थान्तरम् ! इत्येवं प्रत्युक्तमप्यनभिप्रायेऽन्यत्वं व्यभिचारविसंवादेन अन्विष्य तुल्यमाक्षेपे नैवेति मामकीनमिदम् अर्थान्तरत्व चेति स्पष्टं सर्वं युक्तैव । अत्र चतुर्थं पादं न चास्ति व्यभिचारितेति दूषयितुमाह— चतुर्थपादेनेति । न चास्ति व्यभिचारितेत्यनेन यदव्यभिचारित्वमपोहवादिना त्वयोक्तं तत्तावत्तथास्ताम्, तद्विचारस्य विप्र-

1 सि क्ष डे तावच्चेति । 2 सि क्ष डे. भा. त्वपरिहारस्तु ।

(चतुर्थेति) चतुर्थपादेन यत्त्वयोक्तं न चास्ति व्यभिचारिता इति सा तावदसत्या तदपक्षगतापोह-
वादिनः तथाप्यभिचारिता, विरुद्धत्वात्, भेदपक्षे संशयदोषापादनार्थं यदुक्तं त्वया व्यभिचारत
इति,-सम्भवो हि यथा कुम्भे वर्तते तथा पटादिष्वपीति व्यभिचारात् संशयः स्यात्, नाभिधाने स्वार्थ
मूलः, तत्र विधिवादे सत्यासत्ये विधेयव्यावर्त्यौ भावौ, तयोः असत्यत्वस्य च भावस्य सम्भवो यस्मात्
5 तत्र भवति तदवसायस्य संशयज्ञानं तस्य संशयज्ञानस्य प्रमाणत्वात् किमिव न प्रमाणमभिधानम्? विपर्ययो
विपर्ययो वाऽनध्यवसायो वा यदि प्रमाणमित्यर्थः तत्सर्वं विधिवाद एव घटते, अत्र तूक्तन्यायेन-अन्यापोहार्थ-,
मेरुमूल्यत [illegible]स्याप्यदर्शनात् स्वपक्षे संशया [य] नासत्यम्, अभिमतत्वात् विपर्ययानध्यवसायनिर्णय
मध्यगतत्वात्, निर्विषया इत्यर्थः, कस्मात्? तदर्थभावाभावात्मकस्वार्थत्वात्-स चासन्न सन्नपि भावो यत्र
[illegible] तस्य भावः आत्मा यस्य स्वार्थस्य स्वदभिमतस्य तस्य भावात्-तदर्थभावा-
10 भावात्मकस्वार्थत्वात्, तत्प्रकृतेरसार्थत्वात् न भवति न भवतीत्युभयतोऽप्यभावविषयत्वात् [illegible]
व्यतिरेकविषयत्वासत्त्वादिर्विं संशयविपर्ययावपि निर्विषयौ विपर्ययाभावात् अनध्यवसायोऽपि स्वार्थस्य
भावकस्याध्यवसायस्य पर्युदासेऽनध्यवसायोऽध्यवसायाभावस्य इति भवति उभयतोऽप्यभावे कुतोऽनध्य-
वसायः? निर्विषयत्वात् खपुष्पवदिति ।

अथवा स्वम्मतप्रदेशादर्शनादन्यशब्दार्थः स्वार्थस्य सांशोऽप्यदर्शनादिति, यथार्क पृथ-
15 शब्दस्य वृक्षेषु सर्वेषु नहि दर्शनेनास्ति सम्भवः, नापि सर्वत्र शिंशपेषु सर्वशिंशपस्य सम्भवोऽपि
धूमादिवत् यद्यपि च कश्चिदस्ति विरत्यादिषु सम्भवः तथापि न सद्भावेनानुमानम्।

---

तत्कम्, अन्यथा तु तदपादितोषापास्तं तदीयं [illegible]–सा तावदसत्यामिति अन्योन्यार्थाभाव[illegible]
सम्बन्धाभावेन स्वार्थस्यासम्भवदर्शनात् तत्सम्भवाद्यर्थेनाभावे कुतो व्यभिचाराव्यभिचारविचार इति विशदार्थं बोध्यम् ।
भेदाभिधानपक्षे तत्सम्भवस्य कुम्भ इव घटपटादिष्वपि दर्शनादेवाभिधानेऽपरत्र व्यभिचारात् निश्चितमभिधेयमिति किं संशया
20 स्यात् तथाभिधेयानां बहुत्वेन कस्याप्यभिधेयस्य निश्चयाभावात् [illegible] तु न सत्यम् [illegible]
[illegible]–भेदपक्ष इति । विधिवाद एव तत्सत्यासत्यो सम्भवो [illegible]–तत्र विधिवाद इति ।
संशये हि विधेयव्यावर्त्यभावयोर्द्वयोरपि विधाने निश्चितत्वादपरस्य [illegible] संशयादि सत्स्वेव न [illegible]
[illegible]–सत्यासत्येति । विपर्ययोऽपि विधिवाद एव घटते [illegible]
निश्चय इति । अपोहवादे न घटत इति दर्शयति–अत्र त्विति । न्यायं दर्शयति अन्यापोहार्थेति । [illegible]–तदर्थभा-
25 वेति [illegible]
[illegible]
[illegible]
[illegible] निर्विषय इत्यादि
अनध्यवसायोऽपीति नार्थ [illegible]
30 [illegible] निर्विषयत्वात् [illegible]

---

१ सि क्ष [illegible] । २ सि. क्ष [illegible] । ३ सि क्ष. डा. [illegible] । ४ सि क्ष. डा. [illegible]
[illegible] । प्र. ××।२। ६ सि क्ष [illegible] । सि. क्ष [illegible] ।

सर्वात्मनाऽप्रतीतेः गुणसमुदायो हि डित्थाख्योऽर्थः, न च सर्वे काणकुण्टादयो डित्थशब्दाद्
गम्यन्ते एवमन्यप्रकारेणानुमानासम्भव इत्यनेनोत्तरवचनेन स्वकीयेन स्वार्थांशेऽप्यदर्शन
मेवेत्युक्तं भवति, तत एव चानुमानासम्भव इत्युच्यतेऽस्माभिः क्वचिददर्शनात् ।

अथ चेत्यादि, पाठान्तरं पूर्वार्थ तदेव, तस्य व्याख्या-तन्मतवदेवादर्शनादन्यशब्दार्थ इति प्रथमपादार्थः सव्याख्यात एव, स्वार्थैकदेशेऽप्यदर्शनात्तन्मतवदेवेति द्वितीयपादार्थः, तं भावयति-यथोक्त- 5
मित्यादिटीकामन्थ एव, वृक्षशब्दस्य वृक्षेत्यादि चादर्शनं नास्ति सम्भवो नापि सर्वत्र डिण्डिनीत्यादि,
अन्यस्यानुमानत्वात् सर्वत्रानुमेये दर्शनासम्भवोऽप्योगुणाद्यादर्शनादन्यन्नत्वादानुमन्यन्तरमत्रानुमेये गुणमतेऽपि धूमादिलिङ्गादर्शनवदिति, अत्र परो
ब्रूयात्-ननु डित्थादिरिश्वाभिधेये सर्वत्र दर्शनमित्यत्र तयोरुत्तरं यदुक्तं यद्यपि क्वचिदित्यादि स एव टीकाग्रन्थो
यावदनुमानासम्भव इति, वयं तन्मतवादेव ब्रूमः-अननोत्तरवचनेन स्वकीयेन यद्यपि डित्थशब्दे [दर्श] नमिह
स्वार्थांशे तदप्यदर्शनमेवेत्युक्तं भवति, काणकुण्टादयः सर्वे गुणास्तस्य गुणसमुदायात्मकस्य न गम्यन्त इति 10
वचनात्, सर्वात्मनादर्शना [त्] शब्दस्य सर्वात्मनाऽप्रतीतेरुदाहरणेऽभिहितत्वात् [च] वर्णेन स्वार्थांशेऽपि
समर्थितम् तत एव चानुमानासम्भव इत्युच्यतेऽस्माभिः क्वचिददर्शनादिति ।

अत्र ब्रूयास्त्वम्—

अन्वयानुपुरुषमुदाहृते व्यावृत्त्या डित्थोदाहरणमतदिति चेन्न, तत्प्रतिपत्तिनिर्मूल-
त्वात्, अनवगतपर्युदासकत्वार्थत्वात्, अविविक्ते देवदत्त न भवस्यदेवदत्त इति वचनवत्, 15
एवञ्च शब्दस्यार्थाभावेन सम्बन्धाभावकल्पदोषा य उक्ताः स इहापीति श्रुतेः सम्बन्ध

---

यथोरन्यशब्दार्थे इत्यस्य प्रकारान्तरेण व्याख्यामाह-अथ चेति । व्याचष्टे-पूर्वार्धमिति अदर्शनादन्यशब्दार्थे स्वार्थैकदेशेऽपि
दर्शनादिति पूर्वार्धं तदेवैतत् । तत्र प्रथमपादार्थं ग्रन्थः स्वरूपान्तरार्थे न दत्तक इति । द्वितीयं पादार्थं प्रदर्शयति-स्वार्थैकदे
शेऽपीति । पूर्वमेकदेशदर्शनेन योरन्योरदर्शनात्वविभुत्वेन प्रतीतिः तथैव सम्भवान्तरत्वेन स्वार्थमिवानम्, किन्तु
धर्माधिधर्मैकत्वसम्बन्धिनो शब्दस्य ग्रहणम्, तौ च तुल्ये डित्थतुल्येऽस्तीतिशेषे दृष्टौ तत्र तुल्ये सर्वत्र भावस्य डित्थाद्येषा 20
क्वचिद्दन्यत्रोऽदर्शनात्वाद्यसम्भवात् इत्यत्र यस्य हेतु सर्वेषु न हि दर्शनमात्रं सम्भवः नापि सर्वत्र डित्थेति डित्थित्व
सम्भवः यथाऽयोगुणाद्यादर्शनादनुमेये धूमादिलिङ्गादर्शनमित्यादिटीकाग्रन्थेनास्य सम्बन्धः यथोक्तमित्यादीति । किंचि
द्विशेषमाह परमताद्-शब्दस्यानुमानत्वादिति, शब्दस्य अन्यानुमानानुमेयमन्यत्वेऽपि अन्यस्यानुमानत्व-
मिति भावः । एवमनवगमसम्भवस्थाने परः तत्सम्भवमाशङ्कते अथ पर इति समाधत्तेऽपि टीकाग्रन्थ एवं इत्वा-यद्यपि च
क्वचिदपि सम्भवो डित्थादिषु, इयं ग्राह्या डित्थस्यैकत्वमनियमेन अवयवसमुदायत्वविशिष्टवस्त्वभावेन काणकुण्टादिभिर्विना- 25
भावात्वागतम्भवात् अन्यत्सम्भव एवेत्युत्तरयति तथैव-यथापि न व्यापारेणानुमानम्, गुणसमुदायो हि डित्थाख्योऽर्थः न च
सर्वे काणकुण्टादयो डित्थशब्दाद्गम्यन्त एवमन्यप्रकारेणानुमानासम्भव इति । आचार्योऽन्यमताद्-वयं तन्मतादेवेति,
एतस्यैकस्योत्तरस्यैवेति गौरवोक्तदर्शनमिदं तदप्यदर्शनमेव, डित्थार्थैकदेशदर्शनमुक्तं तथा तदन्यगतदर्शनमप्यदर्शनमेव स्यात्,
तस्यापि गुणसमुदायात्मकत्वाविशेषात्, तथा च गुणसमुदायो हि डित्थाख्योऽर्थः न च सर्वे काणकुण्टादयो डित्थशब्दाद्गम्यन्त
इति वचनेन स्वार्थांशेऽप्यदर्शनं तथैव समर्थितं भवतीत एव चानुमानासम्भव इति भावः । सर्वात्मनेति काणकुण्टादिषु 30
डित्थादिषु च सम्भवादर्शनात् सर्वात्मना न प्रतीतिः स्वार्थांशेऽपि । ननु यद्यपि च क्वचिदपि सम्भवो डित्थादिष्विति बहुषु
डित्थादुदाहरणं तदन्यथाभावेऽपि प्रमाणाद्विरुद्धे न भवतीति व्यावृत्त्या डित्थार्थगतिमनुमेयोपमिति चेदत-अन्वयानुपुरुषु

---

१ सि० क्ष० डा० स्वयादे । २ सि० क्ष० डा० सम्भवेऽप्यभो ।

दोष्कर्यम्, यः स वृक्षशब्दो यस्य स वृक्षोऽर्थस्तदितरो वा तस्य शब्दस्य तेनार्थेन न शक्यते सम्बन्धः कर्तुम्, तेन सहात्यन्तमदृष्टत्वात् श्रावणत्वनित्यानित्यत्ववत्।

अन्वयानुयुक्त्युदाहृतेरित्यादि, यावदेतदिति यदिति यदुक्तं भवति किंच इत्यस्य[ा]न्वितो न भवतीति व्याख्या क्रियार्थयोरन्वयाभावाद्व क्रियोदाहरणमिति यच्च न तत्प्रतिपत्तिनिर्मूलत्वात्-नैतद् क्रिय[मु]दाहरणमात्रमुपपद्यते प्रतिपत्तेरनालम्बनत्वात् न भवति न भवतीत्युभयतोऽप्यभावमात्रत्वात् प्रति- पत्तिनिर्मूलत्वम्, कस्मात्? अनवगतपर्युदासकस्वार्थत्वात्-अनवगतः पर्युदासो यस्य स्वार्थस्य सोऽनवगतप- र्युदासकस्वार्थः, तद्भावादनवगतपर्युदासकस्वार्थत्वात् नास्ति प्रतिपत्तेर्बीजम्, उभाभ्याम्-अविविक्ते देवदत्ते न भवत्येवेत्यत्र इति वचनमप्रतिपत्तेरेव कारणम्, निर्मूलत्वात् तथैव तदिति, तद्दर्शयति—एतच्च शब्दस्येत्यादि यावत् च इहापीति यथा पूर्वमुक्त आत्मा ते शब्दस्य चोऽर्थाभावादिति सम्बन्धाकल्पत्वं दोषः, स एव ततोऽन्यस्य कार्यस्याभावादकल्प्यात्मकेऽर्थद्वये शब्दस्य केन सहाविनाभावः सम्बन्धः स्यादिति शुद्धेः सम्ब- न्धदौष्कर्यम्, तदुपसंहृत्य प्रतिज्ञायते यः स वृक्षशब्दो यस्य स वृक्षोऽर्थः तदितरो वेत्यनयोः शब्दार्थयोः सम्बन्धो वृक्षशब्दार्थयोः प्रतिपत्त्यर्थः तस्य शब्दस्य तेनार्थेन लोकप्रसिद्धेन वा स्वरूपभेदेन न शक्यते सम्बन्धः कर्तुमिति पक्षः तेन सहात्यन्तमदृष्टत्वात्, श्रावणत्वनित्यानित्यत्ववदिति यथार्थं साधनम्।

न च सम्बन्धकारं पुरुषं शब्दस्य लिङ्गस्य वा स्वार्थस्थापनशक्तिरस्तीति तथैवोक्तोऽयं न्याय इति दर्शयति—

**स च सम्बन्धो नास्ति तद्वत्, अत एव यदुक्तं त्वया भेदाभिधानपक्षे दोषजात व्यक्तत्वात् तदवस्थम्, असाधारणधर्मत्वात्, श्राद्धसाधारणः पक्षधर्मा**

शाहृतेरिति [illegible] । न्यायः-यदुक्तं भवतीति। एवं [illegible] क्रियार्थ [illegible] न [illegible]- तत्प्रतिपत्तीति। [illegible] न भवतीति। अनवगतेति [illegible] क्रियो न [illegible] । [illegible] इति । एवं प्रतिपत्तेर्निर्मूलत्वे [illegible] सम्बन्धा [illegible] एतच्च शब्दस्येति। [illegible] यथा पूर्वमिति। [illegible] स च सम्बन्धो [illegible] यदा च [illegible] [illegible] सम्बन्ध [illegible] प्रत्यर्थं । [illegible] साधयति—यः स वृक्षशब्द इति [illegible] वा न तयैव [illegible] सम्बन्धः [illegible] साधनम्। तत्र [illegible] [illegible] [illegible] एतेन भाव । तेन सहेति तयैव [illegible] । [illegible] श्रावणत्वेति [illegible] धर्मः [illegible], तत्र न [illegible] न वा [illegible] वा तद् [illegible] भाव । न [illegible]

१ लि॰ श॰ प्रा॰ द॰ [illegible]

एकान्तव्यावृत्तेश्च, इदमपि चात्र यदन्वयव्यतिरेकौ शब्दस्यार्थाभिधाने द्वारमित्युक्त्वा पुनर न्वयस्य निराकरणं तत्रयत केनाभिप्रायेणेति न विद्मः, किमज्ञानात्? असद्बुद्धिपरिभवात्? इहपरलोकाभ्यामयदासश्चामीरुत्वात्? इति।

(स चेति) स च सम्बन्धो नास्ति, उक्तेन उक्त सम्बन्धदोषकर्मम् अत एवाह एतस्मादेव सम्बन्धदोषकर्मात् यदुक्त तथा भेदाभिधानपक्षे दोषद्वारं व्यवहारार्थं नास्त्येव व्यभिचारितादोष इति पक्षः, ५ असाधारणधर्मत्वादिति हेतु, असाधारणधर्मस्य सपक्षविपक्षयोरदर्शनात्, तद्व्याचष्टे-असाधारणः पक्ष धर्मेत्यादि यावदेकान्तव्यावृत्तत्वेति, तद्व्याख्यया गतार्थम्, किञ्चान्यत्-इदमपि चात्रेत्यादि, अन्वयस्य निम्-खनीयत्वात् यदन्वयव्यतिरेकौ शब्दस्यार्थाभिधाने द्वारमित्युक्त्वा पुनरन्वयस्य निराकरणं तत्रयतः केनाभिप्राये णेति न विद्मः किमज्ञानात्? असद्बुद्धिपरिभवात्? इहपरलोकाभ्यामभयत्वादभीरुत्वादिति। कथमन् न्वयनिराकरणमिति चेदुच्यते यदन्वयविषय एकदेशो निरूप्यते न्वया वृक्ष इत्युक्तो न भवतीत्यनुपलम्भवासेन। १०

कथं पुनरनेन न्वया निराक्रियत इति चेदुच्यते —

नन्वेवं सर्वकृत्स्नार्थदर्शनासम्भवात् भेदानन्त्याच्च स्वार्थदेशव्याप्त्यव्यवाभावात् गुणसमुदायमात्रत्वादभिधानाभिधेययोः कोऽसौ सम्बन्धो येनाभिधानाभिधेयाभाव उपपद्येत, लिङ्गस्यैकदेशसम्भविलिङ्गस्य गमकत्वयत्तु न स्वार्थांशमात्रे सम्भवति।

नन्वेवमित्यादि, भावत् कोऽसौ सम्बन्धो यतस्ति इति भावना गतार्था तत्र कारणमाह-सर्वकृत्स्नार्थ १५ दर्शनासम्भवात् भेदानन्त्याच्चासम्भव उक्तः, स्वार्थदेशव्याप्त्यवयो नास्तीति चोक्तो गुणसमुदायमात्रत्वात् गुणमूर्त्यवयवेष्वसत्त्व दर्शनसौक्ष्म्यात्येव तस्मादन्वयाभावेऽनुमानानुमेयसम्बन्धाभावादनुमानानुपप त्तिवदभिधानाभिधेयभावस्याप्युपपत्तिरिति स्यान्मत लिङ्गस्यैकदेशसम्भविलिङ्गवदभिधेयैकदेशसम्बन्धमभि-धानदर्शनात्सम्बन्धोऽभिधानेऽभ्युपेत्य तदप्यभ्युपेत्य-लिङ्गस्यैकदेशेत्यादि लिङ्गिनामभीनामेकदेशेऽप्य

भिना धूमो लिङ्ग स्वार्थं प्रत्यायितुं शक्नोतीति तथैवेत्यभिप्रायेणाह-स च चेति। व्याचष्टे-स च सम्बन्ध इति। भेदाभिधान २० पक्षे उपलम्भो यथा इष्टे वर्तते तथा व्यभिचारिपीति व्यभिचारितादोषे सत्यपि स नास्त्येव असाधारणधर्मत्वादित्याह-एत-स्मादेवेति अत्र मूलं मृग्यम्। अथ मन्त्रमार्थाभिधानेऽन्वयो व्यतिरेकश्च द्वारमिति प्रोक्त तत्र यस्त्वन्वयस्य निराकरणं क्रियते तत्केन हेतुनेति पृच्छति-इदमपि चेति। अन्वयनिराकरणं दर्शयति-यदन्वयेति अन्वयाभिधायिविशेषैकदेशस्याप्यन्यत्र तद्विपक्ष एकदेशे निरूप्यते वर्णान्तरापोहेन स्वार्थमभिधत्ते बुद्धिरिति व्याख्यानमिति भावः। तन्निराकरणप्रकारमाह-नन्वेवमिति। स्वार्थाभावमनन्त्यात् सम्बन्धाभावात् तावत् गुणसमुदाय सर्वेषु सर्वेषु वर्णेन न सम्भवतीति दर्शयति-सर्वेषु कृत्स्नेति। तित्वादेरेकदेश तत्र २५ तित्वादिकमपि दर्शनसम्बन्धो यद्यप्यस्ति तथापि गुणसमुदायमात्ररूपस्य तित्वादे सर्वात्मनाऽप्रतीतेरित्याह-स्वार्थदेशेति तित्वादे स्वार्थेन यो देशः तदनुप्रवेशित्वाद्व्याप्त्यन्वयो नास्तीत्यर्थः। गुणमूर्त्तस्वार्थस्यापि गुणसमुदायमात्रत्वेन सर्वात्मनाऽप्रतीतेरि त्याह-गुणमूर्त्तेष्विति। तथैव धूमे व्यतिरेकसम्बन्धानुपपत्तौ तदनुमानानुमेयसम्बन्धसामर्थ्येनानुमानासम्भवात् तस्मादनयोरभिधानाभिधेयसम्बन्धाभावादनुपपत्तिरित्याह तस्मादिति। ननु सर्वत्र लिङ्गिनि सर्वलिङ्गदर्शनासम्भवेऽपि लिङ्गे कदेशेऽप्यवेक्षित लिङ्गस्य धूमस्य दर्शनेन यथा वह्नि धूमेऽऽवगमो भवति तथाभिधेयैकाभिधेयेनाभिधानस्य दर्शनात् अन्वयात ३० सम्बन्धाभिधानत्वोपपत्त उच्यते स्यान्मतमिति। स्याद्वादेरेवाभिधेयप्रतिपत्तिर्न भवितुमर्हतीत्याह-लिङ्गिना

नैकस्मिन् सम्भवतो वृक्षस्य शिंशपादिभेदैर्गमकत्ववत् न स्वार्थांशमात्रे सम्भवतीति, शब्दादभिधेयप्रतिपत्तिर्न भवितुमर्हति ।

प्रत्यक्षवृक्षसम्बन्धाशक्यत्वे प्रतिपत्त्यभाववदेकत्वेऽपि मूलकोटरादिभेदानां सम्बन्धाशक्यत्वादप्रतिपत्तिः किमङ्ग । पुनरत्यन्तपरोक्षस्वर्गादिशब्दस्वार्थांशमात्रे नो चेदनन्तविराधमन्तभेदाभिधानं वृक्षशब्दस्य स्यात् अदृष्टस्वार्थांशत्वात्, अव्यापिपक्षधर्मत्वात्, अदृष्टव्यवच्छिन्नस्यापि स्वार्थस्य नानुमानाय नाभिधानाय स्याद्वृक्षशब्दः, तदेकदेशवर्तित्वात्, अव-नस्पतिव्यवच्छिन्नचैतन्यसाधनार्थस्वापवत् ।

प्रत्यक्षवृक्षेत्यादि, अयं वृक्ष इति प्रत्यक्षस्यापि मूलादिमतः साक्षादुपलभ्यमानस्य सम्बन्धग्रहणकाले सम्बन्धग्रहणं नास्ति शिंशपादिभेदैरनन्त्यात् जातिशब्दस्य भेदैरनन्तैः सम्बन्धाशक्यत्वे प्रतिपत्त्यभाववत् यथैकत्वेऽपि स्वार्थांशस्य मूलादिकोटरादिशब्दवीर्य[ त ]त्वविशेषभेदानां सम्बन्धाशक्यत्वे कथं प्रदर्शनात् किमङ्ग ! पुनरत्यन्तपरोक्षस्वर्गादिशब्दस्वार्थांशमात्रेऽपि तदर्थस्याप्रतिपत्तेः, नो चेदनन्तविराधनन्तभेदाभिधानं वृक्षशब्दस्य स्यात्, अदृष्टस्वार्थांशत्वात्, अत्राभिप्रायादनसाधन-अदृष्टव्यवच्छिन्नस्यापि स्वार्थस्य नानुमानाय नाभिधानाय स्याद्वृक्षशब्दः, न प्रभवतीत्यर्थः, तदेकदेशवर्तित्वात्—स्वार्थस्य धर्मिणः पक्षस्यानुमेयस्याभिधेयस्यैकदेशे वर्तितुं शीलमस्येति तदेकदेशवर्ती, किमुक्तं भवति[1] अव्यापिपक्षधर्मत्वात्—स-मस्तानुमेयाव्याप्तित्वादित्यर्थः अवनस्पतिव्यवच्छिन्नचैतन्यसाधनार्थस्वापवत्—यथा सचेतना वनस्पतय इति प्रतिज्ञायां स्वापादिति हेतुर्धर्मिणो वनस्पतेरेकदेशे शिरीषादौ वर्तमानोऽपि तालादिष्ववर्तमानो न चैतन्यानुमानाय प्रभवति अव्यापित्वात् तथा वृक्षशब्दोऽपि अदृष्टव्यवच्छिन्नस्वार्थो वृक्षस्वार्थांशवृत्तिर्नानुमानाय नाभिधानाय प्रभवति यदत् पुनः स्वार्थांशत्वस्यानुपपन्नस्यानिष्टापादनम् नैव दृष्टिरपीत्युक्तमेव, तस्यामभावानुमानस्यापि स्वार्थाभावम् ।

20 मिति । तदेव स्पष्टयति—प्रत्यक्षवृक्षेति । व्याचष्टे—अयं वृक्ष इति [illegible] शिंशपादिभेदैरनन्त्यात् [illegible], न हि सम्बन्ध-[illegible] [illegible] [illegible] मूलकोटरादीनां [illegible] सम्बन्धाशक्यत्वादिति भाव । तदेवं प्रत्यक्षे सम्बन्धाशक्यत्वे किं पुनरत्यन्तपरोक्षस्वर्गादिस्वार्थांशमात्रे इत्याह—किमङ्ग ! पुनरिति ।

25 [illegible] स्वार्थांशमात्रप्रवृत्तेऽपि वृक्षशब्दे स्वार्थमभिधत्ते यदि [illegible], [illegible] नो चेदिति स्वार्थांशमात्रप्रवृत्तेर्न स्वार्थं न प्रतीयते नो चेदिति भाव । [illegible] स्वार्थमनुमापयितुं वा न प्रभवति वृक्षशब्द [illegible] [illegible] वृक्षशब्द [illegible] वा स्वार्थं न व्याप्नोति [illegible] वा स्वार्थाभिमतेष्वपरोक्षेति भाव । दृष्टान्तमाह—अवनस्पतीति । दृष्टान्तं स्पष्टयति—यथा सचेतना इति । एतस्मिन् [illegible]

30 [illegible] शिरीषादौ [illegible] [illegible], [illegible] न वर्तत एव [illegible] [illegible] [illegible] [illegible] यदत्पुनरिति । [illegible]

१ क. प्रत्यक्षेत्यादि । २ सि. क्ष. डा. भेदाभिधानाभि । ३ सि. क्ष. डा. °कत्वेऽपि । ४ सि. क्ष. डा. दे °र्मस्येति वर्ती स्यादुपलभ्यमानस्येति । ५ सि. क्ष. डा. दे. भवति । ६ सि. क्ष. डा. दे. न भवति ।

साम्प्रतं साध्याक्षेपानित्यत्वाव्यापिप्रयत्नानन्तरीयकत्ववदनुमानं स्यात्, वनस्पत्यव्यापित्वापवद् नुमानाभासः स्यादिति सन्देह इत्यत्र न—

अशेषपक्षाव्यापी वृक्षशब्दो ह्यशेषमवृक्षव्यवच्छिन्न वृक्षार्थं नामवृक्षं स्थापनावृक्षं वा सपक्षं ननु न व्याप्नोति, नाप्यनुमानेऽत्र दोषः तत्र कः सम्बन्धः साध्याशेषानित्यत्वाव्यापि प्रयत्नानन्तरीयकत्वानुमानत्वप्राप्तेः ? स्वापोदाहरणनिरपेक्षादृष्टदेशवर्तित्वाभ्युपगमे त्वतुल्येऽपि वृत्तिप्रसङ्गः ? अवृक्षे घटादौ वृक्षश्रुतेः अदृष्टदेशवर्तित्वात्, मूलादिमति पलाशादौ स्वार्थांशे वा वृत्तिवत्, तस्मादेव चानन्यत्वात्कृतसम्बन्धजातिशब्दमेवधावित्वेऽप्यदोषः, तथाऽर्थांशेऽदृष्टत्वात्, अपोहस्वार्थवत्, त्वन्मतस्वार्थेऽपि वा तद्दोष एव स्यादिति कुतः तुल्यातुल्ययोर्वृत्त्यवृत्तिभ्यामन्वयव्यतिरेकौ ? कुतो वा शब्दस्याभिधेयस्य पक्षधर्मत्वम् ? लिङ्गलिङ्गिनः कुतस्त्रैलक्षण्यम् ? कुतोऽनुमानत्वम् ?

अशेषपक्षाव्यापीत्यादि, प्रयत्नानन्तरीयक हि सपक्षं न व्याप्नोति स्वापस्तु पक्षमेव न व्याप्नोतीति परिहारः वृक्षशब्दो ह्यशेषमवृक्षव्यवच्छिन्नं वृक्षार्थं नामवृक्षं मनुष्यादि स्थापनावृक्षं—चित्रादि वाऽव्यभिचारेण साध्यधर्मसामान्येन समानं सपक्षं न तु न व्याप्नोति, नाप्यनुमानेऽत्र दोषः, स्वार्थांशवृत्तित्वात्—अव्यापिपक्षधर्मत्वात् वनस्पतिचैतन्ये स्वापवदित्युदाहरणम्, तस्माभासानुमानाय स्यादुक्तम् इति साधूक्तम्, तत्र कः सम्बन्धः साध्या[ क्षेप ]नित्यत्वाव्यापिप्रयत्नानन्तरीयकत्वानुमानत्वप्राप्तेरिति स्वाभ्युपगमस्वाप-दृष्टान्तमनपेक्ष्य वृक्षशब्दो यत्र न दृष्टः तानपि स्वार्थावयवान् गमयति, वृक्षस्वार्थानुमानसाधर्म्यात्, अतो वृक्षप्रवृत्तिरस्तीत्येवमायुक्तम्, अपोहे वृत्तिप्रसङ्गात्, अत आह—स्वापोदाहरणनिरपेक्षादृष्टदेशवर्तित्वाभ्युपगमे त्वतुल्येऽपि वृत्तिप्रसङ्गः—अतुल्ये साध्यविपक्षे वृत्तिः स्यात् अवृक्षे घटादौ वृक्षश्रुतेः, अदृष्टदेशवर्तित्वात्

प्रयत्नानन्तरीयकत्वादनित्यत्वसिद्धिरिष्यते हेतुर्येन यत्नानित्यं न तत्र सर्वत्र वर्तेत इति साध्याक्षेपानित्यत्वाव्यापी स्यात् किं वृक्षशब्दस्यैति हेतुः स्यात् ? किं वा शब्देनानेकत्व [illegible] स्यादिति चेत्, [illegible] मात्रावस्थानात् असम्भवेति सर्वं निराकरोति—अशेषपक्षाव्यापीति । व्याप्नोति—प्रयत्नानन्तरीयकं हीति प्रयत्नानन्तरीयकत्वं न पक्षैकदेशाव्यापि किन्तु सपक्षमात्राव्यापि तथा [illegible] नामात्र स्वापस्तु पक्षमेव न व्याप्नोतीति हेत्वाभास वृक्षशब्दे-[illegible] एव न प्रयत्नानन्तरीयकत्वस्तद्दोषोऽस्ति न सम्भव इति भाव । वृक्षस्य सपक्षं व्याप्नोतीति दर्शयति—वृक्षशब्दो हीति, निश्चितान् वृक्षान् नामवृक्षं स्थापनावृक्षं वृक्षशब्दो व्याप्नोत्येव नामस्थापनावृक्षौ नामव्यवहारेण सपक्षौ वृक्षसामान्येन समानत्वादिति भावः । [illegible] स्वार्थमनुमानमुपलभ्य वा न भवति वृक्षशब्दः तदेकदेशवर्तित्वात्, अव्यापिपक्षधर्मत्वादित्युक्तेऽनुमाने न वनस्पतिचैतन्ये स्वापवदित्युदाहरणाय दोष स्यात् नाप्यनुमान इति एवम् स्वापोदाहरणायेत्यभिप्रायः सम्बन्धः प्रयत्नानन्तरीयकत्वानित्यत्वानुमानवदिदमनुमानं स्यादिति तथापि अवसर एव नास्तीति भावः । ननु स्वार्थमनुवृत्तिव्यतिरेकत्वेन [illegible] प्रतीतानपि वृक्षशब्दो गमयति अतो विवक्षितो वाच्यत्वात् विवक्षार्थो निश्चितानुमानात् प्रत्यक्षानुमानप्रत्यक्षाभिधानार्थं वा वृक्षशब्दस्य स्यात् तु स्वापानुमानसाधर्म्यात् तदनभिधानत्वादनुमानभिधानाद्वेति स्याभ्युपगमेनेति । स्वार्थावयवेषु वृक्षशब्दस्य वृत्त्यनुपगमे वृक्षशब्दोऽर्थान्तरेऽश्वादौ वर्तेत न वृक्षो भवतीत्यसाधकत्वम् इति निश्चयाभिधानान्मत एव स्यादित्युत्तरयति—स्वापोदाहरणेति । अतुल्येऽपीति साध्यधर्मसामान्येनासत्येऽस्मिन् घटादौ वृक्षशब्दस्य वृत्तिप्रसङ्गः यथा लिङ्गलिङ्गिस्वार्थव्यतिरिक्तार्थे घटादौ वृक्षश्रुतिर्वर्तेत तदेकदेशवर्तित्वादिति भाव । तदेवं वृक्षशब्दस्यार्थान्तरनिवृत्तिविशिष्टस्वार्थवृत्तौ तत्स्वार्थस्य मूलस्कन्धशाखादिरूपैरनेकैरनन्यत्वेऽपि तदवस्थायां न वृक्षत्वेऽवस्थानमेव भेदाभावमभ्युपगतोऽप्यन्यत्वेऽपि जातिशब्दानां तुल्यतुल्या जातिरेव

1 सि. क्ष. के भेदसद्भावात्त्व । × × क्ष ।

मूर्त्तादिमति पक्षाशयो व्यापादो वा वृक्षित्वं, तस्मादेव चानन्त्यादव्यसम्बन्धसाविशिष्टमेव चाभिधेऽ-
प्यदोषः तथार्थांशेऽप्युक्तात्–अदुष्टस्वार्थांशत्वादित्यर्थः, अपोहस्वार्थवत्–अदुष्टो न मनवीनदुष्टापोहस्व
स्वार्थो मूर्त्तादिमानानन्त्यःकोटरादिभेदेन तदभिधेये चादोषो दृष्ट एव भेदवादिनोऽप्यानन्त्येऽपि भेदानामदृष्ट-
सम्बन्धेऽपि दोषाभावः स्यात् स्वसम्बन्धसार्थेऽपि वा तद्दोष एव स्यादिति कुतः तुल्यानुन्ययोर्व्यभिचारा-
5 मन्वयव्यतिरेकौ ? कुतो वा तत्स्वामिभेदस्य पक्षस्य धर्मत्वं ? लिङ्गलिङ्गिन कुतसैन्दृश्यम् ? कुतोऽनु-
मानत्वमिति ।

एवञ्च शब्दलिङ्गगतपक्षाद्यभिप्रेयते तदेव पक्षाद्यतथार्थत्वादतत्स्वस्वरूपारम्भकत्वादनुमा
नमप्रमाणम् अज्ञातचक्रे चक्रमिति प्रत्ययवत् तस्मात् साधूक्तं नाप्रमाणान्तरं शाब्दमनुमाना-
दयादि यत् । कृतकत्वाद्यपि स्वार्थमात्मापोहेन नाशयेत् ॥ ( ग्रन्थकर्तुः ) इति इदमपि शास्त्र
10 एव पूर्वपदलक्षणं यस्ययोक्तं यथा लिङ्गं लिङ्गिनं नातिक्रामति येन रूपेण तेनैव रूपेण चाव्यतो
व्यावृत्त्यात्मकेन गमयति सत्त्वाद्यनेकधर्मापि सन् तैस्तान् व्यभिचाराच्च गमयति गम्यन्ते च
लिङ्गमनुपघ्नितः सामान्यधर्माः तैरविनाभावात्, लिङ्गस्य विशेषा न गम्यन्ते तस्यैव व्यभिचारि
त्वात् एवं लिङ्गस्यान्यव्यावृत्तं सामान्यं गमकं नाव्यावृत्तम् लिङ्गिनः सामान्य गम्यं लिङ्गवत्,
लिङ्गे स्वयं विशेषः 'लिङ्गानुपघ्नितः स्वार्थाः' ( ग्रन्थकर्तुः )

15 ( एवञ्चाति ) एवञ्च शब्दलिङ्गगतपक्षाद्यभिप्रेयते तदेव पक्षाद्यतथार्थत्वात् अतस्मिंस्तदिति प्रत्ययो-
ऽनुमानमिति सुगमविचार्थम् तस्मादतत्स्वस्वरूपारम्भकत्वात् अनुमानमप्रमाणम् अज्ञातचक्रे भ्रमदेशः पुरुषो
चक्रे चक्रमिति प्रत्ययवदिति तस्मात् साधूक्तं 'नाप्रमाणान्तरं शाब्दमनुमानाद्यथादि तत् । कृतकत्वादपि
स्वार्थमात्मापोहेन नाशयेत् ॥' इति अप्रामाण्यादनुमानात् परपरिकल्पित शाब्दमपि नाप्रमाणान्तरं
नार्थान्तरं–अप्रमाणमेवानुमानवदिति प्रकृतोपसंहारार्थः इदमपि शास्त्र एव पूर्वपदलक्षण–'न प्रमा
20 णान्तरं शाब्द'मिति श्लोको यथाऽव्याख्यात तथेदमपि लिङ्गलिङ्गिनोर्गमकगम्यनियमार्थकम् कथमपरीति
चतुर्थपदे–यैरनयोक्तं यथा[लि]ङ्गमित्यादि लिङ्गमाह–धूमकृतकत्वादि लिङ्गिन–अग्निनित्यत्वादिविशिष्ट देश-

शब्दाभिधानेऽपि न कश्चिद्दोष स्यात् । यदि तत्र पक्षे दोषो मन्यते तर्हि स्वर्थस्मिन्स्वार्थेऽपि दोष सार्थवैयर्थ्य–तस्मादेव चेति ।
एतमेव भावं दर्शयति–अदुष्टो नेति । नानिम्नस्वरसम्बन्धेऽपि दोषस्य तुल्य एव सद्भाव हेतुत्वे दृष्टान्तस्तुल्योऽभिलाष
व्यतिरेकव्यतिरेको तौ कुतो भवेताम् ? कुतो वाऽभिधेयस्य पक्षस्य धर्मः धर्म स्यात् कुतो वाऽर्थलिङ्गिनो लिङ्गस्य एकस्य तैरूप्यमिति
25 कुतस्य तैरूप्यम् ? कुतश्च वाऽनुमानत्वमित्यादि कुत इति । एवमनुमानस्याप्रामाण्यमाह एवञ्चेति । तदन्यापोहानुमान
अनुमेयं न कश्चिदन्ये नामाणि च चक्रो लिङ्गं वा भवेत्, न भवति न भवतीत्यवयवपरमार्थतानुभवतोऽप्यप्रमाणत्वात् तस्मि-
न्नात्मनि चक्रं यत्र तत्र पतत्यपि स्वरूपतो वा तथापि पक्षादयनुपपत्तेऽनविरोधि प्रत्यवस्थानत्वेन पक्षादिलक्षणत्वम-
ममत्वादतथत्वात् अनुमानमप्रमाणं स्यात् भ्रान्तचक्रस्यार्थ चक्रबुद्धिवदिति भाव स्यादिति मनिमाते । इत्थमनुमानस्याप्रामाण्ये
न प्रमाणान्तरं शाब्दमित्यपि नादिरेव वा ये च उक्तमाह–तस्मात् साधूक्तमिति । एतदेव स्पष्टमाह–अप्रामाण्यादिति ।
30 तत्र लिङ्गलिङ्गिनोर्गमकगम्यनियमार्थकमपि तद्वचन न प्रमाणान्तरं शाब्दमित्यादिरवतरणमिति दर्शयति इदमपीति ।
तद्व्य भेदाह यथा लिङ्गमित्यादीति यद्यपि सत्त्वप्रमेयत्वानेकधर्मयुक्तम्, तथापि तद्रूपादि प्रत्यनीकधर्मान्तरविशिष्टं तथा-

१ क तत्र दर्शितो प्रस्तावोक्तविचारप्रामाणिकत्वं दृश्यते । २ सि क डा तासना । ३ क डा. तथाचवदिति स्वा-
र्थत्वादिवर्षो । ४ क डा. तुल्यानुमेयो । ५ सि क डा है चक्रमितेने । ६ क है डा. यदवचाच तथा अमिताद ।

दाप्याग्निमर्थं नातिक्रम्य वर्तते येन रूपेण, केन च नातिवर्तते ? धूम इत्यधूमो न भवति इत्यदः इत्यतरको न
भवतीत्यधूमाद्यनग्निव्यावृत्तात्मना नातिक्रामति तेनैव च रूपेणाग्नेरतो व्यावृत्तात्मकेन गमयति, सत्त्वद्रव्य-
[त्व]प्रमेयत्वमपि सन् वतान् व्यभिचारान्न गमयति—सत्त्वादिसामान्यधर्मैरिति एष गम्यगमकनियमः,
गम्यनियमोऽपि—गम्यस्य इत्यादि लिङ्गिनोऽनुबन्धिनः सा[मा]न्यधर्माः सत्त्वद्रव्यत्वादयो गम्यन्ते, तेरवि-
नाभावात्, लिङ्गस्य विशेषास्तौपकारी तावयो न गम्यन्ते तस्यैव व्यभिचारित्वात्—लिङ्गस्य विशेषैः सहादृष्ट- 5
त्वात्, एवं लिङ्गस्यान्यव्यावृत्त सामान्य गमक नान्यव्यावृत्तमन्यत्वः सत्त्वादिलिङ्गिनः सामान्यं गम्य निवृत्त-
त्व[न]म्यावित्यः, धमित्व सत्त्वादि चाग्निनाऽनुवर्तमानव्यभिचारादिति, लिङ्गे त्वय पुनर्विशेषः 'लिङ्गानु
बन्धिनः व्याप्ताः इत्यादि श्लोक पूर्वोदाहृताः सामान्यधर्मा सत्त्वादयो लिङ्गस्य धूमस्य न
गमयन्तुपकारणत्वात्, विशेषास्तु कर्विचिल्लिङ्ग्यविनाभाविनः प्रतीता प्रतिपादकाः पाण्डुत्वमहत्त्व-
त्वादय इति । 10

एवंतुन कथं पूर्वपक्षकथनमित्यत आह—

किमङ्ग । ॥

। ॥

। ॥ यत्तूक्त न सर्वत्र लिङ्गिनि
लिङ्ग सम्भवत्यग्निधूमादिवदिति तदिदमपि यदि लिङ्गमेव, कथं तस्य लिङ्ग नास्ति ? अथ 15
नास्ति लिङ्ग कथं तद्वानिति स्ववचनविरोधि ते वचनम् ।

---

लिङ्गेऽपि विशेष गमयति व्यभिचारात् किन्तु अधूमादिव्यावृत्तिरूपेणैव तं गमयति, एव हृत्स्वप विशेषमपि अधूमाद्यनिवृत्त्यात्मनाऽनि-
वृत्तविशेषं सर्वं गमयतीति गमकस्य नियम इति भाव । गम्यनियममाह—गम्यनियमोऽपीति, लिङ्गिनि अग्न्यादौ धर्माः
अपि सामान्यधर्मा सत्त्वद्रव्यत्वादयो गम्यन्त एव व्याप्यव्यापकभाव एव लिङ्गस्याव्यभिचारात् केचित् तदभावादेव लिङ्गस्योप-
कारिणो न गम्यन्ते तथा लिङ्गिनि व्यभिचारादिति भाव । तदाह—एवमिति लिङ्गस्य परैर्व्यावृत्तस्य सामान्यं 20
गमकं भवति लिङ्गिनि सत्त्वादिसामान्यस्वरूपं गम्यं भवति । तत्र सामान्यमपि सत्त्वादि च अन्यानुवर्तकव्यभिचारादिति
भाव । अयमत्र भाव कार्य कारणानुवर्तनेऽपि कारणस्य धर्मा तदा सर्वथा गम्यगमकभाव प्रसज्यत अतः सामान्यधर्मैर्विशे-
षधर्मा अपि तार्किकैर्व्याख्याता गम्या तु धूमस्यापि विशेषधर्मैः सत्त्वद्रव्यत्वादिभिः कारणेऽपि सामान्यधर्मा गम्यत यथेत
सर्वथा अन्यथानुपपत्तेः, यथा हि अग्निरग्निसामान्यत्वादिभिः सामान्यधर्मैर्गम्यः तथा तार्णपार्णत्वादिभिरपि विशेषैः । यथा च
धूमे धूम पाण्डुत्वमहत्त्वादिभि सन्निकृष्टैर्विशेषैर्युक्तो अन्यथा सामान्यधर्मैरपि सत्त्वद्रव्यत्वादिभि तत्र यथा तयो कार्यकार 25
णभावस्तथैव गम्यगमकभाव इतीति चेत न हि सर्वथा अन्यथानुपपत्तौ तत्र सर्व तत्र गम्यगमकभाव स्यात् तार्णपार्णत्वादि
विशेषधर्माणामभावे भवतो धूममात्रस्य तदुत्पत्तिरभावात्, एवमभावे भवतो द्रव्यत्वादिसामान्यधर्मस्याप्युत्पत्तिनियमो
नास्ति, एवं सत्त्वद्रव्यत्वादिभि धूमोऽग्निमत्त्वेनाग्निरुपस्थापितैरपि विना न भवति तथा कारणगतसामान्यधर्मैर्वा
कार्यं गमकम् । न हि तत् सामान्यमात्रात् कदाचिदपि कार्यं व्यभिचरति, एवं कारणगत सामान्यधर्मा गम्या कार्यमपि तैरेव
गमयते कारणगतास्तथाविधा गमकम् येऽग्न्यन्तरात्मनिरूपिता धूमस्य पाण्डुत्वमहत्त्वादयो विशेषास्त एते हि कारणगते सामान्य- 30
धर्मैर्विना न भवन्तीति । लिङ्गे विशेषे प्रागुक्त एवम्—लिङ्गानुबन्धिन इति लिङ्गस्य सत्त्वद्रव्यत्वादि सामान्यधर्मा न लिङ्गिन
गमयन्ति अनुमेयेऽपि तथा सत्त्वे लिङ्गिन्यव्याप्यव्यापकत्वात्, किन्तु लिङ्गिनि विशेषा पाण्डुत्वमहत्त्वादिभिर्धूमत्वादिधर्मोऽग्नि-
त्वविनाभाविनो लिङ्गिव्याप्यव्यापकभावेन गमयतीति भावः । एवं गम्यगमकनियमोऽपि पूर्वपक्षकथनमेवाह—किमङ्गमिति ।

---

१ सि क्ष का. च तुल्यतावस्य । २ सि क्ष का. च लिङ्गत्वात् ।

किमङ्गमित्यादि, स्तोकमयं सर्वमन्यथैवोपन्यस्तं समस्तस्य तत्पुत्रस्यार्थवाक्यं पूर्वोक्तं न भवति न भवतीत्यभवनपरमार्थत्वात्, तत्पुत्रवदभावेन गम्यगमकमित्ययो न्याय्येवेति गवार्थम्, किञ्चान्यत्–यदुप-लिप्तानि पूर्वपक्षमनुवादरूपं वचनमुपानि[पति]ति, यत् स्वार्थस्यापि अभ्यर्थनात्मकस्य समर्थस्योक्त–न सर्वत्र लिङ्गिनि लिङ्गं सम्भवतीति तदिदमप्यमेतदयानित्यया न वा चिन्तां नौऽस्तमित्यभिप्रायः तद्व्याचष्टे–यदि लिङ्गेऽपेक्षाणि लिङ्गमस्यास्तीति लिङ्गि, यदि तस्य लिङ्गि अस्मांतरयोगुरुपाकापदमा च वस्तु कथं तस्य लिङ्गं नास्ति ? लिङ्गाभावे लिङ्गित्वस्यैव[ा]भावात्, मत्वर्थीयनिर्देश्यलिङ्गित्याभ्युपगमाच्च लिङ्गाविलमित्य-भिप्रायः । अथ नास्ति लिङ्गं कथं तद्वान् ? लिङ्गमस्यास्तीति लिङ्गवान्, लिङ्गीत्यर्थः मत्वर्थीयनिर्देशो न भवितुमर्हतीति सोऽर्थः, तन्निमित्ताभावादिति स्ववचनविरोधि ते वचनमिति ।

अग्निधूमोदाहरणे चेदमः प्रत्यक्षविषयस्य सप्तम्यन्तनिर्देशोऽत्रेति प्रत्यक्षोपलभ्यधूमा-
धारप्रदेशाभिसम्बन्धो धूमवत्त्वाद्धूमादिति यथाऽग्निरत्रेति साध्याधारप्रदेशप्रत्यक्षनिर्देशादग्नेः परोक्षस्य जिज्ञासितत्वात् तद्वत्त्वेन देशस्य साध्यत्वम्, इतरथाऽत्रेत्यनर्थको निर्देशः स्यात् तस्मात् सर्वलोकप्रसिद्धिमत्यग्निमति प्रदेशो साध्य सर्वत्र धूमवत्त्व लिङ्गमस्त्येव, न च सर्वाग्नि प्रदेशासाध्यत्वम्, तत्र दृष्टान्ताभावादसाधारणतादिदोषप्रसङ्गात् ।

अग्निधूमोदाहरणे चेत्यादि, इह तावत् प्रत्यक्षोऽस्ति[ ]अग्निरत्र धूमादिति इदमः प्रत्यक्षविषयस्य
प्रातिपदिकस्य सप्तम्यन्तनिर्देशोऽत्रेति प्रत्यक्षोपलभ्यधूमाधारप्रदेशाभिसम्बन्धिधूमवत्त्वाद्धूमादिति, यथा-ऽग्निरत्रेति सौम्याधारप्रदेशप्रत्यक्षनिर्देशादग्नेः परोक्षस्य जिज्ञासितत्वात् तद्वत्त्वेन देशस्य साध्यत्वात्, इतरथा-

न्याचष्टे–स्तोकमयमिति [illegible] न न्यायानुसारं [illegible] । [illegible] इति भावः । [illegible]–यदु-पलिप्तमिति [illegible]
[illegible], न हि [illegible] लिङ्गिनि [illegible] तथा तदपि न युक्तम् इति भावः । [illegible] यदि लिङ्गत्वेनेति–[illegible] [illegible] इति भावः । अग्निधूमोदाहरणेऽपि सर्वत्र लिङ्गिनि लिङ्ग-
[illegible] अग्निधूमोदाहरणे चेति । इदं तावदिति अत्र [illegible] । सर्वत्र लिङ्गिनि लिङ्गाविल-[illegible] अग्निरत्र धूमादिति [illegible] धूमदेशाभिप्रायेण न [illegible]–इदम इति, [illegible] [illegible] [illegible] देशो धूमाधारे [illegible] धूमदेशाभिसम्बन्धात्, [illegible] [illegible] धूमविशेषेति भावः । तन्निर्देशं दर्शयति–यथाऽग्निरत्रेति । [illegible]
[illegible] परोक्षविषयत्वेन जिज्ञासितत्वात् अत एव [illegible] [illegible] साध्यं भवति [illegible] । [illegible] [illegible]–इतरथेति । [illegible] जिज्ञासितत्वात् साध्याधार

1 सि० क्ष० प्र० ० मेघमत्सरोऽथ । २ सि० क्ष० डे० सम्बन्धो । ३ सि० क्ष० डा० डे० समाधान ।

ऽत्रैवानर्थको निर्देशः स्यात्, तस्मात् सर्वलोकप्रसिद्धेऽग्निमति प्रदेशे साध्ये सर्वत्र धूम[म]स्य लिङ्गमस्त्येव, न च सर्वाग्निमत्प्रदेशसाध्यत्वम्, तत्र दृष्टान्ताभावादसाधारणत्वादिदोषप्रसङ्गात् तस्मादस्ति सर्वत्र लिङ्गिनि लिङ्गमिति ।

अयोगुडाङ्गारादयो धूमासम्भवादिति चेन्न, अग्निसत्त्वस्य सिद्धत्वात्, अयोगुडाङ्गारभस्मच्छन्नाग्निष्वपि धूममात्रायाः कस्यांश्चिद्दर्शनात्तदविनाभावात् तद्विपयलिङ्गालिङ्गत्वात्तदलिङ्गित्वात् प्रत्यक्षविषयत्वात् । 5

( अयोगुडेति ) अयोगुडाङ्गारादयो धूमासम्भवादिति चेत् स्यान्मत सर्वत्र लिङ्गिनि लिङ्ग नास्ति अयोऽग्नौ गुडाग्नौ अङ्गाराग्नौ च सत्यपि धूमस्य प्रत्यक्षत एवादर्शनादिष्टमेव न, अग्निसत्त्वस्य सिद्धत्वात्—न ह्यग्निरत्रेति प्रतिज्ञायामप्रतीतमग्निसामान्यं साध्यते, अग्निसत्तायाः प्रतीततरत्वात्, लोके प्रत्यक्षोपलब्धधूमवत्त्वेनात्रेति देशविशिष्टस्याप्रत्यक्षस्य सिषाधयिषितत्वात् अयोगुडांगारभस्मच्छन्नाग्निष्वपि धूम 10 मात्रायाः कस्यांश्चिद्दर्शनात्तदविनाभावात् तद्विपयलिङ्गालिङ्गत्वादिति—अयोगुडाङ्गारादिविषयस्य लिङ्गस्य धूमस्यालिङ्गत्वात्—अविवक्षितत्वात्प्रत्यक्षस्याप्रत्यक्षत्वात्, तदलिङ्गित्वात् प्रत्यक्षविषयत्वादिति—ते ह्ययोगुडाङ्गारादयो न लिङ्गिनो लिङ्गाभावात्तेषाम् तस्यामवस्थायां देशे च तस्मिन्नभिज्ञातत्वात्, लिङ्गत्वे च लिङ्गदर्शनबलेन लिङ्गि वस्तु न हि ते लिङ्गान्ते लिङ्गदर्शनात्, लिङ्गनिरपेक्षप्रसिद्धेश्च, यथा प्रत्यक्षोपलब्धिकाले तस्मात्तेषामलिङ्गित्वात् प्रत्यक्ष[विषय]त्वादिति, [न] लिङ्ग धूमस्तेषाम्, यत्र चासौ लिङ्गं तत्र लिङ्गिनि देशे 15 सिद्धत्वादेव लिङ्गम् देशासिद्धेरग्नि[म]त्त्वेन देशो लिङ्ग्यतेति ।

---

प्रदेशस्यैव लिङ्गित्वात् प्रदेशविशेषणोऽग्न्याख्योऽपेक्षपदेपात्तत्वेनामेयत्वात् सर्वलोकप्रसिद्धेऽग्निमति प्रदेशे साध्ये सर्वत्र धूमस्तत् लिङ्गमस्त्येवेति सर्वत्र लिङ्गिनि लिङ्गसम्भवोपरिपुष्टेति भावः । ननु यावन्तोऽग्निमत्प्रदेशास्ते सर्वे साध्यन्ते न च तत्र सर्वत्र लिङ्गसम्भव इत्याशङ्कते—न चेति । तथा च निखिलसाध्यकक्षे पक्षस्याभावात् पक्षातिरिक्तव्याप्तानन्वयसाधर्म्येण व्यतिरेकसाध्यप्रसक्तात् सर्वेणाप्यग्निमत्प्रदेशत्वस्यासाधारणत्वादिदोषाः प्रसज्येरन् इत्युत्तरयति—तत्र दृष्टान्ताभावादिति । ननु क्वचि- 10 दग्न्यादिलिङ्गिनि न लिङ्गसम्भवः तत्र धूमादेः प्रत्यक्षत एवादर्शनादिति शङ्कते—अयोगुडेति । स्यान्मतेति—स्यान्मतमिति । न ह्ययोऽग्न्यादयो लिङ्गिनः तथा प्रतीतत्वात् न ह्यग्निरत्रेति प्रतिज्ञायामप्रतीतमग्निसामान्यं साध्यते अतोऽप्रतीतत्वादेव न लिङ्गित्वम्, किन्तु देशविशिष्टोऽग्निरेव लिङ्गी देशविशिष्टत्वेनाग्नेरप्रत्यक्षत्वेन सिषाधयिषितत्वात्, सोऽपि तस्मिन् लिङ्गाधार एव प्रत्यक्षोपलब्धे प्रदेशविशेषे लिङ्ग एवैष लिङ्गिनोऽनुमानाभिव्यक्तेन समाधत्ते—अग्निसत्त्वस्येति । वस्तुतस्तु अयोऽग्न्यादिष्वपि ईषद्धूमो दृश्यत एव, तथापि नासौ लिङ्गत्वेन विवक्षितः प्रत्यक्षत्वात्, अत एव प्रत्यक्षपरोक्षभेदेन लिङ्गित्वलिङ्गत्वयोरप्यन्योन्यविभागमित्यभि- 25 प्रेत्याह—अयोगुडाङ्गारेति । तदुपसंहारमाह—तद्विपयेति अयोगुडाङ्गाराद्यग्न्यविनाभाविधूममात्रायाः दर्शनविषयत्वेऽपि । अयोऽग्न्यादेरलिङ्गित्वमाह—तदलिङ्गित्वादिति । कथं लिङ्गाभाव इत्याह—तस्यामवस्थायामिति धूममात्राऽनन्वयाद् देशविशेषे तस्मिन् प्रत्यक्षतयाऽभिज्ञातत्वादिति भावः । लिङ्गदर्शनबलेन गृह्यते वस्तु लिङ्ग्यते तदेव लिङ्गिरुच्यते न ह्ययोऽग्न्यादयः तत एव लिङ्गा लिङ्गदर्शनबलेन लिङ्ग्यन्ते तत्र लिङ्गदर्शनाभावादाह—लिङ्ग्यते चेति । प्रत्यक्षसिद्धावपि दृष्टान्तमाह—यथेति । एवञ्च प्रत्यक्षत्वादग्निरयोऽग्न्यादीनामलिङ्गित्वात्तेषां धूमो लिङ्गं न भवतीत्याह—तस्मात्तेषामिति । अग्निमति सिद्धे धूमो लिङ्गं भवति 30 अग्निमत्त्वेनासिद्धे देशे लिङ्गी भवतीत्याह—यत्र चासाविति । स्यान्मतम न लिङ्गिनोऽयोऽग्न्यादयस्तथा, यतः ते लिङ्गाः अप्रतीत

१ सि क्ष. वक्तव्यस्य । २ सि डा. वसव्यादिसविर्च इष्यते । ३ सि क्ष डा दे °वस्मितत्वात् ।
४ सि क्ष दे क्ष तत्प्रसिद्धे

स्वाम्यवमयोऽन्यादीनामप्यसिद्धत्वात् पक्षान्तर्गतत्वे सत्युच्यते न सर्वत्र लिङ्गिन्यभिमते इत्यत्रो

ब्रूम इत्येतदुक्तम्—

तदसिद्धौ पक्षधर्मत्वविनिर्मुक्तत्वाद्वनस्पतिचैतन्ये स्वापवत् स्यात्, देशविशेषानपेक्षाग्नि-
सामान्यसाध्यत्वेऽसाधारणत्वमत्रेत्यभिधानवैयर्थ्यञ्च, तस्मा भूरिति यत्रशब्दवाच्यस्याग्निविशि-
5 ष्टस्य धूमपक्षविसंवादे साधर्म्याभावाल्लिङ्गशब्दयोः कुतोऽनुमानत्वं शब्दस्य ? यदि लिङ्गवच्छब्दो-
ऽप्रत्यक्षणोऽन्यापोहेन स्वार्थं गमयतीति मन्यसे ततो वृक्षशब्दस्य व्यवच्छिन्नात् वृक्षादभिधे-
यादन्यत्र तुल्ये सपक्षे वृत्तिः स्यात्, अनुमानत्वात्, अन्वयदर्शनार्थप्रयुक्तघटादिवत्।

(तदसिद्धाविति) तदसिद्धौ पक्षधर्मत्वविनिर्मुक्तत्वात्–तेषामप्ययोऽन्यादीनां साध्यत्वे धूमः सर्वत्र
धर्मिण्यभावात् व्याप्तिपक्षधर्मासिद्धौ वनस्पतिचैतन्ये स्वापवत् स्यात्, देशविशेषानपेक्षाग्निसामान्यसाध्यत्वे
10 सपक्षाभावादसाधारणत्वम्, अत्रेत्यभिधानवैयर्थ्यञ्च स्यात्, तस्मा भूरिति यत्रशब्दवाच्यस्याग्निविशिष्टस्य
धूमपक्षविसंवादे साधर्म्याभावाल्लिङ्गशब्दयोः कुतोऽनुमानत्वं शब्दस्येति, तदुक्तम्—यदि लिङ्गवच्छब्द
इत्यादि, यदि कृतकत्वादिलिङ्गवच्छब्दोऽप्रत्यक्षणोऽन्यापोहेन स्वार्थं गमयतीति मन्यसे ततो वृक्षशब्दस्य
व्यवच्छिन्नवृक्षादभिधेयात् स्वार्थांशव्यावृत्तादन्यत्र तुल्ये सपक्षे वृत्तिः स्यात्—पक्षधर्मो वृक्षशब्दस्य
वृक्षशब्दाभिधाने ततो व्यवच्छिन्ने कृतकत्वानित्यत्वाश्रये घटे इव वृत्तिः स्यात्, अनुमानत्वात्,
15 अन्वयदर्शनार्थप्रयुक्तघटादिवदिति गदार्थम्।

ननु वृक्ष एव वृत्तिः स्यात् पक्षत्वाद्वृक्षाणाम्, अनुमानत्वादेव त्वदभिमताद्वृक्षाभिवृत्ति-
मात्रं वृक्षता, नान्यस्मिन्नपि साध्यधर्मसामान्येन समानार्थाभिमतितुल्यार्थान्तरे वृक्षशब्दस्य

यदा तु देशविशिष्टास्तेऽपि पक्षधर्मत्वनिर्दिष्टाः तदा च न धर्मामिमिति धूमो दृश्यत इत्यत्र उच्यते सर्वत्र लिङ्गिनि [illegible]
[illegible] स्वमतमिति। व्याख्ये–तदसिद्धाविति। व्याख्ये–तेषामपीति अयोऽग्न्यादीनामप्यसिद्धत्वेन साध्यत्वे
20 धूमोऽव्यापितस्वधर्मः स्यात्, यथा वनस्पतेः [illegible] स्वापो हेतुरिति भावः। [illegible]
[illegible] देशविशेषेति [illegible] साध्यान्तर्गतत्वेन [illegible]
[illegible] देशविशेषानपेक्षायाम् [illegible] इति भावः। [illegible]
[illegible] धूमः [illegible] देशविशेषानपेक्षत्वम्, एवम् [illegible]
[illegible] साधर्म्याभावात् [illegible] अनुमानं स्यात्, [illegible]
25 [illegible] तस्मा भूरिति। [illegible]
[illegible]
[illegible]
[illegible] यदि कृतकत्वादीति। [illegible]
[illegible] अन्वयेति [illegible]
30 [illegible]
[illegible] ननु वृक्ष एवेति।

25 तद्धर्मत्वाभावे तेषां धर्मत्वं नैव तस्य धर्मत्वमिति प्रदर्शयति–यथाऽस्ति प्रधानमिति, अन्यथाऽपि हि भेदाः धर्मेकार्थतया एकजातिसमन्विता दृश्यन्ते यथा घटादीनां मृदा समन्वयः, येन भेदानां समन्वयस्य सत्त्वं तदपि प्रधानस्याधीनमिति भावः । धर्मसाध्यत्वे हेतुमाह–धर्म्यसिद्धेरेवेति । विकल्पान्तरे तत्समन्वयानुपपत्तेः पारिशेष्यादिति धर्मेण धर्मी साध्य इत्यन्ययाऽसिद्धमिति भावः । साध्यसाधनयोर्धर्मभावे कथं धर्मित्वम् धर्मधर्मिभावस्य परस्परापेक्षत्वादित्याशयेन-नन्नु धर्मयोरपीति । नायं धर्मेकुक्त धर्मिणः साध्ये तत्प्रसिद्धधर्मोपाधितया धर्मिण एव साध्यत्वं प्रमाणप्रसिद्धधर्मो-
30 पाधया च तस्यैव साधनत्वमतो धर्मी, अथ धर्मोऽपि विरुध्यते–साध्यत्वाद्धर्मिणस्तथेति, धर्मेण साध्य-

---

१ सि क्ष. का. वे वैषम्यगाद । २ सि क्ष का वे धर्मिणोऽपि । ३ सि क्ष. का वे त्वया । ४ सि. क्ष. का. वे धर्मिणोऽन्यत्व० । ५ सि क्ष. का वे साध्यादयुक्त ।

यद्यथा—येन प्रकारेण तथा—अनेकधर्मणो वस्तुनः सिषाधयिषितधर्मविशिष्टस्य साध्यत्वात् तत्प्रसिद्धधर्मविशिष्टस्य साधनत्वात्, तथा चाह—'साध्यत्वापेक्षया चात्र धर्मधर्मिव्यवस्था, न गुणगुणित्वेनेत्यदोषः' (   ) इति, उपचारादेवैवमुच्यत इति चेत्—साम्प्रतं सत्य[म]परमार्थतो लिङ्गलिङ्गिभाव एकस्य वस्तुनः सिद्धसाध्यधर्मविशिष्टस्य, तथाप्युपचारकृताद्धर्मभेदात् भिन्नमिवाभिन्नमप्युच्यत इत्येतदायुक्तम्, यस्मादत्र यदर्थं मन्यसे मुख्यस्योपचार इत्यादि यावत् साध्यत्व[म]धर्मिणस्तथैवेति गतार्थं सम्भाव्यमानम्, तस्मात् सिद्धमग्निमद्धूमवद्धर्मविशिष्टस्यैव देशस्य लिङ्गत्वं लिङ्गित्वञ्च ।

तदुपसंहृत्य त्वां प्रति पक्षसिद्धं वस्तुतमग्निमद्देशलिङ्गत्वं तत्साधयामः, तद्यथा—

एवन्त्वग्निमद्देशस्य लिङ्गत्वम्, धूमवत्त्वसाधकलिङ्गानन्यत्वात् धूमवत्त्वस्यात्मवदेव, ननु नाग्निमत्त्वस्य लिङ्गत्वम्, व्यभिचारात् प्रमेयत्ववदिति, न, धूमवत्त्वस्यानुमानमूलप्रत्यक्षस्य त्वस्याविच्छिन्नमूलस्याविरूपेण धूमत्वनिश्चयकरणेन लिङ्गत्वस्य नियतत्वात्तत्र लिङ्गित्वोपमर्दस्यावतार एव नास्ति, प्रत्यक्षत्वात्, तथाऽग्नेरपि प्रत्यक्षत्वे धूमस्य लिङ्गिनो लिङ्गित्वमव्यभिचारित्वोपपादनेन, यदि त्वग्निमत्त्वं प्रमेयत्ववद्धूमं व्यभिचरेत् ततो धूमस्य धूमत्वमेव सन्दिह्येत कुतोऽलिङ्गत्वम्?, अव्यभिचारित्वेनैव तु धूमत्वसिद्धेः स्यात् पक्षधर्मत्वाल्लिङ्गत्वं तथाऽग्नेरपि धूमसिद्धौ लिङ्गत्वम् ।

(एवन्त्विति) एवन्त्वग्निमद्देशस्य लिङ्गत्वमिति प्रतिज्ञा, हेतुः—धूमवत्त्वसाधकलिङ्गानन्यत्वादिति, दृष्टान्तः—धूमवत्त्वस्यात्मवदेव, यथा धूमवत्त्वस्यात्मा देशस्तदनन्यत्वाल्लिङ्गम्, तथाऽग्निमत्त्वस्यात्मा तदनन्यदेशस्य लिङ्गमेव, तदनन्यत्वञ्च प्रतिपादितमेवेति अत्राह—नाग्निमत्त्वस्य लिङ्गत्वं व्यभिचारित्वात्,

---

साधनमसावपि तदन्यथाऽनुपपत्त्या धर्म्यपि साध्यं भवतीत्यर्थः । तद्व्याचष्टे—अनेकधर्मणेति । धर्मः साध्यत्वेन तत्रोऽप्यसावपि साध्यसाधनयोर्धर्मधर्मिभावो न तु विशेषणविशेष्यभावस्तथा गुणगुणिभाव इत्यर्थः, तस्यैवं साध्यत्वापेक्षया चेति । स एव प्रदेशः साध्यः स एव च प्रदेशः साधनमित्येवमेव प्रदेशस्य साध्यसाधनभावे लिङ्गलिङ्गिभावो ऽपचारत एव स्यात् परमार्थतः धर्मभेदाद्धर्मिभेदस्याभ्युपगमात्, न तु वस्तुतो धर्मी भिन्न इत्याशङ्कायामाह—उपचारादिति न्यायो—साम्प्रतमिति । यत्र भिन्ने तत्त्वं प्रत्यक्षेण नैतुमिच्छति धर्मी तत्राम इत्याशङ्कयोपरमति यस्मादत्रेति, मुख्योपलम्भते । उपसंहरति—तस्मादिति । दर्शितमेवमेव साध्यसाधनत्वसमर्थनमुपसंहृत्य साधनमुक्तमग्निमद्देशस्य लिङ्गत्वं साधयतीति दर्शयति—तदुपसंहृत्येति । वस्तुतस्तस्य साध्यत्वमर्थमात्रे न धर्मिण्युक्तेऽप्येकत्वात् साध्यत्वमुपपद्यते । नहु मानप्रयोगमाह—एवन्त्विति । प्रतिज्ञाहेतुदृष्टान्तान् दर्शयति—एवन्त्वग्निमदिति अग्निमद्देशे धर्मी लिङ्गत्वं साध्यधर्मः धूमवत्त्वसाधकं देशरूपं लिङ्गं तदनन्यत्वादिति हेतुः धूमवत्त्वस्यात्मा दृष्टान्तः । दृष्टान्ते साध्यसाधने घटयति—यथेति धूमवत्त्वस्य हि धूमवत्त्वसाधको यो धूमवद्देशस्तदनन्यत्वात्तल्लिङ्गम् धूमवत्त्वे हि लिङ्गत्वे धूमवत्त्वस्यात्माऽपि लिङ्गमेव धूमवद्धूमवत्त्वयोरभिन्नत्वात्, तथैवाग्निमत्त्वस्यात्मापि धूमवत्त्वसाधकलिङ्गधूमवद्देशानन्यत्वाल्लिङ्गमिति अग्निमत्त्वस्वरूपमग्निमद्देशस्य लिङ्गत्वं सिध्यतीति भावः । अग्निमद्देशस्य धूमवत्त्वसाधकलिङ्गधूमवद्देशानन्यत्वमसिद्धमित्यत्राह—तदनन्यत्वञ्चेति एवमेव देशस्य प्रतिज्ञातप्रतिपादितत्वात् साधनत्वमसिद्धधर्मतयेत्यर्थः न साध्यधर्मेणुपपादितमेवेति भाव । धूमवत्त्वसाधकलिङ्गानन्यत्वात् अग्निमद्देशस्य लिङ्गत्वं न घटते, अतोऽव्यभिचारात्ग्निमद्देशस्य धूमवत्त्वमात्रेण तदिष्टसिद्धौ ज्ञाता चाग्निमत्त्वे, विनाभावात् प्रमेयत्ववत्, यदि प्रमेयत्वं निश्चयतो धूमवत्त्वादि विपक्षव्यावृत्त्यभावाद्व्यभिचारित्वात्, एवमग्निमत्त्वमपि धूमवत्त्वव्यभिचारि न लिङ्गम् धूमवत्त्वन्तु लिङ्गमग्निमत्त्वव्यभिचारित्वादिति शङ्कते—नाग्निमत्त्वस्येति । समाधत्ते—नेति । अग्निमत्त्वस्य धूमवत्त्वाव्यभिचारित्वादपि

१××४ ।

व्यभिचरति ह्यग्नित्वं, प्रमेयस्य धूमवत्त्वादृतेऽपि[1] देशान्तरे कालान्तरे वा अयोगुडाङ्गारादिषु दृष्टत्वात्, किमिव? प्रमेयत्ववत्—यथा नित्यः शब्दः प्रमेयत्वादाकाशवदित्युक्ते प्रमेयत्वं घटादावनित्ये विनापि नित्यत्वेन दृष्टम् तथाऽग्नित्वं धूमवत्त्वेनेति व्यभिचारित्वादग्नित्वस्यासाधकत्वम्, धूमवत्त्वस्य तु सदप्यग्नित्वेन विनाऽदृष्टत्वादिति चेत् मतम्, न धूमवत्तुल्यत्वानुमानेऽस्यापि—धूमस्य हि वस्तुत्वे आत्मधर्मेणैव अनुमानसूत्रेण-
5 अन्यथानुपपत्त्येन लिङ्गत्वं नियतम् पाण्डुत्वबहलत्वाविच्छिन्नमूलत्वादिरूपेण धूमत्वनियमकरणे तत्र लिङ्गित्वदोषप्रसङ्गभावस्य एव नास्ति प्रत्यक्षत्वात्, सिद्धत्वादेव लिङ्गत्वात्, तथाऽग्नेरपि प्रत्यक्षे धूमस्य लिङ्गिनो लिङ्गित्वमव्यभिचारित्वोपपादनेनेत्यादि—यदि त्वग्नित्वं प्रमेयत्ववद्धूमं व्यभिचरेत् ततो धूमस्य धूमत्वमेव सन्दिग्धमेव तथापि नीहारादिभावेन अपक्वमूलादित्वात्, तस्मात् सन्दिग्धासिद्धो हेतुः स्याद्धूमः कथोऽस्य लिङ्गत्वम्?[3] अन्यथानुपपत्त्यैव तु पक्वमूलत्वादिरूपेण धूमत्वसिद्धेः स्यात् पक्ष-
10 धर्मत्वाल्लिङ्गत्वम् तथा।

इतर आह—

अथात्र किं प्रतिपत्तव्यं धूमलिङ्गादग्निप्रतिपत्तिवदग्नेरपि धूमप्रतिपत्तिः स्यादिति? अथ किं विषयः सम्प्रधारः? दर्शितन्यायदेशसाम्यतया हेतोः, तस्मात्तुल्यमेव लिङ्गस्य लिङ्गिनो वा लिङ्गित्वम्, धूमस्य लिङ्गित्वापत्तौ तु प्रमेयत्ववदग्नित्वस्याव्यभिचाराल्लिङ्गत्वाभास एव, धूमसंयो-
15 गित्वमेवाग्नेर्गमकं दृष्टम्, यत्र यत्र धूमः तत्र तत्राग्निरिति, तस्मादग्नेरन्यथा संयोगित्वम्, अन्यथा धूमस्य, न हि सर्वत्राग्नौ धूमो दृष्टः, मा भूदेष दोष इति देशसाम्यतेप्यते तस्मात् सिद्धसाधनन्यायविरोधदोष इति।

(अथात्रेति) अथात्र किं प्रतिपत्तव्यं धूमलिङ्गादग्निप्रतिपत्तिवदग्नेरपि धूमप्रतिपत्तिः स्यात्? वस्तुनो लिङ्गलिङ्गित्वाविशेषाप्रतिपत्तौ तु दृष्टोऽविशेष इत्यभिप्रायः, आचार्योऽप्यविशेषमापादयितुमनाः

---

20 धूमस्य पाण्डुत्वबहलत्वाविच्छिन्नमूलत्वादिविशिष्टस्य धूमस्य [illegible] तेनैव रूपेण तयोरन्यथानुपपत्त्यैव रूपेण [illegible] [illegible] पर्वतनितम्बे [illegible] न [illegible] एवं [illegible] धर्मेऽनुमानादि [illegible] हेतुः धर्मे [illegible], धर्मेण तदव्यभिचारित्वात्, तस्मात् पाण्डुत्वादिधर्म- युक्तस्यैव धूमस्याग्निनाऽऽगमनात् [illegible] धूमे [illegible] लिङ्गित्वम् [illegible] न तस्य लिङ्गत्वमेवेति भावः। [illegible] धूमस्य [illegible] न हि [illegible]
25 [illegible] इत्याह—तथाऽग्नेरपीति। अव्यभिचारित्वमुपपादयति—यदि त्विति, [illegible] धूम [illegible] प्रमेयत्ववद् [illegible] धूमत्वे [illegible] स्यात्, किं धूमोऽयं नीहारो वेति [illegible] तथापि, तस्माद्धूमः [illegible] सन्दिग्धासिद्धः स्यादिति भावः। पक्वमूलत्वादिविशिष्टधूमस्य [illegible] धूमत्वसिद्धेः पक्षधर्मतया [illegible] अन्यथानुपपत्त्यैवेति। एवमग्नेरपि धूमानुमानप्रसङ्गमाह—तथेति। धूमाग्न्योर्लिङ्गलिङ्गित्वाविशेषात् परस्परेण [illegible] किं [illegible]—अथात्रेति। [illegible] भाष्ये

---

१ का. देशान्तरम्य। २ सि डे. ॰आत्मैवानुमान। ३ सि [illegible] डे. सन्दिग्धासिद्धये। ४ ×× सि.। ५ सि [illegible] डे. ॰लिङ्गित्वादि।

तमेव साधयितुमाह—अथ किं विषयः सम्भवार इति, इतर आह—धर्मित्वव्यापकवैयसाध्यत[ा]या हेतोः—धर्मितो- ऽयं व्यायो वेश एवाग्निमत्त्वेन साध्यः साधन धूमवत्त्वेनेति, तस्मात्पुरुषमेव लिङ्गस्य लिङ्गिनो वा लिङ्गित्व न विरुध्यत एवत्, किन्तु धूमस्य लिङ्गित्वापत्तौ स्थितापि, तत्रापि संयोगित्वाविशेषे धूमसंयोगित्वमेवाग्नेर्गमकं दृष्टम्, यत्र यत्र धूमस्तत्र तत्राग्निरिति, धूमवत्त्वस्य लिङ्गित्वे प्रमेयत्ववदग्निमत्त्व[स्य]व्यभिचारात् लिङ्गत्वाभाव एव, तस्मादग्नेरन्यथासंयोगित्व, अन्यथा धूम[स्य]स्यात्, न हि सर्वत्रैतानि, यत्र यत्राग्निस्तत्र तत्र धूम इत्यै 5 तत्स्यमनुमानम्, अनुगमाभावात्, सर्वत्राग्नौ धूमाभावात्, मा भूदेव दोष इति वैयसाध्यतेष्यते तस्मात्र वैयसाध्यतायामपि सिद्धसाधनन्यायविरोधदोषः, धूमादग्निरिति व्याप्तः सिद्धत्वात् 'साध्यत्वेनेप्सितः पक्षः' इति लक्षणानवतारः प्रकाशितप्रकाशनवैयर्थ्यमिति ।

अथ धूमः—

अग्निसाधनवदेव हि धूमसाधने व्यभिचारः धूमो ह्यग्निं विना वासगृहेऽपनीताग्निके 10 दृष्टः, अरणिनिर्मन्थने वा भूताग्निके, सम्भाव्यतेतु धूमदर्शनादग्निरेवेति, अग्निदर्शनाद्वा धूमोऽग्नेरिति, अग्ने रन्धनगृहधूमवत्, वैधर्म्येण निरग्निवत्, धूमोऽग्नेरन्यत्र न सम्भवति, सम्भवार्थत्वेनेतरवत्, शक्यत एव प्रतीतिरपि तथा, अथ व्याप्तिशक्तिरपि भवं कल्पितेन ।

अग्निसाधनवदेव हीत्यादि, अग्निधूमयोरविशिष्टगम्यगमकभावापादनमन्यो ग्रन्थार्थः, वासगृहे ऽपनीताग्निके विना दृष्टः, अरणिनिर्मन्थने वा भूताग्निके, तस्मात्तुल्यो व्यभिचारः, कथमनुमानसम्भवः ? 15

---

कथाय किमिति । अत्र किं विषया ते सम्भवारमेवाशाभः पृच्छति—अथेति । तत्र स आह—धर्मित्वव्यापकेति धर्मिव्या- प्तिरग्निमत्त्वकेशसाध्यतामुपगम्याग्निमत्त्वस्य लिङ्गत्वमवसायमानेतोऽभिहितं । एवं तर्हि पुरुषमेवाग्निमेवाग्निस्य लिङ्गिनो वा लिङ्गित्वं को विरोधोऽत्र वाक्येनैवाह—तस्मात्पुरुषमेवेति । तदनन्तरविशिष्टं प्रत्याय्य अनुपपत्तिमाशङ्कते तर्हीति— धूमस्य लिङ्गित्वापत्तौ स्थितेति केवलं धूमत्वेन धूमस्य लिङ्गित्वापत्ती तु संयोगत्वाद्व्याप्यव्यापकभावेन प्रमेयत्ववदग्निमत्त्वं व्यभिचारि भवेत्, अतो न तस्य लिङ्गत्वम्, किन्तु धूमसंयोगित्वमेव गमकं संयोगित्वस्याविशिष्टत्वेऽपि एतत् धूमसंयोगित्वं 20 लिङ्गत्वेन कल्प्यम्, तत्र संयोगित्वमात्रस्याव्यत्व धूमे चान्यत्र, अतः यत्र यत्र धूमः तत्र तत्राग्निरित्यनुमानमन्यथा धूमसंयोगित्वे एव व्याप्तत्वस्य सम्भवात्, यत्र यत्र चाग्निस्तत्र तत्र धूम इत्यनुमानाभावात्, नाग्निमत्त्वं लिङ्गम्, अग्निसंयोगित्वस्य लिङ्गत्वमपीति भावः । संयोगित्वाविशेषेऽपि धूमत्वं न लिङ्गमित्याह—धूमवत्त्वस्येति । संयोगित्वमुभयत्र लिङ्गमिति शङ्कते—तस्मादग्ने- रिति । अग्निसंयोगित्वं न लिङ्गमित्याह—यत्र यत्रेति । अग्नावग्निलिङ्गत्वापत्तिरोपचारेणाव वैयसाध्यत्वेऽनुपपद्यमाने तु धर्मे लिङ्गत्वेन धूमादग्निरिति भावे सिद्धसाधनतामत्र्याह साध्यत्वेनेप्सितः पक्ष इति न्यायागमव्युत्पत्तिप्रतिज्ञायाः भावत्वेति पक्षस्य साध्यत्वे- नेप्सितपक्षदोषप्रसङ्गाभावात्माह—मा भूदेव इति । पक्षलक्षणमाह—साध्यत्वेनेति साध्यत्वप्रकारेणेप्सितो ज्ञातो वा स पक्ष 25 इत्यर्थं धर्मेण सिद्धस्य पुनरग्निमत्त्वप्रकाशनेऽग्निमत्त्वे पक्षस्य लिङ्गस्यापि प्रकाशितस्य पुनः प्रकाशनस्यैव वैयर्थ्यमेव स्यादिति भावः । चतुर्थ धूमवत्त्वस्य लिङ्गित्वे प्रमेयत्ववदग्निमत्त्वव्यभिचारादिलिङ्गत्वाभाव सोऽयं व्यभिचारो धूमस्य लिङ्गत्वेऽपि तुल्य एव इत्यालयेनाचार्य उत्तरयति—अग्निसाधनवदेव हीति, वासगृहेऽपनीतेऽपि धूमो दृष्टः अरणिनिर्मन्थने भूतेऽग्नौ धूमो दृष्ट इति यत्र यत्र धूमस्तत्र तत्राग्निरित्यनुमानाभावात् धूमस्यापि व्यभिचारित्वमवैशिष्ट्येन व्याचष्टे—अग्निधूमयोरिति । एवं 30 व्यभिचारसमत्वेऽपि धूमसंयोगित्वस्याग्निगमकत्वमिष्यते तर्ह्यविशेषादग्निसंयोगित्वस्यापि धूमगमकत्वं स्यात्, तथा च 'संयोग्यादिषु

---

१ सि. क. ख. दे. तस्मात्तु । २ सि. ख. ग. दे. धूमत्वमपि । ३ सि. क. ख. दे. इत्यादिकमनु ।

सम्भाव्यते तु धूमदर्शनादग्निरत्रेति, अग्निदर्शनाद्वा धूमोऽत्रेति, वस्तुनः प्रमाणान्तर[ व ]र्त्ते देशेऽग्नि एव धूमो बहुसूक्ष्मत्वादिभिः, धूमाद्वाऽग्निरिति, तत्र दृष्टान्तः—अग्नेः रन्धनगृहधूमवदिति—रन्धितपचनकर पार्थोपहसाग्निस्वरूपकारके रन्धनगृहे धूमः सम्भवतीति, वैधर्म्येण यत्र धूमासम्भवस्तत्राग्नेरप्यसम्भवो निर्देष्टव्य इति, धूमोऽग्नेरन्यत्र न सम्भवतीति अन्वयस्यार्थः सम्भवार्थत्वेन इतरवदिति, धूमवत्, यथा धूमोऽग्नौ

5 सम्भवति स कदाचित् क्वचित्, तथाऽग्निर्धूमे सम्भवतीत्यन्वयार्थः, शक्यत एव प्रतीतिरपि तथा, अत एवाग्निरत्र[ त ]स्तीति, अनग्निव्यावृत्तिविवेकेनेति ।

वस्तुतः प्रतिपत्तिरत्र प्रतिपादितमपि किमर्थं न प्रतिपद्यसे ? अवयवनिरूपणेनापि प्रतिपादयिष्यामः—अग्निरत्रेत्यस्यां प्रतिज्ञायां अग्निरेवात्रेति नावधार्यते, तत्र पृथिवीत्वादि सद्भावात् देशस्यैव वा भावात्, तथा च तयोरग्निधूमयोरप्यभावापत्तेः, नाप्यग्निरत्रैवेति,

10 तत्प्रदेशव्यतिरिक्तेषु प्रदेशेष्वप्यस्य भावात् यत्र यत्र धूमस्तत्र तत्राग्निरिति न शक्यते वक्तुम्, नाप्यग्निरत्र भवत्येवेति, भवतिप्रयोगव्यवहारेण हि भवत्यपि कदाचित्, तत्र कादाचि त्काग्निव्युदासो निरर्थकः सततमग्निधूमयोरभावात्, तस्माद्विवक्षिते देशे काले च भवत्यग्निरिति प्रतिज्ञार्थः, अव्युत्पत्तिविप्यनवधृतेः, रक्तमिदं करवीरपुष्पमित्यादिप्रतिज्ञावत् ।

( वस्तुत इति ) वस्तुतः प्रतिपत्तिरत्र प्रतिपादितमप्यस्माभिर्न प्रतिपद्यसे किञ्चित्किंचित्वाभिप्रेतं

15 किमर्थम् ? यद्यपि न प्रतिपद्यसे तथाप्यत उत्तरमवयवनिरूपणेनापि प्रतिपादयिष्यामः, अग्निरत्रेत्यस्यां प्रतिज्ञायामित्यादि, अग्निरेवात्रेति नावधार्यते यावत्, तत्र पृथिवीत्वादिसद्भावात् तदग्रदेशेऽग्नेरेव दुर्लभत्वात्

---

[illegible] प्रतिपत्तौ न [illegible] । न वै हेतुः [illegible] व्यभिचारस्य सम्भवात् [illegible] । तर्हि [illegible] सम्भाव्यते [illegible]सम्भाव्यत इति [illegible] धूमदर्शनादग्निसम्भावना क्रियते [illegible] धूमादिति अग्निदर्शनाद्वा धूमः सम्भाव्यते [illegible] धूमोऽस्मात्[illegible] स च धूमो बहुसूक्ष्मत्वादि[illegible] सम्भावयन्ति [illegible] प्रमाणैरत्र देशे [illegible]

20 [illegible] भाव । अग्निदर्शनाद्वा धूमोऽत्रेति सम्भावनायामग्निधूमौ [illegible]—[illegible]रिति । धूमसम्भावनायां [illegible] धूमात् अग्नेरिति । [illegible] दृष्टान्ते [illegible] [illegible] सम्भवति [illegible] । [illegible] धूमसम्भवे [illegible] अग्निसम्भवोऽपि [illegible] वैधर्म्यनिर्देशमाह वैधर्म्येणेति । अत [illegible] धूमोऽग्नेरिति अग्निरहिते देशे धूमस्य सम्भवना [illegible] [illegible] इति भाव इतरवदिति [illegible] [illegible] धूमः सम्भवतीति [illegible]

25 [illegible] [illegible] धूमे [illegible] भवतीति भाव. । एवं सम्भावनामात्रमिदं प्रतीतिरपि [illegible] [illegible]—शक्यत एवेति प्रतीतिरपि धूमेनाग्निसम्भावनया [illegible] धूमसम्भावनया वा [illegible] । [illegible] न [illegible]—अत एवाग्निरत्रेति । [illegible] [illegible] यदि [illegible] प्रतिपादयिष्यामि [illegible] वस्तुत इति । [illegible] प्रतिज्ञा[illegible]

30 [illegible] वस्तुतः प्रतिपत्तिरत्रेति [illegible] प्रतिज्ञावयवेन [illegible] । [illegible] हि अग्निरत्रेति [illegible] अग्निरेवात्रेति अग्निरत्रैवेति अग्निरत्र भवत्येवेति वा तत्र न [illegible]—अग्निरेवात्रेति । [illegible], [illegible]

1 नि [illegible] स्वरूप[illegible] ।

देशस्यैव चाऽभावात्, सर्वो च तयोरग्निधूमयोरप्यभावापत्तेः, नाप्यग्निरेवेत्यवधार्यते, तत्प्रदेशाश्रितोऽन्ये-षाममीनामनग्नित्वाभ्युपगमे प्रत्यक्षाग्निप्रसिद्धिविरुद्धार्थत्वात् प्रतिज्ञादोषात्, तत्प्रदेशमप्यतिरिच्य प्रदेशेऽप्य-प्यभावात् यत्र यत्र धूमस्तत्र तत्राग्निरिति दृष्टान्तो न घटयो धातुमत्वत्वाग्निरास, नाप्यग्निरत्र भवत्येवेत्य-वधार्यते, मैवंविप्रयोगप्रत्ययव्यवहारेण[हि] न भवत्यपि कदाचिदिति किं कारणं ? सदाऽग्निधूमाभावात्, तत्र-तस्मिन् देशे कादाचित्काग्निधूमशब्दो निरर्थकः, सततमग्निधूमयोरभावात्, तस्माद्विवक्षिते देशे तस्मिं 5 तस्मिन् काले भवत्यग्निरिति प्रतिज्ञार्थः, कस्मात् ? अभ्युपगतविविक्तधर्मवृत्तेः-विधिनैवाभ्युपगतत्वा[न]व-धारणमनोक्तत्वात्, रक्तमिदं करवीरपुष्पमित्यभ्युपगमरक्तत्वविशेषणपुरुषायैव तन्निरूपणाया रक्तमेव श्वेतमेवेत्यवधारणानपेक्षा प्रतिज्ञा ।

धूमश्च पक्षधर्मोऽनुषङ्गरूप एवाग्निना भवति, किमर्थम्, अग्निसहचरितत्वाग्निनिमित्तत्व-ख्यापनार्थम्, इह कश्चित् सहचरिभावो यथा रूपस्पर्शयोः, कश्चित् निमित्तनैमित्तिकभावो 10 यथा दण्डघटयोः, इह तु द्वयमप्येव लिङ्गम्, तत्राविनाभावी सहचरिभावः सहचरो यस्मिन् विद्यत इति सहचरी धूमस्याग्निः, इनिः सप्तम्यर्थे, अस्य त्रिविधोऽर्थः अस्मिन् विद्यत एव, न न विद्यत एव, न च न विद्यतेऽपि कदाचिदिति, तस्मिन् हि किल सति विद्यत एवाग्निः, न

---

अवधारणेऽपरस्याऽप्रतीत्या तत्र च पृथिवीत्वादीनामपरेषां धर्माणां प्रसङ्गे सङ्करात् पृथिवीत्वादीना तदभावे धर्मिण्यभावः स्यात् तस्य पृथिवीत्वादिसामान्यविशेषाद्यभावात् पृथिवीत्वादीनां तदभावे देशोऽपि नैव भवेत् तस्य पृथिव्याद्यात्मकत्वा- 15 दित्यग्निरोचनाऽऽवधारणाय तथावधारणं युक्तम् इति भावः । द्वितीयावधारणस्यासम्भवमाह-नाप्यग्निरेवेतीति अनेन हि अग्नेः स्थानान्तरवर्तिता व्यवच्छिद्यते तथा च स्थानान्तरीयाणामग्नीनामनग्नित्वं प्रसज्यते तत्र पूर्वोक्तामिभावात् इत्यतो तत्र प्रतिज्ञा प्रत्यक्षादिप्रसिद्धिविरोधापत्तिः भवेत्, प्रत्यक्षादिभिरन्यत्र प्रसिद्धस्याग्नेरत्राभावप्रसङ्गादिति भावः । दोषान्तरमप्याह-तत्प्रदेशेति । धर्मिदेशातिरिक्तदेशवर्तिनो भेदान्तरत्वेः साध्यसाधनयोर्व्याप्तिग्रहणाभावात् यत्र यत्र धूमस्तत्राग्निः यथा महानसमितीति दृष्टान्तो न घटते इत्येवमवधारणं चासिद्धि भावः । तृतीयावधारणनिराकरणाय-नाप्यग्निरत्र भवत्येवेतीति अनेन 20 हि प्रयोगेण सदाग्नेरस्यात्मनो व्यवच्छिद्यते एवमाग्निरत्रैवेत्येवमुच्यते भवतीत्यस्य परित्यागेन ततश्च कालत्रयव्यापित्वमग्नेः प्रतीयते नहि सर्वदा भवेऽप्यग्निमान् धूमवान् किन्तु कदाचित् अतोऽस्मात् अवधारणेन च कादाचित्काग्निधूमयोः व्यवच्छेदो निरर्थको भवेत्, तस्मादिदमप्यवधारणं न युक्तमिति भावः । एवं देशकालापेक्षयैव साध्यस्य प्रतिज्ञावचनमित्याशयेनाह-तस्माद्विवक्षित इति यच्च परैरपि 'तस्मिन् देशे धूमोपलम्भादग्निसाधनं धूमवत्त्वा । तुल्यमाहात्म्य देशस्य वर्जितं न विरुध्यते ॥' इति । सर्वस्मिन् वाक्ये-ऽवधारणमिति न युज्यामहे, अभ्युपगतरक्तत्वविशेषणत्वादिविशेषणाय पुरुषाय तदुपदर्शनार्थं रक्तमिदं करवीरपुष्पमित्यत्रापि नावधारणस्य 25 रक्तमेव श्वेतमेवेत्यभिमतस्य विरोधे प्रसङ्गः येन रक्तमेवासावेवो गम्यते इत्यनुयुक्ता तदादिप्रकृतौ तदवधारणावधारणं निश्चितं अवधारणस्य वा पुनर्विधाने नियमो युक्तः अतिरक्तोऽसि न वाक्यं वाक्येऽर्थसम्भवम् अभ्युपगतं प्रति योजनाय निश्चितमतो-ऽवधारणं विधानमत उक्तमिति समाधत्ते-अभ्युपगतेति नाति अभ्युपगतिर्नैव योऽभ्युपगतिकरणे विशेषणमितीर्णोऽसि यस्मिन् तदभ्यु-पगतिविध्यनवधारितं तस्मादिति विधि अभ्युपगतं पुरुषं प्रति अनवधारणपूर्वकमेव विधानं वाक्यमित्यर्थः भावः । तत्र दृष्टान्तमाह-रक्तमिदमिति । प्रतिज्ञामुक्त्वा हेतुमाह-धूमश्चेति । अविनाभावत एव धूमः पक्षधर्मो भवतीत्यत्र 30

---

१ सि क्ष भा वे तदात्व तयोरपि । २ सि क्ष भा. वे चतामिति । ३ सि क्ष भा. वे तत्प्रत्ययम इति ।
४ × × क्ष गतो इत एतत्स्य चरण ५६९ पृष्ठे × निर्दिष्टं [illegible] ।

न विपक्षे चास्त्यादिवत्, न च न विपक्षेऽपि धूमसहचरासोऽग्निधूमवत्, न वा सपक्षसहचरं न विपक्ष एव, कृतकमिव नित्य इत्येवमसिद्धविरुद्धानैकान्तिकव्युदासः ।

( धूमश्चेति ) धूमश्च पक्षधर्मोऽनुमेयस्य पत्ताग्निना भवति, किमर्थम् ? अग्निसहचरितत्वाग्नि- निमित्तत्वप्रापणार्थम्, तद्व्याख्या—इह क्वचिदिति, रूपस्कन्धेयोः सहचारि[भावः] इत्यादि निमित्तं
5 यद्यदिनैमित्तिक इति निमित्तनैमित्तिकभावः तावेतौ सहचारिनिमित्तिनैमित्तिकभावावभवो, तदेव हि यत्, इह तु प्रत्ययपरमेव सिद्धम्, तत्राविनाभावीत्यादि, सहचरिभाव तावत्तौ निरूपयामः, सोऽविनाभाव एव, तद्व्याख्या निरूपणार्थो सहचर इत्यादि सहचरो यस्मिन् विपक्ष इति सहचरी धूमसामान्यमिति, इमिप्रत्ययः सहम्यर्थे अस्य त्रिविधोऽर्थः, यस्मिन् विपक्ष एव अग्निर्धूमे, अग्नि एव चावमिति पक्षधर्मावधारणम्, न न विपक्ष एवेति सपक्षानुगतो विपक्ष एव सन्निति [च] विरुद्ध[ा]साधारणानैकान्ति[कयो]र्वा मा
10 भूदिति न च न विपक्षेऽपि क्वचित् सहचरी धूम इति साधारणानैकान्तिकत्वश्च मा भूदिति चे, तद्व्या- चष्टे—यस्मिन् हि विद्व सतीति, पक्षाग्निमतश्च धूमे लिङ्गिन्यभिलिङ्गस्य व्युदासार्थम्, तदुपादानमि- सति विपक्ष एवाग्निर्न न विपक्षे वाताग्निवदसिद्धव्युदासेन, न च न विपक्षेऽपि धूमसहचर[ऽ]योऽग्नि धूमवदिति साधारणानैकान्तिकव्युदासेन, न चाऽसपक्षसहचर न विपक्ष एव कृतकमिव नित्य इति विरुद्धासाधारणानैकान्तिकव्युदासेन एवमसिद्धाद्युक्तोपसंहारो गमार्थः ।

15 कारणमात्र भवतीति [illegible] धूमोऽग्निना सहचरित एव [illegible] एवेति [illegible] एतुर्मिति भावः । [illegible] एव हेतुः [illegible] इह क्वचिदिति [illegible] सहचरिभाव एव न निमित्तनैमित्तिकभाव । [illegible] निमित्तनैमित्तिकभाव एव न सहचरिभावः [illegible] सहचरिभाव एवाविनाभावः, निमित्तनैमित्तिकभाव एव [illegible]
20 [illegible] एव धूमः पक्षधर्मो भवतीति भावः । अत्र सहचरिभावस्याविनाभावं निरूपयति—तत्राविनाभावीति । सहचरि- [illegible]—सहचर इति । धूमेन [illegible] सहचरोऽग्नि [illegible] सहचरी 'अत इनिः' इति [illegible] । [illegible] त्रिविधोऽर्थो भवतीत्याह—अस्य त्रिविधोऽर्थ इति [illegible] धूमे हि सति [illegible] एवाग्निः [illegible] एव भाव इति [illegible], तेन [illegible] । द्वितीयमर्थमाह—न न विपक्ष एवेतीति [illegible]
25 [illegible] हि सति [illegible] न विपक्ष एव [illegible] हेतुरित्यत्र [illegible] [illegible] न विपक्ष एव [illegible], अत एवासौ हेत्वाभास- [illegible] न विपक्ष एवेति न [illegible]—[illegible] न धर्मस्य विपक्षे हेतुत्व [illegible] भाव । तृतीयमर्थमाह—न च न विपक्षेऽपि क्वचिदिति सति धूमे [illegible] न विपक्षेऽपि क्वचित्, [illegible] विपक्षे न विपक्षेऽपि क्वचिदिति न [illegible] धूमो न विपक्षेऽपि
30 [illegible] साधारणानैकान्तिक [illegible] भवतीति भाव । [illegible]—यस्मिन् हि [illegible], धूमे हि सत्यग्निः विपक्ष एव न न विपक्षे एव न च न विपक्षेऽपि क्वचिदिति भाव । [illegible] पक्षाग्निमतस्येति । [illegible]—सति विपक्ष एवेति । असपक्षसहचर इति [illegible]

१ लि. [illegible] । २ लि. [illegible] ।

नन्वेवं सहचरिभावादनुमानसिद्धौ किमर्थं निमित्तनैमित्तिकभावोपादानम् ? एकतरमेवास्त्विति, एतच्च न, अग्निव्यभिचारित्वाद्धूमस्यापि, यदिह स सदा　　　सत्यपि सहचरिभावे निमित्तभूतमग्निमन्तरेण विशिष्टधूमस्यैवाभावः, पाण्डुद्रुमगतिमहत्त्वोत्सङ्गैकदेश चलमूलपुनःपुनरुत्पादिधूमस्याग्निमन्तरेणाभावान्निमित्तनैमित्तिकभाव एषितव्यः ।

नन्वेवमित्यादि, एव तदसिद्धविरुद्धानैकान्तिकव्युदासेन सहचरिभावा[द]नुमानसिद्धौ सत्यां 5
किमर्थमनयोर्निमित्तनैमित्तिकभावोपादानम्, तस्मादेकतरमेवास्त्विति, एतच्च न, अग्निव्यभिचारि-
त्वाद्धूमस्यापि—येनाऽग्निं धूमं व्यभिचरति, अ[यो]गोलकादावभावात् तथा धूमोऽप्यग्निमन्तरेणेन्द्रजालिकघटादौ
अरणिनिर्मन्थनादौ चेति समानम्, तदुक्तम्—यदिह स सदेत्यादि, सदृशाभ्युपगमेन समानता गतार्था
प्रत्युक्ताप्याय, सन्निहितनिमित्तसहचरिभावाप्यासत्तेन, विशिष्टधूमग्रहणं तस्मिन्नेव देशे काले च नानुत्पन्नो
नानीतो नाप्यन्यतो वाऽग्निरित्येतस्यार्थस्य प्रत्यायनार्थम्, सत्यपि सहचरिभावे निमित्तभूतमग्निमन्तरेण धूमस्यै- 10
वाभावादग्निनिमित्तनैमित्तिकभाव एषितव्यः, तदस्य धूमस्यासाधारणानि लिङ्गानि दर्शयन्नाह—पाण्डुद्रुमगती-
त्यादि, पाण्डुविशेषण चाग्नीन्धनविशेषोद्भवत्वम्, ऊर्ध्वगत्या महत्त्वेन च धूमिकाव्युदासः, उत्सङ्गग्र-
हणात् सरोऽङ्गारोर्ध्वविसारित्वं सूच्यते वाष्पविसारित्वाद्धूमिकानाम्, एकदेशचलमूलग्रहणात् अमूला
यनीवामिनाध्याभिव्युदासः अनेकत्र भ्रमणादिराख्यायाम्, पुनः पुनरुत्पादिधूमग्रहणादयनीवामि-

---

कर्तं तस्मिन् सति साध्यं भिद्यते न भिन्न एव, असाधारणत्वादिसम्बन्धाच्च तादात्म्यतोऽग्निरिति भावः । तत्पदार्थतो-एवम 15
सिद्धेति । निमित्तनैमित्तिकभावस्याविनाभावस्याधारत्वं सहते–अनयोरिति । निश्चितव्येनाभावादनुमानं सहचरिभावेन
चेतस्य अतः तस्मादेवानुमानसिद्धौ निमित्तनैमित्तिकभावस्य प्रयोजनाभ्युपगमो व्यर्थं इत्याशङ्क्य–एवं तर्हीति । अग्नि-
विशेषेणानैकान्तिकम् एव यतो हेत्वाभासः तदाशङ्क्य सहचरिभावादित्येव भावः । धूमसामान्यस्याग्निव्यभिचारित्वात् धूमविशेष
एवाग्नेर्गमक इति सूचनाय निमित्तनैमित्तिकभावोऽभ्युपेतव्य इत्युक्तवती–अग्निव्यभिचारिति धूमस्याग्नेर्वाऽभावमभ्युपेत्योऽन्वे-
र्व्यभिचारो यथा तथा धूमस्याप्यग्निमन्तरेणेन्द्रजालिकादिनिर्मितस्याभावमभ्युपेत्योऽग्निव्यभिचार इत्यग्निधूमयोः परस्परव्यभि- 20
चारित्वे समानतेति भावः । तमेव व्यभिचारं धूमे व्याचष्टे पाण्डुत्वादिविशेषणविशिष्टधूमस्यैवाग्निसम्बन्धात्
तदविशिष्टधूमस्यैवाग्निव्यभिचारात् निमित्तनैमित्तिकभावोपगमस्य सहचरिभावस्यैव प्रकृततया व्याख्यातपूर्वत्वं दर्शयन् व्याचष्टे–
यदिह स इति मूलमरस्यम् । व्यभिचारित्वेऽपि दृष्टान्त भावना च यथा धूमस्याग्निमन्तरेणाग्निव्यभि-
चारित्वेऽपि धूमेन सह तथा धूमोऽपि विनाऽग्निनाऽपीन्द्रजालिकादिनिर्मितकलशादौ चेति प्रत्युक्तप्राय धूमस्यानुमा-
नमूलपाण्डुत्वमहत्त्वादिविशिष्टस्यैव धूमस्याग्निव्यभिचारेण विशिष्टस्य तु न व्यभिचार इति । अत्र धूमसामान्य- 25
स्याग्न्यविनाभूतत्व प्रत्युक्तमेवेत्युक्त्वा सन्निहितनिमित्तभूताग्निसहचर्यं धूमस्य प्रदर्शयन्नाह–सन्निहितेति ।
विशिष्टधूमग्रहणप्रयोजनमाह–विशिष्टधूमग्रहणमिति । सामान्यस्य धूमस्याग्नेः सहचर्ये सत्यपि पाण्डुत्वादिविशिष्टो धूमो
न निमित्तभूताग्निव्यतिरेकेण भवितुमर्हति तस्मात् सोऽप्यविनाभावस्य सत्वेनाभ्युपेय इत्याह–सत्यपीति । तानेव धूमस्यासाधारणानि
दर्शयति–पाण्डुद्रुमेति पाण्डुत्वमग्न्यात्मको धूमवर्णो भवति तत्र पीतमृत्तिकाद्युपादानकस्य धूमस्य व्यावृत्त्यर्थं पाण्डु
विशेषणमिति । अन्यत्सर्वं तथात्वादूर्ध्वगत्यादिव्यभिचार–ऊर्ध्वगत्येति अन्ये धूमा भूमिष्ठ अन्यस्थास्तु यान्ति 30
तिर्यग्विसारित्वात्, विशिष्टोर्ध्वगतिमत्त्वाद्धूमोऽपि विसारी न व्यभिचारित्वं तथा उत्सङ्गग्रहणाभिप्रायमाह–उत्सङ्गग्रहणादिति ।
अन्यानि विशेषणानि स्फुटानि । एवं चाग्नेः कार्यं धाराधारव्यवहार प्रत्यक्षानुपलम्भाभ्यां निश्चितं, तत् तत्र व्यभिचरति,

---

१ नि. नामविद्धूर्ध्व । २ सि. ज्ञ. दे. यदिहे स सद॰ । ३ नि. ज्ञ. पाण्डुद्रुमगत्यादि ।

कनाससुतारणिनिर्मन्थनप्रभवाग्न्युदासः, तस्मात् सलिलबलाकयोः सहचारिणोरिवाग्निधूमयोर्व्यभिचार दर्शनात् निमित्तनैमित्तिकभावोऽपीष्टः ।

सोऽपि निमित्तनैमित्तिकभावः सहचरिभावेन विना व्यभिचरत्येवेति दर्शयन्नाह—

बलाकापताकायाश्च निमित्तसद्भावेऽपि नैमित्तिकस्य स्वपतिकुसमासादादिवत् नैमित्तिक-
5 सद्भावेऽपि निमित्तस्य चाभावदर्शनात् सहचरिभावोऽप्येषितव्यः, धूमाग्न्योर्व्यभिचारदर्शनात्
सहचरिनिमित्तत्वोपपत्तावपि देशान्तरासञ्चारित्वस्य तत्सन्निहिताग्निनिमित्तस्य विशेषणविशिष्ट-
स्यैव धूमस्य सहचरिण्यग्नौ गमकत्वेन विशेषणार्थवत्त्वात् इतरथाऽग्निमत्त्वमेव न गमयति
उभयतोऽपि यस्मात् तस्मात् स यथाऽग्निमत्त्वं गमयति तथा सन्निहिताग्निनिमित्तत्वमपि,
उभयथाप्यव्यभिचारात् ।

10 बलाकापताकायाश्चेत्यादि यावद् धूमाग्न्योर्व्यभिचारदर्शनादिति भावना गतार्था, नैमित्तिकसद्भावे
निमित्ताभावदर्शनात् स्वपतिकुसमासादादिवदिति तत्कुसुमगतदोषपरिहारेण व्यतनयकुसुमप्रकाशनार्थं चाह—
[सह]चरिनिमित्तोपपत्तावपीत्यादि यावद्विशेषणार्थवत्त्वादिति उभयविशेषणसम्बन्धो यस्य कारणव्यभिचा-
रित्वं न सम्भवति, तत्कथमिति दर्शयति—देशान्तरासञ्चारित्वादिना भावयन्, तत्सन्निहिताग्नि-
निमित्तत्वाद्धूमस्य व्यभिचारमपश्यद्भिः तैर्विशेषणैर्विशिष्टस्यैव सहचरिण्यग्नौ गमकत्वम्, इतरथा धूमस्यापि
15 व्यभिचारिणि धूमे व्यभिचारात् विशेषणसामर्थ्यादनुमानार्थवत्त्वम्, विशेषणानुपादानेऽग्निमत्त्वमेव न गमयति,
उभयतोऽपि सहचरित्वे निमित्तनैमित्तिकत्वे वा सति यस्मात्, तस्मात्, स यथाऽग्निमत्त्वं गमयति तथा
सन्निहिताग्निनिमित्तत्वमपि गमयतीति दर्शयति—यथाऽग्निमत्त्वेन विना नास्ति धूम[व]त्त्वं तथा तन्नि-
मित्तत्वमन्तरेण नास्तीत्यग्निमत्त्वनिमित्तत्वमपि गमयति उभयथाप्यव्यभिचारादिति ।

---

व्यभिचारदर्शनार्थं भवति एवं निमित्तनैमित्तिकभावयोरविनाभावः न तु सहचर्यमात्रेण व्यभिचारित्वादिति भावः ।
20 निमित्तनैमित्तिकभावे तथापि नैमित्तिकस्य [illegible] व्यभिचारदर्शनात् सहचरिभावोऽप्यावश्यक इत्याह—बलाकेति ।
[illegible] निमित्तम्, [illegible] नैमित्तिकस्य [illegible] दर्शनादिति भावः ।
[illegible] नैमित्तिकस्य [illegible] निमित्तस्य [illegible]
[illegible] निमित्तनैमित्तिकयोर्व्यभिचारदर्शनात् सहचरिभावोऽप्यावश्यक इति दर्शयति—बलाकापताकायाश्चेत्यादीति । [illegible]
[illegible] इत्याह—तत्कुसुमेति, [illegible] सहचरिभावस्य
25 निमित्तनैमित्तिकभावस्य च [illegible] धूमस्यापि व्यभिचारित्वप्रसङ्गेन, न हि [illegible]
हेतु [illegible] धूमस्य [illegible] देशान्तर[illegible]
[illegible] तथा [illegible] व्यभिचारित्वं सम्भवतीति भाव. । एतदेव दर्शयति—देशा-
न्तरासञ्चारीति [illegible] । [illegible]
यति, [illegible] —उभयतोऽपि सहचरित्वे निमित्तनैमित्तिकत्वे च सति [illegible] धूमस्याग्नेरिव
30 धूमे व्यभिचारात् विशेषणसामर्थ्यादनुमानार्थवत्त्वम्, [illegible] सहचरिभावे निमित्तनैमित्तिकभावे वा [illegible]
[illegible] न गमयति [illegible] धूमो यथाऽग्निमत्त्वं गमयति तथा तत्सन्निहिताग्निमत्त्वमपि गमयति, [illegible]

---

१ सि डे. डा. धाम्नधूमयोर्व्य° । २ सि. डा. डे. °व्यभिचारिण° । ३ सि डा. डे °प्रत्यग्नि ।

स्यान्मत लिङ्गत्वादग्निः प्रत्यक्ष प्रमाणान्तरमपेक्षते धूमवदिति तन्न भवति—

एवञ्च वक्रमूलत्वादिविशिष्टधूमपरिग्रहेऽग्नेरपि गृहीतत्वान्न प्रत्यक्षादिप्रमाणान्तरमपेक्ष्यम्, कृतकत्वेनेवानित्यत्वस्य, कृतकमित्युक्ते तदेव ह्यनित्यमध्रुवमित्युक्तं भवति, उत्पादविनाशयोर ध्रौव्याभेदात्, तथा धूमग्रहणेऽग्निग्रहणं प्रदेशात्माभेदात् स एव निमित्तमग्निर्धूमस्य सहचरश्च, न हि तस्य धूमस्याग्नितोऽन्यन्निमित्तं भवितुमर्हतीति परिणाम्यभेदपरिणामान्तरसाध्यत्वे परिणामान्तरसाधनत्वात्, पूर्वप्रत्यक्षदृष्टान्वयकाले सम्बन्धस्मरणादन्यतरविवक्षितहेतुनोपात्तस्येतरस्य साध्यस्याभिव्यक्तिः क्रियते, अर्हत्तस्यस्याभ्युपगम्यमानत्वात् ।

एवञ्चेत्यादि, एवं-वक्रपवनमूलत्वादिविशिष्टधूमपरिग्रहेऽग्नेरपि गृहीतत्वान्न प्रत्यक्षादिप्रमाणान्तरमपेक्ष्यम्, किमिव ? कृतकत्वेनेवानित्यत्वस्य, तद्यथा–प्रागभावप्रध्वंसाभावात्मकमेकमेव वस्तु अनित्यं कृतकञ्चोच्यते, ध्रुव स्थैर्ये, ध्रुव-स्थिरं 'स्थेयूनर्ध्रुवे' (वार्तिक १८६५) इति लप् स्थिरं न नित्यमनित्यमिति कृतकमित्युक्ते तदेवानित्यमध्रुवमित्युक्तं भव[ति, उ]त्पादविनाशयोरध्रौव्याभेदात्, तथा धूमग्रहणेऽग्निग्रहणं प्रदेशात्माभेदात्, स एव निमित्तमग्निर्धूमस्य सहचरश्च, न हि तस्येत्यादि यावत् क्रियते[इ]त्यादि न हि तस्य-धूमस्याग्नितोऽन्यन्निमित्तं प्रदेशपरिणामात्मकत्वात् देशान्तरस्थाग्निपाषाणाम्बुकुम्भादि भवितुमर्हति सहचरं वा तत्सम्बन्धैकत्वव्यभिचारस्वप्रसङ्गात्, परिणाम्यभेदपरिणामान्तरसाध्यत्वे परिणामान्तरसाधनत्वात् एकमस्यैव हेतुसद्भावभावनार्थमाह–पूर्वप्रत्यक्षेत्यादि, यथापूर्वं प्रत्यक्षकालेऽग्निना सम्बद्धो धूमोऽग्निश्च धूमेन, तथाऽन्वयकाले तस्य सम्बन्धस्य स्मरणात्–यत्राग्निस्तत्र धूमो यत्र धूमस्तत्राग्निरित्यन्यतरेण विवक्षितेन

---

हेत्वन्तरेण धूमलक्षणाभावस्यैव [illegible] गमकत्वेति भावार्थः । ननु यथाग्निर्लिङ्गी तथा धूमस्य प्रत्यक्षादि-प्रमाणान्तरमपेक्षेत न हि स्वरूपेण धूमो लिङ्गं भवति किन्तु धर्मेऽपि प्रत्यक्षादिप्रमाणान्तरेण गृहीत एव तथाऽग्निरपि स्यादित्या-शङ्कायामाह–एवञ्चेति । स्वरूपेण धूमाग्निः गृहीतः किन्तु वक्रमूलत्वादिविशेषणविशिष्टे धूमे गृहीते तदग्निरपि गृहीत एवेति न प्रत्यक्षादिप्रमाणान्तरापेक्षा तस्येत्याह–एवमुक्तेति । तत्र दृष्टान्तमाह–कृतकत्वेनेवेति कृतकत्वं प्रागभावप्रध्वंसा-भावरूपानित्यत्वम्, [illegible] यतो हि वस्तु [illegible] तदेवानित्यमुच्यते [illegible] भावः । एतदेवाह–ध्रुव स्थैर्ये इति [illegible] स्थिरं [illegible] 'स्थेयूर्ध्रुव इति वक्तव्य'मिति वार्तिकात्, न नित्यमनित्यमध्रौव्य-मुत्पादविनाशात्मकत्वं [illegible]–तथा धूमग्रहण इति [illegible] भावः । न हि धूमस्य [illegible] देशान्तरस्थोऽग्निः पाषाणादिर्वा निमित्तं भवितुमर्हति [illegible] साध्यत्वेऽपर [illegible] धर्मी हेतुर्भवति अन्यथा [illegible] साधनत्वे [illegible] साधने स्यादित्याह–न हि तस्येति । [illegible] पूर्वमिति [illegible] यत्र यत्राग्निस्तत्र तत्र धूमः यत्र यत्र धूमस्तत्र तत्राग्निरिति [illegible] साध्यस्याभिव्यक्तिर्भवतीति भावः ।

---

१ XX ११५ [illegible] । २ सि० [illegible] । ३ सि० [illegible] धूमो [illegible] ।

हेतुनोपात्तस्येतरस्य साध्यस्याभिव्यक्तिः प्रत्यक्षकाल इव प्रत्यक्षवत्, सामर्थं धूमविज्ञानकालेऽग्निविज्ञान-
स्याभावात् ! अनित्यत्वप्रयत्नानन्तरीयकत्वयोरन्योऽन्यव्याप्तिं
प्रतिज्ञाय हेतुमाह—अर्थवत्त्वस्याभ्युपगम्यमानत्वात्, अन्यापोहाभ्युपगमात् स्ववचनादेव चानेन अभ्युपगम-
पगतं त्वयेति वक्ष्यामः ।

5 स्ववचनानपेक्षायामप्यनित्यं सर्वं प्रयत्नानन्तरीयकं न भवतीति ते वचनं न्यायापेत-
मेव, तान्यपि सिद्धप्रयत्नानन्तरीयकाण्येव, लोकप्रसिद्ध चेतनविहितवृत्तित्वात्
कुड्यादिवत्, लोकप्रत्यक्ष वातादीनामनग्न्यादित्वे स्पर्शादिमत्त्वाज्जीवच्छरीरत्वेऽपि
तु नास्त्यन्तशरीरत्वात् स्वयं प्रवृत्तत्वात्, स्वपदिवत् वातादिचैतन्ये सिद्धे
चेतनविहितवृत्ति च विद्युदभ्रमेघशब्दादि , सवितृगति तस्मात् विद्युदादीनि
10 प्रयत्नानन्तरीयकाण्यनित्यानि चेत्यन्योऽन्यगम्यगमकतेति ।

स्ववचनानपेक्षायामपीत्यादि, यद्यपि स्व वचनमनपेक्ष्यापि अनित्यं सर्वं प्रयत्नानन्तरीयकं
न भवतीति ब्रूषे तथापि ते स्ववचन न्यायापेतमेवेदम्, तद्यथा—तान्यपीत्यादि तान्यप्यभ्रप्रायाणि
सिद्धप्रयत्नानन्तरीयकाण्येवेति प्रतिज्ञा लोकप्रत्यक्षेत्यादि समासप्रत्यक्षो हेतुर्यथा विहितवृत्तित्वादिति कुड्या
निर्दिष्टम्यः तत्सामान्य–लोकप्रसिद्धेत्यादि, विशेषप्रयोजनानि च पिण्डार्थेन विद्युदादीनां वातचैतन्यं साध्य
15 जीवच्छरीरं वातादयः अनग्न्यादित्वे स्पर्शादिमत्त्वात् गोवत्, तस्यापि गोर्मृतस्य जीवत्वाभावात् मा भूद्
नास्त्यन्तशरीर[ति] जीवच्छरीरत्वेऽपि तु नास्त्यन्तशरीरत्वेत्यादि यावत् स्वयं प्रवृत्तत्वादिति, विशेषणमयथात्व
स्वपदिवदिति, स्वपदेमैतन्यवत् वातादिचैतन्ये सिद्धे चेतनविहितवृत्ति चेत्यादिना विद्युदभ्रमेघशब्दादीनां
चेतनावत्प्रयत्नारब्धता दर्शयते सवितृगतीत्यादिना इन्द्रधनुषः, तस्माद्विद्युदादीनि प्रयत्नानन्तरीयकाण्य-
नित्यानि चेत्यनित्यप्रयत्नानन्तरीयकत्वयोरन्योऽन्यगम्यगमकता यथाविनाभावित्वदर्शनस्य विनाभावेना-
20 भावाभिः तत्प्रदर्शनादेव साध्यसाधनधर्मयोः । विधेः संयोगिवृत्तिर्विपर्यायप्रतिज्ञोक्ता ।

न त्वाधाराधेयवृत्तिरिति प्रतिपादयिष्यामः—

याऽप्याधाराधेयवृत्तिः 'लिङ्गे लिङ्गी भवत्येव लिङ्गिन्येवेतरत् पुनः । नियमस्य विपर्यासे-
ऽसम्बन्धो लिङ्गलिङ्गिनोः ॥' (प्र स ) यस्मात्लिङ्गे धूमे लिङ्ग्यग्निर्भवत्येव न भवत्यपि तस्माद्धूम
पदमिवद्धूमो द्रव्यत्वादीनामस्ति प्रकाशको न तेष्वग्न्यादीनाम्, यस्माच्च लिङ्गिन्येव लिङ्गं भवति
25 नान्यत्र तस्माद्धूर्कं यद्धूमो धूमत्वेनेव पाण्डुत्वादिभिरपि प्रकाशयति न द्रव्यत्वादिभिरिति

अत्र सामर्थं धूमविज्ञानकालेऽग्निविज्ञानस्याभावादिति अन्यापन्तरं नियमं प्रत्यनुक्ति इति परिहारे एवमनित्यत्व-
प्रयत्नानन्तरीयकत्वयोरिति ग्रन्थमारभ्य स्ववचनप्रतिज्ञायाः अन्यथानित्यत्वप्रयत्नानन्तरीयकत्वयोः परस्परव्याप्यव्यापक-
भावप्रदर्शनाय प्रयत्नानन्तरीयकत्वादित्यादिना विद्युदभ्रमेघशब्दादीनां चेतनप्रयत्नानन्तरीयकत्वप्रतिपादनम् अन्यात्प्रत्युक्तम् न न्यायानु
मते। यद्यपि लिङ्गलिङ्गिनो रन्योन्यस्य धर्मस्याधाराधेयत्वेऽपि अन्योऽन्याधारत्वेऽपि अन्यतरस्य विशेषेऽपि उभयत्र भेदस्यानुक्त्वा सर्वदि,
30 अन्यतरस्यैवेऽपि न आधारस्याधेयता आधेयस्य वाऽऽधारता एवमेव लिङ्गलिङ्गिनोर्व्याप्तिरपि विशेषणं अन्यथा न
लिङ्गेन लिङ्गिधर्मपुरस्कारेण लिङ्गि गमकम्, न सामान्यधर्मेण, सामान्यधर्मपुरस्कारेण लिङ्गी गम्यः न तु विशेषधर्मेण, यदि च

१ भि. च अन्यत्वेति । २ सि च °सुत्त्वा ।

सामान्यस्य गमकत्वं लिङ्गिनि, न विशेषाणाम्, लिङ्गस्य च विशेषाणां केषाञ्चिद्गमकत्वं न सामान्यस्य, तदेतत्सर्वमविनाभावादाधाराधेयवृत्तेरिति, एषामपि तद्भावदर्शनविधेरेव गमकत्वं, यत्र दृष्टः तद्गमयति न यत्र चादृष्टस्तद्रूपावच्छेदेन ।

याऽप्याधाराधेयवदित्यादि, यामप्याधाराधेयवद्वृत्तिं मन्यसे 'लिङ्गे लिङ्गी भवत्येवे'त्यादि-श्लोकः, तद्व्याख्या यस्माल्लिङ्गे धूमे लिङ्गी-अग्निर्भवत्येव [न] न भवत्यपि तस्मादुक्तमित्यवधारणार्थमदर्शनम्, [5]
यस्माच्च लिङ्गिन्येवेत्यादि पाण्डुद्रव्यत्वादिभिरित्यादि तद्विपरीतावधारणप्रदर्शनं गतार्थम्, सामान्यस्य गमकत्वं लिङ्गिनि न विशेषाणाम्, लिङ्गस्य च विशेषाणां केषाञ्चिद्गमकत्वं न सामान्यस्य इदम्, तत्सर्वमविनाभावादाधाराधेयवद्वृत्तेरिति पूर्वपक्षः, अत्रोत्तरं-एषामपीत्यादि, इयमप्याधाराधेयवद्वृत्तिस्तद्भावदर्शनविधेरेव यत्र दृष्टस्तद्गमयति दर्शनबलेन, न येन चादृष्टस्तद्रूपावच्छेदेन व्याप्तिर्वि[हि]तेति ।

अत्रापि— [10]

न हि योषिद्द्रव्यपाण्डुत्वं गमयत्यग्निम्, अभूताग्निभूमत्वात्, धूमभूतं तु पाण्डुत्वं गमयत्यग्निम्, धूमभूताग्नित्वाद्विधेरेव तद्भावस्य तद्भावत्वेनैव गमकत्वात्, यथा चेद् तथा द्रव्यत्वादिसामान्यमपि गमकमग्नेः धूमभूताग्नित्वात् पाण्डुत्ववत्, यत्तु धूमो दीहपादीनां न प्रकाशक इत्युक्तं तदपि तद्भावदर्शनविधेरेव, तथा चान्यथा च दृष्टत्वात् व्यभिचारात् दर्शनविधेरेवानुमानलक्षणोपपत्तेश्च, 'तद्भावदर्शनानुबन्धेन हि बुद्ध्युत्पत्तिरनुमानम्', धूमवत्त्व [15]
प्रदेशस्याग्निमत्त्वानुपपत्तिमेवेत्यैकान्तिकग्रहणेऽनुमानं भवति धूमादग्निरत्रेति, तस्यैकान्तेनैव

---

धूमो न धूमः धूम एव च गमको नाग्निरिति मन्यसे तदपि न युक्तमिति चेदुच्यते प्रथमतस्तन्नाप्युपन्यस्यति-याऽमपीति । यामाधाराधेयवद्वृत्तिमुपदर्शयति-लिङ्गे लिङ्गी भवत्येवेति अयोगव्यवच्छेदोऽयम्, ततो दर्शयति-अग्निर्भवत्येव न न भवत्यपीति अत्र धर्मिणि धर्मस्य सद्भाव धर्मिण्यस्ते तथायोगव्यवच्छेदो न्यायप्राप्तः धूमेऽग्निर्भवति इत्येवं योऽयोगव्यवच्छेदः सर्व- धर्मिष्वप्यस्त्ययोगो यतो व्यवच्छिद्यतेऽत्र एव सामान्यधर्मेणाग्निर्धूमस्य इति कथ्यते अत एवोक्तं मूले-द्रव्यत्वादीनामिति [20]
द्रव्यत्वाद्यव्यभिचारित्वमेवेति भाव । यस्माच्च लिङ्गिन्येवेति अन्ययोगव्यवच्छेदोऽयम्, अग्नावेव धूमो भवति [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] सामान्यस्तु धूमोऽप्यग्नावेव [illegible] [illegible] न [illegible] [illegible] धूमः पाण्डुत्वादि [illegible] इति [illegible]
गमको न सामान्यधर्मेण अत उक्तं-द्रव्यत्वादिभिरिति । तदिममर्थमाह-सामान्यस्येति लिङ्गिनि सामान्यस्यैव [25]
गमको धूमो न विशेषाणामिति । [illegible] विशेषा एव गमका न सामान्यमित्याह-लिङ्गस्य चेति । सर्वमिदमविनाभाव [illegible] आधाराधेयवद्भावात् [illegible] मतं दर्शयति-तत्सर्वमिति । उक्तं पूर्वपक्षं [illegible] [illegible]-इयम पीति [illegible] [illegible] [illegible], [illegible] [illegible] [illegible], स एव ह्यग्निर्धूमे भवति [illegible] [illegible] धूमेन [illegible] [illegible] न [illegible] न भवति किन्तु भवत्येवेति तद्भावस्य दर्शनादेव विधिरपेक्ष
गमकत्वं, न तु यत्र न [illegible], यथा [illegible] न भवति [illegible] भवतीति भावः । तद्भाव [30]
दर्शनविधि पाण्डुत्वं दर्शयति-न हीति । [illegible] पाण्डुत्वं [illegible], न हि [illegible]

---

1 लिङ्गिनीत्यपि । × × । 2 सि [illegible] ।

ग्रहणमव्यभिचारात्, व्यभिचारास्त्वनुमानाभासं धूमकुपाविवत्, यथा धूमः कुपो वाऽत्र धूमा दित्यनुमानाभासं व्यभिचारादर्शनबलेनैव तथाविधदर्शनपुरस्सनुपलम्भेनानुमानमपि ।

न हीत्यादि, योषिद्वृणपाण्डुत्व न गमकमग्नेः, अभूताग्निभूमत्वात्, धूमभूतं तु पाण्डुत्वं गमकमग्नेः, धूमभूतत्वात्, विशेषेण तद्भावस्य तद्भावत्वेनैव गमकत्वात्, यथा चेदमित्यादि, पाण्डुत्वादि-

5 विशेषस्य धूमभूतत्वेन गमकत्व[त्व]त् द्रव्यत्वादिव्यपायस्यापि धूमभूतेर्गमकत्वमग्नेरिति भावना यावत् पाण्डुत्वमिति, एवं तावद्भूमभूतसामान्यविशेषधर्माणां गमकत्वं तुल्यं [1]मिथो, एवं गम्यत्वनियमाविशेषः, तथाप्यग्नेरपि द्रव्यत्वसामान्यगतिरग्निभूतत्वात्, योषदग्निदग्धस्थिरिव द्रव्यत्वगतिः, अतद्भूतत्वात्, येन धूमो दीप्त्यादीत्यादि, दीप्तितैक्ष्ण्यादिविशेषागतिरपि तद्भावदर्शनविशेषेण तथा चान्यथा च-दीप्तितैक्ष्ण्यादिरूपेण तदितरस्थितस्येन च दहनात्वव्यभिचारात्, मार्तण्डमूर्त्यादीनामव्यभिचारस्य तद्भावगतिः, किं तर्हि ? सम्बन्ध-

10 व्यभिचारेण, निरात्मकत्-दर्शनविशेषेणानुमानस्योपपत्तेः स एवैषितव्य इत्यत आह-तद्भावदर्शनानु-सारेण हि पुरुषस्थितिरनुमानमित्येवदनुमानलक्षणम्, तद्रूपाचष्टे-धूमवत्त्वमित्यादि, यथा धूमवत्त्वं प्रदेशस्याग्निमत्त्वाद्भूतत्वमेवैतत्स्यैकान्तिकं ग्रहणं तथाऽनुमानं भवति, धूमादग्निरस्तीति, तस्मात्तदेकत्वेनैव गदृ्गमत्व-

मिरम् । धूमत्वं तु तद्गमकमग्नेः तस्यैव धूमभूतत्वात्, योषिदग्निपाण्डुत्वं तु योषिदग्नेर्न तद्भिपरिणामत्व्यस्य धूमभूतस्यतोऽप्यपि तद्भावदर्शनविशेषेण तद्भावत्वेनैव रूपेण पाण्डुत्वं गमकम्, न तु पाण्डुत्वसामान्यरूपेणेत्याशयेनाह-योषिदग्निपाण्डुत्वमिति ।

15 विशेषता विशेष एव गमको न सामान्यमिति वस्तुस्थितेः तथा तत्र तुल्यम्, तद्भावत्वेन गमकत्वं तत्सत्ताविशेषा एव सामान्यमपि यदि तद्भावे भवेदपि न प्रतिरुध्यात् तस्य गमकतासामर्थ्यमित्याशयेन सामान्यं सामान्यविशेषयोरैकमत्या-यथा चेदमित्यादीति द्रव्यत्वादीन्यपि तद्भावत्वेनैव रूपेण गमकानि न तु सामान्यरूपेणेति भावः । तथैव विशेषसामान्यविशेषयोस्तद्भावत्वेनैव गमकत्वेनाविशेषमाह, किञ्चित्सामान्यमपि न सामान्यरूपतो गम्यमपि तु तद्भावत्वेनैवेत्याह-एवं गम्यत्वनियमाविशेष इति सामान्यमेव गम्यं न तु विशेषा इत्येवं विशेषो नास्ति गम्यतायामन्यतद्भावविरहस्यैकस्याविशिष्टत्वादिति भावः । अग्निगत-

20 सामान्यस्यापि तद्भावेनैव गमकत्वमाह-अग्नेरपीति । यथैव द्रव्यत्वमग्निभूतं तथैव द्रव्यत्वं तद्भावत्वाद्गम्यम्, अग्निव्यतिरिक्त-भावितं द्रव्यत्वं तु न धूमेन गम्यम्, अग्निभावत्वाभावादेवेति भावः । धूमस्य दीप्तितैक्ष्ण्यादीनामभावादपरम्, अतदग्निभावत्व-मग्निभिना कार्यं न भवति तथातथाभूतानां कार्यं धूमो भवति अग्निस्थदीप्तितैक्ष्ण्यादिकार्याणामपि धूमो व्यभिचरति इति ते व्यभिचारेण गम्या इति चतुर्थे तथा तथापि तद्भावदर्शनविशेषेणैवाह-येन तु धूम इति । दीप्त्यादीनां व्यभिचारो तद्भावदर्शनात् अविद्यमानत्वात्तद्भावेन दर्शनाद तद्भावदर्शनविशेषेण धूमात्तेषामगतिरिति भावः । तद्भावदर्शनमाह-तथा चान्यथा चेति,

25 दीप्त्यादिभिरग्नेस्तद्भावदर्शनान्यो नास्ति व्यभिचार इति भावः । ननु दीप्त्यादिविरहितत्वं न धूमम् ? निरग्नेरदीप्तधूमत्वेऽपि ? पावकाभिरेण भवति पुनरेव व्यभिचारः ? यदि तर्हि दीप्त्यादीनां मिथो व्यभिचारः स्वाभावादित्याह-तावदग्नेरिति न हि यत्र व्यभिचारं ब्रूमः तत्र तेषां सम्बन्धाभावात् किन्तु यत्र अग्निरग्नौ दीप्त्यादिसम्बन्धो नास्ति तत्र व्यभिचारो बोध्य इति भावः । तद्भावदर्शनविशेषेणानुमानं एवानुमानलक्षणं तद्भावदर्शनव्याप्त्या हि पुरुषस्थितिरनुमानमित्येवमुपपन्नं इत्याह पूर्वोक्तविशेषे चेति । प्रदेशस्य धूमवत्त्वमग्निमत्त्वव्यभिचारेण न हि प्रदेशस्य धूमवत्त्वं तथाग्निमत्त्वमन्तरेण सम्भवतीति नैकान्तेन एतो तथ

30 तदन्वं विनाऽनुमानं धूमादग्निसिद्धि भवति तद्व्यतिरेकेणानुपपत्तेः धूमवत्त्वस्याग्निमत्त्वव्यभिचारित्वाभावादिति व्याचष्टे-यथा धूमवत्त्वमिति । यदा तु व्यभिचारी भवेत्तदा तदनुमानाभासं भवति यथा यथाविध्न धूम अत्र कुपो वा इति प्रतिज्ञाय धूमात् इति हेतुं प्रयुञ्जयात् तदिदमनुमानाभासं भवति, तत्र धूमकूपयोरव्यभिचारदर्शनाभिमतत्वानुपलम्भाभावात्

1 सि क डे डा धूम धूमा । 2 सि क्ष. डा डे विविशेष । 3 सि. यत्तु धूमो दीप्त्यादिस्यादि । 4 सि. क्ष. डा. डे °दर्शनविशेष । 5 सि क्ष डा डे तदात्मत्वात् । 6 सि क्ष डा. डे विविशेषा ।

मिचारात्, व्यभिचारात्तु अनुमानाभासम्, तद्यथा—धूमस्तुषारादि[व] व्यस्तनैरन्तर्याद्व्यभिचारेण यथा
यथा तु धूमः क्षुपो वाऽत्र धूमानिति तदानुमानाभासं भवति, विनापि धूमाग्निना दृष्टत्वाद्व्यभिचारात्
दर्शनबलेनैव, तदुपसंहार०—तथाविधदर्शनानुस्मरणबलमेवानुमानमपीति गद्यार्थम् ।

एवमनध्यवसायविपर्ययानुमानाभासावपि, तदतत्परस्वरूपगतमेकान्तमनाश्रित्य ज्ञानमन-
वधृतार्थमनध्यवसायः, विपर्ययस्त्वभूते भूतप्रत्ययो भूते चाभूतप्रत्ययः, एतावप्यनुमानाभासौ, 5
तत्परिणामाव्यवच्छेदेन दृष्टवत्, स्व मत्या व्यावृत्तेस्त्वनुमानाप्रामाण्यापत्तिः, न भवति न
भवतीत्यभवनपरमार्थत्वादर्थान्तरमभावो वा, अत्यन्ताज्ञानात्, अनध्यवसायवत्, भाव-
वृत्त्यननुरोधिमतिपरत्वाद्वा विपर्ययवत्, तस्मात् दृष्टवदेवानुमानवदाभासौ, यथादृष्टज्ञाना
नुपतत्त्वादिति ।

( एवमिति ) एव—सम्यगनुमानाभास[वत्]वानध्यवसायविपर्ययानुमानाभासावपि, तद्यथा—तद 10
तत्स्वेऽपि, स चायम् यो तदसत्सो तयोर्द्वय तद्रूपमेकान्त—भूतमेवाभूतमेवेति, अनाश्रित्य यथाऽभि-
न्नेव, अभिन्न अपसर्पेवमादि अभिभिन्नतासन्दिग्धरूप ज्ञानमनवधृतार्थमनध्यवसायः विपर्ययस्त्वभूते
भूतप्रत्ययो भूते चाभूतप्रत्ययः, स्थाणौ पुरुषप्रत्ययवत्, एतावप्यनुमानाभासौ तत्परिणामाव्यवच्छेदेन—
तथाविधदर्शनानुस्मरणबलमेवानुमान दृष्टवत् तथैवानुमानाभासोऽपि, स्वमत्या व्यावृत्तेस्त्वनुमाना-

---

व्यभिचारादिति अभिमतनिश्चायकत्वमनैकान्त्याद्विविधत्वस्मृत्यव्यभिचारदर्शनादिति भावः। एतदेव स्फुटयति—यथा तु धूम 15
इति, धूमः [illegible] गुल्मादिरेव । तथा तथा दर्शनबलादेवानुमानतदाभासयोर्भेदमभिप्रेत्याह—दर्शनबलेनैवेति ।
उपसंहरति—तथाविधेति । एवं व्यभिचारादनुमानाभासं सम्यगनुमानाभावं उच्यते [illegible]
मानाधिकरणत्व प्रदेशे च धूमदर्शनमात्रमानयमेदर्शनादिप्रदेशदर्शनाच्च विमर्श प्रदेशे [illegible] । किं चाऽन्योऽप्याभि-
नवमानाभासाविति [illegible], स्वानुभवप्रमाणभावादनुमानाभासावपि [illegible] एवमनुमानाभासमुपदर्श्यानध्यवसायविपर्ययानु-
मानाभासौ दर्शयति—एवमिति । [illegible] विपर्ययानुमानाभासयो तथा- 20
विपर्ययस्वरूपप्रदर्शनायाह—अनध्यवसायेति । अनध्यवसायमाभासमेव निरूपयति—तदपेति तदतत्परस्वरूपगतमेकान्तमना-
श्रितसन्दिग्धरूपमनुमानमनध्यवसायाभासम् यथा [illegible] सन्दिग्धार्थस्थाणौ हि [illegible] सह चान्वर्त
[illegible] अनुमानाभासम् इति भावः । [illegible] निरूपयति—स चायम यथायेति [illegible]
[illegible] इति, तदनाश्रित्य [illegible] 25
[illegible] एवेति वा निश्चयरहितं [illegible] एव चानवधृतार्थं ज्ञानमनध्यवसाय इति भावः । [illegible]
[illegible] विपर्ययानुमाना-
भासोऽपि तथाविधदर्शनबलेनैवेति दर्शयितुमाह—विपर्ययस्त्वेति भूते वस्तुन्यभूतप्रत्ययोऽभूते वा भूतप्रत्ययो विपर्ययः यथाऽ-
पुरुषभूते स्थाणौ पुरुषोऽयमिति प्रत्यय इति विपर्ययस्य सामान्यलक्षणम्, [illegible] प्रत्यय इति भावः । एतावप्यनुमानाभासौ
तथाविधपरिणामव्यवच्छेदेन न भवितुं अर्हताविति तथाविधदर्शनबलेनैव तावपि भवत तथाविधदर्शनानुस्मरणमनुमानं एवं अनु- 30
मानाभासोऽपि तदनुस्मरणबलानुसारेण [illegible] एतावपीति । स्वमते तु [illegible] अनुमानाप्रामाण्य-
[illegible] परमार्थत्वादनुमानमप्रमाणमेव भवतीत्याह—स्वमत्येति । तदेवाह—न भवतीति [illegible]

---

१ तै. प्र. पा. दृष्टवत् ।

मामान्यापत्तिः, न भवति न भवतीत्युभयतोऽप्यभवनपरमार्थत्वात् अर्थान्तरमभावो वा अवस्तुत्वप्रसङ्गात्, अग्निर्न भवत्युदकमनग्निः, स न भवति यतः खपुष्पं वेति व्यवच्छानमेवेत्यसामान्यापत्तिः पूर्वोक्तन्यायेन कस्मात् अवस्त्वाम्नानात्, अनध्यवसायवदित्यप्रामाण्यम् यथा विपर्ययवदप्रामाण्यापादनार्थमाह–माञ्‌ दृश्यमनुरोधिप्रसिद्धेर्वा विपर्ययवदिति–माञ्‌साम्येऽपि विरूपेण प्रवृत्तिरभिमवन तदनुरोधिनी न भवति या

5 प्रतिपत्तिः सा माञ्‌दृश्यमनुरोधिनी, तस्याः प्रतिपत्तेर्माञ्‌दृश्यमनुरोधिन्या हेतोरप्रामाण्यं स्यादेवमनुमानस्य, पुरुषे स्थाणुप्रत्ययवदिति प्रागुक्तन्यायवशेनाभिधापादनं गतार्थम्, तस्मात् दृष्टवदनुमानतदाभासौ, यथा-दृष्टज्ञानमनुपपन्नत्वादिति ।

एवञ्च तदपि दूषणं यत्सम्बन्धानुमानलक्षणस्य प्रसक्तं न दूषणमेव, दृष्टविधिदूषेरनुमानोक्तेः ।

10 एवञ्च तदपीत्यादि, अविशेषेण सम्बन्धानुमानलक्षणस्य 'सम्बन्धादेकस्मात्' इत्यादेः 'असदेव कार्यं कारणम् ( ) इत्यादेश्च यत्किञ्च दूषणम्–सम्बन्धस्याविशिष्टत्वादनुमा[न]मिदमित्यत्र नियतम् दीप्तिवैरस्यादीनामपि गमकत्व धूमवदणुत्वादिविशेषगमकत्ववत् द्रव्यसत्त्वादिसामान्यस्यापि गमकत्वम् अग्नेर्वा गमकत्व धूमवत् धूमस्य वाऽग्निवद्‌द्रव्यत्वमित्यादयो दोषाः प्रसक्ताः, दृष्टविधिदूषेरनुमानोक्तेः यथा दृष्टस्तथा संदेहानध्यवसायविपर्ययनिश्चयप्रसिद्धैरभ्युपगमादिनैवेदमपि न दूषणम् दृष्टविधिदूषिमात्-

15 त्वाद्‌नुमानस्येति ।

भवतीत्यनुमानं स्यादिदम्, अग्निर्न भवतीत्येवेऽप्यभवनार्थं अग्निर्न भवतीत्यतोऽप्यभवनार्थं हेतुमतोऽप्यभवनपरमार्थत्वम्, भवनार्थताया अभावमात्रमिति भावः । तदपि विभिन्नमाह–अर्थान्तरमभावो वेति । अभावपक्षे हेतुमाह–अवस्तुत्वमिति । अर्थान्तरत्वमभवन विभावयति–अग्निर्नेति उदकादिरपि तदग्निर्न भवतीति भवपदार्थान्तरमेवाग्निर्न भवतीति स्यात्, अभवनाग्नि-भवतीत्यर्थान्तरमेव भवतीति न विषमं अग्निरपि स्वात्मव्यतिरिक्तविविक्तिनाद भावात्मवेति, सर्वस्यापि स्वरूपेण

20 वस्तुस्वरूपमेव सर्वस्य सामान्यापत्तिरिति भावः । [illegible] ज्ञानमित्यादि भवतीति [illegible] त्वात् [illegible]–अवस्त्वेति । अभावस्यापि [illegible] वा [illegible] विपर्ययवदिति । अनुमानस्य [illegible] विपर्ययवदिति । [illegible] न भवति [illegible] भावः । [illegible] तदनु-रोधिनीति विभजति–तस्याश्चिति । एवं [illegible]

25 दर्शितं प्रमाणितानि [illegible] प्रतिपादयति–एवञ्चेति । सम्बन्धादेकस्मात् [illegible] संबन्धसानुमानलक्षणम्, असदेव कार्यं [illegible] अविशेषेणेति 'न न [illegible] न सम्बन्धी [illegible] धूमो वा [illegible] धूमात् [illegible] संयोगेन [illegible] धूमात् [illegible] सामान्यवत्त्वं [illegible] यथा खलु [illegible] संयोगेऽपि [illegible] न [illegible] तु सम्बन्धमात्रम्, तथा धूमस्य [illegible] सामान्यधर्मो

30 अपि द्रव्यत्वादयो [illegible] धूमत्वे [illegible] धूमस्य [illegible] दोषत्वसक्तौ न [illegible] दृष्टधूम [illegible] भावः । तदुक्त [illegible] सम्बन्धस्येति । तदाक्षेपे हेतुमाह–दृष्टविधीति दृष्टविधिदूषेरनुमानोक्तेस्तदुक्तं दूषणजातं न दूषणमिति भावः ।

१ मि व व है अनुमानेदोषा ।

लिङ्गाभ्यत् 'लिङ्गे लिङ्गी भवत्येव' इत्यस्याः कारिकाया योऽर्थोऽवधारणवैपरीत्येनानुमानमित्युक्तः तस्य दूषणार्थमाहाऽऽचार्यो 'लिङ्गेन न विना लिङ्गी'त्यादि श्लोकेन—

यथाह–न हि सर्वत्र लिङ्गिनि लिङ्गं सम्भवत्येवायोऽग्निमदिति, अत्रोत्तर लिङ्गिनि देशेऽग्निमति धूमो भवन्नेव पक्षधर्मो भवति, नाभवन्, असिद्धत्वात्, लिङ्गिनि लिङ्गं भवत्येव, वाष्पादिव्युदासेन, तस्य चाग्निगततैक्ष्ण्यादिलिङ्गत्वं न भवति, न दृष्टत्वाद्धूमे तैक्ष्ण्यादिना च अविधिवृत्त्या, यथा चाऽऽह–यदा भवति लिङ्गं तदा नालिङ्गिनि भवत्युदकादौ धूम इति, तदपि न घटते नियमेन तस्य सद्भावे तत्रैवाग्नौ नान्यत्र लिङ्गत्वम्, अत्रदाध्यत्वाद्यैतन्मवेश सम्बन्धिन्येवाग्नौ लिङ्गत्वात्, तस्मात् स एव तस्यैव लिङ्गम्, धूमगतद्रव्यत्वाद्यन्यप्रकाशनन्त्वसत्यदृष्टदर्शनविधेरेव, तथाऽव्यभिचारात् ।

यथाऽऽहेत्यादि परमतमदर्शनं यावदयोऽग्निमदिति, नियमविपर्ययेण नोदाहरणम्, अत्रोत्तरे 10 लिङ्गिनि देशेऽग्निमति धूमो भवन्नेव पक्षधर्मो भवति नाभवन्नसिद्धत्वात् बहुमूलत्वादिविशेषणावधूयपक्षधर्मस्यैव लिङ्गत्वाल्लिङ्गिनि लिङ्गं भवत्येव वाष्पादिव्युदासेन तस्य च–धूमस्याग्निगततैक्ष्ण्यादिलिङ्ग[त्वं] न भवति, न दृष्टत्वात् धूमे–धूमे तस्यादृष्टत्वात् तैक्ष्ण्यादिना च सह विधिवृत्त्येति, यथा चाऽऽहेत्यादि लिङ्गिन्येवेत्यस्यावधारणस्य निरूपणम्–यदा भवति लिङ्गं तदा नालिङ्गिनि भवत्युदकादौ धूम इति, तदपि न घटते, कस्मात् ? नियमेनेत्यादि, तस्य धूमस्य सद्भावे बहुमूलत्वादिविशेषपरिच्छिन्ने तत्रैवाग्नौ नान्य- 15 त्रापोऽग्न्यादौ लिङ्गत्वम् किं कारणम् ? अग्निरत्वेत्यत्रभव्यत्वाधिकरणवाचिनो धूमवत्त्वस्य अत्रभव्य

---

अत्र 'लिङ्गे लिङ्गी भवत्येव लिङ्गिन्येवेतरत् पुनः । नियमस्य विपर्यासेऽसम्बन्धो लिङ्गलिङ्गिनोः ।' इति कारिकापूर्वार्धेऽवधारणस्य वैपरीत्ये सति नानुमानम्, लिङ्गलिङ्गिनोरसम्बन्धादिति च उत्तरार्धार्थं तं दूषयितुमाह–लिङ्गाभ्यदिति लिङ्गे लिङ्गी भवत्येवेत्यवधारणम्, न तु लिङ्गिनि लिङ्गं भवत्येवेति अग्न्यादौ [illegible] लिङ्गिन्येव लिङ्गमित्यवधारणम्, न पुनर्लिङ्ग एव लिङ्गीति लिङ्गाभावेऽप्यग्न्यादौ लिङ्गिदर्शनात् व्यभिचारादिव [illegible] वैपरीत्येऽनुमानाभाव [illegible] तत्र पुनरिति 20 भावः । परमतमुपदर्श्य तदित्थं करोति–यथाऽऽहेति लिङ्गे धूमे इति लिङ्गीनिर्भवत्येव न तु लिङ्गिन्यग्नौ सर्वत्र लिङ्गं भवत्येवोऽग्न्यादौ धूमाभावादिति परमतमदर्शनमित्याह–परमतमदर्शनमिति । लिङ्गिनि लिङ्गं भवत्येवेत्यवधारणं समर्थयति लिङ्गिनि देश इति । अग्निमद्देशसम्बन्धेन पर्वतादिना धूमेन भूयते अन्यत्रायोऽग्न्यादिस्थानादिना वा न सोऽग्निमूलो न भवति किन्तु भवन्नेव एतदग्निमद्देशे भवन्नेव धूमः पक्षधर्मो भवति नाभवन्निति धूम असिद्धत्वात्, अस्यलिङ्गाभावनिर्णयेन हि बहुमूलत्वादिविशेषणावच्छिन्नस्य धूमस्य धूमत्वविशिष्टपक्षधर्मत्वाल्लिङ्गत्वम्, न वाष्पादेरन्यथात्वात् 25 लिङ्गिनि लिङ्गं भवत्येवेत्यवधारणं युक्तम् एवेति भावः । अग्निगततैक्ष्ण्यादिविशेषा धूमस्य धर्मा न भवन्ति तैक्ष्ण्यादिना सहभावेऽपि विधिवृत्त्याऽदृष्टत्वादित्याह–तस्य चेति । लिङ्गिन्येवेतरत् पुनरिति पादार्थमाह–यथा चाऽऽहेति यदि लिङ्गिन्येव नान्यत्रेत्यवधारणमिष्यते अग्नेरग्निविशेषे प्रदेशे एव प्रमाणोपपन्नमग्निं परस्परं नियमेन भवन्त्वाग्निधूमौ देशस्यैकस्य मेदभिन्नतया तादृशतया भवतः तत्र च धूमवत्त्वं बहुमूलत्वादिविशेषणविशिष्टत्वेन, तद्वैतान्यतविनियमनिर्देशे नियतत्वात् इत्यत्र धूमो नायोऽग्न्यादौ भवति तस्य यत्सद्भावेऽग्न्यादिभ्यो धूमो भवति तं प्रत्येव तस्य लिङ्गत्वमत एतदेवमन्यत्रापि लिङ्गि- 30 न्येवाग्नौ धूमस्य लिङ्गत्वमित्याह तस्य धूमस्येति । तत्र हेतुमाह–अग्निरत्वेति अग्निविशिष्ट [illegible]

---

१ सि क्ष डा. डे भवतीत्येव । २ सि क्ष. डा. डे बहुमूल । ३ सि क्ष डा. धर्मस्यैव । ४ सि. क्ष डा डे धवत्वे ।

वाच्यैतत्सर्वैकसम्बन्धिमेवाग्नौ लिङ्गत्वात् अन्यथाऽनुमानदोषभावकोपत्वात् तस्मात् स एव तस्यैव लिङ्गमिति सिद्धम्, वस्तुतः धूमगतद्रव्यत्वाद्यन्यप्रकाशनं तत्सम्बद्धदर्शनविवेरेव तथाऽव्यभिचारात्।

किञ्च—

यथा च त्वयोच्यते लिङ्गे लिङ्गी भवत्येवेति तत्र लिङ्गे चेति लिङ्गिनियमः तथा च धूमादपि गतिवत् धूमाद्यधारणकारणविशेषसहचाराग्निविशेषः तेभ्य एव किमिति नेष्यते? यथा मधुर हरिततृणेन्धनोऽग्निः मशकनिवारणार्थं यत्र गोकुले क्रियते तत्रैवोपकविशेषो धूमस्तार्णास्वतादि विशेषानग्नेर्गमयति तथा बहलतुषावकीर्णे गृहाङ्गणगते मृत्पात्रकाराः शिल्पिनोऽग्निं कुर्वन्ति तत्रैव तौषकौपार्थि गमयतीति विशेषाणामपि लिङ्गित्वदर्शनाल्लिङ्ग एव लिङ्गिनो भावः।

( यथा चेति ) यथा च त्वयोच्यते लिङ्गे लिङ्गी भवत्येवेति तत्र लिङ्गे चेति लिङ्गिनियमस्तथा चेदं दोषजात—तेभ्य किमिति नेष्यते? धूमाद्यधारणकारणविशेषाणां शीततरमन्दप्रकाशनादिविशेषसहचरणात् धूमादग्निरिवेति तदधारणकारणविशेषसहचराग्निविशेषः कस्मान्नेष्यते? तेभ्य एव—धूमाद्यधारणकारणविशेषेभ्यः सामान्यवद्दर्शनमिति चेत्तन्नेति दर्शनमवतीत्युच्यते तद्यथा—मधुरहरितेत्यादि, यत्र दोग्धारः पुरुषा एव दोहयन्ति इतिविरहिताः गोकुले हरिततृणावकीर्णे, न चाऽऽवासे, गवां मशकनिवारणार्थं हरिततृणेन्धनोऽग्निः क्रियते, तत्रैव तदन्यकोपकविशेषो धूमः तार्णास्वतादिविशेषानग्नेर्गमयति यथा बहलेत्यादि न तेषाऽऽमितरा विशेषः तत्र[त्र]मृत्पात्रकाराः शिल्पिनस्तत्र[?] तौषकौपार्थि गमयतीति विशेषाणामपि लिङ्गित्वदर्शनात्—धूम एव लिङ्गिनः—अग्नेर्भावः, तस्मात्तदधारणनैरपेक्ष्येण लिङ्गलिङ्गिता, न च विशेषागम्यतेति।

सामान्यतोदृष्टात् प्रत्यक्षविषयधूमाधारप्रदेशसम्बन्धिन्येवाग्नौ धूमस्तस्य लिङ्गत्वमन्यथाऽनुमानदोषप्रसङ्गादिति अत्रानुमानाङ्गम् एव अग्नेः सामान्यस्य लिङ्गत्वात्, न हि प्रसिद्धं साध्यते, अग्नेरन्यदर्शनात् लिङ्गित्वं तत्र लिङ्गाभावात्, लिङ्गाभावाद्धाभावात्,

२० न हि ते लिङ्गान्ते लिङ्गदर्शनात् तेषां लिङ्गनिरपेक्षत्वमेव [illegible] धूम [illegible] सम्बन्धाभावेन लिङ्गमिति भाव । धूमस्येव [illegible] प्रकाशनं न भवति [illegible] [illegible] धर्मे [illegible], कारणस्य [illegible] तेषां [illegible] [illegible] तदपि [illegible] वस्तुतरिति । यथा लिङ्गे लिङ्गी भवत्येवेति दोषमाह—यथा चेति । यदि लिङ्गे लिङ्गिनोऽव्यभिचारादि धूमोऽग्निमवगमयेत् तर्हि न भवेत्—तत्र लिङ्गे चे

